विधमभिधाय विराड्रूपमिमाकार्यादाहारोपसंहरति यावानित्यादिना कथं एवमेव गर्भतया विद्यमानस्य विराजः सृष्टिस्तत्राह रेत इ
ति विराड्रूपमिति शब्दार्थमाह नामारयस्य सृष्टिविवक्षयो धूमिकां करोति तमेवमिति अयोग्येऽपि पुत्रभक्षणे प्रवर्तकं दर्शयन्नशनायावत्त्वादि
ति विराजो भयकारणमाह स्वाभाविकेति इंद्रियं देवतां च व्यावर्तयति वाक्कृतेति ॥ इदानीं मृत्यादिसृष्टिमुपदेष्टुं पातनिकां करोति
स इत्यादिना ईक्षणे प्रतिबंधकसद्भावं दर्शयन्नशनायावानपीति अभिदधीमन्यतेति निरुक्तोऽस्य पदस्य अभिमन्यते नास्य कः पश्चन
भिमन्यतेरित्यादिशास्त्रमत्र प्रमाणयितव्यं अन्नस्य कनीयस्त्वे कारणानीत्याशंक्याह बहूनीति यद्यपि विराजो भक्षणे कामनास्ति तथाऽ
नेक्षणे दीति तस्याज्ञात्मत्वान्मृत्यादेरकत्वाच्चेति शेषः कारणनिवृत्तौ कार्यं निवृत्तमित्यत्र दृष्टांतमाह बीजेति यथोक्तेक्षणानंतर
मिथुनीभावद्वारा त्रयीसृष्टिं प्रस्तौति स एवमिति ननु विराजः स्थावरजंगमात्मनो जगतः सृष्टेरकृतत्वात्किं शनकैस्त्वाक्षेपेण
दृष्टापरिहरति किं तदिति गायत्र्यादीनीत्यादिपदेनोष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीति छंदांस्युक्तानि केवलानां छंदसामसं।

बृ०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अग्ने॰
२६

भवानिदाहृत्वाऽऽतोऽग्रपञ्चः सामान्येनोमेत्राणां स्तुतिरत्र विवक्षितेत्याह सोऽवेति उद्गात्रादिना गीयमानमृक्षु जातं सोऽवेतदेव होत्रादिना शा।
स्यमानं शास्त्रं स्तुतमनुष्टुप्सतीति द्विरुक्तिः यज्ञगीयतेनेन चक्षुष्यत्तेः धूर्ये प्रभृतिभिश्चाध्वर्युणा तेनेत्य य यद्याह्यमित्यभिप्रेत्याह द्विपदमनपवत्रि
विधानीमृक्षु यज्ञादयो ग्राम्याः पशवो गावयादयस्त्वारण्या इति भेदः कर्मसाधनभूतानसृजतेति संबंधः समनसा वाचं मिथुनेऽसमभ।
वदित्युक्तत्वात्सांगो वत्र्याः सिद्धत्वान्न ते साः स्त्रहिंष्मिहे तेति प्रांकृते नञ्चिति व्यक्ताव्यक्तविभागेन परिहरति नेत्यादिना इति मिथुनीभावस
गे घोऽन्नपतिरिति शेषः अत्र सर्गस्यात्र सर्गश्चेति द्वयं क्रमिदानीमुपास्यस्य प्रजापतेर्गुणांतरं निर्दिशति स प्रजापतेरित्यादिना कथं।
मृत्योरदितिनामत्वं सिद्धवदुच्यते तत्राह तथा चेति अदितेः सर्वग्रासित्वं कारणत्वं वदता मे वेणा सर्वकारणस्य मृत्योरदितिनामत्वं सू
चितमिति भावः मृत्योरदितित्वविज्ञानवतोऽवांतरफलमाह सर्वस्येति सर्वात्मनेति कुतो विशेष्यते न चाद्रान्यथेति सर्वरूपेणावस्था
नाभावे सर्वान्नभक्षणस्याशक्यत्वादित्यर्थः विरोधमेव साधयति नहीति फलस्योपासनाधीनत्वात्प्रजापतिमदितिनामानमात्मत्वे
नध्यायन्ध्येयात्माभूत्वा तद्रूपत्वमापन्नः सर्वस्यान्नस्यादित्यर्थः अन्नं अन्नमेवास्य सदा न कदाचिदत्तदस्यान्न भवतीति वक्तुमनंतर वा
क्यमादत्ते सर्वमिति अत एवेत्यक्तं व्यक्तीकरोति ॥ सर्वात्मनो हीति ॥ उपास्तिविधेः सफलेऽस्मिन्समाप्ते रेव ब्राह्मणस्योचितं किञ्चन।
ग्रंथेनेत्याशंक्य प्रतीकमादाय तात्पर्यमाह सोऽकामयतेत्यादिना तदेवाश्वमेधस्याश्वमेधत्वमित्येतदत्ते वाक्यसिद्धमानिर्दिश्यते भूयो
दक्षिणावत्वादश्वमेधस्य भूयस्त्वं इति शाङ्घ्रोऽकामयतेत्यनेन संबध्यते कथं तत्तेन वद्व्यामाणस्य प्रजापतेर्भूयः शाङ्घ्रो किं नेदि सहस्वेमश्वमे

२६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धमत्वं तिष्ठतु कर्मानधिकारित्वात्तत्राह जन्मांतरेति तदेव स्पष्टयति स प्रजापतिरिति अथातीते जन्मनि यजमानोऽश्वमेधस्य कर्त्ताभूदय्य
ना हिरण्यगर्भो भूयो यजेयेत्याह तथा च कर्त्तभेदात्कथं प्राक्तनमेवं जन्मनस्तत्राह स तद्भावेति स प्रजापतिरश्वमेधवासनाविशिष्टो ज्ञा
नकर्मफलत्वेन कल्पादौ निर्वृत्तो भूयो यजेयेत्याह कर्त्तभोक्त्रोरेकत्वेन साधकफलावस्थयोर्यजमानस्तत्रयोर्भेदाभावादित्यर्थः प्रजाप
तिरीश्वरो नतस्य दुःखात्मकं फलत्वं तुष्ठानेनाप्युक्तेत्याशंक्य प्रकृतिवशात्तदुपपत्तिमभिप्रेत्याह सोऽश्वमेधेति कथमेतावतापि विवक्षित
तास्तुतिः सिद्धेत्याशंक्याह देवमिति अश्वमकार्यमाह स तपइति वह्न्यादीनां यशस्त्वहेतुमाह यशोहेतुत्वादिति तदेव साधयति तेषु हीति
प्राणा एवेति तथाशाहार्थः सत्स्विति तेषु शरीरे बलं भवतीति एवं चेदेव हे हकृत्येयः उत्क्रमय्येन्यतिरेकद्वारा स्फारयति नहीति प्राणानां
यशस्त्वं वीर्यत्वं चोपसंहृत्य वाकार्य्यं निगमयति तदेवमिति प्राणानां यशस्त्वं वीर्यत्वं चोपसंहृत्य वाकार्य्यं निगमयति तदेवमिति तस्या
लोऽश्विन्यादिव्याचष्टे तदेवमित्यादिना शरीरान्निर्गतस्य प्रजापतेः शुक्लत्वमाशंक्याह तस्येति ः सम्यक्कृतानाभावादासतोऽसत्यपि तत्पुनः
तस्मिन्प्रवेशो युक्तः परित्यक्तपरिग्रहाद्योगादिति शंकते स तस्मिन्निति अज्ञानवशात्परित्यक्तपरिग्रहोऽपि संभवतीत्याह उच्यतइति
स्वीतदेहस्य कामनायुक्तेति शंकते कथमिति सामर्थ्यातिशयात्शरीरस्यापि प्रजापतेस्तदुपपत्तिरिति मन्वानो ब्रूते मेध्यमिति काम
नाफलमाह इति प्रविवेशेति तथापि कथं प्रकृतनिरुक्तिसिद्धिरित्याशंक्याह यस्मादिति यद्वक्ष्यते यस्मादित्यादि त्यात्मनो देहस्याश्वत्वे
पि कथं प्रजापतेस्तथात्वमित्याशंक्य तन्मादात्म्यादित्याह ततइति अश्वस्य प्रजापतित्वेन स्तुतत्वात्तस्योपास्यत्वं फलतीति भावः तथा
म

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्राने
१७

पिकं यमश्वमेधनामनिर्वचनमित्याशंक्याह यस्माद्वेति कृतोस्तदात्मकस्य प्रजापतेरितियावत् देहो हि प्राणवियोगादश्वयत्पुनस्तस्मिन्नेव
ध्यान्मेधार्होऽभूत्ततः सोऽश्वमेधस्तन्नामाद्धात्मात् प्रजापतिरपितद्येत्यर्थः नतु प्रजापतित्वेनाश्वमेधस्य स्तुतिर्नोपयोगिनी अग्रेस्तु उपास्यत्वे
न प्रस्तुतत्वात् कृतउपासनाभावादृत आह क्रियेति नन्वक्रतुत्वेनास्याश्वमेधक्रतुत्वात्मनस्याग्रेहकरीत्यास्तु तत्वान्नउपास्तेश्च प्रागेवा
कृत्वा देव इव वा अश्वमेधमित्यादिवाक्येनोपयुज्यते तत्राह कर्तनिर्वर्तकस्येति उक्तं च चित्यस्याग्नेः तस्य प्राची दिगित्यादिना प्रजापतित्व
मिति शेषः अश्वोपासनमग्न्युपासनं चैकमेवेति वक्तुमन्त्रवाक्यमित्याह तस्यैवेति यएवमेतद्विदितेरहितित्वं वेदेत्यादौ प्रागेव विहित
मुपासने किं पुनरारंभेणेत्याशंक्याह एवं वेति यद्यपि विधिरहितत्वं वेदेति श्रुतिस्तथापि सगुणोपास्तिविधिर्न प्रधानविधिः अयं तु
प्रधानविधिरुपास्तिप्रकरणत्वादपेक्ष्यते अतोऽश्वमेधं वेदेति प्रधानविधिरिति भावः तात्पर्यमुक्त्वा वाक्यमादायाक्षराणि व्याकरोति
एष इति यथोक्तमित्यश्वमयत्वं प्रजापतित्वमनुकृष्यते तेन मनवउक्तेत्यादिप्रदर्श्यमानविशेषणे विधिरत्रस्पष्टो न भवतीत्याशंक्याह
तस्मादिति अश्वमेधो विशेषणत्वेन संबध्यते एवं शाखान्तरसिद्धार्थत्वं भातीत्युक्तो विधिरित्याह कथमिति एष वा अश्वमेधं वेदेत्यादौ विव
क्षितस्य विधेर्भूमिकां करोति तद्वेत्यादिना उपास्तिविधिप्रस्तावः समग्रमर्थः कथं वपशुविषये दर्शनं तद्दर्शयति तद्येति एवमनेनत्वा
केप्यद्वेन सतीतियावत् अथ विवक्षितविधिमभिदधाति यस्माद्वेति प्रजापतिरित्यं फलावस्थायामन्यत्रैव किं प्रमाणमित्याशं
क्यं प्रतितत्कार्यं ध्वनाद्य प्रजापतत्यानि चेष्टा दृष्टिरित्याह तदेवेति सोऽहि तेन मेध्यसंस्कृतेन पशुमिति यावत् फलावस्थप्रजापति

१७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वदित्येवं पाठार्थः उपासनविधिरुक्तः संप्रतिप्रतीकमादाय तान्यर्थमाहैष इति द्विविधो हि क्रतुः कल्पितपत्रे तेनेको बाह्यतन्तेह तकस्य
मचहि प्रकारोपि फलत्वेनास्थितः सवितेनेति उपास्तिफलेवक्तमेतदाक्रमित्यर्थः विशेषोक्तेर्विनानास्ति तु भुक्तोपयोगो नितिरित्याह कोसा
विति क्रतुफलात्मकः सविता मंडले देवता वेति संदेहे हिली घंटरीत्वात तस्यैत्यादिना चेष्टे तस्येति आदित्योदयास्तमयाभ्यामहोरात्रादि
द्वारा संवत्सरव्यवस्थानात् त्रिमात् तत्स्य पुंकेन मादात्म्यमित्यर्थः क्रतोश्चादित्यत्वमुक्तात्तरंगस्याग्रे स्तहृक्तमथ पाग्निरकं इतिवाक्यं तस्या
श्रीमाह तस्यैवेति नन्वपूर्वोक्तस्यैवाग्नेरादित्यत्वं कुतो नियम्यते नत्वग्निसत्योग्निरन्यस्त्वाग्निरादित्यः किं न स्यादित्याशंक्याह तस्यचेति तथापिक
थं तस्यैवादित्यत्वं तत्राह तथा चेति तस्य प्राचीत्यादिना लोकात्मत्वं चित्याग्ने रुक्तं तदिदानीं धूनेत स्मात्तस्यैवादित्यत्वमिष्टमित्यर्थः अग्न्या
दित्यभेदस्य लोकवेदसिद्धत्वाद्वा तयोरेकेन क्रतुना तादात्म्यमित्याशंक्याह ताविति यथा विशेषितत्वमादित्य इपत्वं कुतस्तस्य चार्कस्य क्र
तरूपेण साधनत्वेन भेदादित्याशंक्योपचारादित्याह क्रियात्मक इति तथापि कथमादित्यस्य क्रतुना तादात्म्योक्तिरित्याशंक्याह क्रतुसाध्य
त्वादिति नन्वादित्यस्य क्रतुफलत्वेन हेतोरग्नेस्तादात्म्यायोगात् पुक्तमग्नेरादित्यत्वमित्याशंक्याह ताविति क्रतुफलत्वान्न तादात्म्यं विनात
द्धेतुत्वमित्याग्निरंतु क्रविभागात्तत्वमित्यादिनोपासनादिस्थापारेसमनावेकैकव प्रमाणाभावादेवतेति तयोरैक्योक्तिरित्यर्थः एकैकेवत्वे कथमुक्तयो
रग्न्यादित्ययोरन्यतरपरिशेषेशंकृतेकासेति कथं हृ थयोरैकत्वमेकत्वे वा कथं द्वित्वं तत्राह सर्वं समयीति उक्तेर्थे वाक्योपक्रमसमनुकूलयति तथा
चेति साधुनतिस्मदेरथं निगमयति साधुनविति नन्वफलकथनार्थं उपक्रमस्यामाणान्नतास्मादित्ययोरेकत्वं वदता प्रक्रांतं प्रमस्तमिति तेनत्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ॰ने॰
१८

द्र यः श्रुनरिति एकत्वमभिव्रत्वे ॥ इति तृतीयस्य द्वितीयं ब्राह्मणम् २ ॥ ब्राह्मणोऽन्तरमव[illegible]त्वार्थत्वस्य पूर्वेण संबंधाप्रतीतेर्नैसोऽस्तीत्या
क्षिपति द्वयादेतस्येति विवक्षितं संबंधं वक्तुं वृत्तं कीर्तयति कर्मणामिति साकाङ्क्षासापरागतिरिति वृत्तं तेरूक्तापराणि निर्वृक्तिरित्याशंक्या
द्र स्वल्पान्नभावइति अश्वमेधोपासनस्य माश्वमेधस्य केवलस्य वा फलमुक्तं नोपास्यंतराणां कर्मान्तराणां वेत्याशंक्याश्वमेधफलोक्त्या
पास्यंतराणां केवलेभ्य उक्तिलानां च फलमुपलक्षितमित्याहाश्वमेधेति ऊर्ध्वमनन्तरब्राह्मणस्य तात्पर्यमाहाथेति ज्ञानयुक्तानां कर्म
णां संसारफलत्वप्रदर्शनानन्तरमिति यावत् ज्ञानकर्मणोरुद्भावकस्य प्राणस्य स्वरूपं निरूपयितुं ब्राह्मणमित्युत्थाप्यैतस्यापकत्वसंब
धमुक्त्वाक्षिपति नन्विति मृत्युमतिक्रांतो दीप्यतइति मृत्यावतिक्रमणस्य वक्ष्यमाणत्वात् ज्ञानकर्मफलत्वात्पूर्वत्र वर्तनभावस्य तत्फल
स्योक्तत्वादुभयस्यापि फलस्य भेदात्पूर्वोत्तरयोर्ज्ञानकर्मणोर्विषयशुद्धिर्नोहेरुपभेदात्पूर्वोक्तयोस्तयोरुद्भावकारणप्रकाशनार्थं ब्रा
ह्मणमित्यर्थः पूर्वोत्तरज्ञानकर्मफलभेदाभावादेकविषयत्वात्तदुद्भावकप्रकाशनार्थं ब्राह्मणं युक्तमिति परिहरति नायमिति वा
क्यशेषविरोधं शंकित्वा दूषयति नन्वित्यादिना स्वाभाविकः प्राणस्तानाधेयो योऽयं पाप्मा विषयासंगरूपः स मृत्युस्तस्यातिक्रमणं वाक्य
शेषे कथ्यते न हि हिरण्यगर्भोऽप्यमृत्योरतः पूर्वोक्तं ज्ञानकर्मभ्यां तत्स्यविषयत्वमेवोत्तरज्ञानकर्मणोरित्यर्थः ज्ञानकर्मणोरुद्भाव
कत्वं वक्तुं ब्राह्मणमारभ्यतामाख्यायिका तु किमर्थेत्याशंक्य तस्यास्तात्पर्यमाह कोसाविति कथं यथोक्तो ब्राह्मणाख्यायिकयोरर्थः
पाक्तोसार्तमित्याकांक्षायां तन्निहित्याहरणाव्याकरोति कथमित्यादिना पातार्थमेव स्फुटयति वर्तमानेति प्रजापतिशब्दोऽभविष्यदि

१८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मायजमानं गोचरयतीत्याह तमेति इंद्रादयो देवा विरोचनादयश्च असुरा इति शंकां वारयति तस्मै वेति यजमानेषु प्राणेषु देवत्वमसुरत्वं
च विरुद्धं न सिध्यतीति शंकां केनेत्यमिति तेषु तदुभयोपाधिकं साधयन्नस्त्युत्तरं इति शास्त्रीयेन पेदयोज्ञान कर्मणोरित्यादि कमाह प्रसमेतीति संगति
धानान्निधानामध्यात्मप्रमाणदृष्ट्योक्तिः स्वेष्टेवाम्नुष्ठरमणानामात्मभावितत्तरत्यादिवाक्यदृष्टं व्याचष्टे यस्मादिति देवानामल्पत्वं प्रपंच
यति शास्त्रजनितेति अत्रासुराणां बाहुल्यमिति विशेषः तदेव साधयति स्पर्धेतेति उभयेषां देवासुराणां मिथः संघर्षं दर्शयति तेदेवा इत्ये
ति कथं च स्मारीतेन स्या वर्गानां तानं भोगाध्यानानां स्पर्धाति निमित्तत्वमित्यापूर्वकालत्वे पादस्त्रीयेत तरत्तान कर्मसाध्यत्वान्नयोश्च देवासुरज
याधीत्वान्तस्य च स्पर्द्धा पूर्वकत्वान्तरं परयालोकानां तत्र निमित्तत्वमित्याभिप्रेत्य विशिनष्टि स्वाभाविकेति का पुनरेषां स्पर्द्धानामेत्या
शंक्याह देवानां चेति नामेव फलं विवृणोति कदाचिदित्यादिना अधिकृतैरसुरपराजये देवजये च प्रयतितव्यमित्यनुस्यहुस्यान्यफ
लमाह एवमिति आकांक्षापूर्वकमनंतरवाक्यमादाय व्याकरोति यदेत्यादिना योयं युष्मद्योग्यो नामकर्माणीभूतः पदार्थस्तत्कर्तृः प्रा
णस्यस्वरूप प्राणस्य उपाणमेव कथं सिध्यतीत्याशंक्याह विशेषेणेति किं तत्कर्म किं वा ज्ञानं तत्राह कर्मेति तावेतान्यसतो मासद्गमयेत्या
दीनि जप्यं विजपतीति विधिस्थमानमिति योजना हृदयादेत्यादिनस्तानुनिरूपणपरे जपविधिशेषत्वेनार्थवादत्वान्तत्कृतां च ज्ञान
स्य निरूपणमाणत्वमित्याशंक्य तदिति आभिमुख्येनारोहति देवभावमनेनेत्यभ्यारोहो मंत्रजपस्तद्विधिशेषार्थवादे हृदयादेत्यादि
वाक्यमित्यर्थः उपास्तिविधिश्च वर्णनान्तरं वाक्यं न जपविधिशेष इति हृदयति नेति माभूज्जपविधिशेषत्वस्यापूर्वत्वेरित्वा ज्ञानस्य

न
स

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं॰
१९

कर्मणः सन्निधाने पुरातनकल्पनाप्रकारस्यादृयात्रेत्यादिनाश्रवणाद्विधिशेषोर्थवादोयमिति शंकते उद्गीथेति नेदं वाक्यं ज्ञानं वोद्
गीथविधिशेषः तत्प्रकरणस्थत्वाभावेन संनिध्यभावादिति हृदयति नाप्रकरणादिति उद्गीथस्तान्हिंक विधीयते न त्वेतत्त्वविहितमं
गं भवति तत्राह उद्गीथस्य चेति प्रत्यग्रेति कर्मकांडोक्तिः अध्याहायेदित्युद्गीथविधिरपीह प्रतीयते तत्कथं संनिधिरपोद्यते तत्राह विद्येति
उद्गीथविधिरिह प्रतीयमानः प्राणस्योद्गातृदृष्ट्योपासनविधिरन्यथाप्रकरणविरोधादित्यर्थः जपविधिशेषत्वमुद्गीथविधिशेषत्वं
वाज्ञानस्य नास्तीत्युक्तमिदानीं जपविधिशेषत्वाभावे युक्त्यंतरमाहाभ्यारोहेति अनित्यत्वेसाधयत्येवंविदिति प्राणविज्ञानवतानु
ष्ठेयो जपो न तद्धि ज्ञानात्प्रागस्ति तत्रासौ पश्चाद्भावी प्रागेव सिद्धं विज्ञानं प्रयोजयतीत्यर्थः तस्यापि प्राचीनत्वं कथमित्याशंक्याह विज्ञा
नस्य चेति य एवं विद्वान्पौर्णमासीं यजत इति वद् एवं वेदेति विज्ञानं क्रत्वं न हि प्रयाजादिपौर्णमासीप्रयोजकं तस्याप्येवंतत्प्रयोजकत्वा
त्तथा प्राणविद्याप्रयोज्यो जपो न विज्ञानप्रयोजकस्तस्य प्रयोजकत्वेनाप्येवमसिद्धेरावश्यकत्वादित्यर्थः फलवत्त्वाच्च प्राणविज्ञानं स्वतं
त्रं विधित्सितमित्याह तद्धेति प्राणोपास्तेर्विवक्षितत्वे हेत्वंतरमाह प्राणस्येति यद्धि स्तूयते तद्विधीयत इति न्यायमाश्रित्योक्तमेव प्रपंच
यति नहीति इतश्च प्राणोपास्तिरत्र विधित्सितेत्याह सत्यमिति "फलवचनं प्राणस्योपास्यत्वेनोपपद्यत इति संबंधः "उक्तमेव व्यनक्ति
प्राणेति स्वस्मैहरणानंतरं वागादीनां घटस्यादित्वफलेन तदृष्यात्मपरिच्छेदादित्वोपासितुराधिदैविकप्राणस्वरूपापत्तेरुपपद्यते तस्मा
द्विधित्सितैवात्र प्राणोपास्तिरित्यर्थः उक्तन्यायेन प्राणोपास्तिमुपेत्य प्राणदेवतां शुद्ध्यादिगुणवतीमादिपति भवतीति यथा प्राणस्यां

१९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पास्तिः शास्त्रस्य दृष्टत्वादिहानत्वाख्यगुणसंबंधः कृतत्वादेष्टव्य उपास्त्यानुपास्ये च गुणवत्तिः प्रामाणिकप्रामेरु विशेषादिति सि
द्धांतीकृते नन्विति प्राणस्योपास्यत्वे विशुद्ध्यादिगुणवादस्यानर्थत्वे नार्थवादत्वसंभवान्न यथोक्तादेवतास्यादिति शंकावाद्यमाह न
स्यादिति शुद्ध्यादिगुणवादस्यार्थवादस्यार्थवादत्वेपि नाभूतार्थवादत्वमिति परिहरति नेति विशुद्ध्यादिगुणविशिष्टप्राणदृष्टेरपि फल
प्राप्तिः कृतांसां नत्वानस्य मिथ्यार्थत्वे शुक्तासम्यक्ज्ञानादेव शुभ्योमेः संभवादतः स्तुतिरपि यथार्थैवेत्यर्थः लोकदृष्टांतं व्याचष्टे यो
ऽहीति इदेति वेदाख्यदार्ष्टान्तिकोक्तिः ननु विशुद्ध्यादिगुणवत्त्वैवंतावदिति वाक्यानुपासनाविद्ध्यर्थत्वान्न स्वार्थे प्रामाण्यप्रतिपद्य
तेतत्राह नचेति अन्यपराणामपि वाक्यानां मानांतरसंवादविसंवादयोरसतोः स्वार्थे प्रामाण्यमनुभवानुसारिभिरेष्टव्यमित्यर्थः ननु
प्राणस्य विशुद्ध्यादिवादो नस्वार्थे मानमन्यपरत्वाद्दादित्ययूपादिवाक्यवदत आह नचेति आदित्ययूपादिवाक्यार्थज्ञानस्य प्रत्यक्षादि
नापवादवद्विशुद्ध्यादिगुणविज्ञानस्य नापवादः कृतस्तस्माद्विशुद्ध्यादिवादस्य स्वार्थे मानत्वं प्रत्यक्षमित्यर्थः विशुद्ध्यादिगुणक
प्राणविज्ञानात्फलश्रवणान्नहादस्य यथार्थत्वमेवेत्युपसंहरति ततइति लोकवद्वेदेपि सम्यक्ज्ञानादिष्टप्राप्तिरनिष्टपरिहारश्चेत्यन्व
यमुखेनोक्तमर्थं व्यतिरेकमुखेनापि समर्थयते विपर्यये चेत्यादिना शास्त्रस्यानर्थत्वमिष्टमिति शंकां निराचष्टे नचेति अपौरुषेयस्या
संभावितसर्वदोषस्य शोधकत्वादेर्हेतोः शास्त्रस्यानर्थत्वमेष्टव्यमशक्यमित्यर्थः शास्त्रस्य यथाभूतार्थत्वे निगमयति तस्मादवि
ति नदेवस्कृदयति स्मरमिति सर्वस्याणि ब्रह्मदृष्टिरनसिंस्तद्बुद्धित्वान्मिथ्याधीः साच यावद्भोगतमिथ्यादिमूर्त्यात्फलवती तत्तः शा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रानं·
२०

स्वाद्यर्थार्थप्रतिपन्नेरेव फलमित्युक्तमित्यर्थः भेदाग्रहस्यैवैकोन्यस्यान्यात्मतावभासो मिथ्याज्ञानमसत्त्वभेदेभासमानेन्यज्ञान्यदृष्टिर्वि-
धीयते यथा विष्णोर्भेदे प्रतिमायां गृह्यमाणे तत्र विष्णुदृष्टिः क्रियते तत्त्वेदं मिथ्याज्ञानमित्याह नेति नञर्थं स्पष्टयति नामादाविति प्रथम
र्वके हेतुमाचष्टे कस्मादिति प्रतिमायां विष्णुदृष्टिमत्यालंबनत्वमेव न विष्णुतादात्म्यं नामादेस्तु ब्रह्मतादात्म्यमुक्तमिति वैषम्यमाशंक्या-
हालंबनत्वेनेति उक्तमर्थं वैधर्म्यदृष्टांतेन स्पष्टयति यथेति कर्ममीमांसको ब्रह्मविदेवं प्रकटयन्नवतिष्ठते ब्रह्मेति केवलात् दृष्टिरे-
वेनाग्निचोद्यते चोदनावशाच्च फलं भवत्यतिब्रह्मत्वं नास्ति मानाभावादित्यर्थः यथा यथा देवानां प्रतिमादिरूपास्यमानानामन्यत्र सत्त्वे
यथा च वस्त्राद्यात्मनो पित्रादीनां ब्राह्मणादिदेहे तदुपमाणानामन्यत्र सत्त्वं तथा ब्रह्मणोपि नामादावुपास्यत्वादन्यत्र सत्त्वमविष्यतीत्या-
शंक्याह तेनेति नामादौ ब्रह्मदर्शनेनेति यावत् दृष्टांतासिद्धेर्नक्वापि ब्रह्मास्तीति भावः सत्यज्ञानादिलक्षणं ब्रह्म नास्तीत्युक्ते सदेव
सोम्येदमित्यादिश्रुतेरित्याह नेत्यादि किं च ब्रह्मदृष्टिः सत्यार्थाशास्त्रीयदृष्टित्वादियमेवगार्गिसामेति दृष्टिवदित्याह श्रुत्यादिविहि-
तदेव स्पष्टयति विद्यमानेति नामिदृष्टिभिः सामान्यदृष्टित्वं तस्मादिति यावत् यत्तदृष्टांतसिद्धिरिति तत्राहतेनेति ब्रह्मदृष्टेः सत्यार्थ-
त्ववचनेनेति यावत् ब्रह्मास्तित्वे हेत्वंतरमाह श्रुत्यापेक्षत्वादिति उक्तमेव विवृणोति पंचेति पंचाग्नयो हि पुरुषपर्जन्यपृथिवीपुरुषयोषि-
तः श्रादिपदं वा मेत्यादि यहार्थं न नु वेदांतवेद्यं ब्रह्मेच्छते न च तेभ्यस्त हीः सिद्ध्यति तेषां विधिशेषत्वेन प्रामाण्यात् तत्रोक्तं ब्रह्मसिद्धिर
त्याह क्रियार्थैश्चेति विमतं स्वार्थे प्रमाणं अज्ञातज्ञापकत्वात् संमतवदतो वेदांतशास्त्रादेव ब्रह्मसिद्धिरित्यर्थः सिद्धसाध्यार्थभेदे

२०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न वैषम्यात् विशिष्टत्वमनिष्टमित्याशंक्योक्तं विशृणोति यथा चेति विशिष्टत्वं स्वरूपोपकारित्वं फलोपकारित्वं च पंचमोक्तं प्रका
म्र रं परा ष्टमेवमित्यादिष्टं ग्रन्थेनाक्तिकत्वं साधयति प्रत्यक्षादीति किंच वेदानां नाम प्रामाण्यं बुद्ध्युत्पन्नेर्वा संशयाद्युत्पत्तेर्वा नाद्य इत्याह
न चेति न हि तीय इत्याह न चानिश्चितेति कोटिद्वयास्पर्शित्वाद्बाधाच्चेत्यर्थः क्रियार्थैर्वाक्यैर्विध्यर्थानां वाक्यानां साधर्म्यं प्रक्रमादि
पन्यनुष्ठेयेति साधर्म्यस्याप्रक्रान्तत्वमेव व्यनक्ति क्रियार्थैरिति वाक्यान्यबुद्धेर्यथार्थत्वाद्धि तद्भावेपि वाक्यप्रामाण्यमज्ञातज्ञापकत्वेनावि
रुद्धमिति परिहरति न तावदिति ग्रन्थेयनिष्ठत्वमंतरेणाकृतेोवस्तुनि प्रयोगाप्रत्यये पोस्तु यथार्थत्वमित्याशंक्य न वेर्विषयतयार्थत्वान्न दुप
हास्य प्रामाण्यार्थं वेति विकल्प्याद्यं दूषयति न हीति तद्भयविषयस्याकर्तव्यार्थस्य तथात्वेन कर्तव्यत्वापत्तेः किं त्वमानगम्यत्वाद्न्यथा विप्र
लंभकविधिवाक्योपि तथात्वापत्तेरित्यर्थः द्वितीयं प्रत्याह न चेति बुद्धिपरत्वेन प्रयोगोपलक्षणार्थं कर्तव्यार्थविषयप्रयोगादेर्ननुष्ठेयविष
यत्वात्मानत्वे किं तु प्रमाकरणत्वात् जन्यत्वाच्चान्ययोः प्रकृतिमक्तिताद्वस्थ्यात् तेनानुष्ठेयनिष्ठत्वमानत्वे नुपयुक्तमित्यर्थः कृतस्तर्हि कार्या
कार्यधियावित्याशंक्याह वेदेति वैदिकस्यार्थस्याबाधेन यथार्थत्वे सिद्धे समीहितसाधनत्वविशिष्टं चेद्वस्तु तदा कर्तव्यमिति धियानुतिष्ठ
ति तद्वेदनिष्टसाधनत्वविशिष्टं तदा न कार्यमिति धिया नानुतिष्ठत्यतो मानान्तस्यानुष्ठानानुष्ठाने हेतुः कार्याकार्यधियावित्यर्थः तथापि
ब्रह्मणो वाक्यार्थत्वं पदार्थत्वं वा नाद्य इत्याह अननुष्ठेयत्व इति तस्याकार्यत्वेपि वाक्यार्थत्वे किं तस्यादित्याशंक्याह न हीति उभयत्रापि सती
ति हेतुः द्वितीयं दूषयति पदार्थत्वे चेति ब्रह्मणः प्रामाण्यार्थत्वमेन दिग्ध्वानैकार्थ्यस्य हेत्वे वाक्यप्रामाण्यहेतुनाने न साधयति तस्यादिना सु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्राने॰
२१

क्तृकस्य लोपादितमिष्टलक्षणो वर्णश्च तदुभये तद्विशिष्टो मे रस्तीत्यादिप्रयोगे मेवोदाव कार्येपि समयकृधीदर्शनान्नवत्वमसिद्धवाक्यादिकार्यो
ष्टोष्टव्यमिति सम्यक्कृत्तान सिद्धिरित्यर्थः दृष्टांतेपि कार्यधीरेव वाक्याद्रुदेतीत्याशंक्याह नचेति नत्वतत्क्रिया पदार्थानां परस्परं हेतिर्द्धुक्तावे
दांतेषु पुनस्तदभावात्पदसंहत्यायोगात् कुतो वाक्यप्रमाणकत्वं ब्रह्मणः संभवतीत्यत आह नचेति विमतं प्रफले सिद्धार्थज्ञानत्वात्सम्मतवदि
त्यनुमानात्तत्वादेः सिद्धार्थस्यापुरुषार्थमानत्वमिति शंकते मैवमिति श्रुतिविरोधेनानुमानेऽनुनीतेनेत्यादिना विद्वदनुभवविरोधाच्चनेवमि
त्याह संसारेति फलश्रुतेरर्थवादत्वेनामानत्वादनुमानाबाधकतेत्याशंक्याह नेत्येति प्रणीतमयीत्वाधिकरणन्यायेन सिद्धाफलश्रुतेरर्थवा
दत्वशंकेत्यर्थः यत्र विधेयो नयुशेषत्वप्रापकाभावात्फलश्रुतेरर्थवादत्वासिद्धिर्यथा शरीरकानारंभः स्यादित्यर्थः श्रुत्यनुभवाभ्यां वाक्यात्
तात्त्वस्य फलवत्वदृष्टेर्युक्ताकार्यस्यैव शेषत्वात्तत्वमस्यादेर्मानत्वेत्यत्र मुक्तं सेप्रतिपन्नस्य कार्यपरत्वानियमे हेत्वंतरमाह प्रतिषिद्धेति यद्यपि
कलंजभक्षणादेरर्थः पानस्य च संबंधो न कलंजं भक्षयेदित्यादि वाक्यात्प्रतीयते तथापि तस्यानुष्ठेयत्वाद्वाक्यस्यानुष्ठेयविषयत्वासिद्धिरित्या
शंक्याह नचेति तस्यापि कार्यार्थत्वे विधिनिषेधभेदभंगान्नञ्सूत्रसंबंध्यभावबोधनेशुल्कस्यार्थात्वेदृष्टौ लक्षणापत्तिर्निषिद्धविषयेरागा
दिना प्रवृत्तक्रियावतो निषेधशास्त्रार्थधीसंस्कृतस्य निषेधश्रुतेरकरणात्मकक्रियानिवृत्त्यपलक्षितताटौदासीन्यादन्यदनुष्ठेयं न प्रतिभा
तीत्यर्थः भावविषयैकत्वेक्यत्वे विधीनामर्थो भावविषयत्वे निषेधानामिति विशेषमाशंक्याह कर्त्तव्यतेति प्रभावस्य भावार्थत्वाभावात्क २१
र्त्तव्यताविषयत्वासिद्धिरिति निर्देशाद्वार्थः प्रतिषेधज्ञानवतोपि कलंजभक्षणादित्वनवदर्शनान्नत्विद्दृनेर्दियोगाधीनत्वान्निषेधमेव वाक्यमेष

संबंधस्याभावार्थतान्नानुष्ठेयतेत्यर्थः अभक्षणादिकार्यमिति विधिपरत्वमेव निषेधवाक्यस्य किं न स्यादित्याशंक्याह नचेति ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वमिति चेन्नेत्याह न्यायान्तरस्येति विषलिप्तबाणहतस्य पशोर्मांसं कलंजं तद्भक्षणवधाद्यभिशापयुक्तस्यान्नपानादि तस्मिन्न भक्ष्ये ग्राह्येऽप्यव
श्यमेयद्रूमज्ञाने त्वन्यन्नामस्यान्त्यन्नेतन्निषेधधीसंस्कृतस्य तद्धीस्तत्याबाध्यमित्यत्र लौकिकं दृष्टान्तमाह मृगतृष्णिकायामिति तथापि प्रवृ
त्त्यभावसिद्धये विधिरर्थ्यतामिति चेन्नेत्याह तस्मिन्निति तदभावः प्रवृत्त्यभावो न विधिजन्यप्रयत्नसाध्योऽनिमित्ताभावेनैव सिद्धेरित्यर्थः
दृष्टान्तमुपसंहरति तस्मादिति दार्ष्टान्तिकमाह तथेति न केवलं तत्त्वमस्यादिवाक्यानां सिद्धवस्तुमात्रपर्यवसानता किं तु सर्वकर्मनिव
र्तकत्वमपि सिध्यतीत्याह तथेति प्रकृतेर्भोक्तृत्वस्याहमिति ज्ञानसंस्कृतस्य प्रवृत्तीनामभावः स्यादिति संबन्धः तस्माद्ब्रह्मभावाद्विपरी
तार्थो यस्य कर्तृत्वादिज्ञानस्य तन्निमित्तानामनर्थार्थत्वेन ज्ञायमानत्वादितिरेतः कर्तृत्वज्ञानस्याभावः स्यादत आह परमात्मात्मीति
भेति प्रामाण्यमत्र त्यागादिविरामेन निवृत्तिनिष्ठतया निषेधवाक्यमानत्वे तत्त्वमादेरपि प्रत्यगात्मनोऽकर्तृत्वादिनिवर्तकत्वेन मानत्वोपप
त्तिरिति समुदायार्थः दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाशंकते नन्विति तस्य निषिद्धत्वादनर्थार्थत्वमेव वस्तुयाथात्म्यं तत्त्वज्ञानेन निषेधे कृते
तत्संस्कारद्वारा संपादितस्य तस्यापात्रीयज्ञानविपरीतज्ञाने बाधिते तत्कार्यप्रवृत्त्यभावो निमित्ताभावेनैमित्तिकाभावन्यायेन युक्तो न त
थाग्निहोत्रादिप्रवृत्त्यभावो युक्तो ब्रह्मविदाग्निहोत्रादि न कर्तव्यमिति निषेधानुपलंभादित्यर्थः तत्त्वमस्यादिवाक्येनार्थान्निषिद्धमग्निहो
त्रादीति मत्वा न साम्यमाह नेत्यादिना शास्त्रीयप्रवृत्तीनां गर्भेवासादिहेतुत्वादनर्थार्थत्वे अहंकर्तृत्वाद्यभिमानकृतत्वेन विपरीतज्ञान
निमित्तत्वे दृष्टान्तावष्टंभेन प्रपंचयति कलंजेति काम्यानामज्ञानहेतुत्वानर्थार्थत्वाभ्यां विरुद्धत्वे तु प्रवृत्त्यभावो युक्तो नित्यानां तु शा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्वमात्रप्रयुक्तानुष्ठानत्वाज्ज्ञातानकृतत्वंप्रत्यवायाख्यानर्थध्वंसित्वाच्चनानर्थकरत्वंअतस्तेषुप्रवृत्त्यभावोयुक्तोनभवतीतिशंकते नन्विति
नित्यानांपुनःस्वमात्रकृतानुष्ठानत्वमसिद्धमितिपरिहरति नेत्यादिना तदेवप्रपंचयति यथेति अविद्यादीत्यादिग्रहेनास्मितादिक्लेशाचतद्धेयो॰
क्तिः तैरविद्यादिभिर्क्लिन्नेषुमनःसौनाद्दगानिषुप्राप्तौचक्रमेणरागद्वेषवतः पुरुषस्येष्टप्राप्तिमनिष्टपरिहारंचवां॰ लत्ताभ्यामेवरागद्वेषाभ्यामि
ष्टंमेभूयादनिष्टंमाभूदित्यविशेषकामनाभिप्रेरितानिविशेषपुरुषप्रयुक्तस्यनित्यानिविधीयंते स्वर्गकामःपशुकामइतिविशेषार्थिनःकाम्यानि॰
तस्यतस्मयेषांकेवलपुरुषात्मानिमित्तत्वमित्यर्थः किंचकाम्यानांदुष्टत्वेध्रुवतानित्यानामपितद्दिष्टमुक्त्यतिविनियोगप्रयोगाधिकारविधिदृपे॰
विशेषाभावादित्याह नचेति कथंतर्हिकाम्यनित्यविभागस्तत्राह कर्तृगतेनेति स्वर्गकामःपशुकामइतिविशेषार्थिनःकाम्यविधिरिष्टंमेस्याद
निष्टंमाभूदित्यविशेषकामप्रेरितानिविशेषवितप्रवृत्तिमतोनित्यविधिरित्युक्तमित्यर्थः नन्वविद्यादिदोषवतोनित्यानिकर्माणीत्युक्तेपरमात्म॰
ज्ञानवतोपियावज्जीवश्रुतेस्तेषामनुष्ठेयत्वादित्याशंकाश्रुतेरविरक्तविषयत्वात्नैवमित्याह नपरमात्मेति योगारूढस्यतस्यैवशमःकारणमु
च्यतइतिस्मृतेस्तेनपरिपाकेकारणंकर्मोपशमएवप्रतीयतेनतथाकर्मविधिरित्यर्थः नकेवलंविहितेनोपलभ्यतेनसंभवतिचेत्याह कर्मे॰
तिमितेति यदानास्तित्वंसंसारीकिंतुअकर्त्रभोक्तब्रह्मासीतिश्रुत्याज्ञाप्यतेतदादेवतायाःसंप्रदानत्वंकरणत्वंब्रीह्यादेरित्येतत्सर्वमुपसृष्टिं॰
भवति तत्कथमकर्त्रादिज्ञानवतःसंभवतिकर्मविधिरित्यर्थः उपमर्दितमपिवासनावशादुद्भविष्यतिनतच्चविदुषोपिकर्मविधिःस्यादित्याशं
क्याह नचेति वासनावशादुद्भूतस्याभासत्वादात्मस्थत्वात्पुनःपुनर्बाधाच्चविदुषोनकर्मप्रवृत्तिरित्यर्थः किंचानवच्छिन्नब्रह्मास्मीतिस्मरतस्तदा

लष्ट

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्मकस्य देशादिष्वापेक्षैककर्मनिरवकाशमित्याह नहीति विद्वद्भोभिलाषनादिवत्कर्मावसरः स्यादिति शंकते भोजनादीति अपरोक्षज्ञानवतो
वा परोक्षज्ञानवतो वा भोजनादिप्रवृत्तिर्नोद्योतनभ्युपगमात्त्वन्मते तैर्बोधितानुवृत्तिमात्रत्वादविद्यादेर्बाधिताभिमाननिमित्तस्य तथात्वा
नुपपत्तेरित्यभिप्रेत्याह नेति न हि द्वितीयः परोक्षज्ञानिनः प्रारब्धानपेक्षत्वमिपासादिदोषकृतत्वात्तत्प्रवृत्तेरिष्टत्वादित्याह अविद्यादीति अवि।
द्याद्युपेतस्यास्यादिति चेन्नेत्याह नत्विति भोजनादिप्रवृत्तेरावश्यकत्वानुपपत्तिं विवृणोति केवलेति न तु तथेत्यादिप्रपंचयति शास्त्रेति
मितेति नहि दृष्टस्वविहितकालाद्यपेक्षत्वान्नित्यानामदोषप्रभवत्वं भवेदित्याशंक्याह दोषेति एवं दोषकृतत्वेपि नित्यानां शास्त्रसापे।
क्षत्वात्कालाद्यपेक्षत्वमविरुद्धमित्याह एवमिति भोजनादेर्दोषकृतत्वेपि यावज्जीवं चरेदिति यतीनां तच्चरणमित्यादिनियमवद्विदुषो
अविद्यादिनियमोपि स्यादिति शंकते तद्भोजनादीति विदुषो नास्ति भोजनादिनियमोऽकृतविधित्वान्नचैतावता यथेष्टचेष्टापत्तिर्ध- ति
र्माधीनाविवेककृतात्तदिमानतो विदुषोविद्येतेः नो विद्यावस्थायामप्यसतो यथेष्टचेष्टाविद्यारब्धायोकृतस्यात्संस्कारस्याप्यभावाद्वा
धितानुवृत्तेश्चाविद्यादेस्तत्त्वनाभासत्वाद्बाधितानुवृत्तिरित्याह नेति किंचाविदुषो विविदिषूणामेव नियमस्तेषां विधिनिषेधगोचरत्वा
द्वतेषामप्येवज्ञानोदयपर्यंतं यतीनामानित्यनिरूपस्यस्वयंक्रियात्वाभावान्नापि सक्रियामात्रे इति न ब्रह्मविद्यो प्रतिपादितपतिश्चान्यनिरूपा
त्मनस्तदाहेयकत्वासिद्धेरित्याह नियमस्येति कर्मस्वरूपाद्दिमतो धिकाराद्विरक्तस्य ज्ञानाधिकारात्तज्ज्ञानिनो देहत्वभावादेव कर्माभावात्।
तस्य भोजनाद्यतत्त्वत्वात्तत्त्वमादेः सर्वव्यापारोपरमात्मकज्ञानदेतोर्निवर्तकत्वेन प्रामाण्यं प्रतिपादितमुपसंहरति तस्मादिति तस्य विधि।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कृत्यादरूकं वाक्यं तस्य निषेधवाक्यवन्नत्वमान्नादहेतोरस्तु हि शोधि मिथ्याज्ञानध्वंसित्वाद्दोषव्यापारनिवर्त्तकत्वेन कूटस्थवस्तुनिष्ठस्य सुतरां प्रामा
ण्यं मिथ्याज्ञानध्वंसे हेत्वभावे फलाभावव्याघेन सर्वकर्मनिवृत्तेरित्यर्थः तत्प्रयोपपादनेनैतदेव स्पष्टयति कर्मप्रवृत्तीति यथा प्रतिषेधेऽभक्षणा
दौ प्रतिषेधशास्त्रवशात्प्रवृत्त्यभावस्तथा तत्त्वमस्यादिवाक्यसामर्थ्यात्कर्मस्वपि प्रवृत्त्यभावस्य तुल्यत्वात्प्रामाण्यमपि तुल्यमित्यर्थः
प्रतिषेधशास्त्रसाम्येन तत्त्वमस्यादिशास्त्रस्योच्यमानेन तथैव निवृत्तिनिष्ठत्वे स्यान्न वस्तुप्रतिपादकत्वमित्याशंक्याह तस्मादिति प्रतिषेधा
दि प्रसक्तक्रियाया निवर्त्तयन्तस्तु पलक्षितैर्हासीन्यात्मके वस्तुनि पर्यवसानित तत्त्वमस्यादिवाक्यस्यापि वस्तुप्रतिपादकत्वमविरुद्धमि
त्यर्थः वेदानां सिद्धे प्रामाण्ये वरदेवादादीनामन्यपराणामपि संवादविसंवादयोरभावे स्वार्थे मानत्वसिद्धेः सिद्धाविशुद्धादि शुणा
वतीप्रमाणदेवतेति चकारार्थः ॥ ज्ञानसिद्धपरीक्षमाणमित्येतत्प्रसंगागतं विचारं परिसमाप्यते हवाचमित्यादिव्याचष्टे नेदेवादिति
प्रचेतनायावाचोनियोज्यत्वेवायति वागभिमानिनीमिति योऽहं गो देवानामभिप्रायमाह वागेवतेति तन्त्वोऽस्याश्चक्रमेज्ञपमंत्रप्रका
शपादेव तानिवर्त्तयिष्यति नन्तुवाग्देवतेति तत्राह तामेवेति प्रसतोमामसद्गमयेति जपमंत्राभिधेयाग्रहणवेतरलिङ्गैर्गासंबंधः वागाद्याश्रयं कर्त्तृ
त्वादि दर्शयतोर्थवादस्य प्रासंगिकं तात्पर्यमाह द्वाचेति प्रात्माश्रयैककर्तृत्वादावभासमाने तस्य वागाद्याश्रयत्वमयुक्तमित्याह कस्मादि
ति परस्यजीवस्य वाक्कर्तृत्वादिविवक्षितमिति विकल्प्य दूषयति यस्मादिति विचारदशायां वागादिसंघातस्य क्रियादिपाक्षिकत्वात्क
देवादिलक्षणप्रयोगस्यात्मनीतत्तत्स्वात्मरस्यात्मनः स्वतन्त्रकृतिकत्वमन्तव्यस्य तदाश्रयत्वमित्यर्थः किंचाविद्याश्रयः सर्वोव्यवहारोनतहि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नैपरस्मिन्नवतरतीत्याह तद्विषयइति कर्त्रंशशास्त्रार्थवत्त्वादितिन्यायेन कर्तृत्वमात्मनोंगीकर्तव्यमित्याशंक्य यथा च तक्षोभयथेति न्या
याद्दैपाधिकं तस्मिन् कर्तृत्वमित्यभिप्रेत्याह वक्ष्यति हीति यदुक्तमविद्याविषयः सर्वो व्यवहार इति तत्र वाक्यशेषमनुकूलयतीहापीति
इतश्च परस्मिन्नात्मनि कर्तृत्वादिव्यवहारो नास्तीत्याह व्याकृतात्विति अनामरूपकर्मात्मकमित्यस्याउपरिष्टान्नव्यदमध्याहर्तव्यं
दृष्टगविद्याविषयात् क्रियाकारकफलजातादिति शेषः माभूत्परमात्मा कर्तृत्वाद्याश्रयो जीवस्तु स्यादिति द्वितीयमाशंक्याह
यत्त्विति जीवशब्दवाच्यस्य विशिष्टस्य कल्पितत्वात्तत्रत्यतात्त्विकं कर्तृत्वादिकं किंतु तद्व्यवहारास्वरूपमारोपितमिति भावः आत्मनि तात्त्वि
ककर्तृत्वाद्यभावे फलितमर्थवादतात्पर्येणुपसंहरति तस्मादिति तात्पर्यमर्थवादस्योक्तानिमुक्तयावाग्देवतयायत्कृतेनतउपव्यस
तितद्वत्तत्वादिना उद्गातृत्वं जपमंत्रप्रकाश्यत्वं चात्मनोंगीकृत्य वागुद्गानेप्रवृत्ताचेन्नयाकश्चिदुपकारो देवानामुद्गानेन निर्वर्तनी
यः स च नास्तीति शंकते कः पुनरिति वदनादिव्यापारे सति यः स्वविशेषः संघातस्य निष्पद्यते स एव कार्यविशेष इत्याहोच्यत इति
योवाचीति प्रतीकमादाय व्याख्यायते कथं पुनर्वाचो वदनं चक्षुषोदर्शनमित्यादिना निष्पन्नफलं सर्वधारणमित्याशंक्यानुभवमनुस
त्याह सर्वेषामिति किंच देवार्थमुद्गायन्त्या वाचः स्वार्थमपि किंचिदुद्गानमस्ति तथा च ज्योतिष्टोमे द्वादशस्तोत्राणि तत्र त्रिषु पवमा
नाख्येषु स्तोत्रेषु यजमानफलमुद्गानेन कृत्वावशिष्टेषु नवस्तोत्रेषु यत्कल्याणवदनसामर्थ्यं तदात्मने स्वार्थमेवागायदित्याह
तेमोगामिति सत्त्वविज्ञानकीर्तनात्वफलमवेपंभवतीत्याशंक्याह वाचनिकमिति अध्यात्मनेन्नाद्यमागायेदिति श्रुतमित्यर्थः कल्याणवद

 CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं·
२४

नसामर्थ्यस्य स्वार्थत्वं समर्थयते नह्वीति कल्याणवदनं वाचो साधारणं चेत् कस्तर्हि यो वाचीत्यादेर्विषयस्तत्राह यत्त्विति वाग्देवता
यामसुराणामवकाशं दर्शयति तेनेति स्वार्थपरार्थयोर्वागुद्गाने सतीति यावत् कल्याणवदनस्यात्मनावाचैव संबंधो यो यमासंगोऽभिनिवे
शः स एवावसरो देवतायास्तमवसरं प्राप्येत्यर्थः अवसरमेव व्याकरोति रंध्रमिति अस्मान्नतीत्येतिसंबंधः कोसावसुरात्वयस्तत्राह
स्वाभाविकमिति तच्चोपायस्तु पन्यस्यति शास्त्रेति असुरानभिभूयकेनात्मनादेवाः स्यासंतीति विवक्षायामाह ज्योतिषेति प्रजापते
र्वा विपाप्मा हि सोऽसुरैरिति कुतो वगम्यते तत्राह स यः स पाप्मेति प्रतिषिद्धवदनमेव पाप्मेत्ययुक्तं महत्त्वस्य क्रियातिरिक्तत्वाशीकारादि
त्याशंक्याह येनेति असभ्यं सभानर्हं स्त्रीवर्णनादि बीभत्सं भयानकं प्रेतादिवर्णनं अनृतमयथार्थवदनं आदिशब्दात्पिशुनत्वं श्
ह्यते किमत्र प्रजापतेर्वा विपाप्मत्वे मानमुक्तं भवतीत्याशंक्य स एव स पाप्मेति व्याकरोत्यनेनेति प्राजापत्यासु प्रजासु प्रतिपत्तेर्नास
त्यवदनादिना लिंगेन तद्धाविपाप्मानुमीयते विमतं पाप्मपूर्वकं प्रतिकूलधीविषयत्वाद्दुःखवत् यः स पाप्मा प्रजानाम्पृमितः स एव
प्रजापतेर्वा विपाप्मानं रामयति विमतं कारणपूर्वकं कार्यत्वात् घटवत् न च प्रजागतदुरितं प्राजापत्यं तत्त्वविनाहेत्वंतराद्दवस्मात्कारणा
द्विधायित्वात्कार्यस्य न च तत्कारणोपि परस्मिन्नसंगो पापविद्धमिति श्रुतेर्न च न ह वै देवान्पापं गच्छतीति श्रुतेर्न स्त चेपि पापवेधस्त
स्यफलावस्थस्य पापत्वेपि यजमानावस्थस्य तद्भावादित्यर्थः आद्यसकाराभ्यां कारणस्थपाप्मानमनूद्यतस्यैव कार्यस्थत्वमुच्यते अन्त्या
भ्यां तत्कार्यस्थपाप्मानमनूद्य तस्यैव कारणस्थत्वमिति विभागः वाग्देवतायाजपमंत्रप्रकाश्यत्वमुपास्यत्वं चानेनेति निर्द्धार्यावशिष्टपर्या

२४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

घवत्तद्वयस्य तात्पर्यमाह तथैवेति परीक्षाफलनिर्णयमाह देवानां चेति उक्तोपास्यत्वे हेतुत्वं तत्र माह तत्त्वेति इतरः कार्यकरणसंघातस
स्मिन्व्यापकत्वपरिच्छिन्नत्वमतस्तस्योपास्यत्वं जपमंत्रप्रकाश्यत्वं चेत्यर्थः उक्तैरिंद्रियैरनुक्तैरिंद्रियाण्युपलक्षणीयानीति विवक्षित्वो
पसंहरत्येवमिति वागादिवत्तत्वगादिषु कल्याणकाभावात्तपाप्मवेधोऽस्तीत्याशंक्याह कल्याणेति पाप्मभिरुपासज्यमाना विद्धा
वित्येतयोरस्ति पौनरुक्त्यमित्याशंक्य व्याख्यानव्याख्येयभावान्नैवमित्याह इति नु खल्विति संप्रति प्राणस्य मंत्रप्रकाश्यत्वमुपास्यत्वे
चेति वक्तुमुत्तरं वाक्यमुपादाय व्याकरोति वागादीति क्रमेणोपासीना इति संबंधो वागादिषु नैराश्यानन्तर्यमथशब्दार्थः विवक्षि
तार्थज्ञापकोऽसाधारणो हेतुरुक्तवचनव्यापारो भिन्नयोर्दोषसंसर्गिणो दैवेण संसर्गे कर्तृमिच्छा उत्तीर्णेनेत्याशंक्याह सैवेति तदभ्या
सानुवृत्तात्तस्य पाप्मसंसर्गकरणस्याभ्यासवशादिति यावत् उक्तमर्थं दृष्टान्तेन स्पष्टयति कथमित्यादिना अश्मरनाशेनासंगजति
तया पाप्मावियोगे हेतुमाह संसर्गेति वक्ष्यमाणं सोऽग्निरभवदित्यादिनेति शेषः वागादीनां स्थितानां नष्टानां च उक्तोऽग्न्यादिरूपत्वमित्याशंक्याह
एवमपीति न नष्टिस्तेषां परिच्छेदाभिमानः स्यादित्याशंक्याह स्वाभाविकेनेति परिच्छेदाभिमानाद्ध्यात्माभिमानस्य बलवत्त्वं सूचयति
यथाह्वेति न केवलमप्राणानामेव वागादीनामसंसर्गधर्मि प्राणमुपयाहिनाशः किं तत्तत्त्वजातीयानामपीत्यभिप्रेत्याह किं चेति वागा
दीनामग्न्यादिभावापत्तिवचनेन तत्संस्कृतस्य यजमानस्य देवतात्मापत्तिरास्मरणपाप्मध्वंसस्य फलमित्युक्तं तत्र एवं कल्पीययजमानस्यातिपाप्मशा
लिनास्यथोक्तफलवत्त्वेऽपि नेदानीं तन्नसेवमित्याशंक्य प्राणस्य राभवतीत्यादि श्रुतिमवतारयति यथेति सर्वकल्पनाप्रकारे ॥ सर्वेज्ञानस्या
ग

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यजमानः शास्त्रप्रकाशितं वर्तमानप्रजापतित्वं प्रतिपद्येतेति संबंधः । एवं यजमान इत्यस्य व्याख्या । अतिक्रान्तकालिक इति पुराकल्पमेवद
र्शयत्येताविति तेनेति । ऋतत्रकेनेत्येतत् । तेनैव विधिना श्रुतिप्रकाशितेन क्रमेण सुखं प्राणात्मत्वेनोपगम्येति शेषः । सपत्नो भ्रातृव्य इत्यस्य
द्विषन्निति कुतो विशेषणमर्थसिद्धत्वाद्द्वेषस्येत्याशंक्याह यत इति । तस्य द्वेष्टृत्वनियमे हेतुमाह परमार्थिकेति । अपरिच्छिन्नदेवतात्मत्वं पार
मार्थिकमात्मस्वरूपं विवक्षितं तत्तिरस्करणकारणत्वादुक्तपाप्मनो विशेषणमर्थवदिति शेषः । यदाग्नेयोऽष्टाकपाल इतिवत् यएवं वेदे
तिप्रसिद्धार्थोपबंधे विधिविधिपरं वाक्यमतश्चैवं विद्यादिति विवक्षितमित्यभिप्रेत्याह यथोक्तमिति । फलवत्प्रधानोपासनं कृत्वा तेनेदो
दुरित्याद्युत्तरवाक्यं गुणोपास्तिपरमित्याशंक्याह फलमिति । फलवत्त्वं प्रधानविधिप्रकाशं मत्वा व्याप्तिकामेवाश्रित्य गुणविशिष्टं प्राणो
पासनमाहानन्तरश्रुतिरित्यर्थः । शंकोत्तरत्वेन चोत्तरग्रन्थमवतारयति कस्माच्चेति । विशुद्धत्वमुक्त्वा हेत्वन्तरं जिज्ञास्यमिति द्योतयितुं
वशब्दः । करणानां कार्यस्य तदवयवानां च प्राणो यस्मादात्मा व्यापकस्तस्मात्स एवाश्रुत इत्युपपत्तिनिरूपणार्थं तस्य व्यापकत्वमित्ये
तदर्थमाख्यायिकया दर्शयन्ती श्रुतिर्हेत्वन्तरमाहेति योजना । तत्र हेतुस्तस्मादर्थे प्राणस्यात्मत्वादिप्रकटीकर्तुमाख्यायिका श्रुतिर्विभजते
नेयमाख्यायिकेति वा आह एवंभूतप्राणमाश्रित्य फलावस्थास्तर्हि किमिति प्राणस्य वर्तिग्रामफलत्वादित्याशंक्याह संवितरीति । विचारफला
भ्युपलब्धिं कथयति लोकवदिति । तामेव उपलब्धिमाकांक्षाद्वारेणाविष्कृणोति कथमिति । दृष्टान्तं स्पष्टयति मर्यादेति । तथा देवा विचार्येश
णमास्यान्तराकाशस्थं निर्दिष्टोरितवन्तस्त्याह तथेति । किमनया कथया सिद्धमित्याशंक्याह यस्मादिति । उपलब्धिसिद्धैर्गुणैः किंमनुचिन्वनोति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विशेषेति सर्वानेव वागादीन विशेषेणाप्यादिभावेन प्राणः संजितवान्नचासमध्यस्थः साधारणकार्यं निर्वर्तयन्नतो मुक्तिनोऽप्यमा
स्यान्तराकाशे वर्तमानः सिद्ध इत्यर्थः आयास्यत्वं वर्ततिरसत्वं गुणांतरं दर्शयन्नत एवेति सर्वसाधारणत्वादेवेति यावत् तथापि कृतो
सांगिरसत्वं साधारणोऽपि न भसितं तदनुपलब्धेरित्याशंक्य परिहरति कथमित्यादिना अंगेषु चरमधातोः सारत्वप्रसिद्धेर्न प्राणस्य तथा
त्वमित्याशंक्य समाधत्ते कथं पुनरित्यादिना कस्माच्चेदेतोरित्यादिवाद्यपरिहारमुपसंहरति यस्माच्चेति वाक्यार्थं प्रपंचयति आत्मा
दीति प्राणस्य शुद्धत्वाद्व्यापकत्वाच्चोपास्यत्वमुक्तं तस्य शुद्धत्वं वागादिवदसिद्धमित्याशंकते स्यान्मतमिति शंकामाक्षिप्य समाधत्ते न
त्वित्यादिना प्राणेन स्पृष्टं स्यादिति तेन सहापरस्याशुद्धत्वावदशुद्धवागादिसंबंधादशुद्धत्वाशंका प्राणस्यो निषिद्धेत्यर्थः तात्पर्यं दर्शी
यदुत्तरवाक्यमुत्तरत्वेनावतारयत्याहेति अन्वयप्राणेनोच्यते स्त्रीलिंगेऽपर्थांतरोक्तिप्रतीतेरित्याशंक्याह यं प्राणमिति तस्याः पूर्वस्य परो
हत्वाद्दपरोहवाची वक्ष्यमेतद्धीयोऽन्यतेतत्राह सैवेति कथं प्राणो देवता शब्दः न हि तस्य तद्रूढत्वं प्रसिद्धमित्याशंक्याह देवता चेति या
गेहि देवता कारकत्वेन गुणभूता प्रसिद्धा तथा प्राणोऽपि इज्याद्यन्यत्वे सति विहितक्रियागुणत्वाद्देवतेत्यर्थः प्राणोपास्तेर्हि विधं फलं पा
पहानिर्देवताभावश्च तत्र पापहानेरेव प्रधानफलस्यात्र श्रवणात् इत्येण विशिष्टप्राणोपास्तिरिह विवक्षितेति वाक्यार्थमाह यस्मादिति
नतावत्प्राणदेवताया हृतीमत्वनिर्वृत्तं न तद्रूढप्रसिद्धेरदर्शनात्रापि यौगिकं प्राणस्य प्रत्यक्षश्रुतेर्हेतुत्वाभावादित्याह विपति अतः शु
द्धिरिति परिहरत्याहेति कथं पाप्मसन्निधौ वर्त्मानस्य तेनोद्धरत्वमित्याशंक्याह दारसंश्लेषेति उपासेस्तदाभावयतीति यावत् ब्रह्मतानां

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दिवस्याणतत्वज्ञानान्फलसिद्धिसंभवे किं सदा तद्भावनयेत्याशंक्य भावनापर्यायोपासनशब्दार्थमाहोपासनं नामेति दीर्घकालादरनै
रंतर्यरूपविशेषणत्रयं विवक्षि त्वाह लौकिकेति तस्य मर्यादां दर्शयति यावदिति मनुष्योहमिति वद्देवोहमिति यस्य जीवतएवाभि
मानाभिव्यक्तिस्तथैव देहपातादूर्ध्वं तद्भावः फलतीत्यत्र प्रमाणमाह देवोभूत्वेति का देवतारूपं तवेति किं देवा नामपीति तद्भावो भावी
त्यर्थः कैरिक्षां तरमवतार्येहृत्रेकीर्तयति सावाइति नित्यानुष्ठानात्पापहानिर्दृष्टोस्यापत्तयन्न्यते नैवेद्यमुपासने नित्यं नैमित्तिकं वा
देवतात्मत्वकामिनो विधानात्तत्कथं पापमेवं विदो दूरी भवतीत्याशयति कथं पुनरिति विरोधिसंनिपाते पूर्वध्वंसमावश्यकं मत्वा
नः समाधत्ते उच्यत इति उक्तमेव व्यनक्ति इंद्रियेति इंद्रियाणां विषयेषु संसर्गो योभिनिवेशस्तेन जनितः पाप्मापरिच्छेदाभिमानोपरिच्छि
न्नप्राणात्मन्यात्माभिमानेन वेनाविरुध्यते परिच्छेदापरिच्छेदयोर्विरोधस्य प्रसिद्धत्वादित्यर्थः विरोधं साधयति बाधादीति पाप्मनो वा
गादिविशेषवत्यात्मनि विशिष्टेभिमाने देवतात्वाद्याधिदैविकापरिच्छिन्नाभिमानेन ध्वंसो युज्यते इत्यनेन हि चंडालभांडावलंबिनो जलस्य
गंगाद्यविशेषभावापत्तावपेयत्वनिवृत्तिः प्रत्यक्षापि यथा प्राप्य गंगां याति पवित्रतामिति न्यायादित्यर्थः यद्वै नैसर्गिकाज्ञानजन्यं त
दागंतुकप्रमाणज्ञानेन निवर्तते यथा रज्जुसर्पादिज्ञानं नैसर्गिकाज्ञानजन्यं च पाप्मा तेन प्रामाणिकप्राणविज्ञानेन तद्ध्वस्तिरित्या
ह स्वाभाविकेति नन्वभिमानयोर्विरोधाविशेषाद्द्वाद्य बाधकत्वव्यवस्थायोगाद्द्वयोरविशिष्टयोर्बाधः स्यात्तत्राह पाप्मजनितेतादृशीति उक्त
मेव पापध्वंसरूपं विद्याफलं प्रपंचयितुमनंतरवाक्यमित्याह तद्वैतदिति मृत्युमपहत्य यत्रासादित्यामंतस्तत्रागमयांचकारेति संबंधः क

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्थपापाश्रुत्युक्तत्वेतत्राह स्वाभाविकेति अपहतेत्यत्र शब्दैवदत्वयः प्राणदेवताचेत्पाप्मानेऽहंतिसदैव किं न स्यादित्याशंक्याह प्राणात्मेति
भवतु प्राणो वागादीनां पाप्मनोपहंता विशुद्धस्तु किमायातमित्याशंक्याह विरोधादेवेति अनंतकाशादेशात्वादिक्शामंताभावाद्यत्रासौ दि
शामित्युपक्रमितिशंकते नन्विति शास्त्रीयज्ञानकर्मसंस्कृता जना मध्यदेशाः प्रसिद्धस्यापि तदधिष्ठितत्वेन मध्यदेशत्वात्तस्यापि त्यजा
धिष्ठितदेशस्य पापीयस्त्वस्वीकारादतस्तज्जनेनतदधिष्ठितं च देशमवधिं कृत्वा तेनैव निमित्तेन दिशां कल्पितत्वादानन्त्याभावात्सर्वाक
जनातिरिक्तजनस्य तदधिष्ठितदेशस्य चानन्त्यात् के मध्यदेशादन्यो देशो दिशामंत इत्यत्र केनकाचिदनुपपत्तिरिति परिहरति उच्यत इति
किमित्यत्यजने श्रित्यधिकावायः क्रियते तत्राह इतिसामर्थ्यादिति देशमात्रे पाप्मावस्थानानुपपत्तेरित्यर्थः नामेवानुपपत्तिं साधयती
दृश्येति भवतु यथोक्तोदिशामंतस्तथापि पाप्मसंसर्गोऽस्तु तथापि किमायातमित्याशंक्य तस्य शिष्टैस्त्याज्यत्वमित्याह तस्मादिति निषे
धहृदयस्य तात्पर्यमाह जनमेत्यमयीति प्राणोपास्तिप्रकरणे निषेधश्रुतेस्तदुपासकेनैवायं निषेधोऽनुष्ठेयो न सर्वैरित्याशंक्याह ने
त्यादिना इत्यं श्रुत्युक्तनिषेधनं चेदतिक्रामेत्तदा पाप्मानमनुगच्छेयमिति निषेधातिक्रमादिति सर्वस्य भयं जायते न प्राणोपासक
स्यैवातः सर्वोऽपि पाप्मानोभयेनागच्छेदाकांक्षिप्रकरणाद्बलवदित्यर्थः द्विविधमुपास्तिफलेपापहानिर्देवताभावश्च तत्र पापहानिमु
पदिशता प्रासंगिकः साधारणो निषेधोदर्शितः संप्रति देवताभावं वक्तुमनंतरवाक्यमिति प्रतीकोपादानपूर्वकमाह सा वा एषेति अथ शब्दा
द्योतितमर्थं कथयति यस्मादिति पाप्मापहंतृत्वमनुध्यायविशिष्टभागेत्याचष्टे तस्मात्स एवेति अथ शब्दाद्योतितमर्थं कथयति यस्मादि
ति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्व सामान्योक्तमर्थं विशेषेण प्रपंचयति स वै वाचमित्यादिना कथं वाचः प्रथमत्वं तदाहोद्गीथेति वाचो मृत्युमतिक्रांताया रूपेण प्रकृ
वैकं दर्शयति तस्मा इति अनयोरग्नित्वविरोधं धुनीते सा वागिति एवमपि वाचोऽग्नित्वेनोपासनालभ्यं तदग्नित्वमित्याशंक्याहैतावानिति
उक्तं विशेषं विपादयति प्राणिति वागादीनामग्न्यादिदेवतात्वप्राप्त्युपासकस्य किमायातं न हि तद्देवतस्य फलमित्याशंक्याह यथेति
देवतात्वप्रतिबंधकान् पाप्मनः सर्वान् पोह्योक्तवर्त्मना वागादीनामुपासकोपाधिभूतानामग्न्यादिदेवतात्मत्वं सोऽपि सदा प्राणमात्मत्वेन
ध्यायन् भावनाबलाद्देहपाते यद्वदेव यजमानवदाप्नोतीति भावः कस्येदं फलमित्याकांक्षायामुपासके विशिनष्टि यो वागादीति उक्तोपा
सनस्य प्रागुक्तफलमनुगुणमित्यत्र प्रमाणमाह तं यथेति उपास्यस्य प्राणस्य कार्यकरणसंघातविधारकत्वं नाम गुणो नैरंतर्येण प्रसरे
वाक्यं तदा तदायत्माकरोत्यथेत्यादिना कथं तज्ज्ञातं विक्रीतस्य फलसंबंधस्तत्राह कर्त्रीरिति अन्नागानमार्त्विज्यमित्यत्र प्रश्नपूर्वकं वाक्य
शेषमनुकूलयति कथमित्यादिना तमेव हेतुमाह यस्मादिति प्राणेनैव [illegible] तदद्यत इति संबंधो यस्मादित्यस्य तस्मादित्यादिना वाक्येन न्व
यः प्रतिनिर्दिष्टेनाऽरनशब्दस्त्यागपर्यायस्तर्हि कथं शकटे नः शब्दप्रयोगस्तत्राह दानः शब्द इति इतश्च प्राणस्य स्वार्थमन्नागाने शुक्लमित्या
ह किं चेति प्राणेन वागादिवदात्मार्थमन्नमागीतं चेन्न हि तस्यापि पाप्मवेधः स्यादित्याशंक्याह यदपीति इदानीं देहाकारपरिणतेन प्राण
स्थितिर्भवति तद्वशात्प्राणस्य वागादयः स्थितिभाजो न तः स्थितत्वं प्राणस्यान्नमिति न पाप्मवेधस्तस्मिन्नस्तीत्यर्थः भर्तृत्वेन पुरोगत्वादि गु
णविधानार्थं वाक्यान्तरमादाय ते देवा इति तस्य विवक्षितमर्थं वक्तुमादावाक्षिपति नन्विति अनुकूलत्वे हेतुमाह वागादीनामिति अवधार

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

णानुपपत्तिं दूषयति नैष दोष इति यथा प्राणस्योपकारोऽन्नकृतो न वागादिद्वारकस्तथा तेषामपि नासौ प्राणद्वारको विशेषाभावादि
ति शंकते कथमिति वाक्येन परिहरत्येतमर्थमिति त्याह विशेषमिति शेषः तेषां देवत्वं साधयति स्वविषयेति तत्र प्रसिद्धिं प्रमाणयति वैश
द्धस्त्याह वेद इति स्मरणार्थं इति तत्प्रसिद्धस्यार्थस्येति शेषः वाक्यार्थमाह दंत इति एतावत्त्वमेव व्याचष्टे तत्सर्वमिति किमिदं प्राणार्थं
मन्नगानेनाप्तमतदाह्वानेनेति काक्षनेरेतावता भवतां हानिस्तत्राह वयं चेति अन्नमेतदेणममापि स्यात्तमपाकं मे दर्थं तदभीतमिति चे
न्नदाहानतरति आभजस्वेति श्रूयमाणे कथमन्यथाम्नानयतेत्रत्राह णिच इति नवैवान्नस्वामित्वमस्माकमपि तत्र प्रवेशमात्रे स्थित्य
र्थमपेक्षितमिति वाक्यार्थमाहास्माननिति वैशिष्ट्यापघर्थं प्रश्नः प्राणं परिवेष्टतदनुत्तयावागादीनामन्नार्थिनामवस्थाने चैतेषामपि
प्राणवदन्नसंबंधः स्यादित्याशंक्याह नेति त्यक्तप्राणस्यान्नबलाद्वागादिस्थित्यनुपलंभे विपर्ययः वागादीनामन्नजन्योपकारस्य प्रा
णद्वारत्वे सिद्धे फलितमाह तस्मादिति तेषामन्नकृतोपकारस्य प्राणद्वारकत्वे वाक्यशेषं संवादयति तदेवेति विद्याफलं दर्शयन्नुग्ण
ज्ञातमुपदिशति वागादीति वेदनमेव व्याचष्टे वागादयश्चेति स च प्राणोऽहमस्मीति वेदनविवक्षार्थः अन्नामय[illegible]व्याधिरहितो दीप्ता
ग्निरितियावत् सं प्रति प्राणविद्यास्तोकं तद्विद्यावद्विद्वेषिणो दोषमाह किंचेति इदानीं प्राणविदं प्रति गुरुरागेलाभं दर्शयति अथैत्यादि
ना तेदेवाभ्रुववतित्यादेर्गुणविधिविधिविवक्षितेनेन विशिष्टविधिर्गुणफलस्यैवात्र श्रवणादित्याह सर्वमेतदिति उत्तरग्रंथस्य स्वव्यवहितेन
संबंधं वक्तुं व्यवहितमनुवदति कार्यकरणमिति अनेनेत्यग्रेघमवतारयति अस्मादिति किमित्याशंक्य सत्वसाधको हेतुः साधनीयस्त
णा

वी ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं· २८

आह तदेतद्विति संप्रश्नप्रतिवचनसंबंधं दर्शयति अनेनतरंचेति प्रकारांतरेणभुज्यमानमिति सूचयितुं चशब्दः तदिदं यदुपपादनीयं तदुच्यतां
किमित्यत्र तस्य पुनरुक्तिरित्याशंक्याहतं नरात्रिमिति· प्रतिज्ञानुवादोवक्ष्यमाणहेतोरुपयोगीत्यर्थः यथोपन्यस्तमेवेत्यादि प्रपंचयति प्राणो
वा इति· उक्तार्थनिर्णये हेतुं पृच्छति कथमिति· नचप्रसिद्धिं हेतुं ऊर्ध्वं परिहरति प्राणोहीति प्रसिद्धिमेव प्रकटयति प्रसिद्धमिति स्मारणेप्र
सिद्धस्यांगिरसत्वस्येति शेषः प्रसिद्धिरसिद्धेति शंकते कथमिति तामन्वयव्यतिरेकाभ्यां साधयति प्रत्याहेति पदार्थमुक्त्वा वाक्यार्थमाह
यस्मात्कस्मादिति उक्तेनव्यतिरेकेणअन्वयमप्युक्तं समुच्चेतुं चशब्दः तस्मात्शब्दस्योपरिभावेन संबंधमुक्तं स्फुटयति तस्मादिति अन्वय
व्यतिरेकाभ्यां आंगिरसत्वेप्राणस्यसिद्धे फलितमाहात इति· उक्तन्यायादांगिरसत्वेसिद्धेपि कथमात्मत्वं सिद्ध्येदित्याशंक्याहात्मेति अस्तुप्रा
णः संघातस्यात्मा तथापि किं स्यात्तदाह तस्मादिति· भवतु प्राणाधीनं संघातस्य जीवनं तथापि कथं तस्यैवोपास्यत्वमित्याशंक्याह तस्मा
द्यास्येति बृहस्पत्यादिधर्मकं प्राणोपासनं वक्तुं वाक्यांतरमवतारयति एष इति तस्य विधांतरेणनाम्यर्थमाह नकेवलमिति कार्यस्थूलं
शारीरं प्रत्यक्तनोरूपमाणेरूपात्मकं करणं च स्थानक्रियाशक्तिमत्कर्मभूतं तयोरात्मा प्राणइत्युक्त्वा नाम शरीरपितेथ्येति वक्तुं केरिकाच
तद्रूपमित्यर्थः किमितिप्राणस्यात्मत्वेनसर्वात्मनोप्याप्तिरित्याशंक्याहोपास्यत्वायेति उपाहोप्यर्थो बृहस्पतिशब्दादुपरि संबध्य
ते बृहस्पतिर्देवानां पुरोहित आसीदिति श्रुतिर्देवपुरोहितो बृहस्पतिरुच्यते तत्कथं प्राणस्य बृहस्पतित्वमिति शंकते कथमिति देवपुरो
हितत्वावर्तेयित पुनरवाक्येनोत्तरमाहेत्युच्यतइति प्रसिद्धवचने कथमित्याशंक्याह बृहतीति छंद इति समादिगायत्र्यादीनि प्रधानानि छंदां

२८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ति तेषां मध्यच्छंदो बृहतीत्युच्यते साच बृहती षट्त्रिंशदक्षरा प्रसिद्धेत्यर्थः भवतु यथोक्ता बृहती तथापि कथं वाग्वै बृहतीत्युक्तं तत्राहानुष्टु
ब्वेति द्वात्रिंशदक्षरा तावदनुष्टुब्विद्या साचाष्टाक्षरैश्चतुर्भिः पादैः षट्त्रिंशदक्षरायां बृहत्यामंतर्भवति एवं तावत्संख्याया महासंख्यायामं
तर्भावादित्याह साचेति वागनुष्टुभोरनुष्टुप्त्वं बृहत्याः श्लोकमेकमुपजीव्य फलितमाह अत इति भवतु वागात्मिका बृहती तथापि त
त्पतित्वेन प्राणस्य कथं बृहस्पतित्वमित्याशंक्याह बृहत्याश्चेति सर्वात्मकप्राणरूपेण बृहत्यास्तत्त्वात् तत्र सर्वासामृचामंतर्भावः संभ
वति तस्मात्प्राणस्य बृहत्याः पतित्वे सिद्धं बृहस्पतित्वमित्यर्थः प्राणरूपेण तत्त्वं बृहतीत्यत्र प्रमाणमाह प्राणो बृहतीति तथापि प्राणस्य
विवक्षितं बृहस्पतित्वं कथं सिध्यतीत्याशंक्याह प्राण इति तस्य तदात्मत्वे हेतुत्वेनाह वागात्मत्वादिति तासां तदात्मत्वेपि कथं प्राणेंतर्भा
वो न हि घटोशरात्मा पटेंतर्भवतीति शंकते तत्कथमिति प्राणस्य वाचो निष्पादकत्वात्तद्रूपाणामृचां कारणे प्राणे युक्तोंतर्भाव इत्याह
देत्यादिना प्राणस्य तन्निर्वर्तकत्वेपि न तस्मिन्वाचांतर्भावो न हि घटस्य कुलालेंतर्भाव इत्याशंक्याह कोष्ठेति कोष्ठनिष्ठेनाग्निना प्रेरि
तस्तत्र तत्र वायुरूर्ध्वं गच्छन् कंठादिभिरभिव्यज्यमानो वर्णतयाभिव्यज्यते तदात्मिका च वाग्घ्रिणीता देवताधिकरणे उक्ता वागात्मिकोक्ता तद्यु
क्तं तस्याः प्राणेंतर्भूतत्वमित्यर्थः ऋगात्मत्वं प्राणस्य प्रकारांतरेण प्रसाधयति पालनाद्धेति मंत्रप्रदत्वे सति स्थापकत्वं तादात्म्यमा
त्रमित्यभिप्रेत्योपसंहरति तस्मादिति यजुषामात्मेति पूर्वेण संबंधः नियतपादाक्षराणामृचां प्राणत्वे उक्ते तद्विपरीतानां यजुषां तत्त्व
मिति शंकित्वा परिहरति कथमिति तथापि कथं प्राणो यजुषामात्मेत्याशंक्याह वाग्वै ब्रह्मेति निर्वर्तकत्वे पालयितृत्वे चापि तत्पतित्वमित्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दृ एवं वदंतीति दृष्टिमाश्रित्याशंकते कथं पुनरिति वाक्यशेषविरोधान्नात्र दृष्टिः संभवतीति परिहरन्नुत्तरमितिवाक्योक्तेः सामेत्येते वाचः
साम सामानाधिकरण्येन निर्देशाद्वागधिकारोऽयमिति योजना तथापि कथं शरीरत्वं यत्र दृष्टं वा दृतीब्रह्मणोरिति तत्राह तत्राचेति प
विशेषमेव दर्शयति सामनीति एतत्त्ववाक्समानाधिकृतयोर्दृतीब्रह्मणोश्चरूपजन्ह्ममेहत्वमित्याह वाग्विशेषत्वाच्चेति तत्रैव हेत्वंत
रमाह विशेषेति प्रसंगमेव व्यतिरेकमुखेन विवृणोति सामेति द्वितीयश्चकारोऽवधारणार्थः किंच वाग्वै दृतीवाग्वै ब्रह्मेति वाक्याभ्यां
दृतीब्रह्मणोर्वागात्मत्वे सिद्धे न च मयोर्वाक्स्यात्वेवाकाद्व येपि वाग्वैवाग्गितिपोनहमस्य प्रसंगात्तस्माद्दृतीब्रह्मणोरेकत्वशरीरजन्ह्ममि
त्याह वाक्प्राधत्वेचेति तत्रैवस्थानमाश्रित्य हेत्वंतरमाह एतेति शरीरजन्ह्मप्राणस्य प्रतिपाद्यतस्यैव सामत्वसाधयत्येषइत्यादिना तदेव
स्पष्टयति सर्वेति सापाशाद्यो हि सर्वनामतयाचयस्त्रीलिंगः सर्वशब्दस्तेनाभिधेयं वस्तुवागित्यर्थः अथ प्राणइत्यत्र उपपादयति सर्व
पुंशब्देति पुंलिंगेन सर्वेण शब्देनाभिधेयं वस्तु प्राणइत्यर्थः तत्र कस्मात्तत्प्रमाणयति केनेति आचार्यस्य शिष्यं प्रत्येतदाख्यायेऽस्यानिरु
क्तोवाचकानि तथापि कस्य सामशब्दवाच्यत्वमित्याशंक्य फलितमाह वागिति वागुपसर्जनः प्राणः सामशब्दाभिधेयः एकवचननि
र्देशादित्यर्थः ननु गीतिषु सामाख्येति न्यायाद्विशिष्टाकाचिद्गीतिः सामेत्युच्यते तत्कुतो वागुपसर्जनस्य प्राणस्य सामत्वमत आह तत्र
येति प्राणस्य सामत्वे सतीति यावत् प्रगीतेमंत्रवाक्ये सामशब्दस्य रूढेरिष्टत्वात् स्वप्राणादिव्यतिरेकेण सामेत्याशंक्याह स्वेरित्या
दिपदेन पदवाक्यादिग्रहः वागुपसर्जने प्राणे मुख्यः सामशब्दस्तत्संबंधात्तिरश्चोणो मंत्रादिशब्दवदित्यर्थः उक्तेर्थे तस्मादुतः सामत्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मिति वाक्यं योजयति यस्मादिति इदं सामेदं सामेति यद्यद्यपि यतेन ह्याक्प्राणात्मकमेवोच्यते सावाममेति सुगमेऽर्थस्मादेवं तस्मात्
प्रसिद्धस्य सामशब्दस्य सामत्वे तन्मुख्यसामनिर्वचनत्वात् गौणमेवमर्थ्यं लक्ष्म्यवहारे प्रसिद्धमिति योजना प्रकारांतरेण प्राणस्य सामत्वप्र।
तिपादनार्थमुपन्यस्यति यदित्यादिना प्रकारांतरद्योतनीवा शब्दो ननु सूयत इत्याशंक्याह वा शब्द इति निमित्तांतरमेव प्रश्नपूर्वकं प्रकटयति
केनेत्यादिना ननु प्राणस्य तत्तच्छरीरपरिमाणत्वे परिच्छिन्नत्वादानंत्यानुपपत्तिस्तत्कथमस्य विरुद्धेषु शरीरेषु समत्वमित्याशंक्याह पुत्तिका
दीति मशकशरीरस्य यथा श्रुतार्थत्वे किं तस्मादित्याशंक्याह न पुनरिति प्राणदिदे विकेन रूपेण मूर्तत्वे सर्वगतत्वे च दृष्टत्वे न प्रदीपवद्वेसंकु
चति प्रसार्दे वा विकसति तथा प्राणोपि मशकादिशरीरेषु संकोचमिभादिदेहेषु विकासं च प्रपद्यतामिति समत्वासिद्धिरित्याशंक्याह नैवे
ति प्राणस्य सर्वगतत्वे समत्वश्रुतिविरोधमाशंक्याह सर्वगतस्येति स्वेशादिषु गोत्वं वृत्तिशरीरेषु सर्वत्र स्थितस्य प्राणस्य तत्तच्छरीरपरिमा।
णापावृत्तेः लाभः संभवति सर्वगतस्यैव तन्मयस्य तत्तद्रूपं भाद्यावच्छेदोपलंभादित्यर्थः फलश्रुतिमवतार्य व्याकरोति एवमिति
फलविकल्पे हेतुमाह भावनेति वेदनं व्याकरोति तथा प्राणेति इदं च फलं मध्यप्रदीपन्यायेनोभयतः संबंध[illegible]।
लाचिति हेतुमाह मवधेयं प्रस्तावादिशब्दवद् हीयशब्दस्यापि भक्तिविशेषहेतुत्वादुद्गीथेनाप्यया ते च वोद्गात्रेकर्मणि प्रयुक्तत्वात्
कथमुद्गीथप्राणा इत्याशंक्याह उद्गीथो नाम मतिः नव पदस्योभयतः संबंधसामर्थ्यशब्दितस्य प्राणस्य प्रकृतत्वादिति हेतुमाह साममधिकाभा
दिति तत्राद्वउद्गीथशब्दस्य प्राणे वृत्तिस्तस्य तस्मिन्न च रूढमयोगादप्राणोनाप्राविधो गौणत्वयोगाच्च तेनेह वृत्तिरिति शंकते कथमिति योगमाह निद्दु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पेत्यपरिहरति प्राण इति उक्तं होवाचेत्यस्यार्थस्य वाचको निपातत्वादित्याशंक्याह होवाचेति तथापि कथं प्राणो वा उद्गीथ इत्युक्तं तत्राह प्राणेति
वा उ वै गौतम तत्सूत्रमित्यादि श्रुतेरित्यर्थः उद्गीथभक्तेः प्राह्न विशेषत्वेपि गीयावागिति कथमुच्यते तत्राह गायतेरिति अवधारणेसा
धयति नहीति तथापि कथं प्राणस्योद्गीथत्वमित्याशंक्या वागुपसर्जनस्य तस्य तथात्वं कथमयतच्चेति नहापीत्यादि वाक्यस्य प्रकृतानुप
योगमाशंक्याह होकार्थमिति उद्गीथदेवता प्राणो न वागादिरित्यत्र कोर्थं जीवति तत्वं श्रेषपुष्वेति स्मरणात्त्याह त्दैवं शेषे जीवति यो त्र प्रभृति यद्
यत्वं तद्ध्रुवं सेतत्कमिति इहैव क्रियापदं तिष्ठन्नि प्रकारं सूचयति तोरिति तत्प्रत्यक्षस्यायमाशिषि विषये ताताद्यादेशस्तु ह्यो स्तातङाशि
ष्यन्यतरस्यामिति स्मरणादित्यर्थः मूर्द्धपातप्रापकं दर्शयति यदीति अकृतत्वादित्यस्य प्रापकाभावाद्प्राप्तिरिति शंकते कथं तु ना
रिति उद्गीतस्यब्रह्मादि संनिधानाद्देवता प्रजापत्यादिलक्षणा किं तस्मिन्किं वा वर्णस्वरादि संनिधानान्नैवं तन्न हैवं तेति विप्रतिपत्तेरन्त्रे नैव
तवादित्वे शंकिते ब्रह्मदत्तः शापयेन निर्णयं चकारेत्याह होच्यत इति प्राणा होवाच अप्रकादृत्येनायास्योपक्षुगायदेति संबंधः तत्त्वायास्यो
गिरसप्रान्नवाग्योगश्च प्राणो देवतात्वाग्नो हातां भवितव्यस्मर ते तत्राह बुध्येति उक्तार्थं दार्ढ्याय तस्मेक शुपसंहरति विज्ञान इति उक्तरी
त्या शापयुक्तिपर्या प्राण एवोद्गीथदेवते त्यस्मिन्नित्विज्ञाने प्रत्ययो विस्रम्भसत्यसूयहार्वं तस्य कर्तव्यतामाख्यायिकया दर्शयति अतिरिति
यावत् आख्यायिकार्थं सैव वा चेत्यादिनोक्तेः पौनरुक्त्यमित्याशंकाह तमिममिति शापश्च स्वस्वातंत्र्येण प्रामाण्येपि श्रुतिमूलतया प्रामा ३०
ण्यमिद्धमितिभावः उद्गीथदेवता प्राण एवेति निर्द्धार्य स्वस्वर्णप्रतिहारागुण विधानार्थमनन्तरकं रिकाद्वयमवतारयति तस्येत्यादिना किमि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यादित्यो फलमभिलषतेत्यत आह फलेनेति सौश्वर्यं साङ्गोपाङ्गगुणेरूपयाज्ञात्तु भवमत्तुकूलयति तेनदीति कथं तर्हि किं गतेमाधुर्यं संपादनीयमि
त्याशङ्क्याह यस्मादिति प्राणो हं ममैव रतीति भावमापन्नस्य सौश्वर्यं धनमिति प्रकृते प्राणविज्ञाने गुणविधिर्विवक्षितस्तेन किमित्यगाढर
कामो यजेतेत्यादिवदिति नाद्यः पक्षो यथा प्राप्तत्वादात्मोपासनस्य तस्य तत्प्राप्तिश्च पुरुषविशेषापेक्षया विचारावसाने स्पष्टी भविष्यतीत्यर्थः इदा
नीमात्मज्ञानस्यापि विधेयत्वव्यापनार्थं वस्तुस्वभावालोचनया नित्यप्राप्तिमाह यस्मात्तदिति उत्पाद्यत्वाद्युक्तशक्तिभिरात्मविज्ञाने किं तावते
त्यत आह नवेति कारकादीत्यादिपदं तदवान्तरभेदविषयं नन्वविद्यायामपनीतायामपि रागद्वेषादिसद्भावाद्वैधी प्रवृत्तिः स्यान्न हि विद्वद्विद्व
षोर्व्यवहारे कश्चिद्विशेषः पश्वादिभिश्चाविशेषादिति न्यायादत आह तस्मामिति बाधितानुवृत्तिमात्रात्र वैधी प्रवृत्तिरबाधिताभिमानस्य
तरेण तदयोगादिति भावः विदुषः स्वयुमनवस्यत्वेऽप्यावर्तयति पारिशेष्यादिति श्रोतज्ञानात्पूर्वमपि सर्वो सांचिन्तवृत्तीनां जन्मनैवात्मचै
तन्यव्यंजकत्वात्प्रमात्मज्ञाने श्रौतेन ज्ञानेनास्यनात्मेति स्फुरणमात्मज्ञानमेवेति नित्यप्राप्तिमभिप्रेत्याह तस्मादिति अस्मिन्पक्षे इति
नित्यप्राप्तत्वपक्षोक्तिः अत एवं विधिवादीशंकते निष्फलत्वादिति सर्वेषां स्वभावतो विषयप्रवणानीन्द्रियाणीति नात्मज्ञानवार्तामपि पृच्छन्ते
तदप्राप्तत्वादात्मज्ञाने भवत्येवं विधिरिति भावः विशिष्टस्याधिकारिणः प्राप्तज्ञानेऽपाप्ताद्देवसिद्धमिति कथमप्राप्तिरित्याशंक्याह
तावेति नवत्वतत्वशाहुंज्ञाने विवक्षितं किंतपासनेनामानसंकर्मतदेवज्ञानाद्वृत्तिरूपत्वात् ज्ञानमित्येकत्वेऽसत्यप्राप्तत्वाद्विधेयमित्यर्थः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तयोरेकत्वविकल्पेति नेत्यादिना अनेनहीत्यादौ वेदशास्त्रस्यार्थान्तरविषयत्ववत्तस्य वेदत्वत्रापि किं न स्यादित्याशंक्याहानेनेति उक्तश्रुति
भ्यो यद्विज्ञानं कृतं तदुपासनमेवेति योजना सर्वोत्तरपक्षैकवाक्यतोपात्तस्योपक्रमादात्मेत्येवोपासीतेत्युपसंहाराच्च तस्य वेदत्वं च तावद्वेदशास्त्रस्योपा
सनार्थत्वमेवमस्मन्मते योपक्रमोपसंहारविरोधात् तयास्त्वर्थं विशमासंभवादुपासनमेव सर्वत्र वेदनं तच्च सर्वथैवाप्राप्तमिति तत्स्मिन्नप
र्वे विधिः स्यादिति भावः इतस्तत्स्मिन्नेवैकोविधिरित्याह तथेति अतः सर्वत्रैकोविधिरूपेपि शेषः सर्वत्रापि तत्प्राप्तविषयत्वान्नियमादि
रूपो न भवतीत्याह तस्मादिति आत्मोपास्तिविधेरप्यत्र हेतुत्वं तत्राह कर्मविधीति कर्मात्मज्ञानविध्योः शास्त्रानुसारेण विशेषमभिप्रेत्याति
यथेत्यादिना संग्रहार्थतोप्यविशेषमाह मानसेति तदेव दृष्टांतेन स्पष्टयति यथेति यदि क्रिया विधीयते कथं ज्ञानात्मिकेति विशेष्यते त
त्राह तथेति इत्यस्यात्मोपासने विधिरस्तीत्याह भावनेति वेदांतेषु भावनापेक्षितानां शब्दयोपपत्तिविशदयितुं दृष्टांतमाह यथेति भावना
या विधीयमानत्वे सतीति शेषः प्रेरणाधर्मकः शास्त्रव्यापारैः स्वज्ञानकरणकः स्वव्याप्तितानेति कर्तव्यताकः पुरुषप्रयत्नभाव्यनिष्ठः
शाब्दभावनोच्यते स्वर्गं यागेन प्रयाजादिभिरुपकृत्य साधयेदिति पुरुषप्रवृत्तिरर्थभावनेति विभागः दृष्टांतस्य समर्थं दार्ष्टांतिके योजयति
तथेत्यादिना त्यागो निषिद्धकाम्यवर्जनमुपरमो नित्यनैमित्तिकत्यागस्तितिक्षादीत्यादिपदं समाधानादिसंग्रहार्थमित्यपाश्रयमिति सं
बंधः शास्त्रश्रोतांतरत्यादि उक्तप्रकारेण श्रवणमननादिविफलमिति वक्रमादिपदं विधिपुरस्कारेण वेदांतानां कार्यपरत्वेपि तद्गीनानां तेषां
वस्तुपरत्वेत्याशंक्याह यथाचेति विध्युद्देशत्वेन तच्छेषत्वेनेति यावत् अश्वत्थादिवाक्यानामारोपितहेतनिषेधेनाद्वयवस्तुसमर्पयतां।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ०ने०
४६

कथमुपास्तिविधिशेषत्वमित्याशंक्याह नेतीत्यादिना ब्रह्मवेद ब्रह्मैव भवति तरति शोकमात्मविदित्यादीनां फलार्पकत्वेनोपास्तिवि
ध्युपयोगमभिप्रेत्याह फलं चेति मोक्षो ब्रह्मणः प्राप्तिः आत्मोपासनं विधेयमिति पक्षमुक्त्वा पक्षांतरमाहापर इति तस्या उपयोगमाशं
क्याह तेनेति शाब्दस्य ज्ञानस्यात्मस्वरूपापरोक्षात्मविषयत्वाभावमिति शाब्देनदेहत्करोति ज्ञानांतरं वेदांतेषु विधेयमित्यत्र मानमाहेत
सिद्धिरिति पक्षद्वये प्रागेवाप्राप्तत्वं पक्षे प्रत्याह नार्थांतराभावादिति तत्र तत्त्वमर्थस्य स्वयमेव व्याचष्टे नचेति शाब्दज्ञानवतो विषयाभावान्नवि
धिः संभवति अविद्यातत्कार्यनिवृत्तौ स्वयं फलावस्थत्वाच्चेत्यर्थः द्वैतभानं प्रसह्य पूर्वकं विवृणोति कस्मादित्यादिना आत्मोपदेशेनाना
प्तनिषेधद्वारा वाक्योत्थज्ञानातिरेकेणेति यावत् कर्तव्यांतराभावेपि वाक्याजन्यविज्ञानमेव विधेयं स्यादित्याशंक्याह नचेहीति दृष्टा
न्तेपि वाक्योत्थज्ञानातिरेकेणानुष्ठेयप्रवृत्तिरसिद्धेत्याशंक्याह नहीति तदनुष्ठाने नहि वाक्यार्थज्ञानाधानमिति तस्यार्थो विधिस्तत्राह न
चेति अधिकारो विधिप्रकृतिसंबंधस्तत्कृतज्ञानापेक्षमनुष्ठानमित्यर्थो वा त्विधिरित्यर्थः नहि प्रकृतेपि वाक्योत्थज्ञानव्यतिरेकेणानु
ष्ठेयव्यापारसंभवाद्विधेः साफल्यमित्याशंक्याह नत्विति अथ विमर्शप्रवर्तकं वैदिकज्ञानत्वाद्विधिवाक्योत्थज्ञानवदित्याशंक्य प्रवर्त
कविषयत्वमुपाधिरित्याह नहीति मिथ्याज्ञाननिवर्तकं वैदिकज्ञानमुपाध्यंतरमाहाब्रह्मेति वाक्योत्थज्ञानस्य तन्निवर्तकत्वेपि प्रवर्तक
त्वं किं न स्यादित्याशंक्याह नचेति द्वितीयोपाधेः साधनव्याप्तिं शंकते वाक्येति ब्रह्मात्मैकधीपरवाक्योत्थविज्ञानस्याज्ञानतत्कार्यध्वंसि
त्वध्रौव्यान्नसाधनव्याप्तिरित्याह नेत्यादिना नहादित्वाद्ब्रह्मपरत्वादिति यावत् उक्तानां वाक्यानां विध्यपेक्षितार्पकत्वेन तच्छेषत्वं शंकितमनू

४६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भाषते इष्टश्चेति सिद्धान्तोपक्रमे समाहितमेतदित्याह नेति तदेव स्पष्टयत्यात्मेति परोक्षत्वज्ञानं यस्यात्मतत्त्वरूपेति कृत्वतद्धि विधिनात्मज्ञा
नेवाक श्रवणेवा तदर्थं ज्ञानस्मृतिमेतानेवाचिन्त्यत्वहितिनिरोधेवानाद्यरित्याह नात्मवाहीति द्वितीयं शंकते तत्क्षवणेपीति अनिष्टार्थेका।
दिवाकस्यासत्यादित्वहानस्य विधिं विनाश्रवणवत्त्वमादेश्यपितस्माद्धेतोः श्रवणमविरुद्धमित्यभिसंधायदोषांतरमाह नेत्यादिना तत्व
मादिश्रवणप्रयोजको विधिरात्मनोपिप्रवृत्तेः श्रवणमिति चेन्नैवं स्वातंत्र्यपतनविधिरन्यो वा आद्येनदपेक्षयाक्षतं स्पतत्त्वमस्यादेः स्वाध्यायवि
धिर्न्वकर्मवाकावदिति स्वार्थे निष्ठत्वाविशेषो द्वितीयेनस्याप्रमाणत्वान्नदीयस्त्वपरनिर्वाहकत्वेद्दृष्टोनस्यादित्यभिप्रेत्यानवस्थाविरुणा।
ति यद्येत्यादिना तृतीयमाशंकते आकाङ्क्षजनितेति ततः साविधेयेतिशेषः तस्याविधेयत्वे दूषयति नेति अर्थप्राप्तिं विद्धरोति यदैवेति अना
त्मस्मृतिदेवज्ञाननिष्ठतो तत्कार्यस्य स्वत्वनुपपत्तेः स्वभावबलप्राप्तैवात्मस्मृतिरित्युक्तमिदानीमनात्मस्मृतेरनर्थत्वस्यान्वयव्यतिरेकसिद्ध।
त्वाच्चात्मस्मृतिः स्वभावप्राप्तेत्याह ह्यानर्थत्वेति अनात्मनोनर्थत्वनिश्चयाच्चतदीयस्मृत्यनुपपत्तावितरस्मृतिरर्थप्राप्तेत्याह ह्यात्मावगता विति
आत्मनश्च परमेष्टत्वावगमादर्थप्राप्तातदीयस्मृतिरित्याह ह्यात्मवस्तुतश्चेति अर्थप्राप्तानिविधेयत्वाभावमुपसंहरति तस्मादिति अनात्मस्मृ।
तिर्हेत्वज्ञानाभावादिरत्वहुह्यार्थः अर्थतश्चिदेकरसात्मस्वभावबलादिति यावत दृष्टफलत्वात्स्वात्मस्मृतिर्नविधेयेत्याह शोकेति मिथ्यात्वा
नमेव मानिवर्तयति नष्टोकादीत्याशंक्याह विपरीतेति आत्मस्मृतेः शोकादिनिवर्तकत्वमानमाह तथाचेति वर्तयंतुस्याप्यति निरोधस्त
हीति यदिवाक्योत्थज्ञानादेरविधेयत्वेतर्हि चित्तवृत्तिनिरोधोमुक्तिसाधनत्वेन विधीयतांतस्मोक्षज्ञानादेर्यांतरत्वादित्यर्थः बाधमेववि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्राने
८७

वृत्तेरेव मध्यायीति अर्थान्तरत्वात्तस्य विधेयतेति शेषः तस्य युक्तिहेतुत्वेन विधेयत्वे योगशास्त्रं संवादयति तं शान्तरेष्विति अथ योगानुशासनमि
तिः अथ समेदेतः समाधिः स च चित्तस्यैव लक्षणमुक्तं योगश्चित्तवृत्तिनिरोध इति तन्निरोधावस्थायामात्मनः स्वरूपप्रतिष्ठत्वे कैवल्यमाख्या
तेन तदा द्रष्टुः स्वरूपेऽवस्थानमिति एवं योगशास्त्रे युक्तिहेतुत्वेनेष्टो निरोधविधिरित्यर्थः योगशास्त्रादपि बलवतीं श्रुतिमाश्रित्याशङ्कमाह नेत्या
द्यादिना चित्तवृत्तिनिरोधस्य युक्तिहेतुत्वेपि न विधेयत्वं विधिं विना तत्सिद्धेरित्याशङ्क्येति तत्तावद्यथाकथंचित्तन्निरोधो विधेयः सर्वस्यापि
तत्संभवाद्विधिवैयर्थ्यं नापि सर्वात्मना तन्निरोधो विधेयो ज्ञानादेव तत्सिद्धेर्विध्यानर्थक्यादित्यर्थः नान्यः पन्था विद्यतेऽयनाय देवं मत्वा केवल्यमि
त्यादिश्रुतिषु शास्त्रमनुसरन्नुपेत्यवादं स्यजत्वभ्युपगम्येति निरोधस्य युक्तिहेतुत्वमिदमापराशङ्क्य योगशास्त्रमपि श्रुतिस्मृतिविरोधेन प्रमाणमेतेन
योगः प्रत्युक्त इति न्यायादिति भावः वेदान्तेषु विधेयाभावो ऽस्माकं विधिनिरपेक्षः संप्रत्यंशश्रवणजीभावनात्तेषु लीनमुक्ते हृदयमस्याकांक्षेति तदेवं
स्फुरयति शक्तमनुवदति यदुक्तमिति आगमावष्टम्भेन निराचष्टे तदसदिति विधिमन्तरेण वाक्यार्थज्ञाने प्रवृत्त्ययोगाद्दृष्टमेव ज्ञाने सर्वाक्रा
न्तानि वर्तकमित्याशंक्याह नचेति यथा कर्मकाण्डे स्वाध्यायविधेरर्थावबोधपर्यन्तत्वेन ज्योतिष्टोमादिविध्यर्थज्ञाने विध्यन्तरं नोपयुज्यते त
था ज्ञानकाण्डेपि स्यादित्यर्थः तथापि वेदः कृत्स्नोऽधिगन्तव्य इति विध्यन्तरप्रयुक्तमेव वाक्यार्थज्ञानमित्याशंक्याह विध्यन्तरेति स्फुटत्वान्यथा नक
स्वरूपसंपन्नाद्वन्विधिशेषत्वे वेदान्तानामित्याह नचेति वेदान्ताः स्वार्थे न प्रमाणं सिद्धार्थवाक्यत्वात् सोऽरोदीदित्यादिवदिति तत्र प्रमाणान्तरे कांक्षिविधिशेषत्वं
प्रामाण्यार्थमेष्टव्यमिति शंकते वस्तुस्वरूपेति तदेवानुमानेन प्रपंचयत्यथापीति विधेरस्फुटत्वेपीति यावत् फलवत्त्विति ज्ञानानान्नकत्वे

८७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

णाधिरितिमन्वानः समाधत्ते नविशेषादिति नन्वर्थं स्पष्टयति नवात्वस्येति विशेषं व्याचष्टे किंतर्हीति नस्य प्रामाण्यप्रयोजकत्वमन्वयव्यतिरेका
भ्यां दर्शयति नह्येवेति सामान्यस्याप्रयोजकत्वे योजयन्नाह किंचेति किंनेषु माहकज्ञानस्य व्याप्यत्वेन वेति यथार्थः द्वितीये उभयविरोधः स्या
दितिमत्वा पक्षांतरमनूद्य यस्या ह्यामेति प्रमाणपदे तस्य ज्ञाताज्ञाताप्रामाण्यमित्यर्थः निश्चितज्ञानजनकत्वेपि फलवत्त्वविशेषणमसिद्धमित्या
ह किंचेति विहद्वत्तुभयफलस्वरूपति सिद्धे विशेषणमिति भावः दृष्टांते विवादपदमपि तत्र यस्मात्तत्र यस्येति एवमिति वेदांतेष्वेवेति यावत् किंवा।
नेति शेषः प्राप्ते साध्यवैकल्यमत्वा द्वितीयं दूषयति नचेति तदिदं तद्दृष्टांते नतत्वमस्यादेरपि स्यादप्रामाण्यमित्याशंक्याह नतदप्रामाण्य
ति विमतेस्तार्थे मानेयथार्थोत्कज्ञानजनकत्वाद्दृष्टांतादिवाक्यवदिति भावः विपक्षे दोषमाह नतदप्रामाण्येवेति प्रवर्तकज्ञानजनकत्व[illegible]
[illegible] उपाधिरिति शंकते नत्विति साधनव्याप्तिं धुनीते ध्यात्मेति प्रवर्तकधीजनकत्वे धर्मिणि नास्तीत्यंगीकरोति सत्यमिति
नहि इयथार्थोपाधिसत्त्वात्तु मानान्तराभ्यां न मिथ्या शंक्याह नैषदोषइति नहि प्रवर्तकधीजनकत्वं प्रामाण्यप्रकारकं निषेधवाक्येष्वप्रामा
ण्यप्रसंगात् च निवर्तकधीजनकत्वमपि तथा प्रत्येकमुभयप्रकारणत्वाभावेनाप्रामाण्यादिति भावः वेदांतेषु प्रवर्तकधीजनकत्वाभावो
न केवलमदोषः किंतु गुणाय इत्याहालंकारश्चेति आत्मा न चेदित्यादि श्रुतेः तेनेष्टुर्धोल्यादि आत्मज्ञानेन कृतकृत्यता निद्रानेन च ज्ञानस्य
प्रवर्तकत्वेऽतएवोक्तं प्रवृत्तीनां क्लेशजनकत्वाद्दृष्टानर्थोत्कृष्टज्ञानजनकत्वे वा सानाभूषणमेवेत्यर्थः पाठोस्य ज्ञानेनविधेयमिति यदेतत्रमिति हि।
या एवोत्कृष्टमपक्षांतरमनूद्य दूषयति यद्यत्क्रमिति उपासनार्थत्वमित्यात्मोपासनेन निष्कृतालंकारभावयेदित्येवमर्थत्वमित्यर्थः प्रश्नुपगमवा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देनपरिहरति सत्यमिति यद्युक्तेषु ब्रह्मकोशात्मोपासनेन तस्याकारान्तरमुद्दिश्य विधीयते चेत्प्रकृतिवाक्येन तत्संभवात्तत्र शब्दे विधिरिति प्रकृ।
तोपमन्येतेत्याशंक्याह किंत्विति कथं न हि विध्यंगीकारस्तावता युक्तिरित्याशंक्याह यदेति यथापदे प्राप्तस्यावघातस्य व्रीहीनवहंतीति निय
मरूपो विधिरंगीकृतः तथात्मोपासनस्याप्यपदे प्राप्तस्यात्मैव कर्तव्यं नानात्मोपासनमिति यो नियमस्तदर्थः ततः प्रकृतवाक्यस्यापि नियमप्रक
मविरोधोस्तीत्यर्थः पाक्षिकीं प्राप्तिमुक्त्वा माक्षिपति कथमिति का पुनरत्रानुपपत्तिरित्याशंक्याह यावनेति आत्मनिवाक्योप्यविज्ञाने
सत्यनात्मस्मृतिहेतूनां मिथ्याज्ञानादीनामपनीतत्वाद्दुष्टत्वभावे फलाभावस्यावयेन तासामसंभवादात्मस्मृतिसंततिरेव तुनः सदात्मास्मृका
रोतरायोगादिति सिद्धांतितेनोक्तत्वादात्मोपासनस्य पदे प्राप्तिरित्यर्थः तस्यानित्यप्राप्तिमुक्त्वामंगीकरोति बाढमिति नहि नियमविधि
वाचोयुक्तीरित्येत्याशंक्याह यद्यपीति आत्मनि नित्यात्मोक्तसंविदेकताने स्मरणे विस्मरणे वा यद्यपि नोपपद्यते तथापि तयोस्तस्मिन्न
उभवसिद्धत्वान्नियमविधेः सावकाशत्वमित्याशयेनाह शरीरेति प्रारब्धफलस्यापि कर्मणः सम्यक्ज्ञानान्निवृत्तेर्न विरुद्धो वागा
दीनां प्रवृत्तिरित्याह लब्धेति यथा मुक्तस्येषुपाषाणादेरप्रतिबंधे यावद्वेगं प्रवृत्तिरवश्यंभाविनी तथा प्रवृत्तफलस्य कर्मणोत्ता नेनो
पनीयमानतया तेनाबलत्वमाह प्राहि देहेन्द्रियावश्यांगवागादिप्रवृत्तिर्ध्रौव्यमित्यर्थः प्रारब्धकर्मणाबले फलितमाह नेनेति प्रारब्धस्य कर्मणो यथो
केनव्याघेनप्राबल्येनहृष्णानत्वधादिदोषापरोद्भवति तदात्मनि विस्मरणादि संभवात्तत्तज्ज्ञानप्राप्तेः पाक्षिकत्वात्स्वरूपभाविकर्माप्येहयात्तदेदो।
वैलंक्षाद्भिरित्यर्थः प्रादिपदं ब्रह्मचर्यशमदमादिसंग्रहार्थं विज्ञायेत्यादिवाक्यानां नियमविधित्वमुपसंहरति तस्मादिति प्रादिपदेनप्रकृतम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पिवाकं संहृत्यते न कृत्स्नार्थमेव स्पष्टयत्यस्मार्थ इति प्राणन्नानादेवश्रमर्थमिति तत्स्य नदाह्वेतत्त्वीयत्वानस्यवाविधेयत्वाभावाद्देहान्तःगृहेस्थि
देहेर्थमात्मनमिसृक्तमिदानीमिति प्राहुर्यद्युक्तचोद्यस्यापयत्नात्मेति आत्मपाहोरूहमिति प्राहुर्योगादात्मशब्दार्थस्योपास्यत्वेनाविवक्षिते
त्वादात्मगुणकस्यानात्मनोऽव्याकृतप्राह्लितस्य प्रधानस्योपासनमस्मिन्वाक्ये विवक्षितमित्यर्थः उक्तमेवार्थं दृष्टान्तेन स्पष्टयति यथेत्यादि
ना प्रत्यात्मोपासनमेवात्र विधित्सितमित्यत्र हेत्वन्तरमाह आत्मेति तदेव प्रपञ्चयति परेणेति तत्रैवेलत्वं दर्शयति इहेत्यादि वेलत्वमेवानात्मा
देनिपरत्वेति वैलत्वएफलमाहात्तइति नात्रानात्मोपासनं विवक्षितमिति परिहरति नेत्यादिना हेत्वर्थं स्फुटयत्यस्यैवेति आत्मनस्तूप
पास्यत्वेन दाप्रक्रमविरोधस्यादिति शंकते यदिष्येति आत्मनोदर्शनप्रतिषेधं प्रकटयति यमेवेति नियमेदृष्टमाह पृष्टेति तक्तुस्य प
कृतपरामर्शित्वादात्मविषयस्य प्रकृतत्वात्तस्यैवोपास्यत्वादिति हेत्वर्थः एवं परं निगमयति तस्मादिति प्राणनादिविशिष्टस्य परिछिन्नत्वा
तस्यादृष्टत्वेपि दृश्यत्वस्य न दृष्टेतिनिषेधस्य विषयत्वसानात्रोपक्रमविरोधोस्तीति परिहरति नेत्यादिना तदेव विशदयति दर्शनेति कथ
मयमभिप्रायमेदः स्फुटेरवगम्यतेत्याह प्राणनादीति प्राणन्नेवेत्यादिना क्रियाविशेषविशिष्टत्वेनात्मनो विशेषणात्तस्य दृष्टत्वेपिनात्मोपरिशिष्
टोहदृष्टः स्यादिति स्फुटेरात्माश्रयोत्स्यते केवलस्यात्तुतस्योपास्यत्वमभिसंहितमकृत्स्नत्वदोषाभावादित्यर्थः उक्तमर्थं व्यतिरेकमुखेन साधयत्या
त्मवस्त्वेति तस्यात्तूपास्यत्वार्थमेतद्वचनमर्थं वदित्याशंक्यानेदृपास्यत्वनिषेधस्यात्मोपास्यत्वे पर्यवसानमभिप्रेत्याहानेकेति उपक्रमोपसं
हाराभ्यामुपास्यत्वमात्मनोदर्शितमिदानीमिति प्राहुर्योगादनात्मोपासनमिष्टमित्याशंक्य प्रत्याह यस्त्विति प्रयोगशब्दाहाउपरिहारान्तरमाह

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आत्मं॰
४८

हृष्यः इतिशब्दस्यघटोऽकार्यत्वाभावेदोषमाह॥ तथेति नचात्मनःस्वातंत्र्येणानुपास्यत्वार्थमितिशब्दोऽर्थवान्स्वार्थपरवाक्यविरोधादि
तिदृष्टव्यइतिशब्दस्यांतरेणवाक्यप्रयोगेदोषमाह तथेति नस्यशब्दप्रत्ययविषयत्वमिष्टमेवेतिचेन्नत्याह तद्धेति आत्मोपास्यत्ववाक्यबल
ल्लाभादनात्मोपासनमेतदित्युक्तंदूषयति यत्विति आत्मैवज्ञानकर्मानात्मेतिप्रतिज्ञायामप्रदीत्यादिनाहेतुरुक्तः संप्रतितदेतनस्यदनीय
मित्यादिवाक्यापेक्षयावोपपत्त्याएवात्मनिज्ञातत्वेति उत्तरमाह॥ त्रेति निर्द्धारणमेवास्मोरपरत्वमितितिनान्यादित्युक्तत्वादनात्मनोविज्ञात
व्यत्वाभावश्चेदनेनदीत्यादिशेषविरोधःस्यादितिशंकते किंनेति तस्माज्ज्ञेयत्वंनिषेधतिनेति तस्यापिज्ञातव्यत्वेनान्यादितिवचनमवकाश
मित्याह किंतर्हीति तस्यसावकाशत्वंदर्शयति ज्ञातव्यत्वेपीति आत्मनःसकाशादनात्मनोऽर्थांतरत्वात्तस्यात्मज्ञानात्ज्ञातव्यत्वायोगात्ज्ञा
तव्यत्वेज्ञानांतरमपेक्षितव्यमेवेतिशंकते कस्मादिति उत्तरवाक्येनोत्तरमाह॥ नेनेति आत्मन्यनात्मजातस्यकल्पितत्वात्तस्यतदतिरेकस्वरू
पाभावात्तज्ज्ञानेनैवज्ञातत्वसिद्धेर्नास्तिज्ञानांतरापेक्षेत्यर्थः लोकदृष्टिमाश्रित्यअनेनेत्यादिवाक्यार्थमाहयत्पति नन्विति आत्मकार्यत्वाद
नात्मनस्तत्सिद्धेस्तदभावान्नतज्ज्ञानेनज्ञानमुचितमितिपरिहरत्यसेति सामग्र्यभावादात्मतत्वस्यपदनीयत्वासिद्धिरितिशंकते कथमिति
प्रमत्त्यस्यापिश्रुत्याचाद्यार्थेद्रष्ट्रीक्रियाकारित्वसंभवादात्मतत्वस्यपदनीयत्वस्योपपत्तिरित्याह॥ यतइति विलिख्यतेनलब्धुमिष्टंप्रत्येषणो
पायत्वंदर्शयितुंपदेनेतिश्रुतनरुक्तिः अनेनेत्यत्रवेदेतिज्ञानेनोपक्रम्यानुविंदेदितिलाभशब्दार्थकीर्तिमित्याद्विश्रुतोऽप्युनर्ज्ञानार्थेनविंदेनोप
संहारादनुविंदेदितिश्रुतेरुपक्रमोपसंहारविरोधःस्यादितिशंकते नन्विति चेत्किंतेविरोधंनिराकरोति नेति कथंतयोरैकार्थ्यमित्याह॥

न

४८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नदेकत्वाप्रसिद्धेरित्याशंक्याह नैष्कर्म्यादित्यत इति ग्रामादावप्राप्तप्राप्तिरेव लाभो न ज्ञानमात्रेण तथात्रापि किं न स्यादित्याशंक्याह नेत्या
दिना ज्ञानलाभशब्दयोरर्थभेदस्तर्हि कुत इत्याशंक्याह यद्वदिति ग्रामात्मनि लब्धालब्धयोर्ज्ञाने नैव यथा भेदे क्रियाभेदान्न फलभेदसिद्धिः।
तदर्थः न त्वात्मलाभोऽपि ज्ञानाद्भिद्यते लभ्यत्वादनात्मलाभवदित्याशंक्य ज्ञानेनैव तन्मात्रानधीनत्वमुपाधिरित्याह सत्वेति प्रप्रासत्वेऽप्यक्री
करोत्यन्यादिति तद्वदवधानमेव साधयति कारकेति किं चानात्मलाभो विद्याकल्पितः कादाचित्कत्वात्स्वप्नवदित्याह सत्विति किं चास
दविद्याकल्पितो प्रामाणिकत्वात्संप्रतिपन्नवदित्याह मिथ्येति प्रकृते विशेषं दर्शयत्यपि त्विति वैपरीत्यमेव स्फोरयत्यात्मत्वादिति आत्म
नस्तर्हि नित्यलब्धत्वान्न तत्रालब्धत्वबुद्धिः स्यादित्याशंक्याह नित्येति आत्मन्यलाभो ज्ञाने लाभस्तु ज्ञानमित्येतद्दृष्टान्तेन स्पष्टयति यथेत्या
दिना शुक्तिकायाः स्वरूपेण गृह्यमाणाया अपीति योजना आत्मलाभो विद्यानिवृत्तिरेवेत्यत्रोक्तेऽवष्टम्भमाणं च गमकं दर्शयति तस्मादित्या
विरोधमुपसंहरति तस्मादित्यादिना तयोरेकार्थत्वेऽपि कथमनुविद्धे इति मध्ये प्रश्नमुत्थाप्य तत्राह विरक्तेति आदिमध्यावसानानामविरो
धमुक्त्वा कीर्तिमित्यादिवाक्यमवतार्य व्याकरोति गुणेत्यादिना इति शब्दादुपरिष्टाद्ध्येयस्य संबन्धः ज्ञानस्तुतिप्रस्तावविवक्षितज्ञानिना
मोहक्षयफललाभस्यानभिलषितत्वादिति शंक्य आत्मनः परनीयत्वे तस्यैवाज्ञातत्वसंभवाद्देहदृक्कोऽधुनातनेनैव हेत्वंतरत्वेनोत्तरवाक्यम
वतारयति ज्ञातश्चेति प्रत्यगात्मेति यावत् विरक्तस्य त्वेकैः प्रीत्यभावात् कथमात्मनस्तस्मात्प्रियतरत्वमित्याशंक्याह पुत्राद्धीति प्रियत
रमात्मतत्त्वमिति शेषः लोकदृष्टिमेवावष्टभ्याह तथेति विमलपदेन मात्रपवित्रत्वादेवमपि विविनक्ति गृह्यते विशेषणमानेनात्मन्यपकर्षेण

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ॰टे॰
५०

प्रश्नपूर्वकमित्याशयेनाह तथाप्यस्मादिति पुत्रादेः प्रीतिव्यभिचारेपि प्राणादेस्तदव्यभिचारादात्मनो न प्रियतमत्वमिति शंकते ननु कस्मा
दिति परांतरमादाय व्याकुर्वन्परिहरत्युच्यत इत्यादिना प्रकरांतरत्वे प्रियतमत्वसाधने हेतुरात्मत्वमित्यभिप्रेत्य विशेष्यं व्यपदिशति यद
यमिति आत्मनो निरतिशयप्रेमास्पदत्वे विकृतस्तस्यैव पदनीयत्वमित्याशंक्य वाक्यार्थमाह योऽन्यमित्यादिना पुत्रादिलाभे द्वारादीनां कर्त
व्यत्वेन प्राप्तप्रयत्नविरोधादात्मलाभे प्रयत्नः स्वकरो न भवतीत्याशंक्याह कर्तव्यमेवेति आत्मनो निरतिशयप्रेमास्पदत्वे युक्तिं सूचयति क
स्मादिति आत्मप्रियस्योपादानमनुसंधानमितरस्यानात्मप्रियस्य हानमननुसंधाने विपर्ययोनात्मनि पुत्रादावभिनिवेशेनात्मप्रिय।
स्याननुसंधानमिति विभागः युक्तिलेशं दर्शयित्वानंतरवाक्यमवतारयत्युच्यत इति यः कश्चिदात्मप्रियवादी स्वस्मादन्यं प्रियं ब्रुवाणं प्रति
ब्रूयादिति संबंधः वक्तव्यं प्रश्नपूर्वकं प्रकटयति किमित्यादिना आत्मप्रियवादिन्येवं वदत्यपि पुत्रादिनाशस्तद्वाक्यार्थो नियतो न सिध्यती।
त्याशंकयित्वा परिहरति स्वकस्मादित्यादिना ईशो ह्यवधारणार्थः समर्थपदादुपरिसंबध्यते तस्मादेवं वक्तरि विशेषः उक्तसामर्थ्यमनूद्य फ
लितमाह यस्मादिति यथात्मप्रियवादिना यथोक्तसामर्थ्यमेव कथं लब्धमित्याशंक्याह यथेति यतोऽन्यदार्तमित्यनात्मनो विनाशित्वा।
द्विनाशिनश्च दुःखात्मकत्वान्न प्रियत्वसंभ्रांतिमात्रत्वादात्मनस्तु हि परीत्यान्यूनप्रीतिस्तस्यैवानात्मनस्तु तदर्थेति भावः पदांतरमनूद्य दृ
ष्टप्रयोगाभावेन दूषयति ईश्वरश्चाह इति अनात्मन्यतुल्याप्रीतिरिति निश्चिते फलितमाह तस्मादिति पदांतरमनूद्य तत्फलं कथयति स
य इति प्रवादयोगात्कोऽहमाहुः प्रियमात्मानमेवं तस्यापि लौकिकप्रयोगवदवभासः स्यादेवात्मादित्याशंक्या(त)नित्यसार्थमनुवादमारभते विवक्षितः।

५०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मित्याह नित्येति फलस्य केवलत्वं तरमाह आत्मप्रियेति मत्तइत्तीदमात्मप्रियग्रहणं पूर्वविशिष्टस्य प्रियं न प्रणश्यति तस्मात्तत्र संधानेककर्त्तव्यमि
तिस्तत्त्वार्थं फलकीर्त्तनमित्यर्थः पदान्तरमाह प्रियशालेति येनांऽतः सन्नात्मदर्शी तस्य प्रियशालिविशिष्टात्मोपासने प्रियं प्राणादि तत्र न
श्यतीति फलं विधाने फलवचनमित्यर्थः तत्रात्मानं प्रियमुपासीनस्य प्रियं प्राणादि विद्यासामर्थ्यान्न नश्यति तथा च मंदविशेषणं म
हमित्याह नाह्यीलेति नाह्यीलेत्यर्थं विहितस्याकच्प्रत्ययस्य स्वार्थमात्रोपादानात् स्वभावहानायोगात् च प्रमरणशीलत्वाभावे पि प्राणादेरात्मं
तिकमप्रमरणमविवक्षितमित्यर्थः तदाहुरित्यादेर्गतेन ग्रंथेन संबंधं वक्तुं रंगकीर्त्तयति सवितेति तस्यां प्रमाणमाह यदर्थेति तदिह स
वज्ञाख्याने नैव सर्वोपनिषदर्थसिद्धेः तदाहुरित्यादिग्रंथस्य कोशेषमाह तस्येति विद्यासंवेद्याख्यानमित्युक्तेः तीक्ष्णं किंसचिन्त विद्याविवक्षित
प्रयोजनाभिधानायोपोद्घातं विकीर्षति प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थेनार्थान्तरोपवर्णनस्य तथात्वात् ह्रितं प्रकृतसिद्धार्थोपोद्घातं
प्रवर्त्तनइतिव्याख्यातिमित्यर्थः यतब्रह्मविद्ययेत्यादिवाक्यस्य चोद्यं तत्तु हेतोश्च ते प्रकृतसंबंधासंभवादित्याह तदितीति आश्रमस्य चो
द्यकर्त्तृत्वमाचनेयति ब्रह्मेति उत्तमेवघात्र ह्मवेदनेन कामावर्त्तमावर्त्तयितुं तदेव विशेषणं विभजते जन्मेति जन्म च जरा च मरणं च तेषां प्रबंधे
प्रवाहे चक्रवदनवरतं भ्रमणेन क्लेशदाशात्मकं दुःखं तदेवोदकं यस्मिन्नपारसंसारात्मिमस्तोरथो तत्र प्लवभूतं तत्साधनमितियावत् ता
तीरं तस्य संसारसमुद्रस्य तीरे परब्रह्मेत्यर्थः तेषां विविदिषायाः साफल्यार्थं तत्तस्यानीके संसारे वैराग्यं दर्शयति धर्मेति निर्वेदस्य निरंकुशा
त्वं वारयति तदिहलत्वरेति उत्तरवाक्यमवतार्य व्याचष्टे किमित्यादिना ग्रंथप्रयोगपातदहनमधिगम्यतइतिस्फुटत्वं तरमाश्रित्याह तदयेति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं.
५९
ब्रह्म २

मनुष्याधिकारत्वं तेनत्रविनिहूंवस्तुभातीतिसंबंधः मनुष्यग्रहणस्य कृत्यमाह मनुष्या इति ननुदेवादीनामपिविद्याधिकारो देवताधिकर
णन्यायेनवक्ष्यते तत्कुतोमनुष्याणामेवाधिकारज्ञापनमित्यत आह मनुष्या इतिविशेषणतः सर्वोविसंवादे नेतियावत् तथापिकिमिति
नैत्यानान्तु किंसिद्धवत्तद्ब्रुवंतीत्याशंक्याह यथेति उभयत्रकर्मणोरितियावत् उभयवाक्योपादाने तथेति मनुष्याणामनेन तत्कृतार्थः वस्तु
शाह्न तज्ज्ञानात्फलमुच्यते ग्राह्येपगर्भस्य चोद्यस्य प्रवृत्तौ विरोधप्रतिभासो हेतुरित्यतः शाब्दार्थः तद्धस्यपरिच्छिन्नमपरिच्छिन्नं चेति कुतो ब्रह्मा
णोचोद्यमेतदाह यथेति प्रश्नान्तरं करोति तत्किमिति ब्रह्मस्वात्मानमतासीदितिरिक्तं चेति प्रश्नस्य प्रसंगं दर्शयति यस्मादिति सर्वस्यव्य
तिरिक्तविषयेत्वाने प्र सिद्धं ततः किंविचारेणेत्याशंक्याह ब्रह्मचेति सर्वं खल्विदं ब्रह्मेत्यादौ ब्रह्मणः सर्वात्मत्वश्रवणादतिरिक्तविषयाभा
वादात्मानमवेदितिपदस्य सावकाशत्वेन्यर्थः किंशब्दस्य प्रश्नार्थत्वमुक्त्वा तेपार्थत्वमाह तदपरीति ब्रह्महि किंचिदज्ञात्वा सर्वमभवत् ज्ञा
त्वावा नाद्योब्रह्मविद्यानर्थक्यादित्यभिप्रेत्य द्वितीयमनुवदत्यथेति स्वरूपमन्यदाज्ञात्वा ब्रह्मणः सर्वापत्तिरितिविकल्प्योभयत्र साधारणं दूष
णमाह विज्ञानेति द्वितीये दोषान्तरमाह ज्ञानवस्थेति बहिरेवाद्वैतं परिहरति नतावदिति ग्रत्नात्वैव ब्रह्मणः सर्वभावोस्मदादेस्तुज्ञानादिति
शास्त्रार्थेवैहसर्वं नचास्मदादेरपि तदंतरेण तद्भावः शास्त्रानर्थक्यात् ज्ञानाद्ब्रह्मणः सर्वभावपक्षेस्वोक्तं दोषमादेष्मास्मारयति फलेति स्वरू
पेतापरिच्छिन्नं ब्रह्मविद्यानर्थक्यं संबंधात परिच्छिन्नं ब्रह्मज्ञानेनविशिष्टमौपाधिकं सर्वभावस्य साध्यत्वेन चानवस्थाते यान्तदानेगीकारान्नापि
क्रियाविरोधाविषयत्वमंतरेणवाक्यीयतद्विद्वैतोमुक्त्वारणादितिपरिहरति नैकोपीति एतेनविद्यावैयर्थ्यमपिपरिहृतमित्याहार्थेति य

५१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

घपि ब्रह्मापरिच्छिन्नं नित्यसिद्धं तथापि तत्त्वाविद्यातत्कार्यध्वंसरूपस्यार्थविशेषस्य ज्ञानादुपपत्तेर्न तद्वैयर्थ्यमित्यर्थः इदानीं प्रश्नमनूद्य
तदुत्तरत्वेन ब्रह्मेत्यादिश्लोकमवतारयति यदीत्यादिना तत्रच्छ्रुतिकृतां मतानुसारेण ब्रह्मशब्दार्थमाह ब्रह्मेति तस्यापरिच्छिन्नत्वात्तज्ज्ञाने
न सर्वभावसमाप्त्यत्वं संभवादिति हेतुमाह सर्वभावस्येति सिद्धान्ते यथोक्तहेतुनुपपत्तिदोषमाह नहीति सार्वज्ञ्यं विज्ञानसाध्यमाभू
दित्यनयाह विज्ञानेति हिरण्यगर्भस्य नोपदेशजन्यज्ञानाद्ब्रह्मभावः सदसिद्धं च तदुपपन्नमिति स्मृतेः स्वाभाविकज्ञानवत्त्वा[illegible]त्तस्मात्सा ग
र्वभवदिति चोपदेशाधीनधीसाध्योसौ श्रुतो न चासीदित्यतीतकालावच्छेदनिकाले तस्मिन्युज्यते हिरण्यगर्भः समवर्ततेति च जन्मना
ऽवगम्यते कालात्मके तस्मिन्वेधस्य तस्याश्वयपरात्तत्त्वान्मनुष्याणां प्रकृतत्वाच्च नापरं ब्रह्मरूपं ब्रह्मसद्भावमित्यपवितो काहं निकारमतेऽद्वित्वाद्ब्र
ह्मेति ब्रह्मभावी पुरुषो निर्दिश्यत इति भर्तृप्रपंचोक्तिमाश्रित्य तन्मतमाह मनुष्येति तदेव प्रपंचयति सर्वमित्यादिना हेतैकत्वं सर्वजग
दात्मकं परं हिरण्यगर्भाख्यं ब्रह्म तस्मिन्विद्यादि हिरण्यगर्भोरमित्यदं ग्रहोपास्तिलयाससुस्थितया तद्भावमिद्धेवोपगतो हिरण्यगर्भपदे
प्राप्तभोग्यं तत्तोपि दोषदर्शनाद्विरक्तः सर्वकर्मफलप्राप्त्यानिष्कामकामादिनिगरः साध्यानराभावाद्विद्यामेवार्थयमानस्तादृशो ब्रह्मभा
वीजीवोस्मिन्वाक्ये ब्रह्मशब्दार्थ इति फलितमाहात्त इति कथं ब्रह्मभाविनि जीवे ब्रह्मशब्दस्य प्रवृत्तिरित्याशंक्याह दृष्टश्चेति ग्रामादिशब्देन
गृहस्थः सहस्री भार्यो विदेतेत्यादिशब्दानेऽदृष्टेति प्रकृतवाक्यकथने भर्तृप्रपंचव्याख्यानेऽहषयति तन्नेति ब्रह्मशब्देन परस्मादर्थान्तरस्य ग्र
हे तस्य सर्वभावापत्तेः साध्यत्वादनित्यत्वापत्तेर्न तन्मतयुक्तमित्यर्थः साध्यस्यापि मोक्षस्य नित्यत्वमाशंक्य घनकृतकं तदनित्यमिति न्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रा.वे.
५२

यथाभिप्रायमाह नदीति ब्रह्मणा त्वन्यायेऽप्रत्यक्षेऽपि नित्येति भवतु सर्वभावानां परेण नित्यत्वं कारणानित्यत्वाद्वा नित्यत्वे चेति किं च जीवस्या
ब्रह्मत्वेन तत्त्वविद्याकृतं पारमार्थिकं वेति विकल्पाद्यमनूद्य दूषयत्यविद्याकृतत्वेति तत्रानुवादभागं विवृणोति मायिन्यादिना ब्रह्मभावि
त्वकृतत्वकल्पनायामर्थं स्फुटीकरोति नदेति तस्मिन्नात्मा देवघटस्य तत्त्वानात्स्वं सर्वमपि परमार्थतः परं ब्रह्मासीत् तदेव प्रकृतवाक्ये ब्रह्मशब्देनोक्त
इति द्वितीयं दूषणं तद्वि ब्रह्मशब्दस्य मुख्यमात्मत्वमिति योजना गौणो वा दीकरति वरस्य गौणोऽपि ब्रह्मशब्दो निर्वक्तव्य इत्याशंक्याह तथेति निरति
शयमहत्त्वं सम्यग्ब्रह्मत्वं ब्रह्मशब्देनोक्तं तच्च तत्त्वभावीत्यर्थः श्रुतो मुख्यत्वकल्पना तन्न्यायवती तस्मात्तत्कल्पनान्तरके विध्याव सर्वमा
ह नेतीति श्रुतिस्थाने तद्वाक्यविद्यादौ श्रुतहानप्रसक्तोपादानेऽदृष्टमित्याशंक्याह मरतवरइति तत्रापि शब्दस्य मुख्यार्थत्वे सत्यविद्यानिधाना
त्वध्यासावाक्यार्थासिद्धेस्तत्तत्ताने प्रयोजने श्रुतमपि हित्वा श्रुतं शृत्येन प्रकृतेत्वस्तित्प्रयोजनविशेषश्रुतत्वान्यादिर्न शुक्तिमानित्यर्थः
मनुष्याधिकारं निर्वोढुं ब्रह्मभावित्वकृतत्वकल्पने त्याशंक्य मरतवरविशेषणं यद्ब्रह्मविद्ययेति परस्यापि तत्स्वमुपपित्कृतत्वं तस्यापविद्याहा
नाधिकारानित्यमविहतुमित्ययेऽस्फुटीभविष्यतीति भावः द्वितीयं कल्पमुत्थापयति अविद्येति ब्रह्मविद्यावैयर्थ्यप्रसंगात्मैवमिति दूषयति
तत्त्वेति प्रत्युपपत्तिमेव साधयति नहीति साक्षात्कारोपमं तरेणेति यावत् वस्तुधर्मस्य परमार्थभूतस्य पदार्थस्य सम्यग्: विद्यायास्तर्हि कथ
मर्थवत्त्वमत आह तदविद्याकृतमिति सर्वेश्वरत्वादाविति यावत् किमत्र विद्यात्मकं विद्यानिवर्त्यत्वादित्यतोऽरिवदिर्म्यमिषेत्यस्यार्थेतिकमाह
तत्त्वेति विमतं तत्कारके विद्यानाकुतिविद्यावदित्यपाद्येनाह नदीति प्रत्रमत्वारे वो तत्त्वत्वयोगादपुरुषत्वाब्रह्मभावित्वकृतत्वकल्पने त्वपरं

५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हरति तस्मादिति ब्रह्मण एव विद्यानिवृत्तिर्विद्याफलमित्यभिप्रेत्य वचो रचयति ब्रह्मणीति न हि सर्वलोकप्रकाशकरसे ब्रह्मण एव ज्ञानमात्रे देहे तमो वद्रुप
पद्यत इति भावः तस्माज्ज्ञानत्वमसत्त्वेवाहि ह्यतेनाह तस्मादाह तस्मादिति न हि तत्त्वमसीति विद्याविद्यायां वितानेन ब्रह्मणि युक्तेऽपि पेषणप्र
संसारतत्त्वज्ञानत्वमेवेष्यमित्यर्थः ब्रह्मात्मैकमत्वात्तेशास्त्रेण ज्ञानाद्येतत हि वचं च श्रवणादिविधीयते तेन तस्मिन्ब्रह्मज्ञानत्वमेवेष्यमित्य
कुर्मयं हृष्टान्तेन साधयति नहीति मिथ्याज्ञानस्याज्ञानाव्यतिरेकाद्ब्रह्मण एव विद्याध्यारोपणायां शुक्तौ हृप्यारोपणं दृष्टांतमिति मितिदृष्ट
ष्टांकल्पांतरमालंबते न्यूनमिति ब्रह्माविद्याकर्तृत्वेन भवतीत्यस्य पर्यायाकृतो वार्थः तदन्यः तदाश्रयो नास्तीति चानन्याश्रयमंगीकरोति भवन्ति
ति अन्यदित्यादविद्यायाः कर्त्रपेक्षाभावादिनाच हारं ब्रह्मणेऽन्यत्वमनुपपन्नमादित्यर्थः द्वितीयप्रत्याह किंत्विति ब्रह्मणोऽन्यस्मिन्नेव ना
स्तीत्यर्थः फलिमलोकद्वारयति नान्योऽतोऽस्तीत्यादिना ब्रह्मणोऽन्योऽनेनेनोपि नास्तीत्यर्थमं वदंयपवति यस्त्विति ब्रह्मणोऽन्यस्मान्नस्माभावेदो
पमारोपकते नत्विति किमिदमानर्थक्यमवगतेनवगतेवाचोद्यतेतत्राद्यमंगीकरोति बाढमिति द्वितीयेनोपदेशानर्थक्यमवगमार्थत्वा
दितिदृष्टं उपदेशवदवगमस्यापि स्वप्रकाशेवस्तुनि नोपयोगोऽस्तीति शंकते पुनरागमेति प्रत्युभवमनुस्मरन्परिहरति नानवगमेति सा
वस्तुनोऽभिन्नाचेदद्वैतहानिरभिन्नाचेत्तन्नानाधीनत्वासिद्धिरिति शंकते नत्विष्टमेवेति पुनरवगमनिष्ठत्वेऽपि स्वरूपमानतयास्वरूपापलापयोगा
त्प्रकारांतरमंभवाच्च पंचमप्रकारत्वमेवेष्यमितिमत्वाह नदृष्टेति दृष्टमपि युक्तिविरोधे त्याज्यमित्याशंक्याह दृष्टमानमिति दृष्टवि
रुद्धमपि तत्तो नेष्टतेन आह नचेति युक्तिविरोधे हृष्टिराभासीभवतीति शंकते दर्शनेति दृष्टिविरोधे युक्तेरेवाभासत्वं स्यादिति परिहरति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ॰२.
५२

तथापीति श्रुत्युपपन्नत्वं हि सर्वस्य दृष्टिवशादिष्टं दृष्टस्य त्वनुपपन्नत्वेन किं चिन्निमित्तमस्तीत्यर्थः ब्रह्मभावि शुद्धत्वकल्पनं नित्यकृत्यव
पदेशात्तस्यार्थवत्त्वमुक्तं तं प्रतिप्रकारान्तरेण दूषयति श्रुत्येति श्रुतिरिशब्देनयागोर्थविज्ञानमयः प्राणेष्वित्याद्याश्रुतिर्गृह्यते उरुत्व
मेव तस्यानुमितत्वाद्यास्तुतिः न्यायो मिथ्यो विरुद्धयोरेकत्वायोगः विलक्षणत्वमन्यत्वे हेतुः जीवस्य परस्मादन्यत्वेपि न तस्य तत्त्वामन्यत्वमित्याशं
काह तद्विलक्षणत्वेति पश्य तद्विलक्षणत्वेष्वतिलोदृष्टं विना तत्रैवोपपत्तिमाह कल्पतेति कल्पितादिकमुपलब्धिमत्स्वत्वेन कार्यत्वात्
धेरवादित्याद्युपपत्तिः तयोर्मिथ्योभेदे हेत्वंतरमाह संसारेति जीवस्य स्वगतदुःखध्वंसे दुःखेस्मा भूदित्यर्थित्वेन प्रवृत्तिर्हि दृष्टा तेन शास्यास्ति।
दुःखाभावादतो भेदस्तयोरित्यर्थः इतश्चेश्वरस्य न प्रवृत्तिरिष्टफलयोरभावादित्याह ज्ञानाकीति मिथ्योभेदे श्रौतं लिंगान्तरमाह सोन्वेष्टव्य इति
तत्रैव लिंगान्तरमाह गुहां प्रविष्टाविति गतिर्देवयानादिमार्गस्तस्य मार्गविशेषो विरजादिर्देशो गन्तव्यं ब्रह्म तेषामुपदेशात् चिन्तनमभिसंभवंतीत्यादयः
तथापि कथं भेदसिद्धिस्तत्राह स्मृतीति मा भूत् गत्यादिरित्याशंक्याह तदभावे चेति कथं तर्हि गत्यादिकमुपपद्यते तत्राह भिन्नस्येति जीवेश्वरयो
र्मिथ्योभेदे हेत्वंतरमाह कर्मेति भेदे सत्युपपद्यमानं भवंतीति शेषः तदेव स्फुटयति भिन्नस्येति तद्वेद प्रामाणिकेपि कथं ब्रह्मभावि शुद्धत्वकल्पने
त्यागं कोपसंहरति तस्मादिति ब्रह्मभाविनो जीवस्य ब्रह्मशब्दवाच्यत्वे ब्रह्मोपदेशस्यानर्थक्यप्रसंगात् सैव मितिं दूषयति तेत्यादिना ग्रंथेन
मेव स्फुटयति संसारीचेदिति विधिशेषत्वेन ब्रह्मोपदेशोर्थवानिति चेत्तन्न किं कर्मविधिशेषत्वेनोपासनाविधिशेषत्वेन वा नाद्यं नवमितिविरि
कल्पनं दूषयति तद्विज्ञानस्येति अविनियोगाद्धि नियोजकक्रमाद्यभावादिति शेषः कल्पान्तरमाह तेन संसारिण इति उपदेशस्य नाथेना

५३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रत्वपेक्षत्वाच्च संपन्नेऽलसकर्षतादर्थ्यमित्याशंक्याह । निर्ज्ञातेनेति व्यतिरेकमुक्त्वान्वयमाचष्टे निर्ज्ञातेनेति परयोः सामानाधिकरण्येन जीवब्र
ह्मणोरभेदावगमाच्च संपन्नवतः संभवतीति समाधत्ते नेत्यादिना कथमेकत्वेनागम्यमानेऽपि संपदेरुपपत्तिरित्याशंक्याहानुपपत्तेरिति एकत्वे ह्येवर
मादेहमिति एकत्वफलितमाह तस्मादिति किं च संपत्तिपक्षे नटादापत्तिः फलमन्यद्धेतिविकल्पितत्वादितीयं प्रत्याह नचेति व्याचष्टे दूषयति संप
निरुद्धमिति तेयथायथेत्यादिवाक्यमाश्रित्याशंक्य तेवचनादिति संपन्नेरमानत्वान्नतद्बलादन्यस्यानन्यत्वमित्याह नेति नस्याः मानत्वेऽपि वे
मानस्याकारकत्वान्नवसवायुपासनादन्यस्यानन्यत्वेऽस्थितस्यानवरूपस्यवात्रोपपत्तेः श्रुतिश्च नरूपं सिद्धस्य आदिभावाभिधायिनी तस्यादृष्टा
ध्यानप्रयोगपचारादतो ब्रह्मभावः स्वतः सिद्धो न संपादिक इत्याह विज्ञानस्येति यथान्यस्यानन्यभावे यथोक्तं वचनमेव प्रमाणं साधकमित्या
शंक्याह नचेति ब्रह्मोपदेशानर्थक्यप्रसंगात् ब्रह्मभावविरुद्धकल्पनेऽयुक्तानत्वेवरेत्वंतरमाह सप्त इति ब्रह्मोपदेशस्य संपत्तिशेषत्वे
दोषांतरमाहेश्वायेति तदेव विवृणोति त्रिरूपमर्थमाचष्टे सैंधवेति यथोक्तं वस्तुनामर्थगम्यमस्यापुनर्विषदीत्यत्रदेहमाह कांदृशयेपीति
मधुकांडावसानगतमवधारणं दर्शयतीत्यत्रशासनमिति श्रुतिकांडानेवमवस्थितमुदाहरेतावदिति न केवलमुपदेशस्य संपत्त्वे
तेवृहदारण्यकविरोधः किंतु सर्वोपनिषद्विरोधोऽस्तीत्याह तथेति २०मयेमित्युक्तात्तद्बाधनेनिगमयति नचेति नतुहृहदारण्य
केब्रह्मकंडिकायां जीवपरयोर्भेदोऽभिप्रेतः उपसंहारेत्वभेद इति अवस्थायां न हि विरोधः शंकाः समाधानमित्यतआह तथाचेति ब्रह्मभा
विरुद्धकल्पनायामुपदेशानर्थक्यमित्याह बाधस्येत्यत्रकमिदानीं ब्रह्मेत्यादिवाक्ये ब्रह्मशब्देन परस्याग्रहणात् हिरण्यगर्भाब्रह्मविद्येतिसं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं.
५४

त्वानुपपत्तिर्दोषो न स्यादित्याह उपदेशानुपपत्तेश्चेति अथो कस्य ब्रह्मशब्दार्थो जीवादन्यस्तदात्मा न भिन्नश्चात्मशब्दे न परो गृह्यते न तद्विद्या च ब्रह्म
विद्येति संज्ञाप्रसिद्धिरिति शंकते आत्मेतीति वाक्यशेषविरोधान्नैवमित्याह नाहमिति न देवप्रपंचयन्नन्यस्येदिति यथोक्तावगमफलि
तमाह तथा च सतीति ऊर्ध्वं तम्भेदव्यपदेशानुपपत्तिं विशदयति संसारीति जीवब्रह्मणोर्भेदाभेदोपगमाद्भेदेन ब्रह्मविद्येति व्यपदेशः से
त्स्यतीत्याशंक्याह नचेति स्वात्मनो वा ब्रह्मात्मनो भेदाभेदोक्त्यापि भिन्नाभिन्नविद्या यो ब्रह्मविद्येति नियतो व्यपदेशो न स्यादित्याह नचेति नि
मित्तविशेषः भिन्नाभिन्नविषया विद्या ब्रह्मविषयापि भवत्येवेति व्यपदेशसिद्धिमाशंक्याह नचेति उभयात्मकत्वाद्वस्तुनस्तद्विद्यापि तथेति
विकल्पोपपत्तिमाशंक्याह नचेति वस्तुतोऽपि हि वस्तु ब्रह्म वा ब्रह्मवैकल्पिकमित्याशंक्याह श्रोतव्य इति संशयितमपि तत्त्वं वाक्यादुपपद्यते
वेनावगतेव पुरुषार्थः श्रोतः सिध्यतीत्याशंक्याह ज्ञात इति निश्चितस्यैव ज्ञानस्य पुरुषार्थसाधनत्वेन संशयितस्येत्यतः शब्दार्थः जीवपरयोर
त्यन्तभेदस्य भेदाभेदयोश्चायोगात्परमेव ब्रह्म ब्रह्मशब्दवाच्यं न जीवस्तद्भावी न कर्मसंप्रत्ययं तत्राभेदपक्षे दोषमाशंकते ब्रह्मणीति तदात्मानमेवा
वेदिति तु ज्ञातत्वे ब्रह्मण्युच्यते न दृष्टं तं स्यज्ञानपूर्वत्वात् तत्र च न तत्कर्मत्वमपि न च स्वकर्तृकस्वकर्मत्ता नानृत्तिः क्रियाकारकफलवि
क्षणत्वादतो न परं ब्रह्मशब्दितमित्यर्थः शास्त्रं ब्रह्मणि साधकत्वादि दर्शयति न च तापोऽरुषेयमदोषं नोपालंभार्हं तथा च तस्मिन्नविद्यके
साधकत्वाद्यविरुद्धमिति समाधत्ते न शास्त्रेति न चाशुद्धत्वस्य पारुषेयत्वेनासंभावितदोषत्वादिति शेषः ननु ब्रह्मणो नित्यशुद्धत्वं गम्यते
साधकत्वादि चाने नैवोच्यते न चाद्वैतं नीचशुचित्वं तथा च वास्तवं नित्यशुद्धत्वं कल्पितमितरदित्याशंक्य यदि तस्य नित्यशुद्धत्वादि सर्वं यदेव
नित्यशुद्धत्वपरिरक्षणार्थं शास्त्रमपि स्यात् लभ्यते ते नेत्याह नचेति शास्त्रं हि ब्रह्मणो २

२

५४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

साधकत्वादिनेष्यते न तदात्मार्थपरित्यागः सा स्वसाधकत्वादिना विनाभ्युदयतिः श्रेयसयोरसंभवाच्च ब्रह्मणोन्यः चेतनो चेतनो वास्ति नान्यो
नास्ति इत्याश्चैवेदं सर्वमित्यादिश्रुतेस्तस्याद्यधीनत्वमवस्थाश्रयत्वं किंच सर्वस्यापि संसारस्य ब्रह्मणएव विद्यया ध्वासान्तर्दृष्टत्वेन साधक
त्वाद्यपि तत्राध्यस्तमित्यभ्युपगमे काऽनुपपत्तिरित्याह नचेति नस्यात स्मिन्कल्पितत्वेऽऽतो वगतमित्याशंक्याह कथेति उक्तश्रुतिनान्य
र्थं सेकत्वयति सर्वो हीति सर्वस्य हि तत्रव्यवहारस्य ब्रह्मणि कल्पितत्वप्रकृतचोद्यस्याभासत्वफलतीत्याह इत्यत्वत्युमिति परपक्षं निराकृ
त्य स्वपक्षं दर्शयति नस्मादिति नह्यतिरेकेण जगन्नास्तीति सूचयति वैशब्द इति तत्पदार्थश्च क्वात्वं पदार्थैकत्वयतीदमिति नचाविद्य
नामेदं पश्यं किलात्वापदार्थं तं व्याचष्टे प्राणीति तस्यापरिच्छिन्नत्वमाह सर्वं चेति कथं तर्हि विपरीतधीरित्याशंक्याह किंत्विति यथा प्रतिभासं
कर्तृत्वादेर्वास्तवत्वमाशंक्य शास्त्रविरोधान्मैवमित्याह परमार्थतस्त्विति नहि लक्षणमध्यस्त संसाररहितमिति यावत् किंपुनस्तद्ब्रह्मेति
चोद्यं परिहृत्य किंच तद्ब्रह्मेति चोद्यांतरमुत्थाप्य तत्रथ्यापि विदिति सर्ववाक्योक्तमविद्याविशिष्टमधिकारित्वेन व्यवस्थितं ब्रह्म[illegible]ासिसंसा
रीत्याचार्येणदर्शयता कथंचित बोधितमात्मानमेव वाव दीतिसंबंधः आत्मैव प्रमेयस्तत्त्वज्ञानमेव प्रमाणमित्येवमर्थत्वमेवकारस्याविव
तस्मादविद्येति प्रकृतमात्मस्वरूपार्थं विविच्य वक्तुं पृच्छति कुहीति सप्रवर इह प्रविष्ट इत्यत्रात्मनोदर्शितत्वात्प्रमाणेनादिलिंगस्यतस्यत्वदेवा
नुसंधानेशक्यत्वान्नास्ति वक्तव्यत्वमित्याह नत्विति आत्मानमप्रत्यपि तं द्रष्टुं तत्परोक्षत्ववचनमनुपपन्नमिति शंकते ननु वसावित्रि आत्मा
नं चेत्ससाक्षादपि तमिच्छसि तर्हि यत्प्रमत्नमेव तं दर्शयामीत्याह नेदं तदिति नेदं प्रतिज्ञानुरूपं प्रतिवचनमिति चोदयति नन्वेति प्रत्यक्षत्वाद्दर्शना

द

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रानं॰
५५

ऽदिक्रियायास्तत्कर्तुः स्वरूपमपि तथेत्याशंक्याह नहीति यदि दर्शनादिक्रियाकर्तृत्वरूपोऽक्रिमात्रेण ज्ञानात्मनोपशाम्यति नहि हस्त्यादिसादि-
त्वेनात्मोत्मात्मच्छन्नभवानित्याह एवं तर्हि दृष्टेरिति एवं स्मान्मतिवचनाद् अस्मिन्नतिवचने दृष्टविषये विशेषो नास्तीति शंकते नन्विति विशेषाभावे
विशदयति यदीत्यादिना वरस्य दृष्टादृष्टेऽदृष्टेति विशेषे प्रतीयमाने तत्र भावोक्तिर्व्यर्थेत्याशंक्याह दृष्टव्यापेति तथादृष्टेऽपि विशेषाभावि
च्छतीत्याशंक्याह दृष्टाविति वृत्तिमदंतःकरणावच्छिन्नः सविकारो वरदृष्टाकृष्टस्य चिन्मात्रस्वभावः सन्निधिसत्तामात्रेण बुद्धिवृत्तीनां दृष्टेति
विशेषमंगीकृत्य परिहरति नेत्यादिना एतदेव स्फुटयत्यस्तीति समुपसीदृष्टारमधिकरोति दृष्टेर्दृष्टुस्तावत्त्वयमतिरेकाभ्यां विशेषं विशदय
ति योदृष्टेरिति भवतु दृष्टिसद्भावे दृष्टुः सदा दृष्टत्वं तथापि कथं कूटस्थदृष्टित्वमित्याशंक्याह नचेति नित्यत्वमुपपादयति नित्या चेदिति उक्तमुपप
परामर्शाद्यप्रमीकदाचित्के दृष्टृदृष्टत्वे दृष्टान्तमाह यथेति यथादित्यादेर्दृष्टिरपि कदाचिदेव दृष्टा दृष्टयेतेन सर्वदैव नित्यापत्यभावमाशंक्या-
ह नचेति विकारिणोऽग्निरस्या दृष्टत्वे क्रमदृष्टत्वमन्यथाऽदृष्टत्वे च दृष्टत्वं तस्मादिरिणो व्यावर्तमाने तस्मान्निर्विकारत्वेनानमयतीति भावः दृष्टिद्वयप्र
माणाभावादसिद्धमिति शंकते किमिति तदुभयमंगीकरोति बाढमिति तत्रानित्यां दृष्टिमनुभवेन साधयति प्रसिद्धेति उक्तमर्थमुपमाभ्यु-
ङ्गीकरोति नित्यैवेति ऽप्रतिनित्यां दृष्टिं स्फुटतया समर्थयते दृष्टुरिति नचैवोपपत्तिमाह श्रूयमाणाच्चेति तदेव विवृणोत्यंधस्यापीति ज्ञानादि-
नेव चक्षुरादिहीनस्यापि पुंसः स्वप्ने वा मननामय चक्षुरादिविषया दृष्टिरुपलब्धा या सा तस्मिन्काले च चक्षुरादिजनितदृष्ट्यभावेऽपि स्वयमविनश्यंतमनुभू- ५५
यते सा दृष्टुः स्वभावभूता दृष्टिर्नित्येत्यर्थः व्याविमतेनित्यमव्यभिचारित्वात्परेषामत्रवदिति प्रयोगोपपत्तेरित्यर्थः नन्वात्मा दृष्टिस्वभावश्चेत्कथं दृ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देहेंद्रियेष्वहंममतामाह नचेति नित्यत्वेहेतुरविपरिणामित्वं नचेति नित्यदृक्परिहर्तेस्वरूपभूतत्वेपेक्षेतस्याहंस्पतनापेक्षां वारयति स्वयमिति उक्तमवि
परिलुप्तत्वेचानकीकरणमिति आत्माहंदेहेंद्रियेष्विति स्थितेफलितमाहैवचेति यत्वस्तुतोनाचेतनोवेति विशेषः नित्यदृष्टिस्वभावमात्मपदार्थं परि
शोध्यास्मत्पदार्थं योजयति तदुक्तेति वाक्यशेषविरोधं चोदयति नत्विति किंकर्मत्वेनात्मनो ज्ञानं विरुध्यते किंवासाक्षित्वेनेतिवाच्ये
नाद्योनभ्युपगमादित्याह नेति नहितीयइत्याहैवमिति तदेवस्पष्टयत्येवंदेहेति नहिंतर्हि विषयं ज्ञानान्तरमपेक्षितव्यमिति द्वितीयो विरो
धोनशक्यतेइत्याशंक्याह नाज्ञानेति नहिप्रतिषेधरूपेण संबंधः संहितमर्थं विशिनष्टि नचेति नित्यस्वरूपत्वेतिशेषः विज्ञा
नत्वंचात्रवाक्यीयबुद्धिवृत्तिव्याप्यत्वमत्याह हिंस्फुरणलक्षणं आत्मविषयेस्फुरणाकांक्षाभावं प्रतिपादयति नित्वज्ञेनेहीति आत्मनिस्फु
रणसामान्यस्यासंभवेविस्फुरणस्ताकांक्षापशांतिरित्याशंक्याह नहीति किंचरूपविरूपणास्त्रणावारणेषिरूपेणनायनित्याह नचेति आदित्यप्र
काशरूपत्वादेरात्मप्रकाशकत्वाभावादिति भावः नहितीयइत्याह नचेति आत्मनोवृत्तिव्याप्यत्वेपिस्फुरणव्याप्यत्वानंगीकरणान्नवाक्य
शेषविरोधोस्तीत्युपसंहरति तस्मादिति वाक्यांतरस्याकांक्षाएवंक्रमादत्ते तत्त्वमिति तदर्थं राणिव्याचष्टे दृष्टेति इतिपदमवेदित्वेन
संबध्यते ब्रह्मशब्दंव्याचष्टे ब्रह्मेति ब्रह्मादेपदार्थयोर्मिथोविशेषणविशेष्यभावमभिप्रेत्यवाक्यार्थमाह तदेवेति आचार्योपदिष्टेर्थेस्व
त्यनिश्चयेदर्शयति यथेति इतिशब्दोवाक्यार्थज्ञानसमाप्त्यर्थः इदानींफलवाक्यंव्याचष्टे तस्मादिति सर्वभावमेवव्याकरोत्सर्वेति ब्र
ह्मैकानिवृत्यासंसरतिविविधयायाचपुनस्तरति पदस्यनिवेदित्वस्पसंहरति तस्मादुक्तमिति वृत्तिकीर्तयति यत्स्वमिति यथाग्निहोत्रादिम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रु.बे.
५६

तुच्छत्वादिज्ञानिमेतन्नमर्थित्वादि विशेषवन्तं चाधिकारिणमपेक्षते तेन तत्त्वज्ञानमिति वक्ते तद्योयोदेवानामित्यादिवाक्यान्तरहरणमाव
ष्टे तत्त्वेति यथोक्तेन विधिनान्वयादिकृतपदार्थपरिशोधनादिनेत्यर्थः ज्ञानादेव मुक्तिर्नसाधनान्तरादित्येवकारार्थः विवक्षितमधि
कार्यनियमं प्रकटयति तथेत्यादिना योयः प्रत्यगुद्यतमसमेव तदभवदिति पूर्वेण संबंधः अग्रैवाविद्यायां संसरति ये च्यते च विद्ययेत्यु
क्तत्वादेवादीनां विद्याविद्याभ्यां बंधमोक्षौ किं तद्विरुद्धेत्याशंक्याह देवानामित्यादीति तत्त्वदृष्ट्यैव भेदवचनेकाहानिरित्याशंक्याह
परइति ग्राविद्यमेदमनूद्य तत्तदात्मनास्थितं ब्रह्म चैतन्यस्यैव विद्याविद्याभ्यां बंधमोक्षौ नेत्येवां परविरोधाभीतिफलितमाहात इति
अविद्यादृष्टिमनूद्य तत्त्वदृष्टिमन्वाचष्टे परमार्थतस्त्विति अबोधात्स्वारोपितं तत्र देवादिशरीरेषु परमार्थतो ब्रह्मैवासौ हेतौपदेशिके ज्ञाना
नर्थकमित्याशंक्याहान्यथेति नानाजीववादस्यतत्रनावकाशः प्रक्रमविरोधादित्याशयेनाह तदिति तथैवेत्यनुभवज्ञानानुसारित्वप
रामर्शः तद्वैतदित्यादिवाक्यमवतार्य व्याकरोत्यस्मादिति मंत्रोदाहरणफलितमेवमर्थं ग्रहाराख्याचष्टे कथमित्यादिना ज्ञानान्मुक्तिरित्यस्या
र्थवादोयमिति योगसिद्धेः किलेत्युक्ते आदिपदं समन्तवामदेवस्तत्र फलहरणार्थं तत्रावान्तरविभागमाह तदेतदिति शास्त्रप्रत्ययप्रयोगप्राप्त
मर्थं कथयति पश्यन्निति लक्षणहेत्वोः क्रियायाइति हेतौ शतृप्रत्ययविधानान्नैरन्तर्यं च सति हेतुत्वसंभवात् प्रकृते च प्रत्ययबलाद्ब्रह्म
विद्यामात्रयोर्नैरन्तर्यप्रतीतेस्तयासाधनान्तरानपेक्षया लभ्यमोक्षं दर्शयति श्रुतिरित्यर्थः अग्रोदाहरणमाह भुंजानइति भुजिक्रियामात्र
साध्यातृप्तिर्निरन्तरप्रतीयते तथा पश्यन्नित्यादावपि ब्रह्मविद्यामात्रसाध्या मुक्तिर्विभातीत्यर्थः तद्वैतदित्यादिव्याख्यायतदिदमित्यादि वक्ता

५६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रयितं शंकयति तेयमिति ऐदंयुगीनानां कलिकालवर्तिनामितियावत् उक्तवाक्यमुक्तत्वेनावतार्य व्याकरोति नह्युत्पादनायेति
तस्मात्स्वधर्मं वारयति यज्ञसंभूतेति प्रविष्टं प्रमाणमनुक्रमं स्मारयति इष्टीतिव्याह नैवाहोवविषये हत्त्वकं साभिलाषमनेयमुक्तेश्या
र्कः एवं शास्त्रार्थमेवाहाहमिति तद्देवतानां विचूर्णनं व्यपोहति मत्सुख्यार्थमित्यादि तानेव परिपंथिनिकं थ ब्रह्मार्थमिति तानमित्याशो
कारोपाधीति श्रुहमित्यात्मतानेमत्तासिद्धमितिनतदर्थं प्रयतितव्यमित्याशंक्याह संसारेति केवलमित्यद्वितीयत्वमुक्तं तेनानय
ज्ञानफलमाह सोविद्येति यत्तद्देवादीनां महावीर्यत्वाद्ब्रह्मविद्याप्राप्तिः किमुतनास्मदादीनामल्पवीर्यत्वादिति तत्राह नहीति
श्रेयांसि बहुविघ्नानीति प्रसिद्धिमाश्रित्य शंकते कर्ममात्रेक्षेति शंकोत्तरत्वेनोत्तरवाक्यमादाय व्याकरोत्यनतञ्चाहेत्यादिना यथाके
नाप्युपायान्तरेण ब्रह्मवित्तानां विततिसंबंधः अपिशब्दार्थं कथयति किमुतेति अल्पवीर्याणामुत्तरविघ्नकरणे पर्याप्तानेति किमुत
वाच्यमिति योजना अपात्रप्रतिषेधाद्योगमभिप्रेत्य चोदयति ब्रह्मविद्येति शंकानिमित्तं दर्शयन्नुत्तरमाह तस्मादेष इति अधमर्णानिवो
त्तमर्णा देवादयो मर्त्यान्प्रति विघ्नं कुर्वन्तीति शेषः कथं देवादीन्प्रति मर्त्यानामृणित्वं तत्राह ब्रह्मचर्येणेति यथा पशुरेवं सदेवानामि
ति मनुष्याणां पशुसादृश्यप्रवणाच्च तेषां परतंत्र्याद्देवादयस्तान्प्रति विघ्नं कुर्वन्तीत्याह पश्विति अथो अयं वा आत्मा सर्वेषां भूतानां लो
क इति च तेषां सर्वप्राणिभोग्यत्वश्रुतेश्च सर्वे नन्वविघ्नकरा भवंतीत्याहाथो इति लोकश्रुत्यभिप्रेतमर्थं प्रकटयति आत्मन इति यथाध
मर्णान्मनुष्यानुत्तमर्णाः विघ्नमाचरंति तथा देवादयः स्वस्थितिपरिरक्षणार्थं परतंत्रान्कर्मिणः प्रत्यमृतत्वप्राप्तिमुद्दिश्य विघ्न

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्राने॰
५७

ष्कुर्वंतीति तेषां तान्प्रति विघ्नकर्तृत्वशंकाया अवकाश एवेत्यर्थः पशुनिदर्शनेन विवक्षितमर्थं विवृणोति स्वपशूनिति पशुस्थानीयानां
मनुष्याणां देवादिभिर्ग्रस्तत्वे हेतुमाह मत्स्वामिति इतस्त्वदेवादीनां मनुष्यान्प्रति विघ्नकर्तृत्वमशूनत्वप्राप्तेः संभावितमित्याह तस्मादिति
इतस्त्वतेषां तान्प्रति तत्कर्तृत्वमानीत्याह यद्येति स्वलोकोदरेः एवंविधं सर्वभूतभोज्योहमिति कल्पनावत्वं क्रियापदानुषंगार्थं चा
कारः ब्रह्मविदत्वेपि मनुष्याणां देवादिपारतंत्र्याविघातात् किमिति ते विघ्नमाचरंतीत्याशंक्याह ब्रह्मविदत्व इति देवानां मनुष्यान्प्रति
विघ्नकर्तृत्वशंकाया उपपादिताया उपसंहरति तस्मादिति न केवलं शुक्रदेहबलादेव किंतु सामर्थ्याच्चेत्याह प्रभाववंतश्चेति सामर्थ्या
च्चेहिंसाफलप्राप्तेस्तेषां विघ्नकरत्वेन हि कर्मफलप्राप्तावपि स्यादिति श्रुतिप्रसंगेणोक्ते तत्त्विति भवतु तेषां सर्वत्र विघ्नाचरणमित्यत आ
ह हंतेति श्रुतिविश्वंभो विश्वासाभावः सामर्थ्याद्धि विघ्नकर्तृत्वप्रसक्तेनंतरमाह तथेति श्रुतिप्रसंगानंतरमाह तथा कालेति विघ्नकरणे प्रभु।
त्वमिति शेषेण संबंधः ईश्वरादीनां यथोक्तकार्यकरत्वे प्रमाणमाह एषोहीति एष ह्येव साधुकर्म कारयति कर्म देवता हूचवत्तरित्यादि वा
क्यशास्त्रप्रसिद्धार्थः देवादीनां विघ्नकर्तृत्ववदीश्वरादीनामपि तत्संभवाद्देहार्थानुष्ठाने विश्वासाभावात्तदप्रामाण्यप्रसंग इति फलितमा
ह तेनापीति किमिदमवैदिकस्य चोद्यं किं वा वैदिकस्येति विकल्प्याद्यं दूषयति नेत्यादिना दृष्टादृष्टविपाकविषयाद्युग्राद्यादानदर्शनात्।
त्यागिनां सुखदुःखोदितारतम्यदृष्टेः स्वभाववादेवनियतनिमित्तोपादानवैचित्र्यदर्शनयोरनुपपत्तेस्तद्योगात्कर्मफलजगद्वैचित्र्य ५७
सिद्ध्यर्थः द्वितीयं प्रत्याह सर्वेति कर्महेत्वेन्याद्युष्कृतिः कर्मणा बध्यते जंतुरित्याद्यास्मृतिर्जगद्वैचित्र्यानुपपत्तिश्चान्यायः कथमेतावता।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देवादीनां कर्मफले विघ्नकर्तृत्वाभावस्तत्राह कर्मणोऽपीति कथं देवसिद्धिरित्याशंक्याह कर्मणः स्वोत्पत्तौ देवाद्यपेक्षाव्यतिरेकप्रयुक्तेन विशदय
ति कर्मदीति स्वफलेऽपि तत्स्वतन्त्रसापेक्षत्वमस्तीत्याह तद्वेति निष्पन्नमपि कर्म सर्वं कारकमनपेक्ष्य स्वफलदाने शक्तं न भवतीत्यर्थः
कर्मणः स्वोत्पत्तौ स्वफले च कारकसापेक्षत्वे हेतुमाह क्रियाद्यादीति कारकादीनामनेकेषां निमित्तानामुपादानेन स्वभावो निष्पद्य
ते यस्याः सा तथोक्ता तस्या भावः कारकाद्यनेकनिमित्तोपादानस्वाभाव्यं तस्मादुभयत्र परतन्त्रं कर्मेत्यर्थः देवादीनां कर्मापेक्षितका
रकत्वे फलितमाह तस्मादिति इतोऽपि कर्मफले नाविसंवादोऽस्तीत्याह कर्मणामिति एषां देवादीनां क्वचिद्विघ्नलक्षणे कार्ये कर्मणां
वशवर्तित्वमेव संप्राप्तिकर्मापेक्षत्वमन्तरेण विघ्नकरणेऽतिप्रसंगात्स्तोत्रादावपि सर्वत्र तेषां न स्वपेक्षत्वाद्वाच्य इत्यर्थः न तत्र तेषां कर्मवशवर्ति
त्वे हेत्वन्तरमाह स्वसामर्थ्येऽपीति विघ्नलक्षणे हि कार्ये दुःखमुत्पादयति न च दुःखमश्वेनापापानुपपद्यते दुःखविषये पापसामर्थ्यस्य शा
स्त्राधिगतस्याप्रत्याख्येयत्वात्तस्मात्प्राणिनामदृष्टवशादेव देवादयो विघ्नकारणमित्यर्थः देवादीनां कर्मपारतन्त्र्ये कर्मस्वतन्त्रत्वं चेन्न
स्यात्प्रधानगुणभाववैपरीत्यायोगादित्याशंक्याह कर्मेति एतस्य नामीषां नियतो गुणप्रधानभावोऽस्तीत्याह दुर्विज्ञेय इति इतिशब्दो
हेत्वर्थः यतो गुणप्रधानकृतो मतिविभ्रमो लोकस्योपलभ्यते तस्मात्सोऽदुर्विज्ञेयो न नियतोऽस्तीति योजना मतिविभ्रमे वादिविप्रतिप
त्तिं हेतुमाह कर्मैवेत्यादिना कथं तर्हि निश्चय इत्यत आह तत्वेति वेदवादादुदाहरति गुणेनावादिति ग्रावादिपदेन धर्मशब्दाच्च जेद्धूर्ध्वं मित्या
दयः स्वतिवादादिदृष्टान्तेन सर्वोदयवादसेवनादौ कालज्वलनसलिलादेः प्राधान्यप्रसिद्धेर्न कर्मैव प्रधानमित्याशंक्याह यद्यपीति प्रवै

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्राने. ५८

कौलिकत्वमप्रधानत्वेन तच्च हेतुमाह प्राप्तेति फलितस्यानिलत्वांशस्य त्वप्रदाहस्ते जगदैव विषयोपपत्तिन्यायः कर्मफले देवादीनां विघ्नकर्तृत्वे
प्रसंगागतं निराकृत्य विद्याफले तेषां तदाशंकितं निराकरोति नाविद्येति तत्र तन्नर्थश्रुत्यानुवादरूपं वक्ष्ये विशदयति यद्वत्ममिति तत्र प्रश्न
एवं केऽपि वोक्ता हेतुं स्फुटयति कस्मादिति आत्मनो ब्रह्मत्वस्य नित्यरूपाया मुक्तेरज्ञानध्वस्तिमात्रत्वात्तस्याश्च ज्ञानेनानल्पकालत्वात्त
स्मिन्सति तत्फलस्यावश्यकत्वाद्देवादीनां विघ्नाचरणेनावकाशो नास्तीत्यर्थः उक्तमेवार्थमाकांक्षापूर्वकं दृष्टान्तेन समर्थयते कथमि
त्यादिना ब्रह्मविद्यातत्फलयोः समानकालत्वे फलितमाह तत इति देवादीनां ब्रह्मविद्याफले विघ्नकर्तृत्वाभावे हेत्वंतरमाह यद्वेति
यस्यां विद्यायां सत्यां ब्रह्मविदो देवादीनामात्मत्वमेव तस्मात्कथं तेन स्वविघ्नमाचरेयुः स्वविषये तेषां प्रातिकूल्याचरणानुपपत्तेरित्य
र्थः उक्तमेवार्थं समनंतरवाक्यश्रुत्योपाख्याति तदेतदिति कथं ब्रह्मविद्यासमकालमेव ब्रह्मविद्देवादीनामात्मा भवतीत्यत आह विद्या
मात्रेति यथेदं रजतमिति रजतताकारायाः शुक्तिकायाः शुक्तिकात्वमविद्यामात्रव्यवहितं तथा ब्रह्मविदोऽपि सर्वात्मत्वं तन्मात्रव्यव
धानात् तस्माच्च विद्योदयानंतरीयकत्वेन निवृत्तेर्युक्तं विद्यातत्फलयोः समानकालत्वमुक्तं चैतत्प्रतिवचनदशायामित्यर्थः उक्तस्य हेतोरपे
क्षितत्वं दर्शयति ब्रह्मविदो देवाद्यात्मत्वे फलितमाह तत इति कैवल्ये तेषां विघ्नाकर्तृत्वे कृत्वा [illegible] तत्कर्तृत्वेत्याशंक्याह यद्यपीति तेषां।
निरंकुशप्रसरत्वं वारयति नत्विति सफलः प्रयत्नरहितः पूर्वोक्तसंबंधः तस्य निरवकाशत्वादिति हेतुमाह ब्रह्मेति ज्ञानस्यानंतरफलत्वेन।
तदज्ञाने निवर्तयेदज्ञानामिव तत्त्वज्ञानामपि ब्रह्मास्मीति ज्ञानसंततमभावाच्च बाध्यमेव ज्ञानमज्ञानध्वंसि प्रागितिबाधमपि प्रागादेस्तत्कार्यस्य च

५८

× ज्ञानस्यानंतरफलत्वात्तत्फले न देवादीनां विघ्नकर्तृत्वे शुक्तमुपेत्यास्त्ययुष्माः शंकते एवं तन्हीति ×२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दृष्टत्वादतो देहपातकालीनेन ज्ञानमज्ञानं निवर्तयतीति सिद्धो जीवन्मुक्तिरित्यर्थः । ननु ज्ञानस्याज्ञाननिवर्तकत्वं तत्स्थेन तेनैवा प्रथममेव स्यात्त्व
त्वादात्मविषयत्वाद्धानहेतुमितेति निर्विकल्पो भयचरदृष्टेनाभावेऽमत्वाद्वितीये दोषांतरमाह नप्रथमेनेति तदेवानुमानेन स्फोरयति यदिहीति
कल्पांतरं शंकयत्येवं तर्हीति अविच्छिन्नज्ञानसंततिरज्ञानं निवर्तयतीत्येतन्न दूषयति नेत्यादिना जीवनादिदेहकः प्रत्ययोनुवृत्तिलोदे
भोत्वेद मिथ्यादिलक्षणः तस्यानुभवादुपपन्नत्वप्रसंगात्स्मीत्यविच्छिन्नप्रत्ययसंततेस्तु विरुद्धत्वयायोगापद्यायोगे दोषमाह विरोधादिति प्रत्य
यसंततिश्रुपपाद्यद्याशंकते अथेति उक्तरीत्या प्रत्ययसंततिमुपेत्य दूषयति नेत्यादिना तमेव दोषं विशदयति इयत्तामिति शास्त्रार्थः ।
ज्ञानसंततिरज्ञानं निवर्तयतीत्येवमात्मकः प्रात्मेत्येवोपासीतेति फलेत्राम ज्ञानसंततिमात्रमसद्भावेन तो विद्याहारा विद्याध्वस्तिरिति शास्त्रा
र्थो निश्चसिद्धिरित्याह संततीति प्रात्माधीसंततेः सत्वेपि नसात्मविषयत्वाद्विद्याहारा विद्यां निवर्तयत्याद्यदि दिदृक्षणस्यात्माधीसंततेरभि
चारादिति परिहरति नायंतयोरिति एवं स्मिन्नत्ययेनाविद्यानिवर्तकत्वमंत्येतत्तयोरसके तत्संप्रयत्वात्तथात्वे चेद्दृष्टेनाभावः प्रात्मविषय।
त्वात्तथात्वे प्रथमप्रत्ययेऽभिचारः स्यादित्युक्तौ दोषौ प्राद्याः संततिर्नो विद्याध्वंसिनी चेत्सात्तत्र चेत्संगीकारेपि विशेषाभावादेतत्त्वात्तस्या
निवर्तकत्वे दृष्टेनाभावः प्रात्मविषयत्वाच्चेत्तदा वेत्वनैकांतिकत्वमित्येतावेव दोषौ स्यातामित्यर्थं विवृणोति प्रथमेति अंत्यप्रत्ययस्यतत्त्वे
तत्तेषामविद्यानिवर्तकत्वात्सर्वेषु प्रथमस्यापि तत्रापारातेऽस्ति स्यादयोगात्तत्ज्ञानेनाज्ञाननिवर्तकमेवेति चोदयत्येवं तर्हीति फलविरोधेन परिहर
ति ततस्मादिति तासामर्थ्यवादत्वेनाविवक्षितत्वं शंकते अर्थवादत्वमिति नेति अतिप्रसंगेन दूषयति तमेवेति यथोक्तफलानामर्थवादत्वे।

CC-0 Panjab University Chandigarh. An eGangotri Vaidika Bharata Initiative

आत्मे
५९

पिकत्वं सर्वेषामात्मोपनिषदां नानात्वप्रसक्तिरित्याशंक्याह तावदिति एतावन्मात्रार्थत्वे आत्मज्ञानानन्तरं ज्ञाननिवृत्तिरित्येतावन्मात्रस्यार्थस्य
सद्भावः अहंधीगम्ये प्रमेयचिन्तासाप्रवृत्तेः संवादविसंवादाभ्यां प्रमाणत्वायोगात् स्वत्वेवार्थवादत्वेनेति प्रसंगस्येष्टत्वं शंकते प्रत्यक्षेति प्रमाणान्तर।
रेधीगम्यत्वादात्मनस्तत्साक्षित्वेन तस्य वेदान्ताः ब्रह्मत्वं बोधयन्तीति न संवादादिशंकेत्याह नाहमिति विद्वदनुभवमाश्रित्यापि फलश्रुतेरर्थ
वादत्वे समाहितमित्याशंक्याविद्येति आत्मज्ञानस्यानन्तरं ज्ञाननिवर्तकत्वे स्थिते परमतस्य निरवकाशत्वं फलतीत्याह तस्मादिति चोद्यस्यानव।
काशत्वमेव विशदयत्यविद्यादीति ज्ञानसंततेरज्ञानस्य चाज्ञानध्वंसित्वासिद्धेरात्मवज्ज्ञानेनचेत्युक्तं प्रतिपरोक्तमनुवदति यत्तूक्तमि
ति दृष्टत्वाद्‌ज्ञानमज्ञानध्वंसीति शेषः प्रारब्धकर्मशेषस्य विदेहेऽस्थितिरिद्वत्त्वादिरुत्पापियावदारब्धं दृष्टरागाद्याभासाविरोधामत्त
त्येव देहाभासजगदाभासयोरभावान्नाद्यज्ञानस्याज्ञाननिवर्तकत्वानुपपत्तिरित्युत्तरमाह नतत्क्षेति तदेव प्रपंचयति येनेत्यादिना त
त्कृष्टस्यादित्यपतीत्यनेन संबंधः आक्षेपकत्वनियमं साधयति विपरीतेति मिथ्याज्ञानेन रागादिदोषेण च निमित्तेन प्रवृत्तत्वादिति यावत् त
थाभूतस्येत्यस्य विवरणं विपरीतप्रत्ययेत्यादिकमेवं चक्षुषा विशेष्यते तावन्मात्रं प्रतिभासमात्रं शरीरं प्रारब्धकर्मणो ह्यज्ञानजन्यत्वेन ज्ञाना।
निवर्त्यत्वाज्ज्ञानिनस्तनोर्देहाभासादि संभवतीत्याशंक्याह मुक्तेषुवदिति यथा प्रवृत्तवेगस्येषोर्वेगक्षयादेव पतनं बद्धस्य तद्वत्तस्याभोग
देवारब्धक्षयो भोगेन त्वितरेऽहपयित्वा संपद्यते इति न्यायाच्चज्ञानादित्यर्थः तद्धेतुकस्य विपरीतप्रत्ययादिप्रतिभासकार्यजनकस्येति यावत्
नतु ज्ञानमनारब्धकर्मवदारब्धमपि कर्म कर्मत्वाविशेषान्निवर्तयिष्यतीत्याह नेति अविद्यालेशेन सहारब्धस्य कर्मणो विद्यानिवर्त्ति

५९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कानभवनीत्यत्र हेतुमाह अविरोधादिति नहिज्ञानादारब्धकर्महीयतेतेनतद्विरोधित्वादविद्यालेशाच्चनतद्व्यवस्थितेरन्यथाजीवन्मुक्तिशा
स्त्रविरोधादितिभावः प्रारब्धस्यकर्मणोज्ञानानिवर्त्यकत्वेज्ञानेकर्मनिवर्त्यकमितिकथंप्रसिद्धिरित्याह क्वचिदीति प्रसिद्धिविषयमाह स्वा
श्रयादिति ज्ञानविरोधिपदंज्ञानकार्यमनारब्धकर्मज्ञानाश्रयप्रमात्राद्याश्रयादज्ञानान्यफलात्मनाऽज्ञानाभिमुखत्वेननिवर्त्यकेज्ञानमितिश
सिद्धिरविरुद्धेत्यर्थः विमतंनज्ञाननिवर्त्यंकर्मत्वादारब्धकर्मवदित्यनुमानादनारब्धमपिकर्मनज्ञाननिरस्यमित्याशंक्याहानारब्धत्वा
दिति अनारब्धकर्मफलरूपेणाप्रवृत्तत्वात्प्रवृत्तेनज्ञानेननिवर्त्यमारब्धंतुकर्मफलरूपेणज्ञातत्वान्नद्योगाद्धतेननिवृत्तिमर्हतीत्यनुमाने
त्वागमापबाधितमप्रमाणमित्यर्थः ननुनारब्धकर्मनिवृत्तावपिविदुषस्तदारब्धकर्मननिवर्त्ततेतथाचयथापूर्वंविपरीतप्रत्ययादिप्रस
ङ्गेविद्वदविद्वद्विशेषोनस्यादतआह किंचेति हेतुसिद्ध्यर्थंविपरीतप्रत्ययविपर्ययविशदत्वनवधृतेति संप्रतिविद्वद्विषयेविषयाभावाद्विप
रीतप्रत्ययस्यानुत्पत्तिमुपन्यस्यतिसचेति आश्रयस्याग्रहीतविशेषस्यसामान्यमात्रस्यालंबनस्येतियावत आश्रयस्येतिपाठेऽप्ययमेवा
र्थः विदुषोविपरीतप्रत्ययादिप्रतिभासेपिनयथापूर्वं तत्सत्वे यस्यतुयथापूर्वंसंसारित्वमित्यादिन्यायविरोधादितिमत्वोक्तेनपूर्वव
दितितत्रानुभवंप्रमाणयति शुक्तिकादाविति यथाज्ञानवतोविपरीतप्रत्ययाभावोऽनुभूयतेतथात्तद्वतोपिक्वचिद्विपरीतप्रत्ययोदृश्यते
तथाचकथंतत्रानुभवविरोधोनप्रसरेदित्याशंक्यपरोक्षज्ञानवतिविपरीतप्रत्ययसत्वेपिनापरोक्षज्ञानवतितदागर्हस्मित्यभिप्रेत्याह क्व
चिदिति परोक्षज्ञानाधारः सप्तम्यर्थः पंचमीत्वपरोक्षज्ञानार्थग्रकस्मादिन्यज्ञानातिरिक्तस्मसामग्र्यभावोक्तिः विदुषोमिथ्याज्ञानभा

विद्याया इति पंचमी

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्राव० ध्या ६०

बद्धस्याविपत्तेर्दोषमाह सम्यगिति तत्सर्वकर्मानुष्ठानमादिशब्दार्थः सम्यक्ज्ञानाविभ्रमे दोषांतरमाह सर्वे चेति ज्ञानादज्ञानध्वंसे तद्व
त्यमिति ज्ञानस्य सविषयस्य बाधितत्वान्न विदुषो रागादिरित्युपपाद्य ज्ञानान्मोहे तज्जन्ममात्रेण शरीरे स्थितिहेत्वभावात्पतेदिति सद्योमुक्ति
पदे प्रत्याह तेनेति प्रवृत्तफलस्य कर्मणो भोगादृते न क्षयो नास्तीत्युक्तेन न्यायेनेति यावत् आरब्धकर्मणो देहस्थितिशंका इतरेषां ज्ञानात्
निवर्त्यत्वमुपसंहरति ज्ञानेनात्मनेरिति तत्स्वहननेदेवाप्नुनेति विदुषो विद्याफलप्राप्तौ विघ्ननिषेधश्रुत्यनुपपत्त्या यथोक्तो यो भातीत्यर्थः
न केवलं श्रुत्यर्थापत्त्या यथोक्तार्थसिद्धिः किंतु श्रुतिस्मृतिभ्यामपीत्याह तीर्थे त्वेचेत्यादिना जीवन्मुक्तिं साधयन् ज्ञानफले प्रतिबंधाभा
वमुक्तः इदानीं पूर्वोक्तशंकाबीजमनुवदति यत्विति कर्मित्वं हि विदुषोऽविदुषो वेति विकल्प्याद्यं दूषयन् द्वितीयमंगीकरोति तत्रेत्यादि
ना कर्मित्वस्येति शेषः तदेव स्फुटयति अविद्यावानिति अविदुषोऽस्ति कर्तृत्वादीन्यनुमानमाह यद्वेति वक्ष्यमाणवाक्यार्थप्रकृतोपयो
गित्वेन कथयत्यनन्यादिति कर्मित्वं विदुषो नेत्यस्मिन्नंगीकृते तस्य नास्ति कर्तृत्वादीन्यत्रापि प्रमाणमाह यत्र त्विति विद्यायामस्यामवि
द्यायास्तत्कृतानेकत्वभ्रमस्य च प्रहाणे यत्र संपद्यते तत्तस्मादेव कारणात् केनेत्यादिना कर्मादेरसंभवं दर्शयतीति योजना प्रमाणसि
द्धमर्थं निगमयति तस्मादिति अविद्याविषयत्वमित्येतत्प्रपंचयन् विद्यासूत्रमवतारयत्येतच्चेति तद्गुणत्वमविद्याविषयं यथा
स्फुटं भवति तथा प्रत्यगात्मामित्याद्यनंतरं प्रपंचयिष्यते प्रथममित्यर्थः तद्द्वारेणाभाकरोत्यथेत्यादिना विद्यासूत्रानंतर्यमविद्या
सूत्रस्याथशब्दार्थः यागोऽयं धृत्यादिना हजावल्पप्रहारेनैवेद्यसमर्पणं प्रणिधानमैकाग्र्यध्यानं तत्तद्वैवौतरित्वप्रयवाहकरणं आदि

१ ६०

स्या नं १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परंब्रह्महिरण्यगर्भाख्यं भेददर्शनमग्रोपासनेन शास्त्रीयमित्यभिप्रेत्यैतदेव विवृणोत्यन्योसावित्ति तस्य मूलमाह न स इति वाक्यांतरमव।
तारयन्नाचष्टे न स केवलमिति सोविद्वानेव शुक्रहृष्टांतवशात्‌ मनुष्य॥रिव देवानां भवति तेषामध्येन सएकैके न बहुभिरुपकारैर्भोग्यत्वा।
दितियोजना पशुसाम्ये सिद्धमर्थं कथयत्यतइति अथानेनाविद्यास्त्वेण किंकृतं भवतीत्यपेक्षायामविद्यायाः संसारहेतुत्वस्त्वितमि
ति वक्तुमविद्याकार्यं कर्मफलं संक्षिपत्यनस्येत्यादिना कर्मसहायभूता विद्या देवतास्थानात्मिका अशास्त्रीयस्वाभाविककर्मणोपि हे
विध्यस्तत्रिविधं चशब्दः ननु सहकारिणी विद्या नशास्त्रीदर्शनादिरूपैवेति भेदः कथंपशुत्वे कर्मफलमविद्यावतः स्यादित्याशंक्याह
यथा वेति स चैद विध्य सिद्धयै विद्यात्तात्पर्यमनुक्रामति विद्यायावेति स्तजातराशंकां वारयति सर्वाहीति कथमेतदवगम्यतेनत्याह
यथेति मनुष्याणामविद्यावतां देवपशुत्वे स्थिते फलितमाह यस्मादिति तत्र प्रमाणत्वेनोत्तरं वाक्यमुत्थापनीयमेतदिति किमिदमविद्या
वतो देवादिपालनमित्याशंक्य वाक्यतात्पर्यमाहेमंइहादयइति अभिसंधिरविद्यावतः पुरुषस्येति शेषः एकस्मिन्नेवेत्यादि वाक्यमादा
यव्याचष्टे नचेति मनुष्याणां पशुभावात्‌ च्युत्यानमप्रियं देवानामिति स्थिते तदुपायमपि तत्त्वज्ञाने तेषां देवा विविद्विषतीत्याह तस्मादिति
तत्त्वविद्यायाः दौर्लभ्यत्वं कथं चेत्‌ नमस्कं मनुष्याणामुक्तार्थे देवानपृच्छतीत्यत्र प्रमाणमाह तथा चेति तेषां ब्रह्मविद्यया कैवल्याप्तिः स्वत
तामनिष्टेति भावः देवादीनां मनुष्येषु ब्रह्मज्ञानस्याप्रियत्वेपि किं स्यादित्याशंक्याह अतइति तेषां विघ्नमाचरतामभिप्रायमाहास्मादि
ति नहि देवादिभिरुपद्रुतानां मनुष्याणां पशुरिवेव नसंपद्येतेत्याशंक्याह यंतिति उक्तं हि नदेवादरमादायरहेति पशुपालवत्‌ यदिरहि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बृ॰आ॰
६१

तमित्युक्ते तदुद्याते योऽन्ययं तितमिति नहि किमिति नित्यमर्वो नैव देवानामहं हंतीत्याशंक्याह विपरीतमिति देवतापराङ्मुखमनुमोचयिषि
तमिति यावत् संप्रति देवाप्रियवाक्योक्तमर्थमाह तस्मादिति अविद्वत्त्वमनुष्येष्वेषु देवादीनां स्वातंत्र्ये तत्तशब्दार्थः श्रद्धादिप्रधानस्तदा
राधनपरः सन्देवादीनां प्रियः स्यान्नहि पशुस्य शक्ता वैफल्यादित्यर्थः तत्त्वीति विषयस्वतन्त्रत्सादामादिति वैराग्यं सर्वोऽपि कर्माणि स
न्नस्य विद्याप्रापकश्रवणादिकं प्रत्येकाग्रमनाः स्यादित्याह प्रमादीति श्रवणादिकमनुतिष्ठन्नपि वर्णाश्रमाचारपरो भवेदन्यथा विद्या
लब्धोऽपि फलेप्रतिबंधसंभवादित्याशयेनाह विद्यापतीति भयादिनिमित्ताधनैर्विक्रुतिः काऽत्रत्यत इत्याह काऽकस्विद्याविकारो यः शो
कभीत्यादिभिर्युक्तेति तथाकाम्यकापवस्तुतः स्वरक्षेपेन मयपवलत्वदेवादिभजनेकल्प्यते तात्पर्यमित्याह कान्केति ब्रह्मकेदिकामित्य
स्याख्योपब्रह्मवा इदमित्यादिवाक्यस्यातीतेन संबंधं वक्तुं वृत्तं कीर्तयति सविंतरेति शास्त्रार्थशब्दो ब्रह्मविद्याविषयस्तदाहुरित्यादिनोक्त
मनुवदति तस्यैवेति अर्थवादस्तथा योऽदेवानामित्यादिसंबंधो ज्ञानस्य सर्वोपनिषत्फलेन साध्यसाधनत्वमधिकारिणाश्रयाश्रयित्वमेकोन
विषयविषयित्वमिति विभागः अविद्यास्तैवेहानेकधयति अविद्यायाश्चेति संसारस्याधिकारः प्रवृत्तिरूपत्वाद्विरिति यावत् यथापशुरित्यादि
नोक्तमनुभाषते तत्रेति अविद्याधिकारः समाप्यर्थः तत्राविद्याकार्यप्रपंचयितमध्यायशेषप्रवृत्तिरितिमत्वा नोविद्याविवर्तंचाहवं[illegible]र
छिप्रकटनार्थं तदेतद्ब्रह्मेत्यस्मात्प्राक्तनेवाक्यमित्याकांक्षाया एवं क्रमाह किंपुनरिति ब्रह्म वा इदमित्यादिवाक्यमिदमापराकृष्णपतेवर्णाने।
वविशिनष्टि यदिमिमेवेति येर्नित्मि नैवेद्योऽस्मत्पादिभिः संबद्धेषु कर्मसु प्रथमविद्वानधिकृतः पशुरिव संसरतीति पशुनिदर्शनेनकृतो प्रसिद्धेत्ता।

ए
६१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तिनिमित्तानि दर्शयितुमुत्तरं वाक्यं प्रवृत्तमित्यर्थः अथेत्यध्यमंशं प्रदित्यत्रानुग्राहक देवतासर्गप्रक्रमात्प्रागेव सृष्टिकालेनेश्चादीनामत्व
विधाप्रस्तुतत्वात्तेषामेवोच्यते नतत्कः क्लृप्तेरभिप्रायस्तत्राह तस्येति एवमग्निसर्गानंतरमिंद्रादिसर्गो वाच्योपि नोक्तः फलाभावादित्यत्व विदुष
स्तत्कार्यं वर्णाद्यभिमानिनः कर्माधिकृतिरित्येतस्यार्थस्य प्रदर्शनार्थं नत्वाविषयकत्वविवदयामत्युत्पाद्यत इत्यर्थः अग्निसर्गोपि तर्हि
नवक्तव्यो विशेषाभावादित्याशंक्याह तमिन्निति प्रजापतेः सृष्टिसर्वेयेचेदग्निसृष्टिस्तेनोक्ताहं तेंद्रादिसर्गोपि तत्रैव वाच्योन्यथा
नदृष्टेरित्याशंक्याह अयं चेति तर्हि तत्रोक्तस्य कस्माद्वचोक्तिः पुनरुक्तेरित्याशंक्यातस्यैवार्थस्येत्यत्रोक्तस्यार्थस्य विहृतत्विति संगानिसृक्ता
वाक्यमाद्यं व्याचष्टे अथेति अथेतत्रादिसर्गोत्सवंमिति यावत् वैशाहस्यावधारणार्थत्वेवदत्वाकाशोक्तिः एवैकमेकमित्यस्यार्थ।
मारेहमिति द्वितीयमेवकारं व्याचष्टे नासीदिति कथं तर्हि तस्य कर्मानुष्ठानसामर्थ्यसिद्धिरित्याशंक्य समनंतरवाक्यं व्याचष्टे ननद्दति
तदेव सद्रूपमाकाशाद्याकारास्पष्टयति किंचनेति एकाचेतनतज्जातिः सृष्टा कथं तर्हि यान्येतानीति बहूक्तिरित्याशंक्याह तद्यक्तिभेदेति ने
तत्रजातेरेकत्वात्कथं तत्राणीति बहुवचनमित्याशंक्य जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामिति स्मृतिमाश्रित्याह जातीति
बहूक्तेर्गतिं तरमाह अन्नीति नासांबहुत्वाज्जातेस्तु तद्भेदात्तत्रापि भेदरूपचर्यं बहूक्तिरित्यर्थः तत्राणि बहुवचनमिति संबंधः तेषां।
विशेषतो ग्रहणात्तत्रचस्योन्नमनत्वं व्याख्यापयितुमिति मत्वा मः प्रश्नाह कानिपुनरिमानीति नन्वकिमिति देवेषु तत्र सृष्टिकृत्यत्वे ब्राह्मणस्य क
र्मानुष्ठानसामर्थ्यसिध्यर्थं मनुष्येष्वेव तत्सृष्टिरुपदेष्टव्येत्याशंक्याह तदन्विति तथापि विविच्य तामासृष्टिस्त्वेनोक्तवक्तव्येत्याशंक्योपपाद्य।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्राने.
६२

लोपमित्याह तदर्थ इति तस्मादित्यादिव्याचष्टे यस्मादिति तत्रस्यनियंतृत्वबहुत्वकर्षे हेतुं तत्रमाह तस्मादिति ब्रह्मेति प्रसिद्धंब्राह्मण्या
त्मेमिति यावत् उक्तमेव प्रपंचयति राजन्येति ग्रामसंघामचिकायां तत्रैस्वकीयंयशः समर्पयतो ब्राह्मणस्य निकर्षमाशंक्याह सैवेति
न योनिर्ब्राह्मणत्वस्यतत्त्वात् कुतो वा तरभेदः तत्रमपिक्रतकाले ब्राह्मणं प्राप्नोतीत्याशंक्याह तस्मादिति तत्रस्य ब्रह्माभिभवे होषश्च व
णोच्चतमस्तत्पेतयातत्तगुणत्वमित्याह यदिति प्रमादादपीतिवक्तेतशाहः यउपनेहिनस्तीति प्रतीकग्रहणं यस्तु पुनरित्यादिव्याख्या
नमिति भेदः ईयतेनत्वरवर्णस्य प्रयोगो हेतुमाह सर्वमपीति ब्राह्मणोभिभवे पापीयस्त्वमित्येतदुदाहरणेनद्रढयति यथेति क
र्वब्राह्मणस्य नियंतृत्वं तत्रियस्य स्रष्टृत्वात् किमुतरेणेत्याशंक्याह तदर्थ इति तद्व्याचष्टे कर्माणीति ब्रह्म ब्राह्मणोस्मीत्यभिमानी गृहस्थस्तया
तत्रमगोनश्वर्वमिवेतियावत् कथंतर्हि लौकिकसामर्थ्यसंपादनद्वाराकर्मानुष्ठानमतआह सविशमिति देवजातानीत्यत्र तकारो निष्ठा
गणंगणशकृत्वाकिमित्यायोनेविशामित्याशंक्याह गणेति विशांसमुदायप्रधानत्वमद्यापि प्रत्यक्षमित्याह प्रायेणेति कर्तृपालयितृरथ
नाजेयित्वगणे स्रष्टृत्वात् कृतेवर्णेतरस्रष्टेत्याशंक्याह सपरिचारकेति शौद्रं वर्णमसृजतेत्यत्र शौकारो वृद्धिः पूषतीति एषेत्स्मृत्वात्वस्या
नवकाशत्वमाशंक्याह विशेषत इति एषशब्दस्यार्थान्तरे प्रसिद्धत्वात् कथं पृथिवीत्वमित्याशंक्याह स्वयमेवेति तत्रचातुर्वर्ण्यस्रष्टृता
वतैवकर्मानुष्ठानसिद्धेरलं धर्मसृष्ट्येत्यतआह सचतुर इति अनियतताशंकयानियामकाभावेतस्यानियतत्वसंभावनयेतियावत् तत्सृष्टः
स्पष्टब्रह्मविषयः कुतो धर्मस्य सर्वनियंतृत्वं तत्रस्यैव तत्प्रसिद्धेरित्याह तत्कथमिति यतभवमतृस्त्यपरिहरमध्यतस्मादिना तदेवोदा

६२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हेतु
तं

ष्ट इति यद्येति गतार्थस्यैमानं इति शेषः धर्मस्योत्कृष्टत्वेन नियंतृत्वे सत्यादभिन्नत्वे देवत्वं तत्रमाह यो वा इति कथं धर्मस्य सत्यत्वं सदृश्यरुद्ध
धर्मो वचनधर्मः सत्यत्वमित्यवांतरभेदादित्याशंक्याह सपवेति यद्योके विवेके लोकप्रसिद्धिप्रमाणयति यस्मादिति उभयशब्दो धर्म
सत्यविषयः धर्मं वदतीत्येतदेव विभजते प्रसिद्धमिति यथाशास्त्रानुसारेण वदंतं धर्मं वदतीति वदंति तथा एवं वा कृवदन्नवैपरीत्येन धर्मं
वदंतं सत्यं वदतीत्याहुरिति नियोजनाधर्ममेव व्याचष्टे लौकिकमिति सत्यं वदतीत्येतदेव स्फुटयति शास्त्रादिति कार्यकारणभावेनान्व
योरेकत्वमुपसंहरत्येतदिति शास्त्रार्थसंशये शिष्टव्यवहारान्निश्चयो यथा व्यवहारादिशास्त्रेषु धर्मसंशये व्यशास्त्रार्थवशान्निर्णयोय
थाचैत्यवं दत्वादिश्रुतासेनाग्निहोत्रादावनेोरेकमज्ञावादुभयोरेकमितिभावः धर्मस्य सत्यादभेदं फलितमाह तस्मादिति तस्य सर्वे नियं
तृत्वेपिप्रकृते किमयातदाह तस्मात्सत्य इति नहि यथोक्तधर्मवशादेव कर्मानुष्ठानसिद्धेर्वर्णाश्रमाभिमानस्य किंचित्करत्वमित्याशं
क्याहातत्र इति धार्मिकत्वाद्यभिमानोब्राह्मणाद्यभिमानेऽवरोधायानुष्ठापकस्यैतदभिमानोपि तथैवाभिमानांतरे ऽत्ररक्तत्वादनुष्ठापये
दित्याशंक्याह नातिचेति न त्वत्त्वविदुषो धार्मिकस्य ब्राह्मणादिशुनिमित्तेषु सत्सु कर्मप्रवृत्तो निमित्तांतरमपेक्ष्यते प्रमाणाभावादित्य
र्थः ॥ पुनरुक्तिवैयर्थ्यमाशंक्योक्तसूत्रार्थ इति हर्षवद्देवेषु दर्शितस्य वर्णविभागस्य मनुष्येष्वप्युपयोजनार्थ इति यावत् तस्य अर्थ
वतत्वमिति विशेषं वर्णांतरविभागमभिधातुमारभते यदिति पुनरेन देवांतररूपेण तद्याति विकारमंतरेणेति यावत् विकारांतरमग्निश्च
स्य लवणं हविर्विशेषणात्मत्वविवक्षितमर्थमाहें द्रादिदेवताधिष्ठितं इति वैश्येनेति वस्वाद्यधिष्ठितत्वं वृष्यते पूर्वेणेति रुद्राधिष्ठितत्वं स्ना

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पेज्ञा २

श्र्न.
६३

आदिभावमापन्नस्य तत्त्वादिभावो न तत्त्वादिभावमापन्नस्य प्रयादिभावस्त्येनानन्यात्रेण ब्राह्मणो विकृतत्वाविकृतत्वमग्निब्राह्मणस्तन्म
र्थ उक्तमित्यभिप्रेत्य तस्मादित्यादि व्याचष्टे यस्मादिति यथोक्तप्राधान्यायाः स्यात्मनःसाधयति तदर्थमेवेति कर्मफलदानार्थमितियावत् मनु
ष्याणां मध्ये कर्मापि मनुष्यमवलंब्य कर्मफलभोगायेकायामधिकरणसंप्रदानतावेनावस्थिता ग्रीरादिनिमित्तक्रियापेक्षा नास्ति किं तु ब्राह्मण
जातिमात्रनिमात्रेण तत्स्यात्ति बद्धजन्मादिकमीवधूपंभावीति तन्मात्रेण पुरुषार्थः सिद्ध्यतीति प्रतीकग्रहणपूर्वकमाह मनुष्याणामिति उक्तं त
र्हि यथोक्तक्रियापेक्षित्वे तत्राह यद्वत्विति देवानां मध्ये ग्निसे वह्नमेव कर्म कृत्वा पुरुषार्थलाभो मनुष्याणां मध्ये तु ब्राह्मणस्य उक्तजन्मा
दिमात्रेण तत्सामित्यत्र प्रमाणमाह स्मृतेश्चेति जन्मग्रहणं जातिमात्रप्रयुक्तकर्मफलत्वार्थं ग्रन्थदग्निसेबंधकर्मकोर्यब्राह्मणेनामत
त्राह मैत्र इति सर्वभूतेभ्यभयप्रदो विशिष्टजातिमानिति यावत् नन्वयथोक्तस्य तेब्राह्मणप्रतिलेन मात्रात् मुपयलाभेपि कृतस्तेनो निश्रेयसि
द्धिस्तत्राह परिव्रजेति ब्राह्मणाव्युत्थायाथ भिक्षाचर्यं चरन्तीति ब्राह्मणस्य पारिव्राज्यं श्रूयते तच्च संन्यासाद्ब्रह्मणस्थानमिति ब्रह्मलोक
साधनं गम्यते अतश्च ब्राह्मणजातिनिमित्तं लोकमिक्तीति युक्तमित्यर्थः ब्राह्मणमनुष्येष्वित्यस्यार्थमुपसंहरति तस्मादिति देवाकाम
दायव्याचष्टे यस्मादिति हिशब्दार्थो यस्मादित्युक्तो यस्तु पूर्वस्मतदेताभ्यां यस्मात्साक्षात् भवत्तस्माद्यावेवेत्यादि युक्तमिति योजना ग्रन्थे तु
त्वा ब्राह्मणे रूपा परमात्मलक्षणं लोकमात्मनमिक्ष्तीति मर्दे प्रपंच व्याख्यानमनुवदन्नपचेति मममीनस्यादित्यादिवाक्यविषयासक्तमालोचना
यां कर्मफलमिह लोकशब्दार्थो न परमात्मासक्तमभंगप्रसंगात् दर्शयति तदस्मादिति कर्माधिकारार्थं कर्मस्वप्रवृत्तिसिद्ध्यर्थमिति यावत्

पु

स

६३

पा ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वाक्यशेषगतविशेषणावष्टम्भादपि कर्मफलस्यैवात्र लोकशब्दवाच्यत्वमित्याह परेणेति तदेव प्रपंचयति यदिहेति परपदेत्यमिति वि
शेषणं व्यावर्त्याभावादनुपपन्नं तत्तेवैत्यत्वेऽपि कथं तदुपपत्तिरित्याशंक्याह स्वलोकेति परशब्दोनात्मविषयः नन्वप्रकृते वाक्ये लोकशब्देन परमा
त्मा नोच्यते चेदुत्तरवाक्येऽपि तेन तन्नोच्यते विशेषाभावादित्याशंक्य विशेषणसामर्थ्यान्नैवमित्याह स्वत्वेनेति कर्मफलविषयत्वेनापि विशे
षणस्यैनेतदप्राकृतत्वान्न विशेषसिद्धिरित्याशंक्याहाविद्येति तेषां स्वरूपव्यभिचारे वाक्यशेषं प्रमाणयति ब्रवीति चेति उत्तरवाक्यव्याख्या
येऽवयवं पदमाह ब्रह्मणेति तस्योत्तरे चेतनमकिंचित्करमित्याशंक्याह तच्चेति सर्वैः पववर्तैः स्वस्य कर्तृत्वं यातान्प्रति नियंतृत्वेति यो
जनात्तस्य प्रमर्थोपायत्वप्रसिद्धिमादाय फलितमाह तस्मादिति प्रविदितोऽपीतिच्छेदः देवताराधनकर्मभुक्तिरेतदिति पदद्वयं ततो तदुत्तरवा
क्यव्याख्यायति ग्रतद्धारेति ज्ञानादेव मुक्तिर्नकर्मणेत्यागमप्रसिद्धमिति निपातयोरर्थः तत्त्वनिमित्तमुपादानं चेति द्वयं संहितप्रविद्ये
ति निमित्तं विभूत्योः तमप्यधीनेति आत्माख्यस्य लोकस्य स्वत्वे हेतुमाहात्मत्वेनेति यद्ब्रह्मास्मीत्युदस्त्विति संबंधः यः परमात्मानमविदित्वे
वस्थितेनतमेव परमात्मानं पालयतीति योजना परमात्मनः स्वरूपत्वादविदितस्यापि पालयितृत्वं स्यादित्याशंक्याह स यद्यपीति लोकश
ब्दादपरिच्छिन्नव्यापीति इदं च अविदित इत्यस्य व्याख्यानमविद्ययेत्यादि परमात्माख्यो लोको नात्मनो भुनक्ति यथा कर्मफलभूते लोके वैधर्म्य
दृष्टांततया दर्शयत्यन्यत्र खल्वेति अज्ञातस्यापालयितृत्वे साधर्म्यदृष्टांतमाह संक्षेति यथा लौकिको दशमोऽस्मीति अज्ञातो न शोकादिनिवर्तने
नात्मानं भुनक्ति तथा परमात्मापीत्यर्थः तदेव स्पष्टयंश्च दृष्टांतद्वयं व्याचष्टे यथा चेत्यादिना अविद्यादीत्यादिशब्देन तदुत्पन्नं सर्वं सं[illegible]नेपादि

गृहा

आनं॰
६४

हेत्यादिवाक्यापोह्यं चोद्यमुत्थापयति नन्विति नन्वनिष्टफलनिमित्तस्यापि कर्मणः फलप्राप्तिध्रौव्यात्कथं कर्मणां मोक्षः सेत्स्यति
तत्राह हैवेति बाहुल्यमश्वमेधादिकर्मणां महत्त्वं तेन हि दुरितं समभिभूय मोक्षमेव संपादयिष्यतीत्यर्थः यत्कृतकं तदनित्यमिति न्यायमा
श्रित्य परिहरति नहेत्यादिना तत्रायमर्थः संसार इति निपातार्थः स च यत्स्तुवदिति अनेनैव विलं व्याकरोति स्वं लोकमिति यद्यप्यतो विदि
त्वन्यस्मादतिरेकादि पुण्यकर्मणि क्षिरेष दुरितप्रसक्तिं निवारयति नैरन्तर्येणेति तथा पुण्यमेवाविन्वतोऽभिप्रायमाह नैनेति प्रकान्तयत्कृ
ष्णोपहितं कथयति तत्कर्मेति प्रागुक्तन्यायद्योतीहेति निपातः कारणरूपेण कार्यस्य ध्रुवत्वमाशंक्याहान्तत इति आत्मशब्दार्थमाह
स्वं लोकमिति तदेव स्फुटयत्यात्मानमित्येति आत्मशब्दस्य प्रकृतस्वलोकविषयत्वे हेतुं तत्र माह हवेति प्रयोगेऽपि तु नहि क्रियमाणादृथ्यो।
तदविषयत्वमपि स्यादित्यर्थः विद्याफलमाकांक्षाद्वारा निहिपति स इति कर्मफलस्य तथात्वं श्रुत्वा कर्मणो तथात्वं वदतो व्याहतिमा
शंक्याह कर्मेति वाक्यस्य विवक्षितमर्थं वैधर्म्यदृष्टान्तेनाचष्टे यथेति अविदुषस्तिच्छेदः कर्मत्वेऽपि विदुषोऽतः स्वाभावे दृष्टान्तमाह
मिथिलायामिति आत्मानमित्यादिकेवलज्ञानान्मुक्तिरित्येवं परतया व्याख्यातं संप्रति तत्र भर्तृप्रपंचव्याख्यामुत्थापयति स्वात्मेति
आत्मलोकोपासकस्य कर्माभावे कथं तदत्तयवाचो युक्तिरित्याशंक्य कर्माभावस्यासिद्धिमभिसंधाय कर्मसाध्यं लोकं व्याकृताव्याकृ
तरूपेणाभिनत्ति लोकशब्दार्थं चेति श्रौत्येहि कीकल्पनानुत्पत्तौ नीतिवक्तव्यं तत्राद्यं लोकशब्दार्थमनूद्य तदुपासकस्य दोषमाहैक इति
परिविवृतः कर्मात्मा नस्याध्यात्माकृताव्याकृता लोकस्तस्मिन्नुपरागोपासकस्येति यावत् किलशब्दस्य यर्थवत्ता द्वितीयं लोकशब्दार्थमनूद्य

६४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदुपासकस्य लाभं दर्शयति नमेवेति यथाकुंडलादेरंतर्बहिर्लेषणे स्ववर्णातिरिक्तरूपानुपलंभात्तद्रूपेणास्य नित्यत्वं तथा कर्मसाध्यं हि
रण्यगर्भादिलोकं कार्यत्वाद्व्याकृते कारणमेवेत्यंगीकृत्य यत्नस्मिन्नद्बुद्ध्योपास्तेस्तस्यापरिच्छिन्नकर्मसाध्यलोकात्मोपासकत्वात्तद्व्या
विलक्षणमित्यवगते तेनास्यावत्वात्मैव कर्म तेन न तस्य तत्क्षीयतेऽतः पुनरहेतावस्यात्मोपास्ते तस्यात्मैव कर्म भवतीति हि भर्तृप्रपंचैरुक्तमि
त्यर्थः आत्मानमित्यादि समुच्चयपरमिति प्राप्तं परिहरन्नाह भवतीति श्रौतत्वाभावे हेतुमाह स्वलोकेति स्वलोकमदृष्ट्वेत्यत्र स्वलोक।
शब्देन परस्य प्रकृतस्यात्मानमेवेत्यत्र प्रकृतहानाप्रकृतप्रक्रियापरिहारार्थं प्रकृतत्वाच्चात्र लोकशब्दे विधाकल्पना युक्तेत्यर्थः लोकशब्देना
त्र परमात्मपरिग्रहे हेत्वंतरमाह स्वलोकमिति यथा लोकस्य स्वशब्दार्थो विशेषणं तथात्मानमित्यत्र स्वशब्दपर्यायात्मशब्दार्थस्तस्य वि
शेषणं दृश्यते न च कर्मफलस्य मुख्यमात्मत्वमतो लोकशब्दादत्र परमात्मैवेत्यर्थः प्रकृतेन कर्मफलमिति व्याख्यानेति चेत्तत्रैवमेकवाक्यत्व।
संभवे तद्विद्वस्यान्याय्यत्वादित्याह नैरिति एकवाक्यत्वसंभावनामेव दर्शयतो हापीति येषामत्र आत्मादिशब्देन लोको विशेषितस्त।
थात्मानमित्यत्राप्यात्मशब्देन विशेष्यते एवं वाक्ये च स्वलोकमदृष्ट्वेति स्वशब्देनात्मवाचिना तस्य विशेषणं दृश्यते तथा च द्वयोर्वाक्ययोराला
पनयोरेकवाक्यत्वसिद्धिरित्यर्थः प्रकरणेन परस्य लोकशब्दार्थत्वमयुक्तं लिंगविरोधादिति चोदयत्यस्मादिति तदेव विवृणोतीत्यस्मा
दिना ग्रंथं वादस्य लिंगनयकरणात् बलवदिति मत्वा समाधत्ते नेत्यादिना स्तुतिमेव स्फोरयति स्वस्मादेवेति लोकात्तज्ज्ञानादिति शेषः य
थाकांडेशेषत्वमर्थमात्मनः स्तुतित्वमुच्यते तेन यथाव्याख्यातमात्मलोकं स्तौति नैतत्फलवचनमित्याहात्मन इति भवतु वा मा वा भूदस्मादेवेत्या।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्राभं॰
६५

दिरर्थवादस्तथापि तस्य सर्वात्मत्वप्रदर्शनार्थत्वात् पुरुषमत्र लोकशब्देन परमात्मग्रहणमित्याह सर्वात्मेति तस्मात्तत्तत्सर्वमभवदिति वाक्ये
दृष्टान्तयति सर्वं च दिति किं चात्मशब्दस्य विधायपरिच्छेदस्यान्यार्थत्वाच्चिन्तायाः प्रत्याशा तस्मादित्यादिन्यायेन सिद्धत्वात् तत्समानाधिकरणलोक
शब्दस्यापि तदर्थत्वात् परस्यैवात्र लोकत्वमित्याह यदि हीति किं च यदि लोकशब्देन परं हित्वार्थान्तरं गृह्यते तदा सविशेषणं वाक्यं स्यात्
तथा स्वं लोकमिति प्रकृतः परमात्मलोकस्य तत्पदेनानन्तरोक्तव्यक्तब्रह्मलोकस्य च व्यावृत्त्ययोगात् न चात्र सविशेषणं वाक्यं दृश्यमतः स्व
लोकमिति प्रकृतः परमात्मैवात्रापि लोक इत्याह तथेति विशेषणं विनैवास्मादित्यत्र परापराभ्यामर्थान्तरे किं न स्यादित्याशंक्याह न ही
ति स्वं लोकमिति प्रकृते परमात्मन्यात्मानमेवेति विशेषिते चाव्याकृतात् परापराभ्यामेतत्तत्त्वावस्थानप्रतिपत्तुं शक्यते तस्यां प्रकृतत्वा
भावादित्यर्थः कं दिक्कान्तरमवतार्य हृतमनूद्याकांक्षापूर्वकं तात्पर्यमाहायो इत्यादिना प्रत्येतव्यविद्यावस्थापूर्वग्रंथो वा गृह्यते प्रपिपर्याय
स्याथोशब्दस्यानन्तर्यमाशंक्य व्याकरोत्यथो इतीति परस्यापि प्रकृतत्वात्तोऽतो विशिनष्टि गृहीति गृहित्वे हेतुर्विद्वानित्यादिरनन्तरपदस्यासा
र्थकर्माधिकृतस्य तत्कथं गृहस्थस्यात्मनः सर्वभोग्यतेत्याशंक्याह सर्वेषामिति तदेव प्रपञ्चयन्नाह प्रकटयति कैः पुनरिति यजन्तिजुहोत्यो
स्त्यागार्थत्वेनाविशेषात् पुनरुक्तिमाशंक्य यजतिचोदनाद्रव्यदेवतादिक्रियासमुदाये कृतार्थत्वादितिन्यायेनाह यागा इति आसेचने
प्रक्षेपः ऋक्षेवत् होतिरासेवनावधिकः स्यादिति यथोक्तहोमादिभिर्देवादीन् स्वस्वपक्वे तां गृहिणो विद्याप्रतिबन्धसंभवात्तदुपकारित्वा
न्नाहतिरित्याशंक्य सर्वेषामुपजीव्यतामभिप्रेत्य समर्थ्यमनूद्य समनन्तरवाक्यमवतार्य तदर्थमाह यस्मादिति देवादीनां कर्माधिकारिणि क

६५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देत्वादिपरिपालनमेव परिरक्षणमिति विवक्षित्वा पूर्वोक्तं स्मारयति तस्मादिति यथोक्तं कर्म कुर्वन् यद्यपि देवादीनुपकरोति त
थापि ततत्कर्तृत्वमात्रस्वरूपकं मानाभावादित्याशंक्याह तदाहेति भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञश्चेत्येवमेते पंच महा
यज्ञाः नन्वश्रुतमपि विचारं विनानानुष्ठेयं न हि कर्तुरोदनादिश्रुतमित्येवानुष्ठीयतेऽतस्तत्राह मीमांसितमिति तदेतत्स्वरूपतो यद्यज्ञते।
सयदृष्टौ जरदोत्पाद्यवदानप्रकरणात्कृणदेवावजायते जायमानो वा योऽस्तीत्याहि नार्थवादेनेति शेषः वाक्यांतरमाह यथाम्ल्यान्यांतनुपातनिकाक
रोति आत्मैवेत्यादिना कर्मैव बंधने तत्राधिकारोऽनुष्ठाने तस्मिन्नितियावत् विद्याधिकारस्तदुपाये श्रवणादौ प्रवृत्तिस्तत्त्वेनेत्यर्थः यथोक्ता
धिकारिणो देवादिभिरक्षणं प्रवृत्तिमार्गे नियमेन प्रवर्तकमिति शंकते नन्विति उक्तमंगीकरोति बाढमिति तर्हि प्रवर्तकांतरं न वक्तव्यं तत्रा
ह कर्माधिकार इति कर्मस्वधिकारेण स्वगोचरत्वं प्राप्तानेव देवादयोऽपि रक्षंति न सर्वोऽथ समस्ताधारणं ब्रह्मचारिणमतोऽस्य कर्ममार्गे प्रवृत्तौ देवा
दिरक्षणमपारेत्वात् ब्रह्मचारिणो निवृत्तिं त्यक्त्वा प्रवृत्तिपक्षपाते कारणं वाच्यमित्यर्थः मनुष्यमात्रे कर्मण्येव ते बलात् प्रवर्तयंति तेषाम
चिंत्यशक्तित्वात् इत्याशंक्याहान्यथेति स्वगोचरादुद्दानेवेत्येवकारस्य व्यावर्त्यं कीर्तयति नन्विति विशिष्टाधिकारे ऽरक्ष्यास्तु द्वेषेण कर्मरह
हस्यत्वेन स्वामित्वेन देवगोचरतामप्राप्तमित्यर्थः देवादिरक्षणस्य कारणत्वे फलितमाह तस्मादिति प्रथमा विद्या यथोक्ताधिकारिणो
नियमेन प्रवृत्त्यनुरागहेतुरिति शंकते नन्विति तदेव स्फुटयति अविद्यावानिति तस्याः स्वरूपेण प्रवर्तकत्वं दूषयति सापीति अविद्यायास्त
दिप्रवृत्त्यन्वयव्यतिरेकौ कथमित्याशंक्य कारणकारणत्वेनेत्याह प्रवर्तकैति तत्प्रसिद्धिः कारणोक्तारणमेवाविद्या प्रवृत्तेरिति चेत्तत्राह देवत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हीति उत्तरवाक्यस्तत्त्वेनावतार्य तस्मिन्निवद्विते प्रवर्तकं संदिपति तदिदमभिधीयतइति तदर्थतः फलं तत्र संवादयति स्वाभाविका
मिति तदेवमभावतः समन्विमाह सत्तावेति ग्रन्थकेन प्रयुक्तोयमित्यादिप्रश्नस्योत्तरं कामएष क्रोधएष रजोगुणसमुद्भवइत्यादि अकाम
तः क्रियाकाचिद्दृश्यते नेह कस्यचित् यद्यद्धि कुरुते जंतुस्तत्तत्कामस्य चेष्टितं इति वाक्यमाश्रित्याह मानवे चेति दर्शितमिति शेषः उक्तेर्थे
तृतीयाध्यायशेषमपि प्रमाणयति सएषइति एवं तात्पर्यमुक्त्वा प्रतीकमादाय पदानि व्याकरोति आत्मैवेत्यादिना वर्णाहि तत्वद्योतः
कोब्रह्मचारीतियावत्तकथं तर्हि हेत्वभावे तस्य कामित्वमपिस्यादित्याशंक्याह जायादीति तच्छब्दं व्याकुर्वन्नुत्तरवाक्यमादायावशिष्टं
व्याचष्टे स्वाभाविकेति कामनाप्रकारं प्रश्नपूर्वकं प्रकटयति कथमिति कर्माधिकारहेतुत्वं तस्याः साधयति तयेति प्रजाप्रतिजाया
याहेतुत्वद्योतकोयशब्दः प्रजाया मानुषवित्तेन भोगमभ्युपेत्य द्वितीयोयशब्दः तृतीयस्तु वित्तस्य कर्मानुष्ठानहेतुत्वविवक्षयेति विभागः कर्मा

न

नुष्ठफलमाह येनेति तत्किं नित्य नैमित्तिककर्मणामेवानुष्ठानेनेत्याह काम्यानि चेति क्रियापदमनुकृष्टुं चशब्दः कामशब्दस्य यथाश्रुतमं
र्थं गृहीत्वैतावानित्यादिवाक्यस्याभिप्रायमाह साधनलक्षणेति अस्य साधनैषणायाः फलभूतायां इति संबंधः द्वयोरेषणात्वमुक्त्वा लोकैषणां
परिशिनष्टि एते ह्येवेति कथं तर्हि साधनैषणा लोकिकेत्याशंक्याह सैवेति एतेन वाक्यशेषोपि व्याख्यातो भवतीत्याह तावानिति साधनवत् फ
लमपि काममात्रं चेत्कथं तर्हि पृथक्त्वा साधनमात्रमभिधायैतावानित्यवधियते तत्राह फलार्थत्वादिति उक्ते साधने साध्यमार्थिकमित्यत्र हेतुं
तमाह भोजनइति साधनोक्तौ साध्यस्यार्थादुक्तेरेतावानितिहृदयोरवादेपि कथमेषणार्थे कामशब्द स्तत्र प्रयुज्यते नहि तौ पर्यायौ नचैतद्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वाञ्छतेतयोरनर्थतेत्याशंक्य पर्यायत्वमेव गुणकामग्रहणयोरित्याह नेपतेश्चति वेष्टनमेव स्पष्टयति कर्ममार्ग इति अग्निश्चेत्यग्निरेव।
देवमादिद्वारेणमस्यैवश्रेयःसाधनेनात्मज्ञानमित्यभिमानवानधूमतानोर्ध्वमेनस्त्यानिमापन्नःधूमनावामतानेदेहावसानेभवतीतिमन्यमा
नस्तेधूममभिसंभवतीतिश्रुतेःस्वर्लोकमात्मानेवाकांतरस्पुत्याप्यमाचष्टे कथमित्यादिना तस्मादेतावत्वमवधार्यतेतेषामितिशेषः
उक्तमेवार्थंलोकदृष्टिमवष्टभ्यस्पष्टयति नहीति लब्धस्यांतराभावेपिकामयितव्यांतरस्यादित्याशंक्याह लब्धेति एतद्व्यतिरेकेणसा
ध्यसाधनातिरेकेणेतियावत्तत्तयोर्द्वयोरपिकामत्वविधायिश्रुतेरभिप्रायमाह तद्युक्तमिति कामस्यानर्थत्वात्साध्यसाधनयोश्चतावा।
मात्रत्वात्स्वर्गादेश्चमर्थत्वाविश्वासंस्वक्कासमत्वाभवत्वाभ्यमित्युभयोपेक्षणाभ्योमुख्यातेसंन्यासात्मकंकृत्वाकांक्षितमोक्षहेतुत्वात्।
नचहिरण्यस्रवणाद्यावर्त्येदित्यर्थः तस्मात्पीत्यादिव्याचष्टे यस्मादिति प्राकृतस्थितिरेषानद्यत्रिर्वकारिणामिदंदृत्तमित्याशंक्याह
प्रजापतेश्चेति तत्रहेतुत्वेनएवोक्तंस्मारयति सोविभेदित्यादिना तत्रैवकार्यलिंगकमनुमानेस्पष्टयति तस्मादिति सयावदित्यादिवाक्य
मात्रयव्याचष्टे सपत्वमिति द्वंद्वःसशाब्दोवाक्यप्रदर्शनार्थोद्वितीयस्तव्याख्यानमध्याहृतीत्यविषः अर्थसिद्धमर्थमाह आदिशेषादिति
तस्मात्कृत्स्नेनैतदवत्यार्थव्याकरोति यदेत्यादिना प्रकृतस्नानाभिमानिनोविरुद्धंकृत्स्नत्वमित्याह कथमिति विशेषमंतरेणकात्स्न्यार्थं
विभागंदर्शयत्यथमिति विभागेप्रस्तुतेमनसोयजमानत्वकल्पनायांनिमित्तमाह तवेति उक्तमेवव्यनक्ति यद्धीति तथामनसोयजमान।
त्वकल्पनावदित्यर्थः वाचिजायात्वकल्पनायांनिमित्तमाह मन इति वाचोमनोनुवृत्तित्वस्वरूपकथनपूर्वःसंस्कारयति वागितीति प्रा।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

णस्य प्रज्ञात्वकल्पनां साधयति तामृचं चेति कथं पुनस्तत्त्वमानुषं वित्तमित्युच्यते पशुहिरण्यादिहितत्वेनेत्याशंक्याह तत्रेति आत्मादिव
ये सिद्धे सतीति यावत् आदिपदेन कायचेष्टा गृह्यते मानुषमिति विशेषणस्यार्थवत्त्वं समर्थयते तद्धिधमिति संप्रति चक्षुषो मानुषवित्त
त्वं प्रपंचयति वागादीति तत्पदपरामृष्टमेवार्थं व्याचष्टे तेन संबंधादिति तत्स्थानीयं मानुषवित्तस्थानीयत्वेन मानुषेण वित्तेनेत्येतत्सं
बंधमेव साधयति चक्षुषादीति तस्माच्चक्षुर्मानुषं वित्तमिति शेषः आकांक्षाद्वारकं वक्तुमत्र वाक्यमुपादत्ते किंपुनरिति तद्व्याचष्टे दैवेति
तच्चेदेवमाह कस्मादित्यादिना यजमानादिनिर्वर्त्यकर्मप्रश्नपूर्वकं विशदयति किंपुनरित्यादिना इहेति संपत्तिशास्त्रोक्तिः शरीरस्य कर्म
त्वमप्रसिद्धमिति शंकित्वा परिहरति कथं पुनरिति असाविति यजमानोक्तिः दिशास्त्रार्थो यत इत्यनूद्यते तस्योक्तत्वेन कर्मत्वमुपसंहरति त
सोति उक्तरीत्या कृत्स्नत्वे सिद्धे फलितमाह तस्मादिति असाविति दर्शनोक्तिः पशोः पुरुषस्य च पांक्तत्वे तत्कृत्स्नार्थः पुरुषस्य पशुत्वाविशे
षात् पृथग्ग्रहणमयुक्तमित्याशंक्याह पशुत्वेपीति न केवलं पशुपुरुषयोरेव पांक्तत्वं किंतु सर्वस्येत्याह किं बहुनेति तस्मादाध्यात्मि
कस्य दर्शनस्य यज्ञत्वं पंचत्वयोगाद्विरुद्धमिति शेषः संपत्तिफलं व्याकरोति एवमिति व्याख्यातार्थं वाक्यमनुवदन् ब्राह्मणमुपसंहरति
य एवं वेदेति साध्यं साधनं च पांक्तं सूत्रात्मना तात्त्विकेनात्मत्वेनानुसंदधानस्य तदात्मनैव फलं तत्कृत्स्नत्वापादित्यर्थः ४ ॥ वृत्ते
ब्राह्मणे ब्राह्मणांतरमवतारयन् संगतिं वक्तुं वृत्तं कीर्तयति यत्सप्तान्नानीत्यादिना तत्रैवमतिक्रांतब्राह्मणोक्तिः उपास्तिशास्त्रेण भेददर्शनम
विद्याकार्यमनेनानूद्यते स वेदेति तदेवं विद्याकर्मणी प्रस्तुते तयोर्जनाद्यो यमित्युक्तकर्मानुवदति सर्वं त्रयमात्माभिमानेनेति आत्मैवे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इमग्रग्रामीदित्यादावुक्तं स्मारयति काममयुक्तमिति युक्तमनूद्योत्तरग्रंथमवतारयितुमपेक्षितं पूरयति यथा चेति शुद्धिर्णोजगतस्थप
रस्यानेककर्मोपार्जितत्वमेवमनयोरन्योन्योपकारकत्वाद्योगादित्यर्थः ननु सत्त्वस्यैव जगतः कर्तृत्वं ज्ञानक्रियातिशयवत्त्वात्‌ नेतरेषां
तदभावादतश्चाहैवमिति एवं कल्पीयविहितप्रतिषिद्धज्ञानकर्मोत्पन्ना सर्वे जंतवः स्मरसर्गस्यापि तत्त्वेनात्र विवक्षिता न तु प्रजापतिरे
वेत्यत्र प्रश्नमाह सर्वेषामिति सर्वेषामित्याहेतुहेतुमद्भावप्रमाणमाह तद्वेति सर्वेषामेवान्योन्यकार्यकारणत्वात्‌ कल्पितत्वं वचनं चोप
पुंजयते तत्राहात्मैकत्वेति एवं धर्मिकार्यकर्तृत्वानंतरं ब्राह्मणतात्पर्यमाह यदस्माद्विति उक्तमन्ये ध्यानार्थमिति विशेषः अत्रत्व हेतुभेदो ज्ञलादिति।
तेन ज्ञानकर्मभ्यां जनकत्वेनेति यावत्‌ ब्राह्मणमवतार्य मंत्रमवतारयति एतेषामिति तत्राद्यमंत्रभागमादाय व्याचष्टे यत्सप्तान्नानीति अ
न्नयदिति क्रियाया विशेषणं यदिति पदं तथा च न युक्तं पितृत्वादिति विशेषः ग्रंथार्थधारणशक्तिर्मेधा कृच्छ्रचान्द्रायणादितपः तेकस्मादि
त्यपेक्षिते तत्राह ज्ञानकर्मणी इति तयोः प्रकृतत्वं प्रकटयति पांक्तं हीति इतरयोरप्रकृतत्वे हेतुत्वकमनूद्य फलितमाह तस्मादिति ज्ञानक
र्मणोः प्रकृतत्वमुक्तं हेतुमाहात्यवाक्ये इत्ययमत इति यत्सप्तान्नानीत्यादिमंत्रभागव्याख्यायब्राह्मणवाक्यसमुदायतात्पर्यमाह तद्वेति
मंत्रब्राह्मणात्मको ग्रंथसमुदाय इत्यर्थः मेधयाहीत्यादिब्राह्मणमाकांक्षापूर्वकमुत्थापयति तद्यदिति प्रकृतमंत्रसमुदायः सप्तम्या परामृश्य
ते व्याख्यानमेव संगृह्णाति प्रसिद्धो हीति न केवलं हि शब्दात्‌ मंत्रस्य प्रसिद्धार्थत्वं किंतु मंत्रस्वरूपालोचनायामपि तत्सिद्धमित्याह यदिति
मंत्रार्थस्य प्रसिद्धत्वे मंत्रस्यानुवादत्वे हेतुत्वकमनुपफलितमाहात इति ननु प्रसिद्धिमुपपादयितुं प्रक्रमेति नन्विति साध्यसाधनात्मके जगति प्र

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्राते·
६८

नचित्यत्वमविद्यावतोभावितत्प्रत्यक्षत्वात्सिद्धमनुभूयतेहिजायादिसंपादयन्नविद्वान्नित्याहोच्यतइति कृत्याचप्रागुक्तत्वात्प्रसिद्धमेता।
दित्याहाभिहितंचेति यच्चमेधातयोभ्यांसहत्वंमेनब्राह्मणेनोक्तंतदपिप्रसिद्धमेवविद्याकर्मणोर्ज्ञानाभावेलोकत्रयोत्पत्त्युपपत्तेरित्याह
नत्वचेति पूर्वोत्तरग्रंथः समस्तार्थः पुत्रेणैवायंलोकोजय्यइत्यादौवक्ष्यमाणत्वाच्चास्यार्थस्यप्रसिद्धतेत्याह वक्ष्यमाणंचेति मंत्रार्थस्यप्रसिद्ध
त्वेमंत्रस्यप्रसिद्धार्थविषयेब्राह्मणेनुपपत्तिमित्युपसंहरति तस्मादिति प्रकारांतरेणमंत्रार्थस्यप्रसिद्धत्वमाह एषणाहीति फलविषय
त्वेनस्याः स्वानुभवसिद्धमितिवक्तुंहिशब्दः तस्याश्चलोकप्रसिद्धत्वेपिकथंमंत्रार्थस्यप्रसिद्धत्वमतआह एषणाचेति जायाद्यात्मकस्यकामस्य
संसारारंभकत्वंवृत्तोहेपिकामः संसारस्यारंभेनकामत्वाविशेषादित्यतिप्रसंगमाशंक्याह ब्रह्मविदेति विषयोमोक्षस्तस्मिन्नद्वितीयत्वा।
ज्ञानादिपरिपंथिनिकामापरपर्यायोरागोनावकल्पतेनहिमिथ्याज्ञाननिदानोरागः सम्यग्ज्ञानाधिगम्येमोक्षेसंभवतिअद्वैतज्ञानंचसंभव
तितत्त्ववोधाधीनत्वात्संसारविरोधिनीत्वसंसारानुषक्तिशंकावित्यर्थः शास्त्रीयस्यजायादेःसंसारहेतुत्वेकर्मादेरशास्त्रीयस्यकथंतद्धे
तुत्वमित्याशंक्याहहेतेनेति अविद्योत्थस्यकामस्यसंसारहेतुत्वोपदर्शनेनेतियावत्स्वाभाविकाभ्यामविद्याधीनकामप्रयुक्ताभ्यामित्यर्थः
इतश्चतयोर्जगन्तरप्रयोजकत्वमेष्टव्यमित्याह स्थावरांतस्येति यस्मान्मात्रावित्यादिमंत्रपदस्यमेधयादीत्यादिब्राह्मणस्यचात्रोत्पमर्थंशु
कातान्तर्गतार्थमाह विवक्षितत्वेति शास्त्रपरवशस्यशास्त्रवशादेवसाध्यसाधनभावादशास्त्रीयाद्वैतसंभवात्तस्माद्विवक्षितत्वमित्य
र्थः शास्त्रीयस्यसाध्यसाधनभावस्याविवक्षितत्वेहेतुमाह अत्रयेति नरेवप्रपंचयति सर्वोहीति दुःखयतीतिदुःखमहेवरितियावत्प्रकृत

६८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मंत्रब्राह्मणव्याख्यासमाप्ताविति यावद्विवक्षितार्थप्रदर्शनसमर्थौ वा मंत्रब्राह्मणयोः कृत्स्नयोर्भाष्यमर्थसूक्ष्मासमनेनेत्तरग्रंथमवतारयति
त्वेवेति सप्तविधेन्नेसृष्टे सतीति यावत्तद्व्याख्यानमेव विवृणोति यस्येमादिना [illegible] साधारणमन्नमसाधारणीकुर्वतो दोषं दर्शयति स य इति
तस्य दोषो भवतीत्युक्तं विवृणोति न स पाप्मनेरीति ब्राह्मणोक्तेर्थे मंत्रं प्रमाणयति तथा चेति मोघमिति विफलं देवाद्युपभोगमन्नं यदि त्वनुर्वेलोल
भते तदा स वध एव तस्येति साधारणान्नस्यासाधारणीकरणं निंदितमित्यर्थः तत्रैव सत्तीकदाहरति सत्यं [illegible] ब्रवीति नत्वध्याह्यातघेतपत्रे
न चैकः स्वयमश्रीयात् विधिवर्जनेन निर्वपेदिति पादत्रयं द्रष्टव्यं इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः तैर्दत्तानिति शेषः स्तेनेनाः
न विद्यते एनो यस्मात्तेः तेनाऽभिसंज्ञाति स्तेन यप्रभुक्तो राजनियाचघन्नृतसंकरः सत्तरपादत्रयेन त्र्याख्यपादस्यार्थो भ्रूणहाश्रेष्ठब्राह्मण।
घातकोऽयथाहुः वसिष्ठब्रह्महा चैव भ्रूणहेत्यभिधीयत इति स्वस्यान्नमन्तकेस्य पापं मार्ष्टि एनो धयतीत्यन्नदाः पापहायोक्तेरितस्यासाधा २
रणीकृत्य भुंजानस्य पापिनेति ग्रहस्यालयपतेभ्यः एवं ब्रह्मक्लेविचवणः स भुंजानो न जानाति स्वयं शुद्धैर्विधिमात्मनस्तादिवाकामात्सिशब्दार्थः गर
प्राकोन्तार्थवंकेरेत्तमवतार्य व्याकरोति कस्मादित्यादिना सर्वभोज्यत्वमाधयति योस्ववेद इति परस्य ममाजीवोदरिति यावत्पीडाकार।
त्वेरेतमाह समेवमिति प्राणकृतःइतिफलमाचष्टे तस्मादिति साधारणमन्नमसाधारणीकुर्वाणस्य पापात्तिवृत्तिरित्युक्तरेत्वेरमाह इष्ट
तेनेति यद्यपि मनुष्याणां दुष्कृतमन्नमाश्रित्य तिष्ठति तथापि तदा सत्साधारणीकुर्वतो महत्तरं पापं भवतीत्यर्थः एकमस्येत्यादि मंत्रब्राह्मण
योः स्वपदस्सूक्त्कामअर्थं प्रपंचयत्तमाह श्रद्धेणोति यदवेद्यहणाप्रयास्यमन्नो विसृष्टेवात्स्यं निर्देयं तेनत्साधारणमितिमर्थं प्रपंचे देवहस्ताम्।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्थः साधारणपदानुपपन्नेत्युक्तमिदं व्याख्यानमिति दूषयति नचेति वैश्वदेवस्य साधारणत्वमप्रामाणिकमित्युक्तमिदानीं तस्याप्र-
त्यक्षत्वादिदमा परामर्शश्च न युक्तिमानित्याह नापीति इतश्च साधारणशब्देन सर्वप्राणिपतं ग्राह्यमित्याह सर्वेति वैश्वदेवग्रहे पीतरग्रहः
स्यादिति चेन्नेत्याह नचेति प्रत्यहं साधारणान्नसमर्पणमर्थः विपक्षे दोषमाह यदिहीति प्रसंगस्येष्टत्वं निराचष्टे इष्टं तेहीति परपक्षे वाकाशे-
षविरोधं दोषांतरमाह नचेति पैप्पलादित्वं त्वलं तस्य व्याख्यां दूषयति नचतस्येति अनिषिद्धस्यापि तस्य स्वभावतः प्राप्तत्वान्न दुष्टायिनः पापा
निवृत्तिरित्याशंक्याह नचेति सर्वस्यान्नानि निषेधकं जग्ध्वा वैवाकृतं तद्विरिक्त करणे वैश्वदेवस्य प्रत्यवायश्रवणाच्च तत्र तुष्टायितेन पापस्य वे-
धोस्तीत्याह आकरणेचेति सर्वसाधारणान्नग्रहे तत्तत्परस्य निंदावचनमनुपपद्यते तेन तदेव ग्राह्यमित्याह तत्रचेति नचैवमुक्तं तत्र सेवादयत्याह-
मिति ऋषिभ्यो विभज्य स्वयमद्यात् स्वयमेव भुंजानेन तस्मादन्नमेव भक्तव्यमित्यमनर्थभाजं करोमीत्यर्थः मंत्रांतरमाह दायाकांक्षाद्वारा ब्रा-
ह्मणमनुव्याख्यानमाचष्टे देवेवानित्यादिना हुतप्रहुतयोर्देवान्नत्वं प्रतिपादनमनुष्ठानमनुकूलयति यस्मादिति पक्षांतरमुपन्यस्य व्याकरो-
न्तयोरिति यदिदर्शपूर्णमासयोर्देवान्नं कथं तर्हि हुतप्रहुतेऽस्तिप्रत्यक्षप्राप्तिस्तत्राह हित्वेति तर्हि हि देवानि निष्कृतहित्वस्य हुतप्रहुतयोर-
पि देवान्नत्वमपत्यस्य पूर्वपक्षत्वमनन्याह यद्यपीति प्रसिद्धतरत्वे हेतुमाह मंत्रेति अग्नये जुष्टं निर्वपाम्यग्निरिदं हवि[illegible]र्जुषतेत्यादि।
मंत्रेषु दर्शपूर्णमासयोर्देवान्नत्वस्य प्रतिपन्नत्वादिति यावत् हुतस्य दर्शपूर्णमासयोरेव देवान्नत्वमिति वक्तुं सामान्यन्यायमाह गुणेति गुणप्र-
धानयोरेकत्र साधारणशब्दाप्राप्तौ सत्यां प्रधानमतराप्रधाने मवत्सवगति गौणमुख्ययोर्मुख्ये संप्रत्यय इति न्यायादित्यर्थः अस्त्वेवमस्तु ते

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंतावत्तत्राह दर्शपूर्णमासयोस्त्विति तयोर्निरपेक्षत्वफलमिति हेतुतया सापेक्षत्वमिति सिद्धत्वाद्यपेक्षत्वाप्राधान्यं सिद्धं तत्त्वाच्च प्रधानयोस्त।
योरितरयोस्तु गुणयोरेकत्र प्राप्तौ प्रधानयोरेव देवतानिति मंत्रे ग्रहे युक्तिमानित्यर्थः दर्शपूर्णमासयोर्देवताग्नत्वे समनंतरनिषेधवा
क्यमनुकूलयति यस्मादिति इष्टिप्रजननशीलत्वात्स्यादिति संबंधः ननु तत्प्रजननशीलत्वाभावे कुतो दर्शपूर्णमासयोर्देवतार्थत्वं न हि।
तावन्निषिद्धौ तत्र दर्शविभागो कारेष्टिशब्देनेति किं पुनरस्मिन्वाक्ये काम्येष्टिविषयत्वमिष्टिशब्दस्य तत्र नियामकं तत्र किल शब्दस्य।
चित्तापावकप्रसिद्धिमाह शातपत्यीति काम्येष्टीनामनुष्ठाननिषेधे स्वर्गकामवाक्यविरोधः स्यादित्याशंक्याह नास्तीत्येति न च विहि
तस्यैकत्र प्रत्ययस्यात्र प्रयोगात् काम्येष्टिप्रजननप्रधानत्वमिह निषिद्धं तेन न च स्वर्गकामवाक्यविरोधोऽस्तीत्यर्थः पशुश्च विषये मंत्रपद
मादाय प्रश्नपूर्वकं तदर्थं कथयति पशुमद्व इति पशूनां पयोऽत्रमित्येतदुपपादयितुं शंकते कथं पुनरिति पयो हीति प्रतीकमुपादाय स्या
करोत्यथ इति पशवो हि पारस्वतन्त्र्यात्स्वेति कृतिमात्रमित्यमनुष्ठाश्वेत्कं तु चिंतितं हीत्यत्रापि हि शास्त्रत्वात्स्यादर्थे यस्मादित्युपक्रमात् स्यो
चितं स्मृतिरेकहायनमाधयत्यन्यथेति नियमेन प्रथमं पशूनां तदुपजीवनमसंप्रतिपन्नमिति शंकते कथमिति मनुष्यविषये वा प्रश्नस्त
हितरपशुविषये वेति हकस्मादत इति तत्राद्यमन्त्रभवावष्टंभेन प्रत्याचष्टे मनुष्याश्चेति चकारो मनुष्यमात्रसंग्रहार्थः तेनैव पयसैव।
तिपावत घृतं वेति वाग्राह्योवहमामाणविकल्पद्योतकः जातरूपं रेमवैवर्णिकेभ्योन्येषां जातकर्माभावाद्योपलाममनतिक्रमस्तत्रमेव।
जातं कुमारं प्रथमं पाययंतीत्याह यथासंभवमिति यदा तेषां जातकर्मानधिकृतानां जातं कुमारं यथासंभवं घृतं वा स्तनं वा प्रथमं पाय

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा॰ ने॰
७०

यंतीति यावत् पशुविषयं प्रश्नं पश्चावस्थेतिस्तचित्तसमाधानं प्रत्याह स्तनमेवेति पशूनां जातं वत्समिति संबंधः पशूनां पयोन्नमित्यत्र
लोकप्रसिद्धिं प्रमाणयत्यथेति हि पात् पश्वधिकारविच्छेदार्थो यशब्दः प्रतिवचनमाचष्टे मध्यापीति नन्वेषामग्रे हुतोपजीवित्वमुप
लभ्यते पयस्तेनोपजीवंति हुतं पयसो भेदात् तत्कथं पश्वन्नत्वं पयसो भागासिद्धमतआह यद्वेति नन्वहुतमुपजीवंतोपि पयपवा उपजीवंती
त्ययुक्तं न इदं स्तोकत्वामताह हुतस्यापीति मंत्रपाठक्रममतिक्रम्य पश्वन्नव्याख्याने प्रत्यवतिष्ठते कस्मादिति द्वे देवानभाजयदिति व्या
ख्याते साधने साधनत्वाविशेषात् पयोपि द्वितीयमित्यर्थः क्रममाश्रित्य परिहरति कर्मेति न देवस्यावयति कर्मेहीति यद्यपि पयोर
पे साधनमाश्रित्य कर्मप्रवृत्तं तथापि दर्शपूर्णमासौ तयोः कत्वं पयसः सिध्यतीत्यत आह तद्वेति वित्तेन पयसा साध्यं कर्मोपजयस्य साधनमि.

रा॰

त्यत्र हेतुमाह यथेति दर्शपूर्णमासौ द्वे देवान्नेदेवत्वमाणस्यात्र त्रयस्य यथा साधनेन तथा पयसोप्यग्निहोत्रादिद्वारा तत्साधनत्वा
त्कर्मकोटिनिविष्टत्वात् व्याख्यानानंतर्यं पयोव्याख्यानस्य युक्तमित्यर्थः पाठक्रमस्तर्हि कथमित्याशंक्यार्थक्रमेण तद्बाधमभिप्रेत्याह
साधनत्वेति श्रौतं तर्हि पाठक्रमः अकारणत्वमविवक्षितत्वे पाठक्रमादर्थक्रमस्य बलीयस्त्वाद्वेदेनत्वस्य बाधत्वमित्येतत्प्रथमे तंत्रे स्थित
मित्यभिप्रेत्याह इतिचेति पश्वन्नस्यचरमत्वेन व्याख्याने हेत्वंतरमाह व्याख्यानेनेति व्याख्यानसौकर्यं साधयति सर्वं हीति पश्वन्नस्य च
प्रतिपत्तिसौकर्यं प्रकटयति व्याख्यातानीति चत्वारि साधनानि त्रीणि साध्यानीति विभज्योक्ते व[illegible]ोः सौकर्येणाधीर्भवति ततश्च
पाठक्रमातिक्रमः श्रेयानित्यर्थः पश्वन्नस्य सर्वोपि[illegible]विषयमंत्रमवतार्य प्रश्नपूर्वकं तदीयं व्याख्यानमाचष्टे तस्मिन्नित्यादिना मंत्रा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तमेहोत्राख्यात्तत्प्रतिभातीत्याशंक्याह नवेति पयसिहीति व्याख्यातो हि शब्दस्य प्रसिद्धावद्योतकत्वमस्ति तेन च हेतुना हि शाह्वेन तस्मि
न्नित्यादिमंत्रद्वयं व्याख्यातमितियो जना मंत्रार्थस्य लोकप्रसिद्धभावात्तत्प्रसिद्धावद्योतितनाहि शाह्वेन व्याख्यातेत्युक्तमिति शंकते कथ
मिति कार्यं कारणे प्रतिष्ठितमिति न्यायेन वैदिकीं प्रसिद्धिमादाय समाधत्ते कारणत्वेति पयसो द्रवद्रव्यमात्रस्य कुतः सर्वजगत्कार
णत्वमित्याशंक्याह कारणत्वं चेति तत्समवायित्वेपि कुतो जगत्कारणत्वेत्याशंक्याहाग्निहोत्राद्येति तेवा एते आहुती हुते उत्क्रामतस्ते
न्तरिक्षमाविशत इत्यादयः श्रुतिवादाः घृपर्जन्यव्रीह्यादिक्रमेणाग्निहोत्राहुत्योर्गर्भीकारप्रकारं दर्शयंति अग्नौ प्रास्ताहुतिः सम्यगादित्य
मुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यादयः स्मृतिवादाः पयसिहीत्यादि व्याख्यानमुपसंहरत्यत इति पयसः सर्वजगदा
धारत्वस्य श्रुतिस्मृतिप्रसिद्धत्वादित्यर्थः यावत् सर्वं पयसि प्रतिष्ठितमिति विधिस्मितदर्शनस्तुत्ये शाखोत्तरीयमंत्रे निर्दिष्टमुद्भावयति
यत्तदिति न केवलेन कर्मणा मृत्युं जयति किं तद्दर्शनसहितेनेति दर्शयितुमग्निहोत्राहुतिषु संख्यां कथयति संवत्सरेणेति उक्ताहुति
संख्यायां संवत्सरावच्छिन्नायामग्निहोत्रविदां संप्रतिपन्नायां किलेत्युक्तं तत्र यत्त्वाह सायं प्रातश्चेत्याहुती द्वे विधेये तेन कथमाहुतीनां षष्ठ्य
धिकानि त्रीणि शतानि संवत्सरेण भवंति तत्राह सप्त चेति प्रत्येकमहोरात्रावच्छिन्नाहुतिप्रयोगाणामेकस्मिन्संवत्सरे द्वैविध्यात्संख्या
तत्रैव प्रयोगाहोतो विंशत्यधिकासप्तशतरूपा संख्येति सिद्धमित्यर्थः आहुतीनां संख्योपलक्षितासु याजुष्मतीनामिष्टकादृष्टिमाह या
जुष्मतीरिति तासामपि षष्ठ्यधिकानि त्रीणि शतानि संख्या भवंति तथा च प्रत्यहमाहुतीरभिनिष्पद्यमानाः संख्यासामान्येन याजुष्म

ते
स्ता

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अग्ने॰
७२

नीरिष्टकाश्चिनयेदित्यर्थः आहुतिमयीनामिष्टका[..]नां संवत्सरावयवाहोरात्रेषु संख्यासाम्येनैव दृष्टिमन्वाचष्टे संवत्सरस्येति सान्त्वपि
षष्ट्यधिकानि त्रीणि शतानि प्रसिद्धानि तथा च तेषु यथोक्ता इष्टका दृष्टिं श्रित्येत्यर्थः चितेऽग्नौ संवत्सरात्मप्रजापतिदृष्टिमाह संवत्सरमि।
ति यः संवत्सरः प्रजापतिस्तं चित्यमग्निं विद्वांसः संपादयंतीति अहोरात्रेष्टकाहोरात्रयोः संख्यासाम्यादित्यर्थः दृष्टिमनूद्य फलं दर्शयत्येव
मिति उक्तसंख्यासामान्येनाग्निहोत्राहुतीरप्येवमेव ध्यायतो यान्यप्तीसंत्तके इष्टकाः संपाद्यतद्रूपेणाहुतीश्चापि आहुतीमयीश्चेष्टकाः संवत्स
रावयवाहोरात्राणि तेनैव संपाद्य पुरुषनाडीस्य संख्यासामान्येन तन्नाडीस्तान्येवाहोरात्राण्यपाद्यतद्रूपेणाहुतीरिष्टकानाडीस्तानुसंदधानो ना।

संवत्सर ६

ग्निहोत्रयाजन्ध्यतीहोताणुरुष[..]श्चित्यानां समस्तमाप्नोत्याह मग्निः संवत्सरात्मा प्रजापतिरेवेति ध्यायन्नग्निहोत्रेण यः सा संवत्सरं जुहूनि विद्य
यात् इति होमवशात् प्रजापतिं संवत्सरात्मकं प्राप्य मृत्युमपजयतीत्यर्थः एकीयमतमुपसंहृत्य तन्त्रिद्धाश्चैवं केमतान्तरमाह इत्येवमि।
त्यादिना एवं विद्वानित्युक्तं व्यक्तीकरोति यद्ध्रुक्तमिति तत्रथैव विद्वानेकाहेनाग्निहोत्राहुतिमात्रेण जगद्रूपं प्रजापतिं प्राप्य मृत्युमप
जयतीत्याह तदेकेनेति उक्तेऽर्थे श्रुतिमवतार्य व्याचष्टे तदुच्यत इति सर्वं हीत्यादिरेतद्वाक्यमाकांक्षाफलं कल्याण्याख्याकरोति कः पुनरि।
त्यादिना यथोक्तदर्शनवशादेकाहेनाहुत्या मृत्युमपजयतीत्युक्तं ब्राह्मणान्तरे संवादयन्नाहेति यथा संवत्सरमित्यादुक्तं तथा यदहरेवे
त्याद्यपि ब्राह्मणान्तरे स्थितमित्यर्थः ब्रह्मा हिरण्यगर्भभावी जीवः स्वयंभूः परस्मै वरदात्मनावस्थानात् तपोतप्यत कं नेति इष्ट्वन्वयतत्कृतकं
नहि नित्यमिति ध्यायेनकर्मनिंदाप्रकारमाह तदेहतेति कर्मसमृद्धाय भूतानामुपासनाद् उपरिष्टादिति हन्तेति उपासनामनूद्य समुच्चय फलं कथ

मी २
७२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यति तत्सर्वं विवृणोति श्रेष्ठत्वेपि राजकुमारवदस्वातंत्र्यमाशंक्याह स्वाराज्यमिति अधिष्ठायपालयितृत्वमाधिपत्यं पश्वन्नेव्याख्याते श्रु
त्यंशमवतारयति तत्र कस्मादिति ह्रियमाणस्यापमृत्युपाशमनात्मुपदिशति ननु चत्वार्यन्नानि व्याख्यातानि त्रीणि व्याचिख्यासितानि तेषु व्या।
ख्यातेषु कस्मादित्यादि प्रश्नोऽकस्मादित्याशंक्यासाधनेषु केषु साध्यानामपि तेषां मध्येऽन्नत्वमस्तीत्यभिप्रेत्य प्रश्नप्रवृत्तिं मत्वा तान्व्याचष्टे
यदेति सर्वदेत्यस्य व्याख्यानं निरंतरमित्युपाध्यानां सदा भिरद्यमानत्वे हेतुमाह तन्निमित्तत्वादिति भोक्तॄणां स्थितेरन्ननिमित्तत्वात्तैः सदा
द्यमानानि तानि यद्यक्षयाणि भवंति हीनानि नीत्यर्थः किंच ज्ञानकर्मफलत्वादन्नानां यत्कृतकं तदनित्यमिति न्यायेन क्षयः संभ।
वतीत्याह कृतेति अन्नतर्हिनेयां शंक्य परिहारेत्याह नचेति भवतु तर्हि स्वभावादेव सर्वमन्नात्मकस्य जगतो हीनत्वेनेत्याह भवितव्यं चेति।
स्वभाववादस्यातिप्रसंगित्वादित्यर्थः प्रश्नं निगमयति तस्मादिति प्रतिवचनमादाय व्याचष्टे तस्येत्यादिना तेषामपि तत्त्वे हेतुमाह मेधये
ति भोगकालेपि विहितप्रतिषिद्धज्ञानकर्मसंभवात्प्रवाहरूपेणान्नानामक्षयः संभवतीत्यर्थः तत्र प्रतिज्ञाभागमुपादाय तद्व्याख्या।
चष्टे तदेतदिति देवभागमन्यायाः विभजते कथमित्यादिना तस्मान्नततोऽक्षयः संभवति प्रवाहात्मनेति शेषः उक्तं हेतुं व्यतिरेकद्वारेणोपपा
दयितुं यदेतदित्यादि वाक्यं तद्व्याचष्टे यदीति अन्वयव्यतिरेकसिद्धं हेतुं निगमयति तस्मादिति तथापि यथाप्रज्ञतमिति पवित्रत्वं साधयति
गमयति तस्मादिति अन्नक्षये दोषसिद्धं फलितमाह तस्मान्न क्षीयमाणानीति धियाधियेत्यादिश्रुतेः सचोद्यमित्यर्थोऽके परिहारं प्रपंचय
न्नाह सप्तविधान्नस्य कार्यत्वात्प्रतिक्षणं ध्वंसित्वेपि पुनः क्रियमाणत्वात्प्रवाहात्मनानदत्वेनमेवाक्षयत्वमस्मिन्नर्थे तात्पर्यमाहान्नं इति

अने.
७२

प्रज्ञाक्रियाभ्यां देहभावं लक्ष्यते आवर्तते निबध्यते यः प्रबंधः समुदायस्तदात्मकः सर्वो लोकश्चेतनाचेतनात्मको द्वैतप्रपंचः सा
ध्यत्वेन साधनत्वेन च वर्तमानो ज्ञानकर्मफलभूतः वणिकोपि नित्यइव लक्ष्यते तत्र हेतुः संहतेति संहतानां मिथः सहायत्वेन स्थितानाम
नेकेषां प्राणिनामनेकानि कर्माणि तासमनाद्यनंतसंतानेनावष्टब्धत्वाद्दृढीकृतत्वादिति यावत् प्रातीतिकमेव संसारस्य स्थैर्यं न तात्त्विकमिति
वक्तुं विशिनष्टि नदीति असारोपि सारवद्भातीत्यत्र दृष्टांतमाह कदलीति अशुद्धोपि शुद्धवद्भातीत्यत्रोदाहरणमाह मायेत्यादि अनेको
दाहरणेन संसारस्यानेकरूपत्वं द्योतनार्थं केषां पुनरेष संसारोन्यथा भातीत्यपेक्षायां संसारायपराक्दृशामिति न्यायेनाह नदात्मेति किमिति
प्रतिक्षणप्रध्वंसित्वादिति कत्योच्यतेनेनाह नदेनदिति वैराग्यमपि कुत्रोपयुज्यते तत्राह विरक्तानामिति इति वैराग्यमर्थवदिति शेषः उ
भयोर्ज्ञानमननयोर्देहविलयप्राप्तानंतरं ज्ञानमनूद्य तत्फलमाह योवैतामित्यादिना यथोक्तमनुवदति पुरुष इति फलविषयं मंत्रपदमुपादा
यतहीदं ब्राह्मणमवतार्य व्याकरोति सोहमित्यादिना यथोक्तोपासनवतो यथोक्तं फलमुपास्तिप्रधानत्वेनैव सोहमस्मीति संबंधः विद्वेषो
द्वेषप्रतिगुणत्वाभावे हेतुमाह दाननामिति रक्षमर्थं प्रतिगृह्णातीति भोक्तैवेति प्रशस्तिसिद्धये प्रपंचयति सदेवानित्यादिना साधनात्मकमम
वलप्रयमत्राव्ययकारणमदितिनव गुणप्रद्वेषेण उक्तोपासनस्य फलं चोक्तमिदानीमाब्राह्मणसमाप्तेरुत्तरग्रंथस्य तात्पर्यमाह पाक
सेत्यादिना ब्राह्मणशेषस्य तात्पर्यं शुद्धामंत्रपदमनूद्याक्षरतदाबाब्राह्मणं तत्त्वाप्यमाचष्टे त्रीणीत्यादिना ज्ञानकर्मभ्यां समाप्तानि
सृष्ट्वा वन्नानि भोक्तृभ्यो विभज्य त्रीण्यात्मार्थं कल्पयितैः पिता कल्पितवानित्यर्थः अन्यमेत्यादिवाक्यमुपादत्ते तेषामिति षष्ठी निर्धारणार्थे

दै
ना

७२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्र मनसोस्तित्वमात्रे साधयन्नस्ति तावदिति आत्मेंद्रियार्थसान्निध्ये सत्यपि कदाचिदेवार्थधीर्जायमाना हेत्वंतरमाक्षिपति न चादृष्टादि
तदिति युक्ते तस्य दृष्टसंवादित्वात् तस्मादक्षादिसांनिध्ये ज्ञानकादाचित्कत्वानुपपत्तिर्मनःसाधिकेत्यर्थः लोकप्रसिद्धिरपि तत्र प्रमाणमि
त्याह यत इति अतोस्ति बाह्यकरणादतिरिक्तं विषयग्राहिकरणमिति शेषः तामेव प्रसिद्धिमुदाहरणनिष्ठतया दर्शयति किं दृष्टवानित्या
दिना तत्रैवान्वयव्यतिरेकावुपन्यस्यति तस्मादिति यथाकार्याण्यपि च लोकप्रसिद्धिवशादिति यावत् विमनमात्मव्यतिरेकापेक्षे तस्मि
न्नसत्यपि कादाचित्कत्वानुपपत्तिरनुमानेन तद्बोधार्थं तस्मादनुमानादिमानात्तदन्यदस्ति मनो नामेति संबंधः रूपादिग्रहणसमर्थस्यापि
सत इति प्रमाणोच्यते अंतःकरणस्य चक्षुरादिभ्यो वैलक्षण्यमाह सर्वेति समनंतरवाक्यफलितार्थविषयत्वेनादत्ते तस्मादिति तद्धेतो
नात्मेन्द्रे तत्स्फुटयति तदधीनत्व इति कामादिवाक्यमवतारयन्नाकूतं मनः स्वरूपप्रतिसंशयं निरस्यत्यस्तित्वइति प्रत्यक्षादिवत्कामादिरि
पि विवक्षितो द्वैतमिमत्वा मनोबुद्ध्योरेकत्वमुपेत्योपसंहरति इत्येतदिति हेतुप्रवृत्तस्यास्यैव मनो भोक्तृकर्मवशाज्ज्ञानार्थाकारेण विवर्तत इ
त्यभिप्रेत्यानंतरवाक्यमवतारयति मनोस्तित्वमिति नटेवान्यत्कारणं स्फोरयति यस्मादिति तस्मादस्ति विवेककारणमंतःकरणमिति संबंधः
चक्षुरसंयोगानंतरमस्पर्शविशेषा दर्शनेपि संप्रयुक्तया त्वचाविनापि विशेषदर्शनेस्यादित्याशंकाह यदीति त्वङ्मात्रस्य स्पर्शमात्रग्राहित्वेना
विवेचकत्वायोगादित्यर्थः विवेचके करणांतरे सत्यपि कुतो मनःसिद्धिरित्याह यत इति वृत्तेर्कीर्त्यमस्ति तावदिति उत्तरग्रंथमवतारयि
तुं भूमिकां करोति श्रीणीति एवं भूमिकामारचय्य आध्यात्मिकं वाख्याव्याख्यानार्थं यः कथ्यत्यादिवाक्यं सा कामादाय व्याकरोति मध्येत्यादिना शाह

क१

म६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्र.ने. पर्यायो ध्वनिर्द्विविधो वर्णात्मकोऽवर्णात्मकश्च तत्र घोषवद्वर्णभिन्नत्वादिरूपस्थाने संयोगो द्वितीयो मेघादिकृतः सर्वोऽपि प्रकृतावागो वेद्य
७३ र्थः प्रकाशकमात्रं वागित्युक्तात् तत्र प्रमाणमाह देवतावदिति तस्मादभिधेयनिर्णयकत्वान्नासावफलापार्हेति शेषः वाचोऽपि प्रकाश्यत्वा
त्प्रकाश्यप्रकाशकमात्रं वागित्ययुक्तमित्याशंक्याह दैवेति देवतास्वसमर्थयते नहीति प्रकाशान्तरेण सजातीयेनेति शेषः प्रकाशिकापि वाक्प्र
काश्यापेक्षयापि प्रकाशकान्तरमपेक्ष्यत इत्यनवस्थास्यात्तन्निरासार्थमेषा हि नेति श्रुतिः प्रकाशमात्रं वागित्याह स्वपरनिर्वाहकत्वं शब्दे
यत्र त्वस्मात्प्रकाशकत्वे कार्यं हृदयते तत्र वाचः स्वरूपमनुगतमेवेत्याह तद्विदित्यादिना आध्यात्मिकप्राणविषयं वाक्यमवतार्य व्याकरोत्य
थेति पूर्वोक्तो संचरणाद्धृदये संबन्धिनीया वा श्रुतिस्तत्र प्राणशब्दप्रवृत्तौ निमित्तमाह प्राणयनादिति उरसो निःसरणादिति याव
त् हृदयादधो देशे श्रुतिरस्त्यधोवृत्तिरपानाभिख्यातो हृदयादारभ्य नाभिपर्यन्तं वर्तमानं वायुर्वृत्तिर्यावत् व्यापकत्वं प्राणापानयोर्नियमेन
कुर्मो स्थितेति तथोक्तः वीर्यवत्कर्म शरणमग्र्यत्वादनादित्वत्कर्षो देवेषु ष्टिः आदिपदेनोक्तातिरक्ताप्राणशब्देनानशब्दस्य प्रवृत्तिरक्तिमा
शंक्याह नत्वेषामिति तथापि तत्तीयस्य प्राणशब्दस्य तत्राभावात्तत्रातिरिक्तत्वादित्याशंक्याह प्राणइतीति साधारणसाधारणप्राणवृत्ति
मात्रप्राणस्य पीनकर्तृत्वमित्यर्थः मनसोऽदर्शनादिवत्तत्त्वाचोऽभिधेयप्रकाशनवद्व्याप्राणव्यापिकार्यवत्कत्वमित्याशंक्याह कर्मचेति
एतत्प्रयत्नस्यप्रयोविकार्यत्वेनवसंकीर्तनस्यैवकेकथयति आख्यानानीति आध्यात्मिकानां वागादीनामारंभकत्वं वारयति ७३
प्राजापत्येरिति आरब्धत्वरूपेप्रयत्नस्यैवैकमनन्तरवाक्येन निर्धारयति कोसाविति कार्यकरणसंघातेकप्रमात्मशब्दप्रवृत्तिरित्याशं।
CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्याद्यात्मस्वरूपत्वेनेति वाङ्मयइत्यादिवाक्यस्य शैवेणपौनरुक्त्यमाशंक्याह विशेषेणेति वागादीनामाध्यात्मिकविभूतिप्रदर्शि
नानेन समाधिभौतिकविभूतिप्रदर्शनार्थमुत्तरं ग्रन्थमवतारयति तेषामेवेति तेषामेकैकस्मात्सामान्यं परामृशति त्रिलोकीवाक्यवदुत्तरेष्वा
क्येषु विज्ञानादिवाक्यान्तप्राक्तनेनैतस्यामित्याह तथेति विज्ञानादिवाक्यमायतनगतं विशेषं दर्शयति विज्ञानमिति विज्ञानेन स
र्वं वाचो रूपमिति प्रतिज्ञातोऽर्थः समस्तस्यार्थः प्रकाशकत्वेपि कथं वाचो विज्ञानत्वमित्याशंक्याह कथमिति प्रकाशात्मकत्वमेव ज्ञतो
१४ वाचः सिद्धमित्याह वाचेति वाग्विशेषस्तद्विभूतिः संदिश्यमानाकारत्वात्सैकरूपविकल्पात्मकत्वादिति यावत्तस्मात्सर्वं विजिज्ञा
स्यमन्नो रूपमिति संबंधः एवंवक्तृत्वाग्विभूतिविदो यथाफलमुक्तं तद्वदिति यावत् अनिरुक्तमुक्तेर्विज्ञानरूपो यस्मात्प्राणस्तस्मा
द्विज्ञानेन सर्वं प्राणस्य रूपमिति योजना विज्ञानादिरूपातिरेकेण लोकवेदाद्यभावाद्विज्ञानादिरूपत्वाभिधानेनैव वागादीनां लोका
द्यात्मत्वे सिद्धे किमर्थं त्रयो लोका इत्यादिवाक्यमित्याशंक्याह तस्यैव ध्यानार्थमित्याह विज्ञानेति भूरादिष्वेकैकत्र विज्ञानादित्रयदृष्टे
र्वागादेस्तु व्यवस्थितत्वात् ऊतो विज्ञानादेर्वागाद्यात्मत्वेनियतेत्याशंक्याह सर्वेति प्राणविभूतिविदः संप्रतिफलं कथय
ति प्राण इति लोके विज्ञानस्यैव भोज्यत्वोपलंभाद्विज्ञानादिरूपेण प्राणादेर्न भोज्यत्वोपपत्तिरित्याशंक्याह शिष्येति शिष्यैर्विवे
किभिः संदिह्यमानोपकाराद्यपि यद्यत्त्वं तेषां भोज्यतामापद्यमानाद्रूपेण गुर्वादिभिस्तथापि बालैर्विज्ञानोपकारा [illegible]
पिद्धारस्तेषां भोज्यत्वमापद्यते तथा प्रकृतेपि संभवतीत्यर्थः वृत्तमनूद्यतस्यैव वाचः पृथिवीत्यादि अवतारयति आत्मन इति आधिदैविका

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं
७४

थेस्तद्विभूतिप्रदर्शनार्थं इति यावत् समनंतरसंदर्भस्य तात्पर्यमुक्त्वा वाक्यान्तराणि योजयति तस्या इति कथमाधाराधेयभावो वाचो
निर्दिश्यते तत्राह द्विरूपा हीति उक्तमर्थं सेतिहासं निगमयति तदुभयमिति अध्यात्ममधिभूते च या वाक् परिच्छिन्ना तस्यास्तत्त्वपरि
माणत्वमाधिदैविकवागंशत्वादंशांशिनोस्तादात्म्यात्तयासह दर्शयति तत्रैवेति तावानयमग्निरिति प्रतीकमादाय व्याकरोत्याधे
यरति समानस्तत्रमित्यस्यायमर्थः अध्यात्ममधिभूते च मनःप्राणयोराधिदैविकमनःप्राणांशत्वात्तादात्म्याभिप्रायेण तत्त्वपरि
माणत्वमुच्यते तथा च वाचा समाने प्राणोदाहृतरवाक्ये कथ्यमाने समानपरिमाणत्वमिति आधिदैविकवाग्विभूतिव्याख्यानानंत
र्यमयपरार्धार्थः मनसो हृदयस्थस्योक्त्वा व्याप्तिमभिधत्ते तत्रैवेति मन एवास्यात्मा वाग्जाया प्राणः प्रजेत्यध्यात्मं मन एव पिता वाङ्माता।
प्राणः प्रजेत्यधिभूते च वाङ्मनसयोः प्राणस्य प्रजात्वमुक्तं तथाधिदैवेपि तस्य तत्प्रजात्वं वाच्यमित्यभिप्रेत्याह ताविति कथमादित्यस्य
मनसः प्राणप्रतिपितृत्वं वाचो वाग्नेर्मातृत्वं तत्राह मनसेति सावित्रेणाकमाग्नेयेन च प्रकाशयते कार्यसिद्धदर्शनात्तयोः सिद्धं जनकत्व।
मित्यर्थः कर्मग्रहेण कार्यमुच्यते तत्करिष्यामीति प्रत्येकमभिसंधिपूर्वकमादित्याग्न्योर्द्यावापृथिव्योरंतराले संगतिरासीदित्याह।
कर्मेति संगतिकार्यमभिप्रायानुसारि दर्शयति तत इति वाय्वोरिंद्रत्वासपत्नत्वगुणविशिष्टस्योपासनमभिप्रेत्याह योजात इति द्वि
तीयस्य सपत्नत्ववारणादेरपि तथात्वस्यादित्याशंक्याह प्रतिपत्तत्वेनेति यथोक्तसपत्नव्याख्यानफलमाह तेनेति असपत्नगुणका।
प्राणोपासनेन फलवाक्यं प्रमाणयति तत्रैवेति प्राणस्यासपत्नत्वे सिद्धे सतीति यावत् आग्नेयिकत्वप्रयोगात्वनियमसंगादार्यैतत्त्वमाधिदैविक

७४

उ१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

योर्वाङ्मनसयोर्विभूतिनिर्देशानन्तर्यमयेत्प्रक्तं तत्त्वेनस्येत्युक्तेन प्रजात्वेनोक्तस्य प्राणस्य किमिति न ग्रहणं तत्राह वाङ्मनःप्राणेति
प्रश्नत्रयस्य समस्यप्रधानत्वेन प्रकृतत्वादेतदुक्तेन प्रधानपरामर्शोपपत्तौ नाप्रधानपरामृष्टेत्यर्थः एवं वाचो मनसः पृथिवी द्यौश्च श
रीरं यथात इत्यर्थः ऋते प्राणमात्मानं व्याप्तिमवशिष्टं व्याचष्टे तेवेति तावानित्यादि प्रतीकमादाय व्याचष्टे चेदस्ति वाङ्मनःप्रा
णानामाधिदैविकरूपेणोपासनं विधातुं देवेति कीर्तयति तानीति एतेभ्योऽतिरिक्तमधिष्ठानमस्तीत्याशङ्क्याविशिनष्टि कार्यात्मकमि
ति प्रजापतिरेतेभ्योऽतिरिक्तोऽस्तीत्याशङ्क्याह समस्तानीति सोपस्कारं देवतमंत्रं ध्यवाक्यमादाय व्याचष्टे तपतइति तत्र व्याप्तिमेव व्या
नक्ति यावदिति तावद्दशोद्रं जनरश्च्यापेतियोजना तत्त्व व्याप्तिमत्त्वमुपनीव्याहात एवेति तेषां यावत्संसारभावित्वमभिव्यनक्ति
नहीति कार्यकरणयोर्यावत्संसारभावित्वेऽपि प्राणानां किमायातमत आह कार्येति तेषु परिच्छिन्नत्वेन ध्याने दोषमाह य इति
एवं ध्यानविधिं कृत्वा विवक्षितमुपासनमुपदिशत्यथेति प्रश्नत्रये फलवद्व्याख्यानविषयेऽव्याख्यातेऽव्यक्तव्याभावात्किं तत्र रहस्येनेत्या
शंक्याह नेकीर्तयति पितेति तेषां तत्फलत्वे प्रमाणाभावमादाय शंकते तदेति प्रश्नत्रयव्याख्यानेऽसमर्थः कार्यलिङ्गकमनुमानं प्र
माणयुक्तमुत्तरमाहोच्यत इति अनुमानमेव स्फुटयति तमवेत्युपाकृत्वावगतिं दर्शयति यस्मादिति तस्मात्तत्कारणमपि तादृगिति शे
षः कथं पुनस्तत्त्रयोपाकृत्वधीरित्याशंक्याह विवेति आत्माजायाप्रजेति त्रयं संगृहीतमपि पिण्डहः उक्तं हैतद्यज्ञेन दुर्वेद दकं संसारयति
तदेति प्रश्नत्रयस्य समर्थः तस्यापि कंग्योपाकृत्वमित्याशंक्यानन्तरग्रन्थमवतारयति तत्रविनेति समसीदेवं चतुर्थवतारितं ग्रन्थं व्याच

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

थि

ह्ये सोयमित्यादिना कथं प्रजापतेस्तिथिमिरादृश्यमानत्वमपचीयमानत्वं चेत्याह प्रतिपदाद्यामिति वृद्धेर्मर्यादां दर्शयति यावदि
ति अपक्षयस्य मर्यादामाह यावद्वेति अवशिष्टममावास्यां तिविशां कलाप्रपंचयन् द्वितीयकलोत्पत्तिं पुनरुपतिपदि दर्शयति सम्व
त्सरतिरिति प्राणिजातमेव विशिनष्टि पदपइति स्थावरजंगमं चेत्यर्थः जोषध्यात्मनेत्युपलक्षणं जलात्मनैव विरुध्वफलभूतेप्रजाप
तेः पांक्तत्वं वक्तुं पूर्वोक्तानेन दृष्टान्तेनोक्तमित्याशंक्याहैवमिति नद्देवपांक्तत्वेप्यनक्ति द्विवेति कलानांविरवद्विमत्वेदेनमासोपचये
ति पांक्तत्वनिर्देशेन लब्धमर्थमाहैवमेवइति संप्रतिकृत्स्नस्य प्रजापतेरुपक्रमानुसारित्वं दर्शयति जायेति भवतुप्रजापतेरुक्तरीत्या
पांक्तत्वेन व्याप्तिकर्त्वं पांक्तकर्मफलत्वेनेत्याह कारणेति पांक्तकर्मफलत्वप्रजापतेरुक्तप्रासंगिकमर्थमाह यस्मादिति अपिक्षकला
मध्येतिक्रतोर्विशेषोक्तिरित्याशंक्याह कृकलासोपीति कृतस्तस्य पापात्मत्वेनेत्याह हेवोपीति विशेषनिषेधस्य शेषानुज्ञापरत्वा
द्विरोधः सामान्यशास्त्रेणास्यादिति शंकते नत्विति नीर्थंशाहूः शास्त्रविहितप्रदेशविषयः साधारणेन सर्वत्र निषिद्धापि हिंसा विशेष
तोमावास्यायां निषिद्धमानायोसदेवतास्ज्ञायांनतः शेषानुज्ञानाभावाच्च सामान्योक्तिविरोधोस्तीति परिहरति वाढमिति यस्त्वे
माधिदैविकयज्ञात्मकप्रजापत्युपासनमुक्तेन तदहमस्मि प्रजापतिरित्यर्द्वयदेण कर्तव्यमित्याह योवाइति अव्यक्तमुपलभ्य मानेप्रजाप।
तिमप्युद्दानुपकरयति कोमाविति नस्य प्रजापतित्वमप्रसिद्धमित्याशंक्यापरिहरति केनेत्यादिना कलानां जरादिपरिणामहेतुत्वं क।
थंतकविचेपिकर्मदेवत्वमस्तितेननव्रकलाशब्दप्रवृत्तिरुचितेत्याह विवेति यथाचंद्रमाः कलाभिः पुनरुपचयोपचयतेपचीयतेच।

त्य ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तथा सविद्वान्वित्तेनैवोपचीयमानेनार्द्धितेपचीयमानेनचापहीयतेपतञ्चलोकप्रसिद्धत्वान्नप्रतिपादनसापेक्षमित्याह सवेश्ववरी
ति ग्रात्मैवध्यवाकलेत्युक्तंनदेवरथचक्रदृष्टांतेनस्पष्टयति नदेत्यादिति नाभिश्चक्रपिंडिकातत्स्थानीयंवानभ्यंतदेवप्रश्नद्वारास्फोर
यति किंतदिति शरीरस्यचक्रपिंडिकास्थानीयत्वमप्युक्तंपरिवारादर्शनादित्याशंक्याह प्रधिरिति शरीरस्यरथचक्रपिंडिकास्था
नीयत्वेफलितमाह जीवंश्चेदिति पुत्रश्चधात्मनिप्रजापतावदेहग्रहोपासनस्यसफलत्वोक्तत्वादुक्त्याभावादुभरंग्रथवैगच्छंमित्या
शंक्यनदिहेषयंवक्ते कृतमनुवदत्येवमिति साधनेतावैवफलमुक्तंनयोर्मिथ्योवहत्वात्प्राजापत्यचफलेभागेवप्रदर्शितेनत्कि पुनरा
ग्रहेनेत्याशंक्यसामान्येन तत्प्रतीतावपिरटमस्येतिविशेषोनोक्तंनतस्तदुक्तार्थपुत्रराश्रुतिरित्याह नचेति सर्वेग्रथः समस्यार्थः निय
मोनावगतइतिसंबंधः उपन्यासः प्रारंभः वावशब्दस्यावधारणार्थमर्थं विवृणोति त्रयएवेति तदेवलोकत्रयंप्रश्नद्वारास्फोरयति
केतइत्यादिना जयोनामपुत्रेणमनुष्यलोकस्यातिक्रमइतिकेचित्तान्प्रत्याह साध्यइति पुत्रेणास्यसाध्यत्वमसिद्धमित्याशंक्याह
यथाचेति द्विविधोहिमनुष्यलोकजयः कर्तव्यशेषानुष्ठानंभोगश्चतत्राद्यमाश्रित्यान्ययोगव्यवच्छेदमेवकार्त्स्न्यंदर्शयति नान्ये
नेति द्वितीयेतयोगव्यवच्छेदस्तत्वदर्शयोज्यातिषेमलोकंजयतीतिसाधनांतरेणापिमनुष्यलोकजयश्रुतेरितिभावः पूर्ववाक्यस्यमेव
कारस्वतरवाक्ययोरनुषक्तरूपेत्यवाकारहदयव्याचष्टे कर्मणेत्यादिना साधनद्वयापेक्षयाफलद्वारकपुत्रकर्मविद्यायांदर्शयति देवलोक
इति कृतमनुवदत्येवमिति पुत्रादिवज्जायाविनयोरपिप्रकृतत्वात्फलविशेषविनियोगोवक्तव्यइत्याशंक्याह जायात्विति नपृथक्त्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रानं॰ ७६

त्वकर्मभ्यासमितिशेषः नह्येकस्याधिकारेकर्मणोः समुच्चयादिति द्रष्टव्यं भवत्वेवं साधनद्वयनियमः तथापि विद्याकर्मणोरीहितत्वात्समनंतर
ग्रंथेकिमितिपुनरनिरूपणमित्याशंक्याह विद्याकर्मणोरिति यथोक्तेचोद्येपूर्वस्यलोकेस्मिन्नित्यादावनार्थं संप्रतिवाक्यमित्याहातइति अ
प्यात इतिपदहृदयमाक्षेपसंगतिपदेनाचष्टे संगतिरितीति किमिदंसंगतानेनामतदाह संगतिरितीति तदेवकर्मविषयाद्र्यति पूर्वेति
अनेनप्रकारेणेतिवक्ष्यमाणप्रकारोक्तिः अविशिष्टोत्यादिपदेनद्वःस्वप्नादिसंग्रहः प्रत्याह वाक्यद्वयमितिसंबंधः पूर्वस्याहब्रह्मेत्यादिपू
तिवचनेनेतमाह मत्तेति मयाकार्यंयदध्ययनादितदेवाविशिष्टं त्वयाकार्यमिति पूर्वस्याग्रतशिष्टत्वाभावेप्रतिवचनानुपपत्तिरित्यर्थः
यद्दैकिंचेत्यादिवाक्यानां पूर्वानुमंत्रणवाक्यैरर्थभेदाभावात्पुनरुक्तिरित्याशंक्याहैतस्येति यद्दैकिंचेत्यादिवाक्येवाक्यार्थमाह योध्यय
नेति तंब्रह्मेतिवाक्यवदत्रयज्ञइतिवाक्यमपिशक्यंव्याख्यातुमित्याह तथेति आम्नायार्थसंग्रहार्थं तमल्कर्तृकाइतित्वेलोकइत्यस्यव्याख्या
नेयंवैकेचेत्यादिनत्रयपदार्थानुक्त्वावाक्यार्थमाहैतइति किमितित्वल्कर्तृकमध्ययनादिमयिसमर्पितेत्वयैवकिंनानुष्ठीयतेतत्राह इतऊ
र्ध्वमिति कर्तव्यतेवबंधनंतद्धिषयः क्रतुः संकल्पस्तस्मादितियावत् सपुत्रइत्यादेस्तात्पर्यमाह सर्वेति तदेतिपदयोः क्रमानुशासनोक्तिः एतत्
सर्वमित्यादिप्रतीकमादायव्याचष्टे सर्वंहीति अनयत्तनेष्णुतेर्थेविहितस्यलडोभविष्यदर्थत्वेकथमित्याशंक्याह छंदसीति [illegible]
[illegible] पूर्वानुशासनस्यफलवत्त्वमाह यस्मादित्यादिना कृतसंप्रत्तिकः सन्पिता किंकरोतीत्यपेक्षायामाह सपितेति कोयंप्रवेशोनहिविशि
ष्टस्यकेवलस्यवाविलेसर्पवत्प्रवेशः संभवत्यतआह अध्यात्मेति देवशब्दंव्याख्यानानादिः वागादिष्वाविष्टः पितृलोकैर्योनरस्यापितदावेशधीरि

७६

स्या १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्याशंक्याह वा गिरीति तज्ज्ञापितत्वमेवस्फोरयन्नाहमिति भावनाफलमाह तस्मादिति पुत्रविशेषणान्यतिरिक्तत्वं पितुस्तदवस्थमि
त्याशंक्याह सर्वेषां हीति मृतस्य पितुरितो लोकान्तरागन्तुस्तस्य कथं यथोक्तरूपत्वमित्याशंक्याहं तद्भक्तमिति पुत्ररूपेणात्रस्थितमेववि
भजते नैवेति मृतोपि पिता शिष्टपुत्रात्मनात्र वर्तते नास्माल्लोकाद्व्यावृत्तः फलरूपेणावपरत्रेति भावः उक्तेर्थेपैतरेयश्रुतिं संवादयति
तथाचेति षष्ठीप्रथमाभ्यां पितापुत्रावुच्येते सपुत्रोपदीत्यादिवाक्यमवतार्य व्याकरोति यथेत्यादिना अकृतमकृतादितिच्छेदः तस्मा
दिति प्रतीकमादाय व्याकरोति पुत्रेणेनेति तदेव प्रपंचयतीदं तदिति पुत्रवैशिष्ट्यं निगमयति सपितेति पुत्रेणैतल्लोकजयमुपसंहर
त्येवमिति यथोक्तात्पुत्रादिद्याकर्मणोर्विशेषमाह नतथेति कथं तर्हि ताभ्यां पिता लोकं जयतीत्याह स्वरूपेति तदेव स्फुटयति नहीति
पुत्रशिष्टपुत्रेणैतल्लोकजयिनं पितरमधिकृत्याहाथैनमित्यादिवाक्यं तद्व्याकरोत्यथेति पुत्रप्रकरणविच्छेदार्थोथशब्दः आवेशप्रकार
मुक्त्सायायाः पुत्रद्वारवाक्प्रवृत्तिं प्रतिजानीते कथमित्यादिना पृथिव्यै चेत्यादिवाक्यस्याववर्त्यपदत्वेनानुरूपवेकस्त्यापयति एवमिति
अवेति वैदिकीं निर्हारयितेममीबद्धवदनशीलत्वे हेतुः अनृतकेति मोहार्थतां स्मरणापाकरणश्रुतिस्मृतिभ्यां वदतीतिशेषः मीमांसक
पक्षे प्रकृतश्रुतिविरोधेन दूषयति तेषामिति कथमित्याशंक्य श्रुतेरादिमध्यावसानालोचनया पुत्रादेः संसारफलत्वावगमान्मुक्ति
फलत्वेत्याह जायेत्यादिना पुत्रादीनां चेति चकारादेतावान्वै काम इति मध्यसंग्रहः यद्यकृत्स्नतापाकरणश्रुतिस्मृतिभ्यां पुत्रादेर्मुक्तिफ
लत्वेतिनत्याह तस्मादिति पुत्रादेः श्रुतं संसारफलत्वं परामृश्य तल्लब्धः श्रुतिशब्दः स्मृतेरुपलक्षणार्थः श्रुतिस्मृत्योरविरुद्धविषयत्वे वाक्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रानं॰
७७

पोषमनुकूलयति वक्ष्यामि चेति मीमांसकपक्षं निराकृत्य भर्तृप्रपंचपक्षमुत्थापयति केचिदिति मनुष्यलोकजयस्तेनाप्याहुतिर्यथेत्यपे
रर्थः पुत्रादिसाधनाधीनतया लोकत्रयस्याहृत्तोपि कर्मणो मोक्षः संपद्यते न हि पुत्रादीन्येव मुक्तिसाधनानि विरक्तत्वविरोधादित्याशंक्याह तस्मा
दिति श्रोतव्यो वेत्याद्यो मनराकृतिरेवं मीमांसकमतवत् भर्तृप्रपंचमतमपि निराकरोतीति निरूपयति तेषामिति कथं सा तन्मतं निराकरोतीत्या
शंक्याह कृतिं विशिनष्टि कृत्स्नेति यत्रात्मोपासितव्यस्तदात्मवचनं विहितं परमतमित्युक्तं तदात्मैवेव उक्तत्वादित्याशंक्याह नचेति तथापि क
र्मणयोः फलं मोक्षो न भवतीत्याह मेधेति यत्रात्मनो ज्ञानकर्मजन्यत्वे हेतुमाह पुनः पुनरिति सत्त्वात्मैव उक्तित्वे हेतुत्वेन तरमाह यद्वैति का
र्यकारणत्वस्य कृतेरपि सत्त्वभावो न मुक्तिरित्याह शरीरमिति अविद्यातत्कार्यस्य द्वैतस्यात्मकत्वेनोपसंहारात्तदात्मसत्त्वभावो बंधान्तर्भूतो
न मुक्तिरिति युक्तं तत्र माह त्रयमिति न त्रयविरक्तस्यात्मसत्त्वाप्तिफलमपि कर्मादिविरक्तस्य विदुषो मुक्तिफलमिति व्यवस्थितिरित्याह न
चेदमिति न हि श्रोतव्यो वेत्यादिवाक्यस्यैकस्य सकृच्छ्रुतस्यानेकार्थत्वं भिद्यते हि तद्वाक्यमिति न्यायादित्यर्थः श्रोतव्यो चेत्यादिवाक्याव
ष्टंभेन पक्षद्वयं प्रतिविधाय तद्गतानि वाक्यान्याचष्टे श्रोतव्या इति पदमिदमकृत्स्नमनूद्य व्याकरोत्येवमिति कथं पुनः सत्त्वात्मभूतानामुपासकत्वा
विशतीत्यत आह सर्वेषामिति न हि तयोरभेदाद्विदुषोपि व्यामैव वा भिन्नतिविदुषि विशेषो नास्तीत्याशंक्याह साहीति दैव्यां वाचि दोषविग
मपुनरवाकेन साधयति सा चेति विहृदाचः स्वरूपं संदिपत्यमोघेति वाचि दर्शितं न्यायं मनस्यतिदिशति तथेति यन्मनः स्वभावनिर्मल
त्वेन दैवमित्युक्तं तदेव विशिनष्टि येनेति ग्रमावितिविद्वदुक्तिः येन मनसा विद्वान्प्रपोचत्यपि न हेतुत्वभावान्नदैवमिति पर्वेण संबंधः मनसु।

७७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

केत्याद्येप्राणोनिविशतीति तद्येति तमेवदेवंप्राणंप्रश्नपूर्वकंप्रकटयति सर्वाइति सएवंविदित्यादिव्याचष्टे सयइतिविदिरत्रलाभार्थः नकेव
लंयथोक्तमेवविद्याफलंकिंतुफलान्तरमप्यस्तीत्याह किंचेति सर्वभूतात्मत्वेनदोषयोगात्प्राप्तंपापंपदमनादेयमितितत्रवाक्यावष्टंभमा
शंकामाहद्वेषेति सर्वप्राणिस्थदुःखैरित्यस्माद्धेतोर्यस्मात्प्रष्टोध्याहृत्यसर्वात्मकेविदुष्येकैकभूतनिष्ठदोषयोगोनास्तीत्युत्तरमाह तत्रेति
तदेवप्रपंचयति परिच्छिन्नेति अपरिच्छिन्नधीत्वेपिसूत्रात्मकेविदुषिसर्वभूतान्तर्भावात्तद्दुःखादियोगःस्यादेवेत्याशंक्यानवरुद्धत्वविपरिव
र्त्तिकृमिदोषैरस्माकमसंसर्गवत्प्रकृतेपिसंभवान्नैवमित्यभिप्रेत्याह मरणेति नोपपद्यतेविदुषोदुःखमितिपूर्वेणसंबंधः दृष्टान्तविवृणो
ति यद्येति मैत्रस्यस्वहन्तृत्वाद्यभिमानवत्त्वात्तद्दुःखादियोगवद्विदुषःसूत्रात्मनःस्वांशभूतसर्वभूताभिमानित्वात्तद्दुःखादिसंसर्गःस्यादित्या
शंक्याद्दार्ष्टान्तिकमाह तद्येति ममत्ववतादीत्यादिपदेनाहंताग्रहणंतदेवदुःखनिमित्तंमिथ्याज्ञानमादिशब्देनरागादिरुक्तः उक्तेर्थेश्रुतिमव
तार्यव्याचष्टे नदेवतेति शुभमेवगच्छतीतिसंबंधः फलरूपेणवर्त्तमानस्यकथंकर्मसंबंधःस्यादित्याशंक्याह फलमिति उक्तमेवव्यनक्ति
निरतिशयंहीति अथेत्यादिवाक्यस्यवक्तव्याभावादानर्थक्यमाशंक्याव्यवहितोपासनानुवादेनतदेवव्रतविधानार्थमनन्तरवाक्यमित्यान
र्थक्यंपरिहरति तपत्रित्यादिना व्रतमित्यवश्यानुष्ठेयंकर्मोच्यतेजिज्ञास्याःसत्वमतःप्राह्यार्थः उपासनोक्तानन्तर्यमप्यग्राह्यार्थकमय
त्पनंतरमिति प्रवृत्तायांमीमांसायांप्राणव्रतमभग्नत्वेनधारणीयमितिनिर्द्धारणार्थमाख्यायिकामवतारयति नवेत्यादिना कथंवागादिषु
करणेषुकर्मशब्दप्रवृत्तिरित्याशंक्याह कर्माणीति तदीयस्वेहरूपयोगगम्पदर्शयितुंभूमिकांकरोति तानीति स्पर्द्धाप्रकारंप्रश्नपूर्वकंप्रक

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रचयति कथमित्यादिना यथाकर्म स्वीये स्वीये व्यापारमनुसंतस्थुरे इत्यविरेवमादीनि करणानीत्यर्थः प्रजापतेर्वागादिसृष्टमहाराः स्वकर्म प्रवृत्तिरासीदित्यत्र कार्यलिंगकमनुमानं प्रमाणयति तस्मादिति वागादीनां भग्नव्रतत्वनिर्धारणानंतर्यमथशब्दार्थः प्राजापत्यप्राणे मृत्यु ग्रस्तत्वाभावे कार्यलिंगकमनुमानं सूचयति तेनेति प्रवर्तते प्राण इति संबंधस्तस्यापि कथं प्राणस्यैव व्रतं धार्यमित्यपेक्षायामाह तानीति ज्ञापनार्थमनुसंधानप्रकारमेव दर्शयत्ययमिति तस्य श्रेष्ठत्वे फलितमाह हंतेति इतिशब्दं व्याकरोत्येवं विनिश्चित्येति अस्माकं वागादी नां व्रतानि मृत्योर्वारणाय न पर्याप्तानीति विनिश्चित्य तद्धि प्राणव्रतमेवेति संबंधः प्राणरूपत्वमस्माकं करणानां तन्नामत्वमाह यस्मादिति यस्मादित्यस्य तस्मादिति व्यवहितेन संबंधः प्राणरूपं चलनात्मत्वमिति कुतो निश्चीयते तत्राह नहीति तर्हि करणेषु प्रकाशात्मत्वमेव न चलनात्मत्वमित्याशंक्याह चलनेति संप्रति विद्याफलमाह य एवमिति तदेव स्पष्टयति यस्मिन्निति तपतीत्यर्थस्तत्तस्माद्वरणस्यापत्यः क स्येदं फलमित्युक्ते एवमेव स्फारयति य एवमित्यादिना न केवलं विद्यायां यथाक्रममेव फलं किं तु फलांतरमप्यस्तीत्याह किं चेति प्राणविदा तहस्य ह्यौनकृते वेति भावः इत्यध्यात्ममित्यस्यानर्थक्यमाशंक्याह इत्येवमिति अध्यात्मदर्शनमुक्त्वाधिदैवतदर्शनं वक्तुमनंतरं वाक्यमवतारयत्यथेति नर्हि ज्वलिष्यामीत्यादि किमर्थमित्याशंक्याह कस्येति वदिष्यामीत्यादावुक्तं व्याख्यानमिहापि द्रष्टव्यमित्याहाध्यात्मव दिति यथादैवतं स्वस्वदेवताव्यापारमनतिक्रम्याध्यात्मदेवता विद्युदाद्या अध्विरेव व्रतमित्यर्थः स यथैषामित्यादिव्याचष्टे अस्तमितमिति वायुरपि स्व स्वनानाः स्वकर्मणो न प्रच्युत इति येन वायुव्रतेनाभग्नव्रत इति शेषः तदेव साधयति म्लोचंतीति ब्राह्मणोक्तमर्थमुपसंहरत्येवमिति १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्राह्मणार्थंदर्शयितुंमंत्रमवतार्यव्याकरोत्यथेत्यादिना सूर्योधिदैवप्रलयकालेवायोरुदेतितत्रचापरसंध्यासमयेस्तंगच्छतिसएववा
ध्यात्मंप्रबोधसमयेचक्षुरात्मनाप्राणादुदेतिप्रसुप्तस्वापसमयेचतस्मिन्नेवास्तंगच्छतीतियतश्चेत्यादेर्विभागः श्लोकस्योत्तरार्द्धंप्राणा
दित्यादिब्राह्मणमवहितंश्लोकेदर्शितानांप्राणानांवृत्तिमर्थंप्रथमंव्याचष्टे तंदेवाइति धारणस्यप्रकृतत्वात्सामान्येनचविशेषंलक्षयन्नाह तंदेवाइ
ति धारणस्यप्रकृतत्वात्सामान्येनचविशेषंलक्षयन्नाह धर्मवंतइति सएवेतिधर्मपरामर्शः तत्रेतिसतिसप्तमीसंप्राणमत्रमधिकरोति इमं
मंत्रमिति श्लोकोक्तिः उत्तरार्द्धस्यब्राह्मणमाकांक्षापूर्वकमन्याप्यव्याचष्टे तमित्यादिना तैरभग्नैर्दैवैरभग्नत्वेनमीमांसितंतेनुगच्छंतीत्यर्थः
विशेषणस्यार्थवत्वंसाधयति यमिति उक्तंदेवमग्निरहस्यमाश्रित्यविशदयति अद्येति यथात्रैरूप्यमाद्योद्यप्राहुः अनुगच्छतिशाश्वतीते
ततवायुमनुतदधीनएव तस्मिन्कालेउद्वात्यस्तमेतिउद्वासीदस्तंगतइत्यर्थः इतिबाह्लोग्निविषयवाक्यसमानार्थः अध्यात्मंप्राणव्रतमधि
दैवंचवायुव्रतमित्येकमेवव्रतंधार्यमितिमंत्रब्राह्मणाभ्यांप्रतिपाद्यतस्मादितिव्याचष्टे यस्मादिति नहिवागादयोग्न्यादयोवापरिस्पंदविरा
हिणःस्यातमर्हंतीतितेनप्राणादिव्रतंतैरनुवर्त्यंतएवेत्यर्थः एकमेवेतिनियमेप्राणव्यापारस्याभग्नत्वंहेतुमाह नहीति तदनुपरमेफलितमा
ह तस्मादिति ननुप्राणनापानाद्यभावेजीवनासंभवात्तस्यार्थिकत्वात्तदनुष्ठानमविधेयमित्याशंक्यैवकारलभ्यंनियमंदर्शयति हित्वेतिनेत्या
दिवाक्यस्यावतारार्थंप्रकृतात्पर्यार्थमाह यद्यहमिति प्राणव्रतस्यसकृदनुष्ठानमाशंक्यसर्वेंद्रियव्यापारनिवृत्तिरूपंसंन्यासमामरणमनुव
र्तयेदित्याह यदीति विपक्षेदोषमाह यदिहीति प्राणादिपरिभवपरिहारार्थंनियमंनिगमयति तस्मादिति विद्याफलंवक्तुंभूमिकांकरोति

धि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं॰
७५

तेनेति वृत्तमेव विशिनष्टि प्राप्नोतीति प्रतिपत्तिमेव प्रकटयति सर्वं ह्येतदिति संप्रति विद्याफलं कथं यत्त्वेवमिति कथमेकस्मिन्नेव विज्ञाने फ-
लविकल्पः स्यादित्याशंक्य विज्ञानप्रकर्षापेक्षं साधुत्वं तन्निकर्षापेक्षं त्वसालोक्यमित्याह विज्ञानेति ब्राह्मणे प्रपंचितस्य विद्याकार्यस्य सं-
क्षेपेणोपसंहारार्थं ब्राह्मणान्तरमवतारयति यदेतदिति फलमपि ज्ञानकर्मणोरुक्तं विशेषणत्रयं यदेतत्प्रस्तुतमिति संबंधः अव्याकृतप्र-
क्रियाया उक्तं स्मारयति यच्चेति व्याकृताव्याकृतस्य जगतः संगृहीतं रूपमाह सर्वमिति वाङ्मनःप्राणात्मकं त्रयमिति शंकां प्रत्याह किं-
तदित्यादिना किमर्थः पुनरयमुपसंहार इत्याशंक्याह तान्येवेति आत्मशब्दार्थमाह यस्मादिति अनात्मत्वेन जगतो हेयत्वं तच्छब्देन प-
रामृश्यते वैराग्यमपि किमर्थमित्याशंक्याह नहीति अविरक्तोपि कृतरतितया तत्राधिकारी स्यादित्याशंक्याह बाह्येति अनात्मप्रमा-
णस्य आत्मानं प्रत्याययितुमशक्यत्वात् अनात्मनः सर्वात्मत्वात् कुतो विरोध इत्याशंक्याह तथेति कथं तर्हि प्रत्यगात्मधीरित्यत आह कश्चिदिति उपसंहार-
स्येत्यसफलत्वेपि सर्वस्य जगतो नामादिमात्रत्वे प्रमाणाभावाद् युक्तमिति शंकते कथमिति अनुमानैः संभावनां दर्शयति यच्चेति तत्र तत्का-
र्यत्वहेतुकमनुमानमाह तेषामिति वागित्येतदुक्थमिति संबंधः इंद्रियग्राह्यत्वार्थं वाक्यस्यार्थमाह शब्देति संगृहीतमर्थं विवृणोति यः क-
श्चिदित्यादिना उक्तमुपपादयितुमुत्तरवाक्यमित्याह तदादेति कार्यकारणभावेपि किमायातमत आह कार्यं चेति सर्वे नामविशेषास्तन्मा-
त्रात्मत्वेनानभिधेयतेन न कार्यत्वाद्यद्यत्कार्यं तत्तत्त्वेनानभिधेयं यथा मृद्घटादिरित्यर्थः सर्वे नामविशेषास्तत्सामान्यकल्पिताः प्रत्येकं तदनुवि-
द्धत्वाद्रज्जुवत् सर्पादिवदित्यनुमानान्तरमाह तथेति कार्याणां कारणेनभावतवदितियावत् उक्तमेव प्रश्नपूर्वकं प्रपंचयति कथ-

७५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मित्यादिना सामान्यं साधयत्येतद्धीति इवस्य नामविशेषाणाममात्रे तत्र भवंतीत्याह किंचेति नामविशेषाणां नाममात्रादात्मलाभात्
स्मात् विशेषान्तरैर्वा तत्र भावः इत्यर्थः सर्वे नामविशेषास्तत्सामान्याश्रयवस्तुतः संति तेनात्मवत्वाद्येनात्मवंतस्ते ततोऽन्य वस्तुतो न सं
ति यथा मृदात्मवंतो घटादयो वस्तुतस्ततोऽन्येन संतीत्येवमानेत्याप्तिं साधयति यस्येति हेतुसमर्थनार्थं इत्येवाक्यमुत्थापयति क
थमित्यादिना अतः शब्दमात्रात्तद्विशेषाणामात्मलाभो भवतीति विशेषः तत्रैव युक्तिमाह ततो हीति तत्रैव वाक्यमवतार्य व्याचष्टे तदि
त्यादिना तस्मात्तन्मात्रात्तद्विशेषाणामात्मलाभ इति वाक्यशेषः प्रथमके इकया सिद्धमर्थमुपसंहरत्येवमिति उपपत्तिद्वयमुक्तं वाक्य
ल्प द्वयेपि तैर्मित्यादिश्चात्येवमुक्तयोरिति तत्र व्याख्यानसापेक्षाणि पदानि व्याकरोत्यथेत्यादिना मव्याख्यानानेनेत्यर्थमप्यशब्दार्थः वक्तुर क्थ
मिति संबंधः वक्तुरिति वक्तुः शब्दाभिधेयवक्तृविषयसामान्यमभिधीयते तच्च रूपसामान्यं तदपि प्रकाशमात्रमिति योजना रूपप्रकर
णानेनेत्यर्थमप्येतदुच्यते क्रियाविशेषाणां क्रियामात्रे तत्र भावं प्रश्नद्वारा स्फोरयति कथमित्यादिना आत्मशब्देनात्र शरीरनिर्वर्त्यकर्म गृह्य
ते पुरुषविधब्राह्मणशेषमनुकूलयत्यात्मनाहीति तत्रैवोपपत्तिमाह शारीरेचेति तथापि कथमात्मशब्दः शरीरनिर्वर्त्यकर्मगृह्यतेहि
व्यापीकालत्वात्तेष्वाह तत इति संक्षेपस्यापि संक्षेपांतरमाह तदेतदिति तदेतत्त्रयं त्रिदंडविष्टंभवत्संहतं सदेकमिति संबंधः कथं सं
त हत्वमत आह इतरेतराश्रयमिति रूपविषयमाश्रित्य नामकर्मणी सिद्ध्यतः स्वात्मनेन निर्विषयत्वात्तयोः सिद्धार्थनान्नामकर्मणी वा
प्यित्य रूपं सिध्यति नहीति हित्वा किंचिदुत्पद्यत इत्यर्थः वाचकेन वाच्यस्य तेन नरस्य नाभ्यां च क्रियायास्तथा तयोरपेक्षादर्शनास्त्वोम्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं॰
८०

मभिव्यंजकत्वमाहेतरेति सतिनाम्निरूपसंहारदर्शनाद्रूपेचसतिनामसंहारदृष्टेःसतोश्चतयोःकर्मणस्तस्मिंश्चसति तयोरुपसंहारोपलं
भादितरेतरप्रलयमित्याहेतरेतरप्रलयमिति त्रयाणामेकत्वविरुद्धमितिशंकित्वापरिहरति केनेत्यादिना कथंकार्यसंघातात्मनात्रयाणा
मेकत्वंतत्राह तयेति नामरूपकर्मणांकार्यकरणसंघातमात्रत्वेपितत्तोव्यतिरिक्तसंघातानुस्यूतमात्मानमेकत्वेनाह तयेति नामरूपक
[illegible] हूत्यत्स्यादित्याशंक्याहैतावदिति नामादित्रयस्यसंघातमात्रत्वेकथंव्यवहारासांकर्यमित्याशंक्याहात्मेति संघातोयमात्मशब्दि
तःस्वयमेकोपिसन्नध्यात्मादिभेदेनस्थितःत्रयमेवभवतीतिव्यवहारासांकर्यमित्यर्थः एकस्मिन्नपिसंघातेकार्यकरणरूपेणावांतरविभाग
माह तदेतदिति आत्मभूतस्य सोपाधित्वेनस्थितइतियावत् अविनाशीस्थूलदेहेगलत्यपियावन्मोहंनगलतीत्यर्थः ॥ सत्वस्यच्छस
त्यभूतपंचकेतदात्मकेनामरूपेइत्याह नामेति करणात्यात्मकथयति क्रियात्मकस्त्विति पंचीकृतपंचभूतात्मकेतत्कार्येसर्वसच्छन्न परा
न्नेतिव्याख्यातेःसत्यंवैराजशरीरंकार्यमपंचीकृतपंचमहाभूतकार्यात्मककरणरूपसप्तदशकलिंगात्मसूत्रात्मायतनेनसैवाच्छादकं
ततस्तत्वात्मापिस्थूलदेहकत्वत्वादूर्ध्वंविज्ञानंतेनापिच्छन्नंप्राणस्वरूपंतत्तरामितितत्तदज्ञानेःवहितैर्भाव्यमितिभावः इदानीमविद्याकार्य
प्रपंचमुपसंहरत्येतदिति अविद्याविषयविवरणस्यवक्ष्यमाणोपयोगमुपसंहरन्नाहइति प्रपंचितेस्यविद्याविषयेततोविरक्तस्यात्मानं
विविदिषोस्तत्ज्ञापनार्थंचतुर्थंब्राह्मणंसंदर्भोभविष्यतितस्मादविद्याविषयविवरणमुपयोगीतिभावः ॥ इतिश्रीमत्परमहंसप ८०
रिव्राजकाचार्यश्रीशुद्धानंदपूज्यपादशिष्येणभगवदानंदज्ञानेनकृतायांबृहदारण्यकभाष्यतात्पर्यटीकायांतृतीयोध्यायः ॥ ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तृतीयेऽध्याये संचिंतितविद्याविद्ययोरविद्याप्रपंचितासंप्रतिविद्याप्रपंचयितुंचतुर्थमध्यायमारभमाणोऽनुसंकीर्तयत्यात्मेति किमित्यर्थांत
रेषु सत्स्वात्मतत्वमेवानुसंधानव्यतत्राह तदन्वेषणोचेति तस्यैवात्वेष्टव्यत्वेऽपरब्रह्मास्पदत्वेऽपरमात्मेदत्वेदत्वंतस्माद् तदेवेति ग्राह्मतत्व
ज्ञानस्य सर्वोपनिषत्फलत्वाच्च तदेवात्वेष्टव्य मित्याहात्मानमिति उक्तयापरिपाट्यासिद्धमर्थं संगृह्णात्यात्मतत्वमिति उ
कमर्थांतरमनुवदति यस्त्विति सोऽविद्याविषयइतिसंबंधः कथं भेददृष्टिविषयस्याविद्याविषयत्वं तत्राह द्वासुपर्णाविति योभेददृष्टिप
रः सनवेदेत्यविद्यातद्दृष्टिमूलं संचिंतितातेन तद्विषयोभेददृष्टिविषयइत्यर्थः कथं यथोक्तौ विद्याविद्याविषयावसंकीर्णाववसातुंशा।
स्त्रेतेतत्राहेकथेति समाप्ते ब्राह्मणे वृत्तमर्थं कथयतीति तच्चेति विद्याविद्याविषययोरितियावत् आदिपदंसाध्यसाधनावांतरभेदसंग्रहा
र्थं यथोक्तो भेद एव विशेषः तस्मिंस्त्विति योगोव्यवस्थापनं तेनेत्यर्थः उपसंहारब्राह्मणेनेवृत्तमनुभाषते सचेति अथवा उक्तौ विद्याविद्या
विषयौ कथमसंकीर्णौ मंतव्यावित्याशंकाहे कथ्येति तयोरनंतरग्रंथस्य विषयपरिशेषार्थं चतुर्विधब्राह्मणशेषमारभ्योक्तेदर्शयति तच्चे
ति तर्हि समाप्तत्वादविद्याविषयस्य कथमविदुषो गार्ग्यस्य प्रवृत्तिरित्याशंकानंतरमर्थमवांतरविभागमनुवदति सचेति तावेवप्रकारौ दर्शि।
यन्नादौ सत्वं शरीरमुपन्यस्यत्वं तदिति तस्य बाह्यकरणद्वारा स्थूलेषु विषयेषु प्रकाशकत्वमस्ति तत्वं तद्व्युत्पादितं हिलीयप्रकारस्याचक्षा
णस्य लेशशरीरं दर्शयति बाह्येति तस्य कयापि विधया स्वदेहमात्रप्रकाशकत्वादप्रकाश त्वं ग्रागमापयित्वे नावदेयत्वं सूचय।
त्युपजनेति यथा शृहस्पतत्वादिविद्विरंगं तथा स्वस्य देहस्य स्थूलो देहस्तथापि हरणादिविना शरीरस्यव्यवहारायोग्यत्ववत्स्वापि स्य।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लदेहं विनानन्तयोग्यत्वमितिमत्वाह तस्येति तस्य सर्वप्रकरणं तेनामहपे सत्यमित्यत्र प्रसक्तत्वमस्तीत्याह सत्येति सर्वथाबाधवैधु
र्यं सत्यत्वमिति शंकां निरस्यति विशिनष्टि सत्यस्येति तस्य कार्यं दर्शयति तेनेति वृत्तमनूद्याजातशत्रुब्राह्मणमवतारयति स एवेति आदित्य
वेद्यादयो बाह्याधारभेदात् अनेकधात्वमतिष्ठाम इत्यादिवक्ष्यमाणगुणवपात्स्वकत्वं कथं तर्हि तस्यैकत्वं तत्राह प्राण इति प्राणस्य नाना
त्वमेकत्वं चोक्तं तत्रैकत्वं विवृणोति तस्यैवेति प्राणस्यैव स्वभावभूतोऽनात्मलक्षणः पिंडः समष्टिरूपो हिरण्यगर्भादिशब्दरूपाधिविषये
तत्र तत्र श्रुतिस्मृत्योरुच्यते स चाग्निर्मूर्धा चक्षुषी चंद्रसूर्यावित्यादिश्रुतेः सूर्यादिभिः प्रविभक्तैः करणैरुपेतो भवतीत्यर्थः यद्यपि समस्त
व्यस्तं च तदिदं हिरण्यगर्भमात्रमेव न तस्मादधिकमस्तीति हिरण्यगर्भस्तैव्यस्तैकं चेति एकत्वं विशदीकृत्य प्राणस्य नानात्वं विशदयति
प्रत्येकं चेति गोत्वादिसामान्यवत्स्वल्पत्वं व्यावर्तयति चेतनावत्त्विति केवलभोक्तृत्वपक्षं वारयति कर्तेति वक्ताऽपूर्वपक्षवादीतियावत् ता
स्मादपाख्यातब्रह्मणो विपरीतं सम्यग्ब्रह्म तस्मिन्नात्मदृष्टी राजाजातशत्रुसिद्धान्तवादीत्यर्थः किमिति वक्तृश्रोतृरूपाख्यायिका प्रणीयते त।
त्राहैवंहीति एवंशब्दार्थमेवस्फुटयति पूर्वपक्षेति अतो भवति तत्समाख्यायिकयेति शेषः आख्यायिकान्तरेनीकारे दोषमाह विपर्यये
हीति यथा तर्कशास्त्रेण समर्थ्यमानोऽर्थोऽत्यन्तं न शक्यते श्रोतुं त्विति कृतकेण निरंकुशत्वात्तथा केवलमर्थोऽनुगम्यते प्रश्नप्रतिवचन।
भावरहितैर्वाक्यैस्तैः समर्थ्यमानोऽपि दुर्विज्ञेयोऽर्थः आख्यायिकानां तु श्रियते ततः सा सु क्षुप्रतिपत्त्यर्थमनुसर्तव्येत्यर्थः अतो दुर्विज्ञेय
त्वेतद्धा दार्ढ्यं तेनेति यथोक्तस्य वस्तुनो दुर्विज्ञेयत्वे श्रुतिस्मृती संवादं दर्शयति तथाचेति ससंस्कृतापरिशुद्धादेव बुद्धिः सात्त्विकी बुद्धिः सामा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्मात्रबुद्धिस्तामसी राजसी चेत्यतिगह्वरत्वमन्यत्तगंभीरत्वमेवं भस्तात्पर्यं ब्रह्मणो दुर्विज्ञेयत्वे फलितमाह तस्मादिति आन्वीक्षिकायाः स्व
तन्त्रतिपन्नार्थं शुष्कार्थीत्तरमाहाचारेति अत्र मार्दधमेन प्रणिपातोपसदनादिहान विद्याग्राह्याधमान्न तमेनतद्व्यतिरेकेण श्रद्धादिमात्रेण
सालभ्यत इत्याचारप्रकारज्ञापनार्थं स्वाध्यमारंभ इत्यर्थः आन्वीक्षिकायाः यथ्याकेर्थं चिंतत्वेकथ्यमेवमिति वक्तृश्रोत्रोर्मध्ये यथोक्ता
चारवता श्रोत्रा विद्यालब्धा व्याख्यात्रा तादृशेन सोपदेष्टव्येत्येषोपास्यामान्वीक्षिकायामत्र गलो गम्यते तस्मादाचारविशेषं दर्शयितमेषा।
आन्वीक्षिकापुकेत्यर्थः आगमाद्‌सारि श्रुतस्मृतप्रदायादेवतत्वधीर्लभ्यते यस्तु केवलस्तर्कस्तद्दृशात्रैवावबुद्धिः सिद्धति तथा च केवलतर्कप्रयु
क्तानत्वबुद्धिरिति संभावनानिषेधार्थान्वीक्षिकेति पदं तत्र माह केवलेति केवलेन तर्केण तत्वबुद्धिर्न सिद्ध्यतीत्यत्र श्रुतिस्मृती दर्शयति नै
षेति मतिरित्यादिति शेषः प्रकारान्तरेणान्वीक्षिकामवतार्य तत्रान्वीक्षिकात्र गुणं दर्शयति तथाहीति श्रद्धा ब्रह्मज्ञाने परमसाधनमित्य
त्र भगवतोपि संमतिमाह श्रद्धावानिति आन्वीक्षिकार्थे बहुधा स्थिते तत्तत्राणि व्याचष्टे नवेत्यादिना शर्वपत्तवादित्वे हेतुमाहा विद्याविष
येति गर्वितत्वे हेतुमाहा समग्रमिति इयमेव तत्वाकनिमित्तमित्यज्ञापिकस्यादित्यनुषज्यते अतो ब्रह्मतेत्रवाणीतियागेव महत्सूदाने निमित्त
मिति शेषः श्रुतिं व्याचष्टे जनक इति प्रसिद्धजनकस्य दातृत्वादितद्व्यावर्तको वै निपात इतियावत्तत्वाकार्थमाह जनकोदित्स्वित्यादिना
संभावितवानसीति प्राग्जकेवाप्यावं महत्सदाने निमित्तमिति शेषः तस्मान्मुग्धप्रसिध्यतिक्रमणादिति यावत्तत्सर्वदातृत्वादिकमित्यर्थः
इतिशाहो मिप्रायसमाप्त्यर्थः हृदिप्रविष्टो भोक्तारमित्यादिग्रन्थं दं प्रमाणयन्नाहमिति दृष्टिफले नैरन्तर्याभ्यासं दर्शयन्नुपसंहरति तावता

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ्र॰गे॰
८२

ममकिमायातं तत्राह तस्मादिति मामेति प्रतीकमादायाभ्यासस्यार्थमाह मामेति विनिवारयन्नन्यवाचेति संबंधः एकस्माज्जो निवा
रकत्वमपरस्य संवादेन संगतिरिति विभागे संभवति उक्तो द्विर्वचनमित्याशंक्याह मामेत्याबाधनार्थमिति तदेतदेवस्फुरयत्येवमिति त्वदुक्ते
नप्रकारेण योगविषयोर्थस्तस्मिन्नावयोर्विज्ञानसाम्यादेवं समानेपि विज्ञानवत्वे सत्यस्मानविज्ञानवतरवस्त्रीकृत्य तमेवार्थमस्यान्तस्तवपदेः
प्तेन ज्ञापयता भवता वयं बाधितास्याम इति योजना तत्रापि गार्ग्यस्य कण्ठमीषत्बाधनेन तत्रा हात इति चलितशः सर्वेषामित्यादिवाक्यशे
काद्दारावतार्थं व्याकरोत्यथेत्यादिना पतंपुरुषमिति पोषः इति शाट्या गुणोपास्तिसमासार्थः श्रवीकरीत्यात्रिभिर्गुणैर्विशिष्टं ब्रह्मतदुपा
सकस्य फलमपि जानामीत्युक्ताफलवाक्यमुपादत्ते सयइति किमिति यथोक्तं फलमुच्यते तत्राह यथेति मनसि चेति चकारान्वद्वीचे
त्यर्थः एकः पुरुषस्तमेवाहं ब्रह्मोपासे त्वं चेत्यमुपास्वेत्युक्ते मामेत्यादिना प्रत्युवाचेत्याह इतिस्वैवादिति भानुमंडलतो हि गुणं चंद्रमंडलमि
तिप्रसिद्धिमाश्रित्याह महानिति कथंपांडरवासस्त्वं द्राभिमानिनः प्राणस्य संभवतीत्याशंक्याह्राण्णशरीरत्वादिति पुरुषो हि शरीरेणवास
प्तसेव वेष्टितो भवति पांडरत्वं चापां प्रसिद्धमापो वासः प्राणस्येति च श्रुतिः अतो युक्तं प्राणस्य पांडरवासस्त्वमित्यर्थः न केवलं सोमशब्देन
चंद्रमा गृह्यते किं तर्हि लतापि समानं नामधर्मत्वादित्याह यत्रेति तं चंद्रमसं लतात्मकं बुद्धिनिष्ठं पुरुषमेकीकृत्याहं ग्रहणेणोपास्तिरित्यर्थः
सप्रत्युपास्तिफलमाह यथोक्तेति यज्ञशब्देन प्रकृतिरुक्ता विकारशब्देन विकृतयो गृह्यंते यथोक्तोपासकस्य प्रकृतिविकृत्यनुष्ठानसामर्थ्यं
लीलालभ्यमित्यर्थः अज्ञातयस्योपासनानुसारित्वादुपपन्नत्वमभिप्रेत्योपासकं विशिनष्टि अद्यात्मेति ॥ संवाददोषेणाचेद्ब्रह्मणपिर

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तासहितमाह [illegible] पालिपापतीनामुपसंरक्षणमिति निपततितेषां [illegible] प्रकृतिकः किं किं नु [illegible]

प्रत्याख्याते ब्रह्मांतरमाह तथेति कथमेकमुपासनमनेकफलमित्याह विभुतामिति अप्रवर्तित्वमप्रवर्तकत्वमक्रियावत्त्वं वा कथमेक
मिन्द्रायावपराजितासेनेति गुणः संभवति तत्राह महत्तामिति विशेषणत्रयस्य फलत्रयं क्रमेणोत्पादयति जिष्णुरित्यादिना अन्यतस्त्या
नामन्यतो मारणो जातानां यद्दुर्विर्विष्णुते क्षिप्यते तत्सर्वं भस्मीकरणेन सहते तेनाग्निर्विषासहिः यथा एवं विद्युतो बाहुल्यात्तान्मनि प्रजा
यां च फलबाहुल्यमुक्तं तथात्राप्यग्नीनां बहुलत्वादुपासकस्यात्मनि प्रजायां च रोमाग्नित्वं सिद्धमित्याह वाशीति प्रतिरूपत्वं प्रतिकूलत्वमि
२ त्येतद्व्यावर्तयत्यत्र रूपमिति अमच्छफलमिति संबंधः अस्मादुपासितुरित्यर्थः तथाविधश्रुतिस्मृत्यनुकूलमितियावत् हार्दं चैतन्येतदेवस्य
यति सत्वेति सर्वत्रैकेति विशेषणस्य देवतेति विशेष्यतया संबंधेन तदेव रोचिष्णुत्वमित्यर्थः आत्मैतमेवाहमित्यादौ विशेषः तस्य गुणवदुपा
सनस्येत्यर्थः सर्वमायुरित्येतद्व्याचष्टे यथोपात्तमिति कालतरसावेकादेवतातत्राहाश्विनाविति तस्यैदेवत्वेतियावत् यथोक्तगुणद्वयमु
पपादयति दिगणमिति द्वितीयवत्त्वं साधुभृत्यादिपरिच्छन्नत्वं प्राह ब्रह्मोपासकस्यैव तन्मो ब्रह्मोपासकस्यापि फलमित्याह फलमिति फल
भेदाभावे कथमुपासनभेदः स्यादित्याशंक्याह मृत्योरिति व्यस्तानि ब्रह्माण्युपन्यस्य समस्तं ब्रह्मोपदिशति प्रजापताविति आत्मवत्त्वंवपुषा।
त्मकत्वे फलस्यात्मगामित्वात्प्रजायां न तदभिधानमुचितमित्याशंक्याह बुद्धीति विचारार्थोप्लुतिरिति कथयति किमेतावदिति वाक्यार्थ।
बोधसमाधिमास्फुटयति किमित्यादिना आदित्यादेर्विदितत्वनिषेधं प्रतिज्ञाय हेतुमाह न फलैहीति नैतानि वाक्यानि फलवद्विज्ञानप
राणि अर्थवादत्वादित्याशंक्याह नचेति फलवत्त्वाच्चापरेव विधिपराण्येतानि वाक्यानीत्याह तदनुरूपाणीति अर्थवादत्वेपि तेषामर्थवत्त्वं

एतावन्नु३ इति श्रुतौ निग्रहस्थानुयोगइति प्लुतः उत विद्वानमुं लोकं
प्रेत्य कश्चन गच्छति३ आहो विद्वानमुं लोकं प्रेत्य कश्चित्समश्नुता३उ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं-
८२

तेकिंनस्यादित्याशंक्याहार्थवादत्वइति वाक्यानांफलवद्वित्वानपरत्वमुपेत्यनिषेधवाक्यस्यगतिंपृच्छति कथंतर्हीति तस्यानर्थकांप
रिहरति नैषदोषइति अधिकृतस्यापेक्षितत्वाद्देवनप्रतिषेधस्यप्रसक्तंस्फुटयति ब्रह्मेति नैतावतेत्यविशेषेणात्मब्रह्मज्ञानमपिनिषिद्धमि
तिचेन्नेत्याह यदीति किंचनिष्कामेनचेदेतानुपासनान्यनुष्ठीयंतेतदैतेषांब्रह्मज्ञानार्थत्वादनात्मब्रह्मज्ञाननिषेधमंतरेणनिषेधोपपत्ते
रित्याहैतद्वित्वानेति आदित्यादिकमेवमनात्मब्रह्मेतिनिषेधानर्थक्यंतदवस्थमित्याशंक्याहाविधेति आदित्यादेरनात्मब्रह्मत्वासंभवान्नि
षेधस्योपपन्नत्वात्तस्यामर्थ्यसिद्धमर्थमुपन्यस्यति तस्मादिति उपासनवाक्यस्याभ्यस्याच्चष्टे तद्वेति अब्राह्मणादध्ययनस्यापत्कालेविधी
यते अनुव्रज्यावत्शुश्रूषायावदध्ययनेगुरोः नाब्राह्मणोगुरुःशिष्योवासमान्यंनिकंवसेदित्यादिन्याचारविधिशास्त्रात्आदित्यादिब्रह्मणो
विशेषमाह यस्मिन्निति प्राणस्याप्रियमाणस्यैवसंबोधनार्थंप्रयुक्तंनामाश्रवणादापेषणाच्चान्यानात्मस्याभोक्तृत्वंसिद्धमितीतिफलित
माह तस्मादिति तोऽहमनमित्यादिरनुप्रहषत्वनुक्तिमाह्वयति कथमिति गार्ग्यकाश्यपाभिमतयोरपिजागरितेकरणेषुसंनिधानाविशे।
षात्तेषेवकिमितिविवेकोनदर्शितइत्यर्थः जागरितेकरणेषुद्वयोःसंनिधानेपिसांकर्यादुष्करंविवेचनमितिपरिहरति जागरितेब्रह्मशाह्ना
दंधेमशाङ्कमध्याहत्ययोजनानतर्हिस्वामिभृत्यन्यायेनतयोर्विवेकोपिसुकरःस्यादित्याशंक्याह किंत्विति किंतद्विवेकावधारणकारणमतदा।
इ यदुक्तमिति कथंतदनवधारितविशेषमितितदाह तद्वेति इहेतिजागरितोक्तिः यद्यपिजागरितेद्वित्वात्स्वभावतःविवेकार्थंतयोरुपरा।
तिस्वप्नभोक्तैवसंबोधितःस्वनामभिस्तद्वहंशोष्यतिनाचेतनस्तथापिनेष्टविवेकसिद्धिर्गार्ग्यकाश्यभीष्टात्मनोऽस्त्यितिसेप्यादितिशंकते

तद

८२

प्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नन्विति संशयं निराकरोति नेत्यादिना विशेषावधारणमेव विशदयति योहीत्यादिना स्वव्यापारस्वतन्त्रत्वशाब्दादिः यथा निर्ज्ञातो यथोक्तै
र्विशेषणैः स्वरूपलक्षणमनतिक्रम्य वर्तमानः प्राणस्योक्तविशेषणवतः स्वापे वस्थानेपि तस्य तदा भोगाभावस्तत्र भोक्तृत्वराभ्युपगमादित्या
शंक्याह नचेति तस्यैव भोक्तृत्वे फलितमाह तस्मादिति अस्तु तस्य प्राणशब्दश्रवणं तत्राह नचेति परिशेषसिद्धमर्थमाह तस्मादिति प्राणस्य
भोक्तृत्वव्यतिरेकद्वारा साधयति भोक्तृत्वभावश्चेदिति नचयं केतस्माद्भोक्तेति शेषः उक्तमर्थं दृष्टान्तेन स्पष्टयति नहीत्यादिना उलपेवा(
लतृणविपत्तेदोषमाह नचेदिति उक्तमर्थं संक्षिप्याह नचेत्यादिना प्राणस्याभोक्तृत्वमुक्तमुपसंहरति तस्मादिति यद्यपि प्राणः स्वापेश
ब्दादीनप्रतिबुद्ध्यते तथापि भोक्तृस्वभावो भविष्यतीत्याह नहीति संबोधनशब्दश्रवणमतः शब्दार्थः तस्य स्वनामाग्रहणे संबंधाग्रहणा
कृतेनानात्मत्वकृतमिति शंकते संबोधनार्थेति शंकामेव विशदयति स्यादेतदित्यादिना देवतायाः संबंधाग्रहणमयुक्तं सर्वज्ञत्वादित्या
शंक्याह नदेवतेति नदेव प्रपंचयति यस्य हीत्यादिना नयेति ग्रहणकर्तृनिर्देशः अवश्यमिति स्वचितामनुपपत्तिमाह ह्यन्यथेति आदिपदे
न यागस्तुतिनमस्कारादिर्गृह्यते सव्यवहारोभिमतामोगप्रसादादिः संबोधननामाग्रहणं तत्कृतानात्मत्वदोषस्य त्वदिष्टात्मनोपि तुल्य इ
ति शंकते चानितिकेति संस्पृष्टीं तचोद्यं विघूर्णोति यस्य चेति तदात्मपुष्टमिष्टस्यायं प्रतिपत्तिर्युक्तेति संबंधः नहि विषयत्वादतिरिक्तात्मविषयत्वा
दिति यावत् अस्येवातिरिक्तस्यात्मनः संबोधनशब्दश्रवणमिति चेदित्याह नकदाचिदिति त्वदिष्टात्मनः संबोधनशब्दाप्रतिपत्तावपि भोक्तृ
त्वांगीकारस्तत्र शब्दार्थः अभोक्तृत्वे प्राणस्येति शेषः यथा स्वतः पादांगुलिरित्यादिना मोक्षो मे ज्ञानोनिष्पत्तिसर्वदेहाभिमानित्वेन तन्मायानभि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मानित्वाद्देवं काष्ठेष्वात्मतः सर्वकार्यकरणाभिमानित्वादंगुलिस्थानीयप्राणमात्रेण तद्भावात्तन्नामाग्रहणं नत्वचेतनत्वादिति परिहरति
नतद्दृतइति तदेव स्फुटयति यस्येति प्राणमात्रे प्राणनादिकरणवतोपिभिमानाभावे फलितमाह तस्मादिति चेदस्यापि प्राणैकदेशत्वात्त
न्नामभिः संबोधने कृत्स्नाभिमानी सन्नो निष्टत्वज्ञाप्यंगुल्यादिदृष्टांतोपपन्नेरित्याशंक्याह नवेति गोत्ववत्तस्य सर्ववस्तुषु समाप्तेरहमि
ति सर्वत्राभिमानसंभवाच्चेदनामोक्तावपि नाप्रतिपत्तिर्युक्तेत्यर्थः प्राणवच्छिदात्मनोपि पूर्णतया सर्वाभिमानसिद्धेर्बोधाबोधौ तुल्यावि
त्याशंक्याह नवेति गोत्ववत्तस्य सर्ववस्तुषु देवतेति विशिष्टस्यात्मनो देवताया मात्मत्वाभिमानादितरस्य चक्षुरादेस्तदभिमानत्वेन तद्यो।
गात्तत्त्वतेत्यर्थः प्रकारांतरेण प्राणस्याभोक्तृत्वे वारयन्नाशंकते स्वनामेति अयुक्तं प्राणेतरस्य भोक्तृत्वमिति शेषः तदेव विवृणोति स
मस्येति विशेषदर्शयन्नुत्तरमाह नात्मेति काश्यपाभीष्टात्मनः समत्वविशेषयुक्तं फलमाह समत्वादिति प्राणस्यापि संहतकारणत्वात
स्वनामाग्रहणमित्याशंक्यान तस्यासमत्वकृते कार्यं कथयति नवेति नहि करणस्वामिनि म्रियमाणे करणोपरमः संभवति तस्य चात्रप
रतकरणस्य स्वनामाग्रहणमयुक्तमयुक्त मित्यर्थः प्राणनामत्वेन प्रसिद्धनामभिः संबोधनात्तदनुत्थानेनानात्मत्वादिति शंकते अप्रसि
द्धेति तदेव स्पष्टयति संविदीति प्रसिद्धमनूद्याप्रसिद्धं विधेयमिति लौकिको न्यायः अप्रसिद्धसंज्ञाभिः संबोधनस्यायुक्तत्वे फलितमाह त
स्मादिति चेदेवतास्मिन्देहे कर्त्री भोक्त्री चात्मेति गार्ग्याभिप्रायनिषेधे देवतानामग्रहणस्य नात्पर्यात्तद्ग्रहोर्थवानिति परिहरति तदेवेति
तदेव प्रपंचयति केवलेति प्राणादिनामभिः संबोधनेपि तन्निराकरणं कर्तुं शक्यमित्याशंक्याह नहीति लौकिकनाम्नो देवताविषयत्वाभा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वादित्यर्थः प्राणस्याभोक्तृत्वेऽपीन्द्रियाणां भोक्तृत्वमिति केचित्तान्प्रत्याह प्राणेति प्राणकरणयोर्देवतानामभोक्तृत्वेऽपि देवतान्तरमत्र भो-
क्त्रस्त्यादित्याशंक्याह देवतान्तराभावाच्चेति भोक्तृत्वाशंकानुपपत्तिरिति पूर्वेण संबंधः तत्रोपक्रमविरोधं शंकते नन्विति दर्शितत्वाद्देव-
तान्तराभावो नास्तीति शेषः स्वतन्त्रो देवताभेदो नास्तीति समाधत्ते नन्वस्येति प्राणे देवताभेदस्यैकोऽनुक्तिमाहारनाभीति न देवतान्तरस्य भो-
क्तृत्वेनागमस्य स्वपदत्वविरोधादिति शेषः सर्वश्रुतिष्वित्युक्तं तत्र संक्षेपतो दर्शयत्येष इति कति देवा याज्ञवल्क्येत्यादिना संक्षेपविस्तराभ्यां
सर्वेषां देवानां प्राणात्मन्येवैकत्वमुपपाद्यते श्रुतेत्येन देवताभेदोऽस्तीत्याह सर्वदेवानामिति प्राणात्मरूपसूत्रस्य देवस्यात्मानतिरेके सत्यसत्वा-
पत्तेस्तु प्राणान्तर्भावः सर्वदेवताभेदस्येति विवक्षेचेदाह करणानामभोक्तृत्वे हेत्वन्तरमाह तथेति देवताभेदेष्विवेति यावत् अनाशंकाभो-
क्तृत्वस्येति शेषः तत्रोदाहरणान्तरमाह देहभेदेष्विवेति न हि हस्तादिषु प्रत्येकं भोक्तृत्वशंकावते तथात्रापि नेत्रादिष्वपि न भोक्तृत्वाशंकायु-
क्ता तेषु स्मृतिरूपज्ञानसंकल्पादिः योऽहं रूपमद्राक्षं स शब्दं शृणोमीत्यादिप्रतिसंधानस्य चायोगादित्यर्थः अनुपपत्तिमेव स्फुरयति न हीति क्ष-
णिकविज्ञानस्य निराश्रयस्य भोक्तृत्वाशंकापि प्रतिसंधानासंभवादेव प्रसक्तेत्याह विज्ञानेनेति प्राणादीनामनात्मत्वमुक्त्वा स्थूलदेहस्य
तदुक्तं पूर्वपक्षयति नन्विति संघातो भूतचतुष्टयसमाहारः स्थूलो देह इति यावत् गौरोऽहं पश्यामीत्यादिप्रत्ययेन तस्यात्मत्वदृष्टेरिति भावः
प्रमाणाभावादतिरिक्तकल्पनानुयुक्तेत्याह किं व्यतिरिक्तेति संघातस्यात्मत्वं दूषयति नापेक्षणादिति विशेषदर्शनेन व्यतिरेकद्वारा विशद-
यति घटिरीति प्राणेन सहितं स्थूलं शरीरमेव संघातस्तन्मात्रोऽयं हि भोक्ता स्यादिति योजना तत्त्वस्यापि कथं पेषणापेक्षणायोगात् स्या ने वि
२.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रश्नो॰
८५

शेषः स्यादित्याशंक्याह संघातेनेति तस्य संघातेन संबंधविशेषः स्वकर्मारब्धत्वात्मीयत्वस्वप्राणपरिपाल्यत्वादयस्तेषामनेकत्वात्तेष
णापेक्षणाद्योरिंद्रियोद्भवाभिमवक्तृत्ववेदनायाः स्पष्टत्वास्फुटत्वात्मको विशेषो युक्तः स्फुटदुःखमोहादानां सत्त्वममध्यमाधमकर्मफलानां कर्मो
द्भवाभिमवक्तृत्वविशेषसंभवाद्वयमोक्तो विशेषः संभवतीत्यर्थः परपक्षेपि तथैव विशेषः स्यादित्याशंक्याह नत्विति नहि तत्र स्वकर्मार
ब्धत्वादयः संबंधविशेषाः कर्मफलभेदो वा युज्यंते संघातत्ववादिनां नीद्रियकर्मानंगीकारात्तः संघातमात्रे भोक्तरि प्रतिबोधे विशेषासिद्धिरि
त्यर्थः प्राकृस्पर्शादीनामपटुत्वमतिपटुत्वमतिमांद्यमित्येवमादिना कृतो विशेषो बोधे दृश्यत इत्येतेसोपि संघातवादे न सिद्ध्यतीत्याह तथेति ग्रयु
क्तेति यावत्तचक्रावोविषाणुकर्मण्यर्थः मात्रहिंप्रतिबोधे विशेषो भूदित्याशंक्याहासिचेति विशेषदर्शनफलमाह तस्मादिति ग्रहादिशब्दे

श्री

नगरादिशब्देते ग्रंथः संघातादिति शेषः देहादेरनात्मत्वमुक्त्वा प्राणस्यानात्मत्वे हेतुत्वेनरमाह संहतत्वाच्चेति हेतुं साधयति गृहस्येति यथा
नेमिरथस्य मित्रः संहन्यंते तथैव प्राणस्य संहतिरित्याहारनेमिवच्चेति किं प्राणे नाभिस्थानीये सर्वं समर्पितमिति श्रूयते तद्युक्तं तस्य संहतत्व
मित्याह वक्रनाभीति संहतत्वफलमाह तस्मादिति प्राणस्य गृहादिवत्परार्थेपि संहतशेषित्वमेषितव्यं गृहादेस्तथा दर्शनादित्याशंक्या
ह संभवेति स्वात्मनां तेभ्यादीनां जन्मचोपचयश्चापत्तयश्च विनाशश्च नाम चाकृतिश्च कार्यं चेत्येते धर्मास्तन्निरपेक्षत्वमलज्ञासमनास्तु रणे च
येन संहतेषु संभवादिषु विषयेषु रक्षा च श्रोता च मंता च विज्ञाता च तदर्थं त्वतेषां तत्संघातस्य च दृष्टा प्राणादीनामपि तथात्वं भवितमर्हतीति
मन्यामह इति संबंधः प्राणादिः स्वातिरिक्तशेषः संहतत्वात्गृहादिवदित्यनुमानात्तत्संघातायावस्थातीतो च प्राणादिविक्रियानपेक्षतया

८५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सिद्धोऽद्वयो निर्विकारो ऽपुमान्स्यास्य विकारत्वेनेदंत्वभावादिति भावः प्राणदेवतापाराध्यात्मं माने त्वात्मांतरं विरुद्धमिति शंकते देवतेति प्रा
णदेवताया अस्ति तत्त्वमेव कथमभ्युपगतं तत्राह प्राणस्येति तथापि प्रकृते ऽत्रमाने कथं त्वात्मांतरविरोधस्तत्राह येन तावत्त्वे चेति यो येन स्व
मः स तत्र कं षा न भवति यथा ऽदीपादीपांतरेण तत्त्वेनात्मनैव तत्कृत्वश्चेति व्यामिति विरोधः स्यादित्यर्थः नायं विरोधः समाधीतव्यः शेषशेषिभावस्या
त्र प्रतिपाद्यत्वादिति परिहरति न निरुपाधिकस्येति तदेव स्फुटयति किं चेत्यादिना उपनिषदां वं भो निरुपाधिकं स्वरूपं तत्प्रतिपादितमित्यर्थः
णमकमाह ब्रह्मेति द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्यादि दर्शनात्स्याद्युपनिषदि सोपाधिकमपि ब्रह्म विवक्षितमित्याशंक्याह नचे
ति द्वित्ववादस्य कल्पितविषयत्वात् नेति नेतीति निर्विशेषवस्तुसमर्पणात् तेन्यदात्रमिति चामेकत्र निरुपाधिकमेव ब्रह्म प्रतिपाद्यमिति भावः
शेषशेषिभावस्याप्रतिपाद्यत्वे फलितमाह तस्मादिति किमर्थं तर्हि शेषशेषिभावस्तत्र तत्रोक्तस्तत्राह विशेषवत्त्वोदीति सोपाधिकस्य शेष
शेषिभावो विवक्षितस्तत्र च स्वामिभृत्यन्यायेन विशेषसंभवादसिद्धं समत्वमित्यर्थः न विपरीतस्य निरुपाधिकस्य शेषशेषित्वमस्तीत्यत्र हेतुमा
ह निरुपाध्योदीति शेषशेषित्वाद्यशेषविशेषशून्यत्वादित्यर्थः पाणिपेषवाक्यविचारार्थं संगतिमुपसंहरत्यादित्यादीति वृत्तमनूद्यानंतरग्रंथ
मवतारयत्यावदेवं सन्तमित्यादिना पतन्त्वपनेयथा भवति तथेति यावत् यत्रेमस्मिंकाले विशिनष्टि प्राणिति तदाकाभूदिति संबंधः विज्ञान
मयशब्दस्य विज्ञाने परे ब्रह्मण्यहिकारो जीवत्वेन विकारार्थमयडिति केचित्तन्निराकरोति विज्ञानमिति अंतःकरणप्रायत्वमात्मनोनकल्प्य
ते तस्यासंगस्य तेनासंबंधादित्याह किंपतति किंतन्नरिति असंगस्याप्याविद्यत्वादि संबंधस्त्रपस्त्यपरिहरति कथमित्यादिना एकस्मिन्नेवदा

तस्मिन्निति तस्मादित्वात्तुतन्मायत्वमित्याहोपलक्षणत्वं चेति नियामकाभावं शंकित्वा परिहरति १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रावे॰
८६

कोऽपृथिवीमयइत्यादौप्रायार्थत्वोपलंभाद्विज्ञानमयइत्यत्रापितदर्थत्वमेवमयटोनिश्चितमित्याशंक्यमिदानींजीवस्यपरमात्मरूपविज्ञान
विकारत्वस्यश्रुतिस्थत्वेऽप्रसिद्धत्वाच्चप्रायार्थत्वमेवेत्याह परेति अप्रसिद्धमपिविज्ञानविकारत्वंश्रुतिवशादिष्यतामित्याशंक्याह य
एषइति यएषविज्ञानमयइत्यत्रविज्ञानमयस्यैवेतिप्रसिद्धवदनुवादप्रसिद्धविज्ञानविकारत्वेसर्वनामश्रुतिविरुद्धमित्यर्थः जीवोब्रह्मा
वयवस्तदंशोवाननयोर्मयडित्याशंक्याहावयवेति ब्रह्मणोनिरवयवत्वश्रुतेस्तस्यैवजीवरूपेणप्रवेशश्रवणाच्चप्रकृतेवाक्येमयटोवय
वार्थायोगाद्विविषयत्वासंभवाच्चपारिशेष्यात्पूर्वोक्ताप्रायार्थतैवतस्यप्रत्येतव्येत्यर्थः विज्ञानमयपदार्थमुपसंहरति तस्मादिति यदे
त्यादिव्याख्येयवाक्यशेषमवतार्यतात्पर्यमाह कोषइति स्वरूपज्ञापनार्थंप्रश्नहेतुंनिरस्यैतत्प्रकटयति प्रागिति कार्याभावेनेत्युक्तंव्यन
क्ति नहीति तस्मादित्यस्यैवार्थमाहाकर्मप्रयुक्तत्वादिति किंतथात्वभावमितितदाह यस्मिन्निति द्वितीयपदस्यार्थंसंक्षिपति यतश्चेति ।
उक्तेऽर्थेप्रश्नद्वयस्तुल्यापपत्तेरिति तथात्वभावमेवेतिसंबंधः यतदित्यधिकरणमपादानंचगृह्यते किमिति तेषामुभयेऽप्युक्तेस्वकीय
प्रतिज्ञानिर्वाहमित्यभिप्रेत्याह उभेइति ननुप्राप्यत्वान्नगारोपेणैवप्रश्नद्वयसचेतनत्वाच्चप्रश्नद्वयेऽकृतितर्हिराजस्तस्मिन्नेवादासीन्यमेवयुक्तंतत्राह उ
भेतदुभयमिति तदुदेत्यादिव्याकरोत्येवमिति यतदागमनंयथाभवतितथेतियावत् तत्क्रियापदयोर्यथाक्रमंवक्ष्यमाणेत्याभ्यासंबं
धः कूटस्थविवेकरसायमात्मातत्रक्रियाकारकफलव्यवहारोवस्तुतोनास्तीतिविवक्षितोर्थस्तस्यप्रकटीकरणार्थंप्रस्तुतेप्रश्नद्वयम
नुवदति एवेति उपाधिरंतःकरणंतस्यस्वभावस्तदुपादानमज्ञानंतेनजनितमंतःकरणगतमभिव्यक्तविशेषविज्ञानंचैतन्याभासलक्षणं।

८६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

णं तेनैककरणेनेत्यर्थः वागादीनां स्वस्वविषयगतं प्रतिनियतं प्रकाशनसामर्थ्यं विज्ञानमित्यर्थः यद्यपीतरेति प्रतीकमादाय व्याचष्टे म
ध्य इति आकाशशब्दस्य भूताकाशविषयत्वमाशंक्य आकाशोऽर्थान्तरत्वादिव्यपदेशादिति न्यायेनाहाकाशशब्देनेति सद्रूपं ब्रह्म एवमस्मा।
धूमस्य प्रापयने भूताकाशे तु न भवतीत्यत्र छांदोग्यश्रुतिं संमतिमाह अन्यत्वेति कीदृग्ब्रह्मरूपं नेविवक्षितमित्याशंक्याह लिंगेति स्वोपा
धिकारे स्वाभाविकत्वमविद्यामात्रसंसिद्धत्वे सति संपद्यन विद्विरित्यादिश्रुतेरिति दृष्टुंतानिर्देत्यादिवाक्यमाकांक्षायामेवं क्रमादेते य
देत्यादिना विज्ञानानि तत्साधनानीत्येतत् पुरुषं निधयमावष्टार्थे: तेनैव सत्यस्य पुरुषस्येति प्रश्नकणादिना अंशविशेषमाह गौणत्वमेवे
ति गौणत्वं स्पष्टयति समेवेति नाङ्गोऽर्थव्यभिचारस्यापि दृष्टत्वात् दृष्टान्तस्वापे स्वरूपावस्थानमिति शंकामनूद्य तत्र गृहीतमेवेत्या।
दिवाक्यमुत्थाप्य व्याचष्टे सत्यमित्यादिना का पुनरात्मनः स्वापावस्थायामसंसारित्वरूपेऽवस्थानमित्यत्र युक्तिरिहोक्ता भवति तत्राह
वागादीति तदा सर्वमुपावस्थायो तेनात्मना चैतन्याभासेन हेतुनेत्यर्थः स्वापे करणोपसंहारे विश्लेषोति कथमित्यादिना तदुपसंहार
फलं कथयति तस्मादिति अन्वयव्यतिरेकाभ्यां वागाद्युपाधिकमात्मनः संसारित्वमुक्तं तद्व्यतिरेकासिद्धिमाशंकते नन्विति व्य।
तिरेकासिद्धेः फलितमाह तस्मादिति स्वप्नस्य रज्जुसर्पादिवन्मिथ्यात्वेन वस्तुधर्मत्वाभावाद्वात्मनः संसारित्वमित्युत्तरमाह नदृष्टात्वा
दिति तदुपपादयन्नादौ स यत्रेत्यादीत्युदाहरणं योजयति समहृत इत्यादिना अथात्र स्वप्नस्वभावो निर्दिष्टस्तेन तस्य मिथ्यात्वं कथ्य
ते तत्राह उतेवेति स्वप्ने दृष्टानां महाराजत्वादीनां जाग्रत्सु दृष्टिराहित्यं व्यभिचारदर्शनेन स्वप्नस्य मिथ्यात्वे सिद्धमर्थमाह तस्मादिति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विमतालोकानमिथ्यातत्कालाव्यभिचारित्वाज्जाग्रल्लोकवदितिशंकते नचयथेति साध्यवैकल्यंवक्तुंसिद्धांतीपाणिपेषवाक्योक्तंस्मार
यति नचचेति जाग्रल्लोकस्यमिथ्यात्वेफलितमाह तत्कथमिति प्राडुर्भावेजाग्रल्लोकस्यकर्तृत्वेप्रकरणिकमेवव्यंतत्रपूर्ववादीदृष्टांतंसा
धयति सत्यमित्यादिना अन्वयव्यतिरेकाभ्यांन्यायः देहद्वयस्यात्मनश्चविवेकमात्रंप्राग्युक्तंनतत्प्राधान्येनात्मनःशुद्धिरुक्तेतिविभागमंगी
कृत्यवस्तुतः संतमपिदृष्टांतेसंतंकृत्वातेनस्वप्नसत्यत्वमाशंक्यतन्निरासेनान्यंतीकीशुद्धिरात्मनःस्वप्नवाक्येनोच्यतेतथाचजाग्रतोपि
तथामिथ्यात्वादात्मैकरसः शुद्धः स्यादित्याशयवानाह इत्थमत्रपीति पाणिपेषवाक्येजाग्रन्मिथ्यात्वोक्त्यार्थाद्युक्ताशुद्धिरत्रापिसैवोच्य
तेचेत्तन्नकस्मिन्नित्याशंक्याह सर्वोहीति यत्किंचित्साम्यात्पौनरुक्त्यंसर्वत्रतुल्यमवांतरभेदात्पौनरुक्त्यंप्रकृतेपिसमंपूर्वत्रशुद्धिद्वारस्या
र्थिकत्वादिहवाचनिकत्वादितिभावः जाग्रद्दृष्टांतेनस्वप्नसत्यत्वचोद्यसंभवादाद्यस्वप्नसमाधिरिति एवंवाक्यद्वयेनोक्त्वासमाधिमधुना
कथयति नतावदिति विमतानद्रष्टुरात्मनोधर्मावानदृश्यत्वाद्घटादिवदित्यर्थः किंचस्वप्नदृष्टानांजाग्रद्दृष्टादर्थांतरत्वेनदृष्टेर्मिथ्या
त्वमित्याह महोराजइति तेषांजाग्रद्दृष्टादर्थांतरत्वमसिद्धमित्याशंक्याह नचेति योग्यदेशाभावाच्चतन्मिथ्यात्वमित्याह नचेति देहाद्ब
हिरेवस्वप्नदृष्टांगीकाराद्योग्यदेशसिद्धिरित्याशंक्याह देहस्थस्येति एतदेवसाधयितुंशंकयति नन्विति तत्रसयथेत्यादिवाक्यशून्यत्वेना
वतार्यव्याचष्टे नवहिरित्यादिना यथाकामंतेनमनतिक्रम्येत्यर्थः एतदितिक्रियायाग्रहणस्यविशेषणमेतन्नग्रहणंयथाभवतितथेत्य
र्थः परिवर्तनमेवविवृणोति कामेति योग्यदेशाभावेसिद्धेसिद्धमर्थंदर्शयति तस्मादिति स्वप्नस्यमिथ्यात्वेनदृष्टांतत्वेनजडत्वादिहेत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नाजाग्रदितस्यापितथात्वंशंकांनिरस्यन्नमित्याह तथेति द्वयोर्मिथ्यात्वप्रतीचोविशुद्धिःसिद्धेत्युपसंहरति तस्मादिति अक्रियाकार
णफलात्मकइतिविशेषणंसमर्थयते यस्मादिति जाग्रदितरदृष्टांतीकृत्यदार्ष्टांतिकमाह तथेति द्रष्टृदृश्यभावेसिद्धेफलितमाह तस्मा
दिति ग्रन्थफलंकथयति विशुद्धइति ॥ वृत्तानुवादपूर्वकंवक्ष्यतिनिरस्यमायांकामाह दर्शनदृष्टाविंत्यादिना तद्वेतिस्वप्नोक्तिः
कामादिसंबंधस्यकारणार्थःनिवर्त्य शंकामज्ञानाविवर्तिकांनमस्कृतिप्रश्नतिप्रतिजानीते अतइति स्वप्नेऽपिशुद्धिरुक्ता किंसुषुप्तिग्रहा
णेनेत्याशंक्याह यदेति गतोभवतितदात्मनतरामस्यशुद्धिःसिद्ध्यतीतिशेषः तमेवसुषुप्तिकालंप्रश्नपूर्वकंप्रकटयति कदेति विकल्प
व्यावर्तयति पूर्वेत्विति वृत्तमनूद्यप्रश्नपूर्वकंसुषुप्तगतिप्रकारंदर्शयत्येवंतावदिति हितफलप्राप्तिनिमित्तत्वान्नाड्योहितास्तुच्छेतेतासां
देहसंबद्धानामन्वयव्यतिरेकाभ्यामन्नरसविकारत्वमाहाऽन्नेति तासामेवमध्यमसंख्यांकथयति ताश्चेति तासांचहृदयसंबंधिनीनां
ततोनिर्गत्यदेहव्याप्त्यावस्थितत्वमाह हृदयादिति ताभिरित्यादिव्याकर्तुंभूमिकांकरोति तत्रेति शरीरेसमभ्यर्थः शरीरेकरणा
नांवृद्धिस्तत्त्वेकिंस्यादितितत्राह तेनेति तथापिजीवस्यकिमायातमित्याशंक्याह तद्विज्ञानमयइति भोगाश्रुक्षोजाग्रद्विषयः बुद्धि
विकाशमनुभवन्नात्माजाग्रत्नीत्युच्यतेतस्यकोऽयंचाऽनुभवन्नस्वपितीत्यत्रहेतुमाह बुद्धीति बुद्ध्यानविधायित्वपरामृष्टप्रत्ताभिरित्यादि
व्याचष्टे तस्मादिति प्रपंचसर्पतोत्यावर्तनेनपदार्थशुद्धोक्तावाक्यार्थमाह तमसिवेति कर्मत्वेदेहस्यकर्तृत्वेचात्मनोहृदयहृदयाका
शोब्रह्माणितोतेविज्ञानात्मनस्तस्यापरीततिशायनमात्रहाणस्पर्शोपरविरोधःस्यादित्याशंक्याह स्वाभाविकइति औपचारिकमिदंवचन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मित्यत्र हेतुमाह नहीति इयमवस्थेति प्रकृतासु श्रुतिषूच्यते उक्तेषु दृष्टान्तेषु विवक्षितमंशं दर्शयत्येषां चेति उःख स्थितेषां प्रसिद्धमित्या
शंक्याह विभक्तं यमाणानां हीति ऊर्मादिस्वापस्यैव दृष्टान्तत्वं किं न स्यादित्याशंक्याह नतेषामिति नन्वापस्य दृष्टान्तत्वमस्त्वापस्य
दार्ष्टान्तिकत्वमिति विभागमाशंक्याह विशेषाभावादिति कैषतदाप्नुदितिप्रश्नस्योत्तरसूत्रपादितमुपसंहरत्येवमिति सप्रपञ्चेत्यादेः संग
तिं वक्तुं कीर्तयति कैषइति किं पुनरत्र प्रश्ननिर्णयेन फलमिति तत्त्वपदार्थशुद्धिरित्याह तेनेति शुद्धिद्वारा ब्रह्मत्वं चतस्योक्तमित्याह
संसारित्वं चेति उत्तरग्रन्थस्य तात्पर्यमाह कृतइति एवं गौणत्वस्य गतार्थत्वं शंकते नत्विति स्थित्यवधेरेव निर्द्धारितत्वादागतत्वबधिनिर्द्धा
रयिषयाप्रश्नप्रतिवचनेऽसावकाशमित्याशंक्याह किं श्रुतिरिति न श्रुतिसाहित्येन निर्दोषत्वादिति एवं बाधमाह नेति श्रुतेरनात्मपेत्वदीयं वो
धेनिरवकाशमित्याह किं तहीति नसावकाशत्वं पूर्ववादी साधयति द्वितीयस्येति एवं वादिनमुपादानादर्थान्तरे पंचम्या शुश्रूषमाणे
सत्येकदेशी ब्रवीत्येवं तर्हीति कथमन्यार्थत्वं नतदाहास्त्विति नहितस्यामुपादानार्थत्वे पुनः हेतुत्वावस्थायामित्यर्थः एकदेशिनं पूर्ववा
दी दूषयति नेति उपादानार्थं तावदित्यपरेऽर्थः नदेवस्फुटयत्यात्मनश्चेति जगतः सर्वस्य चेतनस्याचेतनस्य चेति वक्तुं चशब्दः तर्हि भवतु
पादानार्था पंचमीत्याशंक्य पूर्ववादी पूर्वोक्तं स्मारयति नत्विति सर्वो विज्ञानतः निर्णीतं प्रश्नगतहृदयं ब्रह्मप्रश्नहृदयव्याजेन प्रतिपिपाद
यिषितमिति न पुनः हेतुत्विति सिद्धान्ती स्वाभिसंधिमुद्घाटयति नैष दोष इति यथोक्तं वस्तु प्रश्नाभ्यां विवक्षितमिति कुतो ज्ञातमित्याशंक्य
तदुक्तं तार्तीयमर्थमनुवदतीहीति विद्याविषयनिर्णयस्य कर्तव्यत्वमनुक्तं प्रतिभातीत्याशंक्याह तन्निर्णयायचेति ग्रन्थस्यापक्रमभंगः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यादितिभावः किंतद्याथात्म्यंतदाह तस्यैवेति कर्तृभोक्तृयोर्याथात्म्यव्याख्यानोपयोगित्वंप्रश्नद्वयोरित्याशंक्यतयोः श्रौतमर्थमाह तत्रे
ति प्रश्नप्रवृत्तिमुक्त्वाप्रतिवचनप्रवृत्तिमाह सेति निर्वर्त्तयितव्येतितत्त्वप्रवृत्तिरितिविशेषः सप्रश्नप्रतिवचनयोस्तात्पर्यमाह नायमिति स्वात्म
न्येवाधृरित्यत्रप्रमाणमाह स्वमात्मानमिति स्वशब्दौस्वात्मन्येवस्थितिरतःश्रुत्यर्थः प्रबोधदशायामात्मनएवागमनापादानत्वमित्यत्र
मानत्वेनान्तरश्रुतिमुत्थापयति तद्युक्तैवेति स्थित्यागत्योरात्मनएवावधित्वमित्यत्रोपपत्तिमाहास्मादिति वस्त्वन्तराभावस्यासिद्धिंश
कित्वादूषयति नत्विन्द्रादिना क्रियावैतोभूतादेर्देवादुत्पत्तिनिर्देशेनानब्रह्मणोक्रियत्वान्नतोनप्राणादुत्पत्तिरितिशंकते नकर्ममिति स
हेर्मायामयत्वमाश्रित्यश्रुत्यापरिहरन्व्याचष्टेइति स्वात्माप्रविभक्तेनेत्यन्वयव्यतिरेकद्वारास्फोरयति नचेति असहायस्यकारणत्वे
दृष्टान्तमुक्त्वाकर्तुरस्यस्वतन्त्राद्वैदृष्टान्तमाह यथाचेति माध्यंदिनश्रुतिमाश्रित्याह सर्वेपत इति तस्यैतस्यावतार्यव्याचष्टे यस्मादित्यादिना
ननुप्रत्यक्षभूतस्यब्रह्मणोवाचकेषुशब्दान्तरेष्वपिसत्स्विकिमित्येतत्कर्तृविषयमादरेणक्रियतेतत्राह प्राहेति ब्राह्मणवाक्यार्थोपिक
र्थेनिश्चीयतामित्याहे तस्येति उक्तमंगीकृत्यविशेषाःदृष्टासंशयानोविचारंप्रस्तौति भवत्विति संदिग्धंसप्रयोजनंचविचार्यमितित्या
येनसंदेहमुक्त्वाविचारप्रयोजकंप्रयोजनंस्फुटयति किंचातइति कस्मिन्पक्षे किंफलमितिप्रश्नेप्रथमपक्षमनूद्यतस्मिन्फलमाह यदीति य
द्विज्ञानान्मुक्तिःस्यात्सएवज्ञेयनानजीवस्येत्याशंक्याह नहिज्ञानादिति ब्रह्मज्ञानादेवस्यान्नसंसारिज्ञानादित्याशंक्याह सएवेति यद्विद्या
ब्रह्मविद्यानदेवब्रह्मनसंसारीत्याशंक्याह नहिद्वैवेति आद्यकल्पीयफलसमाप्ताविति शाङ्केः पक्षान्तरमनूद्यतस्मिन्फलमाहद्वयेत्यादिना

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्राने
८८

प

किमत्र नियामकमित्याशंक्याब्रह्मवादरूपमित्यादिना सत्रमित्याह सर्वमेतदिति ब्रह्मोपनिषत्त्वदेशास्त्रप्रामाण्यात्सर्वं समंजसं चेत्तर्थे वास्त्र किं
विचारेणेत्याशंक्य जीवब्रह्मणोर्भेदो भेदो वेति विकल्पाद्ये दोषमाह किं त्विति अभेदपक्षे दूषयति संसारिणश्चेति उपदेशानर्थक्यादभेदप
क्षोऽनुपपन्न इति शेषः विप्रतिषाद्व्यापलंभस्य संशयहेतुत्वमनुवदति यत इति पक्षद्वये फलप्रतीतिं परामृशन्नेवमिति अन्वयव्यतिरेककोश
ल्यं तादृशं यत इति स्यैकात्म्येऽपि किं मे ह त्वेनेत्याह सपविचारोऽत्यन्त निर्णयं विनान्यत्किं चित्तत्त्वतस्तस्य ज्ञानमालंबनं केनापि नोक्तं प्रतिवचनं यस्य किं तदै
कात्म्यमिति प्रश्नस्य तस्य विषयभूतमिति यावत्तत्रहिये न केन चिदैकात्म्यं प्रष्टुं प्रतिवक्तुं वाशक्यते श्रवणाद्यापि बहुभिर्योन लभ्य इत्यादिश्रुतेरि
त्यर्थः विचारे प्रयोजकस्यैकात्म्यस्य कार्यविचारमुपसंहरति अत इति संशयादिना विचारकार्यतामवतार्य एवं पदयति तत्त्वावदिति जगत्क
मिति संन्यासो विधिनस्त्यनेकर्मणैव विद्यालाभसंभवादित्याशंक्याह जायेति अविद्याया विषयमेव विषयो यस्येति विग्रहः तस्मात्संन्या।
सो विधित्सित इति दृष्टेन संबंधः न त्वपकृतेन कर्मणो विद्याविषयमपि किमित्यात्मज्ञानलाभेऽप्यनानुष्ठीयमानेन फलयति तथा हात्वेति न
देवदृष्टेनेन स्पृश्यति नहीति पांक्तस्य कर्मणोन्यसाधनत्वमेव कथमधिगतमित्याशंक्याह मनुश्चेति सोयं मनुष्यलोकः पुत्रेणैव जय्यः
कर्मणा पितृलोको विद्यया देवलोक इति विशेषितत्वेऽप्यत्वमेवाविशेषितत्वात् किं हारास्फुटीकृतमिति चकारेण द्योत्यते तत्र ब्रह्मविद्याफ
फले विदिते कर्मोपेक्षितेनेष्टो न साधनत्वाद्दर्शादिवत्तया च समुच्चयात् कर्मसंन्याससिद्धिरत आह नचेति कर्मणां काम्यत्वेपि ब्रह्मविद।
स्तानि किं न स्युरित्याशंक्याह ब्रह्मविदश्चेति इतश्च न तस्य पुत्रादिसाधनानुपपत्तिरित्याह येषामिति समुच्चयपक्षमनुभाष्य दूषयति विरो।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रा॰वे॰
१०४

येनरूपयति केचिदित्ति श्रुतिविरोधमेवस्फोरयति कुर्वादीति प्रविद्धद्विषयत्वेऽप्यनेनानयकरणेनैषाउपदेशादिति शेषः किंप्रजया
करिष्याम इत्यत्र आरभ्य येषांनोयमात्मायंलोक इति च विद्याविषये श्रुतमिति चयोजनाप्रविभागः श्रुत्याकृतस्तैः समुच्चयवादिभि
र्नश्रुत इति संबंधः नकेवलंश्रुतिविरोधादेव समुच्चयासिद्धिः किंतुयुक्तिविरोधाच्चेत्याह सर्वेति द्वितीयस्यकारोवधारणार्थोनजा स
बध्यते स्मृतिविरोधाच्च समुच्चयासिद्धिरित्याह ग्रामेति तत्रप्रथमं सर्वोक्तयुक्तिविरोधंस्फुटयति कर्मेति प्रतिकूलवर्त्मनेनिवर्त्यनिव।
र्त्तकभावः संप्रतिस्मृतिविरोधंस्फोरयति यदिदमिति प्रसिद्धं वेदवचनं कुरुकर्मत्यजेत्यपि इति यदिदमुपलभ्यते विवेकिनेप्रतिचत्यजेतितत्।
त्कांगतिमित्यादि शिष्यस्य व्यासंप्रतिप्रश्नः तस्यबीजमाह एताविति विद्याकर्मणोरुपाययोः परस्परविरुद्धत्वे वर्त्तेते साभिमानत्वनिर
भिमानत्वादिप्रकारेण प्रातिकूल्यान्नसमुच्चयानुपपत्तेर्ययोः कस्य प्रश्नस्यावकाशत्वमित्यर्थः इत्येवंपृष्टस्य भगवतो व्यासस्य ति
रोधः विरोधोत्तान कर्मणोः समुच्चयस्येति वक्तव्ये समुच्चयानुपपत्तिमुपसंहरति तस्मादिति कथंतर्हि ब्रह्मविद्यापुरुषार्थसाधनमि
त्यत आह सर्वविरोधादिति सर्वस्यक्रियाकारकफलभेदात्मकस्य द्वैतेन्द्रजालस्य ब्रह्मविद्यया विरोधादित्यावत् एकाकिनी ब्रह्मविद्या शक्तिरे
वेतिकिंचिन्तेफलितमाह इत्यपरिग्रंज्यमिति नकेवलं संन्यासस्य श्रवणादिपौष्कल्यदृष्टद्वारेण विद्यापरिपाकांगत्वं श्रुत्यादिवशादवगम्य।
ते किंतुलिंगादपीत्याह एतावदेवेति नत्वेवलिंगांतरमाह ब्रह्मणामाविति एतद्वोभयतः संबध्यते यदि कर्मसहितेन ज्ञानेन मुक्तिरेतस्यादाकि
मिति कर्मिणः सतो याज्ञवल्क्यस्य पारिव्रज्यं श्रूयते तस्मान्न्यासः स्वतंत्रत्वेन विधित्सित इत्यर्थः नत्वेवलिंगांतरमाह मैत्रेय्येवेति नहि मैत्रेयी

१०४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्मेति नित्यकर्मणः स्वयं कर्माधिकृतोऽस्मीति परिहारमन्तरेण भार्यायास्तदनधिकारात् यथा च तस्यैव कर्मसंन्यासे प्रवृत्तेः साधनत्वेन विद्योपदेशा
त् कर्मत्यागस्तदङ्गत्वेन धृतिरित्यर्थः तत्रैव हेत्वन्तरमाह विनेति किमहं तेन कुर्यामिति विरतं निश्चेतव्ये ग्रतस्य तत्साधकं कर्मत्वात् न संदायत्वेनश्र
क्तो नोपकरोतीत्यर्थः तदेव विवृणोति यदिहेति तन्निदावचनमित्यनतञ्छेदेन विनश्यते तत्स्पष्टेवाकथं निंदावचनमिति तत्राह यदिति
ति किंचद्वाक्यप्रयोगेऽहं तद्वियोगमित्याद्यभिमानस्य कर्मानुष्ठाननिमित्तस्य निदायासर्वमिदमात्मैवेति प्रत्यये कृते तस्यात्यंतदर्शनाद्वियोगत्वेन सं
न्यासो विविदिषित इत्याह कर्माधिकारेति न तु जाग्रति विधौ कर्मानुष्ठानमशक्यमपरसंपादितमत आह नहीति न तु वर्णाश्रमाभिमानवतः।
संन्यासोऽपीष्यते स कथं तदभावे संभवेत्तत्राह यस्यैवेति अर्थप्राप्तस्यैवावधारणार्थश्चकारः प्रयोजकज्ञानवतो वैधसंन्यासाभ्युपगमादवि
रोध इति भावः आत्मज्ञानाङ्गत्वे संन्यासस्य श्रुतिस्मृतिन्यायसिद्धे चेत्किमर्थमियमाख्यायिका प्रणीयते तत्राह तस्मादिति विद्ययेदितार्थः।
वादसिद्ध्यर्थमाख्यायिकेति भावः भार्यामामंत्र्य किं कृतवानिति तदाहोद्यास्यन्निति वैशब्दोऽवधारणार्थः आश्रमांतरं यास्यन्नेवाहमस्मीति सं
बंधः यद्यो लोके ज्ञानेनतरं भार्यया कर्तव्यं दर्शयत्यत इति सति भार्यात्वे संन्यासस्य तदनुज्ञापूर्वकत्वनियमादिति भावः कर्तव्यांतरं कथयति कि
वेति आवयोर्विच्छेदः स्वाभाविकोऽस्ति किं तत्र कर्तव्यमित्याशंक्याह परिहारेणेति त्वयि प्रव्रजिते स्वयमेवावयोर्विच्छेदो भविष्यतीत्याशंक्या
ह इच्छेति विनेति न स्त्रीस्वातंत्र्यमिति भावः मैत्रेयी मोहमेवापेतमाणामभ्रमीरग्रस्यानुकूल्यमात्मनो दर्शयति सैवमिति कर्मसाध्यस्य शरण्यासा
दादिवन्नित्यत्वानुपपत्तिरात्मपरिहारेनकर्थमाहूस्य प्रश्नार्थत्वपदेवाकांयोजयति तेनेति कथं तेनेत्यस्य कथंशब्देन किमहं तेनेत्यस्य किंशब्दस्

पादायवाक्यं योजनीयं वित्तसाध्यस्य कर्मणोऽमृतत्वसाधनत्वमात्रासिद्धौ तत्प्रकारप्रश्नस्य निरवकाशत्वादित्यर्थः । पुनरपि भार्यां हृदया-
भिमतः संतुष्टः सन्नात्मैवप्रश्नेचप्रतिवक्तीत्याह प्रियवाचेति । वित्तेन ममामृतत्वाभावे तर्हि किंचित्करमवसेयमित्याशंक्याह किंतर्हीति । वित्त
साध्यामृतत्वसाधनत्वाभावमधिगम्यात्मज्ञानस्यामृतत्वप्राप्तिसाधनमेवात्मज्ञानमात्मार्थं दारान्पतिं नियुंजानाहृते साहेति । भार्यापि हितेन
मोहोपायं विवक्षंत्यामात्रैस्तौति सहेत्यादिना । वित्तेन साध्यं कर्म तस्मिन्नमृतत्वसाधने शंकिते किमहं तेन कुर्यामिति भार्ययापि प्रत्याख्या-
ते सतीतियावत् स्वाभिप्रायो न कर्मसु किंदेवहिरिति तस्य भार्याद्वारापि संपन्नोऽस्त्वामित्यर्थः । अमृतत्वसाधनमात्मज्ञानं ते विवक्षितं चेदात्मा
वा अरे द्रष्टव्य इत्यादि वक्तव्यं किमिति न वा अरे पत्युरित्यादिवाक्यमित्याशंक्याह जायेति । उवाच जायादीनामात्मार्थत्वेन प्रियत्वमात्मन
स्त्वनौपाधिकप्रियत्वेन परमानंदत्वमितिशेषः । प्रतीकमादाय व्याचष्टे नवा इति । किं तन्निपातेन स्मार्यते तत्राह प्रसिद्धमिति । यथोक्तेऽर्थे
मेतियामकमाह एवंसर्वमिति । यद्यदात्मनः प्रीतिसाधनं तत्तदनतिक्रम्य तस्मिंस्तस्मिन्विषये एवं वचनमिति योजना । तत्र हेतुमाह न चेति ।
न वा अरे सर्वस्येत्युक्तं पत्यादीनामुक्तत्वाद्दर्शनं पुनरुक्तिप्रसंगादित्याशंक्याह सर्वग्रहणमिति । उक्तवदनुक्तानामपि ग्रहणं कर्तव्यं न च
सर्वैर्विशेषतो ग्रहीतुं शक्यं ते तेन सामान्यार्थं सर्वपदमित्यर्थः । सर्वपर्याये सिद्धमर्थमुपसंहरति तस्मादिति । ननु तत्तौ ये प्रियत्वमात्मनो
व्याप्तो तेन तदेवाज्ञापि कथ्यते चेत्तत्रोक्तिः स्यात्तत्राह तदेतदिति । अथापि उपन्यासविवरणाभ्यां प्रीतिरात्मन्येवेत्यनुक्ते उज्ञातादर्थपितृदर्शना
दत्तश्चाह तस्मादिति । आत्मनो निरतिशयप्रीत्यास्पदत्वेन परमानंदत्वमभिधायोत्तरं वाक्यमादाय व्याचष्टे तस्मादित्यादिना कश्चेत्पुनरिदं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दर्शनमुपपद्यतेऽतआह श्रोतव्य इति श्रवणादीनामन्यतमेनात्मज्ञानलाभात्किमिति सर्वेषामध्ययनमित्याशंक्याह एवं हीति विद्युदुन्माहित्व
मेवंप्राह्यार्थः श्रवणत्वाविशेषाद्विकल्पहेत्वभावाच्च सर्वैरेवात्मज्ञानं जायते चेत्तेषां समप्रधानत्वमाग्नेयादिवदापतेदित्याशंक्याह यदेति श्र
वणस्य प्रमाणविचारत्वेन प्रधानत्वादंगित्वं मनननिदिध्यासनयोस्तु तत्कार्यप्रतिबंधप्रध्वंसित्वादंगत्वमित्यंगांगिभावेन यदा श्रवणादी
न्यनुष्ठानेन सुप्रतिष्ठितानि तदा सामग्रीपौष्कल्यात्मतत्त्वज्ञानेन फलविशिष्टं सिद्ध्यति मननाद्यभावे श्रवणमात्रेण नैव तदुपपद्यते मननादि
नाप्रतिबंधाप्रध्वंसे वाक्यस्य फलवत्तत्त्वज्ञानजनकत्वायोगादित्यर्थः परामर्शवाक्यस्य तात्पर्यमाह यदित्यादिना कर्मनिमित्तैर्ब्रह्मक्षत्रादि
तदेव वर्णाश्रमावस्थादिरूपमात्मन्यविद्याध्यारोपितस्य प्रत्ययो मिथ्याज्ञानेन तस्य विषयतया स्थिते क्रियाद्यात्मकं तद्रूपमर्दनार्थमाहेति
संबंधः अविद्याध्यारोपितप्रत्ययविषयमित्येतदेव व्याकरोत्यविद्येति अविद्याजनितप्रत्ययविषयत्वे दृष्टांतमाह रज्ज्वामिति आत्मनि।
विदिते सर्वं विदितमित्युक्तमाक्षिपति नन्विति दृष्टिविरोधं निराचष्टे नैष दोष इति आत्मनि ज्ञाते ज्ञानमेव सर्वं ततोऽर्थांतरस्याभावादित्युक्त
मेव स्फुटयति यदीत्यादिना आकांक्षापूर्वकमुत्तरवाक्यमुदाहृत्य व्याचष्टे कथमित्यादिना पुरुषविशेषतो ज्ञाते प्रश्नपूर्वकस्य प्रतीकं गृही
त्वा व्याकरोति कमित्यादिना पराकरणे पुरुषस्य पराधित्वं दर्शयन्नात्मेति परमात्मातिरेकेण द्रष्टृप्रमाणमपि ज्ञास्यमाणजातिं स्वस्वरूपे
णापयुपन्यस्य पराधीनस्यादित्याशंक्याह परमात्मेति इदं ब्रह्मेत्युत्तरवाक्यमुवाहः तस्य व्याख्याने यान्युक्तानीत्यादि आत्मैव सर्वमि
त्येतत्प्रतिपादयति यस्मादित्यादिना स्थितिकालेऽपि उत्पत्तितस्मादात्मैव सर्वं तद्व्यतिरेकेणाग्रहणादिति यो नेनास्थिमवस्थायां सर्वस्या।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रा॰
२०६

त्वमात्रत्वेनातमशक्यत्वेनापकाभावादित्याक्षिपति कथंउनरिति घटस्फुरत्तीत्यादिप्रत्ययमाश्रित्यपरिहरति चिन्मात्रेति मयथाडंड
भेरित्यादिवाक्यमवतारयति नचेति सर्वत्रचिदतिरेकेणासत्वेसमर्थः दृष्टांतेविवर्तितेसंक्षिपति यत्स्वरूपेति डंडुभिः दृष्टांतमादाय
तदाणिव्याचष्टे मयथेत्यादिना शब्दविशेषानेवविशदयति ~~यत्स्वरूपेति डंडुभिः दृष्टांतमादाय तदाणिव्याचष्टे~~ डंडुभीति कथंतर्हिडं
डुभिशब्दविशेषाणांग्रहणेनदाह डंडुभेस्त्विति डंडुभिशब्दसामान्यस्येतियावत् उक्तेर्थेडंडुभ्याघातस्येत्यादिवाक्यमुत्थाप्यव्याचष्टे डंडुभ्या
घातस्येति वाघ्राहार्थमाह ततगतावविशेषाइति उक्तमर्थंव्यतिरेकमुखेनविशदयति नत्विति विवर्तितेदार्ष्टान्तिकमाचष्टे तथेति तत्रैवव
त्वविशेषग्रहणंसंभावनामभिप्रेत्यस्वप्नजागरितयोरित्युक्ते तथाडंडुभिदृष्टांतवदितियावत् शंखस्यतुग्रहणेनेत्यादिवाक्यमादिशब्दार्थो
डंडुभेस्तुग्रहणेनेत्यादिवाक्यदृष्टांतयति पूर्ववदिति तथेति दृष्टांतद्वयपरामर्शः एकेनैवदृष्टांतेनविवक्षितार्थसिद्धौकिमित्यनेकदृष्टांतो॥
पपादनमित्याशंक्याह नानेकेति इहेतिजाग्रदुच्यते कतिवांसामान्यवदृश्यत्वमेवस्फुटयत्यनेकेइति तेषांस्वस्वसामान्येनभावेपिकृतोबुद्धस्यामि
पर्यवसानमित्याशंक्याह तेषामिति कथमित्यस्मात्पूर्वंनषेत्यध्याहारः इतिमन्यतेइतिरितिशेषः विमतेनात्मातिरेकिनव तिरेकेणागृ
ह्यमाणत्वाद्यद्यदतिरेकेणागृह्यमाणंनतत्तदतिरेकिनभवति यथाडंडुभ्यादिशब्दाः तत्सामान्यातिरेकेणागृह्यमाणास्तदतिरेकेणनसं
तीत्यनुमानेविवक्षयाह डंडुभीति शब्दत्वेनभावस्तथासत्तानयेनेसर्वेजगदंतर्भवतीतिशेषः दृष्टांतत्रयमवष्टभ्यतिः शंकितमर्थमुपसंह
रत्येवमिति मयथाइंधाग्नेरित्यादिवाक्यस्यतात्पर्यमाहैवमित्यादिना स्थितिकालवदित्येवंशब्दार्थः तत्रवाक्यमवतार्यव्याचष्टेइत्येतदि

२०६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ति महतोनवच्छिन्नस्य भूतस्य परमार्थस्येति यावत् तन्निश्वसितमिवेत्यस्मिन्नर्थे यथेति ग्रहे मैत्रेयि ततो जातमिति संबंधः तदेवाकांक्षापूर्व
कं विशदयति किं तदित्यादिना इतिहासः इतिब्राह्मणमेवेति संबंधः सेवादादित्यादिपदेन ग्राणसेवादादिग्रहणं ग्रसहाइदमग्रआसीदि
त्यादीत्यत्रादिशब्देनासदेवेदमग्रआसीदित्यादिश्रुत्यते देवजनविद्यानक्षत्रविद्यादिशब्देन वेदः सोयं वेदादृष्टिर्न भवतीत्यर्थः इत्याद्याविद्येति
संबंधः आदिशब्दः शिल्पशास्त्रसंग्रहार्थः प्रियमित्येतदुपात्तेत्याद्याइत्यत्रादिशब्दः सत्यस्य सत्यमित्याद्युपनिषत्संग्रहार्थः तदेते श्लोकाइ
त्यादयइत्यत्रादिशब्देन नतत्पद्यश्लोको भवति ग्रसन्नेव समभवतीत्यादिश्रुत्यते इत्यादीनीत्यादिपदं मध्ययोन्यादेवता अपश्यत् ब्रह्मविद्याशीति
परमित्यादिशब्दीतं ग्रर्थवादेष्वाख्यानपदप्रवृत्तिहेतुभावं शंकित्वा परिहारमाहार्थवेति इतिहासादिशब्दव्याख्यानमुपसंहरत्येवमिति
ब्राह्मणमिति इतिहासादिपदवेदनीयमिति शेषः श्लोकादिशब्दानामितिहासादिशब्दानां च प्रसिद्धार्थत्यागे को हेतुरित्याशंक्य निश्वसितश्रुति
रितिहासादिशब्दानां प्रसिद्धार्थत्यागे हेतुः परिशेषस्त्वन्यत्रेत्यभिप्रेत्याह एवं चेति न च प्रथमे कांडे वेदस्य नित्यत्वेन प्रामाण्यं स्थापितं ततः
नित्यत्वेन तद्धानिरित्यत आह नियतेति नियतेत्यादौ वै शब्दो ते कल्पान्तेऽपि तदानुपूर्व्या नित्यादिवाक्यान्नियतरचनावत्त्वे वेदस्य गम्यते श्रुतादि
निधनानित्येत्यादेश्च सदातनत्वं तस्य निश्चीयते न च कृतकत्वादप्रामाण्यप्रसक्तावदोषत्वानिवारणं च पौरुषेयत्वादनपेक्षत्वे स्वतः प्रामा
ण्यं बुद्धिपूर्वकरणीतत्वाभावेन न तत्सिद्धेर्न चोन्मत्तवाक्यसादृश्यम् अबाधितार्थत्वादिति भावः सिद्धे वेदस्य प्रामाण्ये फलितमाह तस्मादिति ना
मरूपं च सर्गादौ सृष्टिरेवाचोपदिष्टा नरूपप्रपंचसृष्टिः सा चोपदेष्टुरसृष्टिपरिशुद्धैरन्यथानुपपत्तेरित्याशंक्याह नामेति यद्यपि नाम नेवाहरूपस्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्र०टी०
१०७

ष्टिरिति नामरूपसृष्टिवचनेन रूपसृष्टिरर्थादुक्ता तथापि सर्वसंसारसृष्टिर्नोक्ता नामरूपयोरेव संसारत्वे प्राकृतस्य सृष्टेः संसारेऽनन्तर्भावादित्याशं
क्याह नामरूपयोरिति सर्वावस्थयोर्व्यक्ताव्यक्तावस्थयोरित्यर्थः यावत् नामरूपप्रपंचस्यैवात्र सर्गोक्त्युपपादितायां प्रसंहरति इत्यत इति
यतः प्राणोपाधिः स्फुरयति तद्वचनेनेति निश्वसितश्रुतिविधानतेत्यावतारयत्यथवेत्यादिना मिथ्यात्वे विप्रतिबिंबवन्मायामात्रसंभवादुत्प
त्तिः वाक्यानां च मिथ्याज्ञानाधीनप्रपंचजन्यत्वेनामानत्वाहेटस्यतद्भावादिष्वयाव्यभिचाराच्च नाप्रामाण्यमित्याह तदाशंकेति प्र
त्योग्रेभ्यो बृहदादिप्रणीतस्वर्गकामस्यैतस्य वेदेनेत्यादिः सयथा सर्वासामपामित्यादिसमनेन ग्रन्थग्रन्थं प्रत्यापयति किंचान्यदिति मेदेव
व्याकरोति न केवलमिति प्रलयकाले च प्रज्ञानव्यतिरेकेणाभावाज्ज्ञानं ब्रह्मत्वमिति संबंधः उक्तमर्थं दृष्टान्तेन स्पष्टयति जलेति न
च्चापि प्रज्ञानमेवैकं स्यान्न ब्रह्मेत्याशंक्याह तस्मादिति सत्यज्ञानादिवाक्यात् ब्रह्मणस्तन्मात्रत्वादित्यर्थः पृथक्त्वं ब्रह्मणश्चेत् प्रतिपन्नं कि
मिति नहि सदर्शनादिवाक्यमित्याशंक्यान्नेवत्वेन प्रलयं दर्शयितुं दृष्टान्तवचनमेतदित्याह इत्यनेन आहेति प्रलीयतेऽस्मिन्निति प्रलयः एक
स्यास्मिन् प्रलये ह्यनेकप्रलयः तटाकादिगतानामपां कुतः समुद्रे लयो न हि तासां तेन संगतिरित्याशंक्याहाविभागेति अविरहितसमुद्ररूपाहेन जलसा
मान्न पृथ्वाते तद्व्यतिरेकेण वजलविशेषाणामभावाभिप्रेतः तेषां तेषां स्थानमात्रत्वात्तथा तासामस्मिन्नविभागस्य प्राप्तिरिति समुद्रे विभाग प्राप्ति
रित्यर्थः पिच्छिलादीनामित्यादिशब्देनानुक्तास्पर्शविशेषाः सर्वे गृह्यन्ते विषयाणामिन्द्रियकार्यत्वाभावात्कुतः स्पर्शानां त्वचि लयः स्यादित्या
शंक्याह त्वगितीति स्पर्शविशेषाणां स्पर्शसामान्येनभावं प्रपंचयति तस्मिन्निति तथापि समस्तस्य जगतो ब्रह्मव्यतिरेकेणाभावाद्ब्रह्मत्वमि

१०७

वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वि

मेतत्कथं प्रतिज्ञातमित्याशंक्य परंपरया ब्रह्मणि सर्वं प्रविलयं दर्शयितुं क्रममनुक्रामति तथेति मनसि सति विषयविषयिभावस्य दर्श-
नात् सति च तद्दर्शनात्मनः स्पंदितमात्रं विषयज्ञानमिति तस्य तद्विषयमात्रे प्रविष्टस्य तद्व्यतिरेकेणासत्त्वमित्यर्थः संकल्पविकल्पात्मकमनः
स्पंदितं हेतुस्तस्य संकल्पात्मके मनसि संतभावात् तस्य च संकल्पस्याध्यवसायपारतंत्र्यदर्शनात् अध्यवसायात्मिकायां च बुद्धौ तद्विषयस्य सर्ववस्तुनः प्र-
वेशात् मनो विषयसामान्यस्य बुद्धिविषयसामान्ये प्रविष्टस्य तद्व्यतिरेकेणासत्त्वमित्याह एवमिति सर्वं जगदुक्तेन न्यायेन बुद्धिमात्रं भूत्वा तद्धेतौ का-
तेजात्मनीति कृत्वा ब्रह्मणि पर्यवस्यतीत्याह विज्ञानमात्रमिति तच्च जगदिदं विलीयमानं शक्तिशेषमेव विलीयते तत्त्वज्ञानाद्धेतोस्तस्य निःशेष-
नाशानाश्रयणान्न यावच्च ज्ञानो ब्रह्मैकरसप्रतिपत्तिस्तावदास्ते एवमिति शक्तिशेषलयेऽपि तस्य दुर्निरूपत्वाद्वस्त्वैकरस्यधीर्विवृत हेतिभावः
एकायनप्रक्रियातात्पर्यमुपसंहरति तस्मादिति श्रोत्रविषयसामान्यमित्यादावेकायनमिति सर्वत्र संबंधः कथं पुनरत्र प्रतिपर्यायं ब्रह्मणि
पर्यवसानं तत्राह तथेति यथा सर्वेषु पर्यायेषु ब्रह्मणि पर्यवसानं तथोच्यत इति यावत् एवंवदिति तत्तद्विषयसामान्यवदित्यर्थः संकल्पेन
वहति शेषविज्ञानमात्र इत्यत्रापि तथैव एवं सर्वेषां कर्मणामित्यादेरर्थमाह तानि चेति क्रियाज्ञानयोः कार्यशक्त्युपाधिभूतयोः शक्तिभेदाद्भेदस-
मिश्रेत्यत्राणश्रेष्ठ्यादिभाष्ये तत्र तयोरन्योन्याभेदमानमाह यो वा इति फलितमुक्त्वा करणलयो न प्रतीयते स्वयं च व्याख्यायते तत्र कोऽदेहविति
एकेति तत्त्विति कृत्वा करणलयस्य वस्तुत्वमंगीकरोति बाढमिति एतमभिप्रायं प्रकटयति किं त्विति करणस्य विषयसाजात्ये विवृणो-
ति विषयस्यैवेति किमत्र प्रमाणमित्याशंक्य प्रत्युमानमिति सूचयति प्रदीपवदिति यद्वत्स्नेहसंस्पादिसंभवे दीपस्यैव व्यंजकत्वात्तस्य।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रा॰ ·
१०८

नियन्तृवदित्यादीन्सत्रमानानि शास्त्रप्रकाशिकायामधिगंतव्यानि करणानां विषयसाजात्येफलितमाह तस्मादिति इष्टानिविषयप्रलयादि
विशेषः एकायनप्रक्रियामात्राविनिशब्दः सयथा सैंधवखिल्य इत्यादेः सोयं भेदकोऽहंकीर्तयति तदेवमादिना सर्वैः संदर्भैस्तत्वेनमुच्यते प्र
तिज्ञातेर्थेपूर्वोक्तहेतुमनूद्यसाध्यसिद्धिफलंदर्शयति तस्मादिति उक्तहेतोर्यथोक्तब्रह्मैवसर्वमिदंजगदिति यत्प्रतिज्ञातमिदंसर्वंयदयमा
त्मेतितत्सर्वोक्तहेतोनयवैधरूपतर्कवशात्साधितमितियोजना उत्तरवाक्यस्यविषयपरिशेषार्थमुक्तेप्रलयेपौराणिकसंमतिमाह स्वाभा
विकइति कार्याणांप्रकृतावबसितत्वेस्वाभाविकत्वेप्रलयांतरेपितेषामसमतिसंगिरते यस्त्विति द्वितीयंप्रलयमधिकृत्यानंतरग्रंथमवता
रयत्यविद्येति तदेवात्यंतिकलयोक्तिः उदकेविलीयमानमिवोक्तेकाविन्नविलयेपितच्छ्याद्दर्शनादित्याशंक्याह यद्यदिति तद्देतिप्रतीकमा
दायव्याचष्टे नैवेति यत्वयप्रदर्शनार्थंनैवेतिपुनरुक्तेमहद्भूतमेकमद्वैतमित्युत्तरत्रसंबंधः ग्रस्यार्थस्यसर्वोपनिषत्सिद्धत्वंदर्शनार्थोवेश
ब्दः इदंमहद्भूतमित्यत्रेदंशब्दार्थंविशदयति यस्मादित्यादिना कोसौखिल्यभावोमित्रेतत्स्वाह नामरूपेति कार्यकरणसंघातेनादात्म्या
भिमानद्वाराज्ञानाद्यभिमानोत्रखिल्यभावस्तदर्थः इतिशब्देनाभिमानोलक्षते यथोक्तेखिल्यभावेसतिजातोभूतस्यमहत्वमित्याशंक्या
ह सखिल्यभावइति खिल्यभावःस्वशब्दार्थः परस्यपरिच्छिन्नत्वार्थमजरादिविशेषणानि केनरूपेणेकरस्यत्वदाह प्रज्ञानेति तस्यापरिच्छि
न्नत्वमाहानंतइति तस्यसाधेत्रत्वेवारयन्त्यपारइति प्रतिभासमानेभेदेकथंयथोक्तंतत्वमित्याशंक्याहा विज्ञेति भवतुयथोक्तेतत्वेखिल्य
भावस्यप्रवेशस्तथापिकिंस्यादित्यतआह तस्मिन्निति महत्वंसाधयति सर्वेति भूतत्वमुपपादयति विषयीति महदित्युक्तेपारमार्थिकेचे।

१०८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तिविशेषणं किमर्थमित्याशंक्याह लौकिकमिति जाग्रत्कालीनेपरिदृश्यमाने हिमवदादिमदृश्यदृष्टिर्भवति तथापिस्वसमाप्त्यादिस
मत्वाव्रतत्वरमार्थवस्तुनहि दृश्यं जरुसिंहस्नालादेर्विशिष्यते अनेनलौकिकात्मरतो ब्रह्मव्यावर्त्यते इति विशेषणमित्यर्थः आपेतिकंसया।
दानेत्यमितिशेषः प्रवधारणरूपमर्थमेवस्फोरयति नान्यदिति पतेभ्योधृतेभ्यः समुत्थायेत्यादिसमनेनतरवाक्यस्यावष्टम्भमाशंक्या
माह यदीदमिति वस्तुतः शुद्धत्वेकिंसिद्धमितितत्राह संसारेति नहितस्मिन्निमित्तेऽभावात्तस्याखिल्यत्वमितिमत्वाह किंनिमित्तइति
खिल्यभावमेवविशिनष्टि जातइति अनेकः सांसारदुःपोधर्मोशनायापिपासादिनिमित्तोपद्रुतोऽहमितिइतियावत् खिल्यभावेनिमित्त
दर्शयन्नुत्तरमाहोपाधयइति पतदुक्तं दृष्टांतव्याकरोति यानीति स्वकस्यपरमात्मनः कार्यकरणविषयाकारपरिणतानीतिसंबंधः तानि
व्यवहारसिद्ध्यर्थंविशिनष्टि नामरूपात्मकानीति तेषामतिदुर्बलत्वंसूचयति सलिलेति स्वच्छत्वेदृष्टांतमाह सलिलोपमस्येति तेषांप
रमात्मविप्रकृतत्वाभावेकथमेतदुक्तं तेनपरामर्शः स्यादित्याशंक्याह येषामिति उक्तमेकायतनप्रक्रियायामितिशेषः ब्रह्मणिप्रज्ञानब्र
तेभ्यस्तानांप्रविलयेदृष्टांतमाह नदीति देशेतिपंचमीनिर्दिशयति देशभूतेभ्यइति एवंस्मिन्ब्रह्मण्येकीभूतेमत्यमाहवाच्यतेषांतेषांप्रकृत
त्वमाह सत्येति यथासैंधवः सन्खिल्यः सिंधोस्तेजः संबंधमपेक्ष्योद्धृतइति तथाभूतेभ्यः खिल्यभावोभवतीत्याह सैंधवेति समुत्थानमेव।
विवृणोति यथेत्यादिना तान्येवेत्यादिव्याचष्टे येभ्यइति खिल्यदेहनिवृत्तदेहत्वोपेतानीतियावत् ब्रह्मविद्यानामदेहमाह एतेति
तत्वलेशदृष्टांतमाचष्टे नदीसमुद्रवदिति यथासलिलफेनादयोविनष्टास्तत्रधानेषुभूतेषुविनष्टस्वरूपस्थानखिल्यभावोनष्टः।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नीत्याह शान्तिवेति किंपुनर्भूतानां खिल्यभावस्य च विनाशो मन्त्व विषिध्यते न त्याह यथेति नवेति कैवल्योक्तिः उक्तमेव व्याकरोर्थस्फुटयति ना
स्तीति ब्रह्मविदः शरीरस्य विशेषसंज्ञाभावं कैमुतिकन्यायेन कथयति शरीरावस्थितस्येति स एष स्येति यावत् सर्वतो मुक्तस्येति शेषः
उक्तं परमार्थदर्शनमेव व्यक्तीकर्तुं चोदयत्येवमिति तेन याज्ञवल्क्येनेति यावत् सर्वतो मुक्तस्येति शेषः उक्तं परमार्थदर्शनमेव व्यक्तीक
र्तुं चोदयत्येवमिति इति वदता विरुद्धधर्मत्वमुक्तमिति शेषः एवं वदतेपि कुतो विरुद्धधर्मवत्त्वोक्तिस्तत्राह कथमिति एकस्यैव विज्ञानघ
नत्वे संज्ञाराहित्यं चक्रुतो विरोधधीरित्याशंक्याह नहीति विरोधबुद्धिफलमाहात इति अत्रैतमुक्तविषयपरामर्शः नवा इति प्रतीकं ग्रही
त्वा व्याकरोत्यन इति मोहनेवाक्यं ब्रवीत्येव भवानिति शंकते नत्विति समाधत्तेन मयेति कथं तर्हि ममेकस्मिन्नेव वस्तुनि विरुद्धधर्मवत्त्वमु
द्रिरित्याशंक्याह त्वयैवेति त्वया तर्हि किमुक्तमिति तत्राह मयात्विति खिल्यभावस्य विनाशो प्रत्यगात्मस्वरूपमेव विनश्यतीत्याशंक्या
ह नपुनरिति ब्रह्मस्वरूपस्यानाशे विज्ञानस्य किमायातमित्याशंक्याह नहीति विज्ञानघनस्य प्रत्यक्त्वं दर्शयति आत्मेति कथं तर्हि ता
त्यवात्र विनश्यतीति तत्राह भूतनाशेति खिल्यभावस्याविद्याकृतत्वे प्रमाणमाह वाचारंभणमिति खिल्यभाववत्प्रत्यगात्मनोपि विना
शित्वं स्यादिति चेन्नेत्याह त्वयं त्विति पारमार्थिकत्वे प्रमाणमाह अविनाशीति अविनाशित्वफलमाहात इति पर्यायं विज्ञानघमिति संबंधः
इदमित्यादिपदानां गतार्थत्वाद्व्याख्येयत्वं सूचयति यथेति विज्ञानघनपदेत्यत्र वाक्यशेषं प्रमाणयति नहीति आत्मनो विज्ञानघनत्वे
प्रमाणिकं चेत्तर्हि निषेधवाक्यमयुक्तमिति शंकते कथमिति अविद्याकृतविशेषविज्ञानाभावाभिप्रायेण निषेधवाक्योपपत्तिरित्याह

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

माह यत्र हीति यस्मिन्नुक्तलक्षणेविकल्पभावे सति यस्माद्यथोक्तेब्रह्मणि द्वैतस्य फलं तेन तस्मात्तस्मिन्सतीतरइतरं जिघ्रतीति संबंधः
द्वैतमिवेत्यस्यार्थमनूद्य व्याचष्टे भिन्नमिवेति इवशब्दस्योपमार्थत्वेनाशंकितं नत्विति द्वैतेनाद्वैतस्योपमीयमानत्वाद्दृष्टान्तस्य दार्ष्टान्तिकस्य
वतस्य वस्तुत्वे स्यादुपमानोपमेययोश्चेद्विशेषयोर्वस्तुत्वोपलंभादित्यर्थः द्वैतप्रपंचस्य मिथ्यात्ववादिश्रुतिविरोधान्नतस्य सत्यतेत्यप
दिदरति वाचारंभणमिति तत्र तस्मिन्नविकल्पभावे सतीति यावत् स्वप्नादिद्वैतमिव जागरितेपि द्वैते यस्माद्वासनात्मके तस्मात्परमात्मनः सा
काशादितरो सावात्माविकल्पभूतोपरमार्थः सन्नितरं जिघ्रतीति योजना परस्मादितरस्मिन्नात्मन्यपरमार्थविकल्पभूते दृष्टान्तमाह वृक्षादे
रिवेति इतरशब्दमनूद्य तस्यार्थमाह इतरोघ्रातेति अविद्यादशायां सर्वाण्यपि कारकाणि संतीति कर्तृकर्मनिर्देशस्य सर्वकारकोपलक्षण
त्वादित्याह इतरइति क्रियाफलयोरेकशब्दत्वे दृष्टांतं विवृणोति यथेति दृष्टांतेपि विप्रतिपत्तिमाशंक्यानंतरोक्तं हेतुमेव स्पष्टयति क्रि
येति अतस्य जिघ्रतीत्यत्रापि क्रियाफलयोरेकशब्दत्वमविरुद्धत्वमिति शेषः उक्तं वाक्यार्थमनूद्य वाक्यांतरेष्वतिदिशतीतरइति तथे
तरो द्रष्टेतरेणचक्षुषेतरं द्रष्टव्यं पश्यतीत्यादि द्रष्टव्यमिति शेषः उत्तरेष्वपि वाक्येषु पूर्ववाक्यवत्कर्तृकर्मनिर्देशस्य सर्वकारकोपलक्षण
त्वे क्रियापदस्य च क्रियातत्फलाभिधायित्वं द्रष्टव्यमित्याह सर्वमिति यत्र हीत्यादिवाक्यार्थमुपसंहरतीयमिति यत्र वा अस्येत्यादिवाक्य
स्य तात्पर्यमाह यत्र त्विति उक्तार्थं वाक्यांतराणि व्याचष्टे यत्रेति तमेवार्थं संक्षिपति यत्रैवमिति सर्वे कर्तृकरणादीति शेषः तत्केनेत्या
दिव्याकरोति तत्रेति किंशब्दस्याक्षेपार्थं कथयति सर्वत्रेति ब्रह्मविदोपि कारकद्वारा क्रियादिरस्तीति क्रियतामित्याशंक्याह आत्मत्वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हि तिसर्वस्यात्मत्वासिद्धिमाशंक्य सर्वमात्मैवाभूदिति श्रुत्या समाधत्ते नचेति कथं तर्हि सर्वमात्मव्यतिरेकेणाभातीत्याशंक्याह तस्मादि
ति भेदभानस्याविद्याकृतत्वे फलितमाह तस्मात्परमार्थेति तद्धेतोरज्ञानस्यापनीतत्वादिति शेषः एकत्वप्रत्ययादज्ञाननिवृत्तिद्वारा क्रि
यादिप्रत्यये निवृत्तेऽपि क्रियादिसाधनेनाद्यात इति करणप्रमाणयोरभावे कार्यस्याविनष्टत्वादिति यावत् ननु किं शास्त्रे प्रश्नार्थप्रतीयमा
ने कर्मक्रियातत्साधनयोरत्यन्तनिवृत्तिर्विदुषो विवक्षिते तत्राह केनेति किं शास्त्रस्य प्रागेव द्वैपार्थत्वप्रश्ने तत्राह तद्वैपार्थ्ये वचो विदुषः सर्वप्र
कारक्रियाकारककार्यसंभवप्रदर्शनार्थमत्यन्तमेव क्रियादिनिवृत्तिर्विदुषो युक्तेत्यर्थः सर्वप्रकारानुपपत्तिमेवाभिनयति केनचिदिति
कैवल्यावस्थायामाशंक्याप्रमात्राभाववचनमित्युक्तान्तैव किंतु नन्वर्थं एवं व्युत्क्रमविद्यावस्थायामपि साक्षिणो ज्ञानाविषयत्वमाह येनापीति
येन कृत्स्नस्य बोधेन व्याप्तो लोकः सर्वं जानाति तं साक्षिणं केन प्रकारेण को वा ज्ञाता जानीयादित्यत्र हेतुमाह येनेति येन चक्षुरादि
ना लोको जानाति तस्य विषयग्रहणेनैवोपक्षीणत्वान्न साक्षिणि प्रवृत्तिरित्यर्थः आत्मनो संदिग्धभावत्वात्तु प्रमेयत्वासिद्धिरित्याह ज्ञा
तश्चेति किं वात्मा स्वेनैव ज्ञायते ज्ञात्रन्तरेण वा नाद्य इत्याह नचेति न द्वितीय इत्याह नवाविषय इति ज्ञात्रन्तरस्याभावान्नस्याविषयो य
दात्मा कृतस्तेन ज्ञातुं शक्यते नहि ज्ञात्रन्तरमस्ति नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेरित्यर्थः आत्मनि प्रमातृप्रमाणयोरभावे ज्ञानाविषयत्वे फलितमा
ह तस्मादिति विज्ञातारमित्यादिवाक्यस्यार्थं प्रपञ्चयति यदात्विति तदेवं स्वरूपापेक्षं विज्ञानघनत्वं विशेषविज्ञानापेक्षं तु संज्ञाभाववचनमि
त्यविरोध इति ब्राह्मणोक्तमेवैतत्तु ब्राह्मणयोः संगतिं वक्तुं वृत्तं कीर्तयति यत्कैवल्यमिति कैवल्यं व्याचष्टे कर्मनिरपेक्षमिति नचात्मज्ञानं कर्म

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मिति संबंधः ततो निराकांक्षत्वं सिद्धमिति चार्थः आत्मज्ञाने च संन्यासिनामेवेति नियतं विशिनष्टि सर्वेति ननु ज्ञातस्ततो निराकांक्षत्वं स
त्यपि तस्मिन्विहेयांतरसंभवात्तद्यागासमितिचेति न वाग्रेपत्वमित्यादावुक्तं स्मारयत्यात्माचेति तस्य निरतिशयप्रेमास्पदत्वेन परमानंदत्वेन फ
लितमाह तस्मादिति सर्वेह दर्शनाद्यैस्तदितरदर्शनैकानि साधनानीत्याशंक्याह सर्वेति दर्शनप्रकारात् दर्शनस्योपायप्रभेदाः श्रवणमननयोः
स्वरूपविशेषं दर्शयति तवेति कोसौ तर्को येनात्मा मंतव्यो भवतीत्याह तवचेति उडभ्यादिग्रंथः समन्वयार्थः उक्तमेव तर्कं संगृह्णात्यात्मैवेति
प्रधानादिवादमादाय द्वैतत्वसिद्धिशंकायां तन्निराकरणार्थमिदं ब्राह्मणमिति संगतिं संगिरते तान्नयायमिति कथं द्वैतत्वसिद्धिशंकोद्भूयते त
त्राह यस्मादिति तस्मात्तथाभूतं भवितुमर्हतीति तत्रत्यः संबंधः अन्योन्योपकार्योपकारकभूतं जगदेकचेतनान्वितमेकप्रकृतिकं चेत्यत्र
णमिमाह यथेति दृष्टांतस्य घटादीति शेषः दृष्टांते सिद्धमर्थं दार्ष्टांतिके योजयति तस्मादिति तदुक्तमर्थं स्फुटयति परस्परेति तथाभूतमित्येक
कारणत्वैकत्वादि गृह्यते विमतमेककारणकं परस्परोपकार्योपकारकभूतत्वात्स्वप्नवदित्युक्तं द्वैतत्वसिद्धेर्नहि सर्वं जगत्परस्परोपका
र्योपकारकभूतमित्याशंक्याह दृष्टेति द्वैतत्वसिद्धिशंकां परिहर्तुं ब्राह्मणमिति संगतिमुक्त्वा प्रकारांतरेण तात्पर्यमाहाथवेति प्रतिज्ञाहेतू क्र
मेणोक्त्वा हेतुसिद्धिं तस्य प्रतिज्ञातार्थस्य पूर्ववचनेन निगमनमित्युक्त्वा तार्किकसंमतिमाह तथाहीति भर्तृप्रपंचानां ब्राह्मणारंभप्रकारमनुवद
त्यैवेति इह व्याख्यातिवाक्यारंभाद्वंद्वमिह प्रोक्तादागमवचनं श्रोतव्यो मंतव्यश्च आत्मा इति निरूपणार्थं द्वंद्वमिह प्रोक्तादारभ्य मधुब्राह्मणात्प्राग्
उपपत्तिप्रदर्शनेन मंतव्य इत्युक्तमनननिरूपणार्थमागमवचनं निदिध्यासितव्याख्यानं तेषु नरेतन्नब्राह्मणमित्यर्थः एतद्रूपयति सर्वेषामपीति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा०टी०
२२२

श्रवणादेर्विधेयत्वेपीतियावत् अन्वयव्यतिरेकाभ्यां श्रवणे प्रवृत्तस्य तत्त्वेक्षत्वे समस्यार्थतत्त्वं मननं न विधिमपेक्षते यथा तर्कतो मननं त-
त्त्वेनध्यातस्य तर्कागमाभ्यां निश्चितस्याभयसामर्थ्यादेव निदिध्यासनसिद्धेर्न तदपि विध्यनपेक्षमेवेत्यर्थः यथाणोर्विध्यनपेक्षत्वे फलितमा-
ह तस्मादिति इति परकीयव्याख्यानमयुक्तमिति शेषः सिद्धान्तेपि श्रवणादिविध्यभ्युपगमात्कथमित्थं परकीयप्रस्थाने प्रत्याख्यानमि-
त्याशंक्याह सर्वथापीति नहि श्रवणाद्यभ्युपगमेपीति यावत् एवं संगतिं ब्राह्मणस्योक्त्वा तदक्षराणि व्याकरोतीयमित्यादिना यदुक्तं मधि-
दमधिरिति तद्विवृणोति यथेति न केवलमुक्तं मधु हृदयमेव किंत्वमधुतरं चास्तीत्याह किंचेति पुरुषग्रहस्येतरविषयत्वं वारयति सर्वेति
तस्य पृथिवीवन्मधुत्वमाह अस्याः सर्वेषामिति सर्वेषां च भूतानां तत्प्रति मधुत्वं दर्शयति सर्वाणि चेति तन्नाद्यमेवमधुहृदयमुक्तमक्षरं ते-
मधुहृदयमपरं कल्पयित्वा कल्पकाभावादित्याह यथा द्वेति प्रथमपर्यायार्थमुपसंहरत्येवमिति पृथिवीं सर्वाणि भूतानि पार्थिवः पु-
रुषः शारीरश्चेति चतुष्टयं एकं मध्विति शेषः मधुशब्दार्थमाह सर्वेति अस्येति पृथिव्यादेरिति यावत् परस्परमुपकार्योपकारकभावेन फ-
लितमाहातश्चेति अस्येति सर्वं जगदुच्यते उक्तं च यस्मात्परस्परोपकार्योपकारकभूतमित्यादि भवत्वनेन न्यायेन मधुपर्यायेषु सर्वेषु का-
रणोपदेशो ब्रह्मोपदेशस्तु कथमित्याशंक्याह यस्मादिति सम्प्रकृतश्चात्मैवायं च तद्धर्मकोमेदह इति योजना इदमिति चतुष्टयकल्पनाधि-
ष्ठानविषयत्वात्तेनपराभृशति इदं ब्रह्मेत्यत्र चतुष्टयाधिष्ठानमिदंशब्दार्थः तत्तीये च तस्य प्रकृतत्वं दर्शयति यद्विषयेति इदं सर्वमित्यत्र ब्रह्म- २२२
त्वाविदमित्युक्तं सर्वं सर्वाणीतिसाधनमितियावत् तदेव स्पष्टयति यस्मादिति यथा पृथिवी मधुत्वेन व्याख्याता तथाऽपोऽपि व्याख्येया इत्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ह तथेति रैतस इति विशेषणस्यार्थमाहाध्यात्ममिति आपो रेतो भूत्वा शिश्नं प्राविशन्निति हि श्रुतं तत्र पृथिव्यामप्सु चोक्तन्यायमग्नाव-
तिदिशति तथेति वाङ्मय इत्यस्यार्थमाह वाचीति अग्निर्वाग्भूत्वा मुखं प्राविशदिति हि श्रूयते अग्नावुक्तन्यायं वायावतिदिशति तथेति
वायुः प्राणो भूत्वा नासिके प्राविशदिति श्रुतं तमाश्रित्याहाध्यात्ममिति पृथिव्यादीनां मते तद्वैर्मिनां च इहदाणामेकवाक्योपात्तानामेकरू-
पं मधुत्वमिति शंकां परिहरन्नवांतरविभागमाह भूतानामिति पृथिव्यादीनां कार्यत्वं तेजोमयादीनां करणत्वमित्यवसमन्याधिकारभेदमति
माह तथा चेति यद्यप्यादित्यस्तत्तेजो भूतेन न भवति तथापि रेवत्ताभेदमाश्रित्याध्यात्मादावुक्तन्यायं तस्मिन्नतिदिशति तथेति आदित्यश्चक्षुर्भू-
त्वाक्षिणी प्राविशदिति श्रुतिमाश्रित्याह चाक्षुष इति आदित्यगतं न्यायं दिक्षु संपादयति तथेति दिशः श्रोत्रं भूत्वा कर्णौ प्राविशदिति श्रु-
तेः श्रोत्रमेव दिशामध्यात्मं तथा चाध्यात्मं श्रौत्र इत्येव वक्तव्ये कथं प्रातिश्रुत्क इति विशेषणमित्याशंक्याह दिशामिति तथापीत्यस्मिन्नर्थे वा-
शब्दः दिक्षु व्यवस्थितं न्यायं चंद्रे दर्शयति तथेति चंद्रमा मनो भूत्वा हृदयं प्राविशदिति श्रुतिमनुसृत्याहाध्यात्ममिति चंद्रवद्विद्युतोपि मधुत्व-
माह तथेति अध्यात्मं तैजस इत्यस्यार्थमाह त्वगिति पर्जन्योपि विद्युदादित्यवत्सर्वेषां भूतानां मधु भवतीत्याह तथेति अध्यात्मं शाब्दः सौ-
वर इत्यस्यार्थमाह शब्दे भव इति यद्यप्यध्यात्मं शब्दे भव इति स्मृत्यस्यापि शब्दः पुरुषस्तथापि स्वरे विशेषतो भवतीत्यध्यात्मं सौवरः पुरुष इति यो-
जनास्तत्र यथोक्तन्यायमाकाशेतिदिशति तथेति सर्वयोगांतरे हृदयमनुयोत्यापयस्याकाशगता इति प्रतिशरीरिणां सर्वेषां प्रत्येकमि-
त्यावत धर्मस्य शास्त्रैकगम्यत्वेन परोक्षत्वादयमिति निर्देशानर्हत्वमाशंक्याहायमितीति यद्यपि धर्मोऽप्रत्यक्षोऽयमिति निर्देशानर्हस्त-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ण्यादिपृथिव्यादेरेकैकं कार्यस्य प्रत्यक्षत्वात्तेन कारणस्याभेदमौपचारिकमादाय प्रत्यक्षत्वव्यवहारादिवदयं धर्म इति व्यपदेशोपपत्तिरित्यर्थः को
ऽसौ धर्मो यस्य प्रत्यक्षत्वव्यपदेश इत्यत्राह धर्मस्येति आत्ममनःसंयोगादुत्पन्नस्य जनितधर्ममित्यादावितिशेषः तदेतस्य प्रत्यक्षत्वात् चोदना
लक्षणत्वमित्याशंक्य कार्यगौणत्वसूत्रयोस्त्वाभ्यामविरोधमभिप्रेत्याह श्रुतीति तस्मिन्नेव कार्यलिंगकमनुमानेनसूचयति तत्रादीनामिति
तदेवानुमानान्तरं विवृणोति वेदोक्तं जगत इति जगद्वैचित्र्यकारित्वे हेतुमाह पृथिव्यादीति धर्मस्य प्रत्यक्षेणाव्यपदेशो हेतुत्वं तदाह प्राणिनामि
५
ति तेनानुष्ठीयमानाचारेण प्रत्यक्षेण धर्मस्य वस्तुप्रमाणत्वेनेति यावत् तत्तत्तीर्थ्यायेयो वैस धर्मः सम्यचैतदिति सत्यधर्मयोरभेदव्यवहा
रयोर्भेदेनाव्यपर्यायद्वयोपादानमनुपपन्नं इत्यत आह सत्य इति कथमेकत्वे सति भेदेनोक्तिरित्याशंक्याह द्वेधेति यदृष्टेन रूपेण कार्यारंभक
त्वं प्रकटयति यत्त्विति सामान्यात्मना रंभकत्वमुदाहरति सामान्यरूपे[illegible] विशेषात्मना कार्यारंभकत्वमवक्ति विशेषेति धर्मस्य द्वैभेदा
नुक्त्वा तयोर्मध्ये प्रथममधिकृत्य यश्चेत्यादि वाक्यमित्याह तद्वेति द्वितीयं विषयीकृत्य पश्चाद्य मध्यात्ममित्यादि ग्रन्थमित्याह तयेति इ
दमत्यमित्यस्मिन् पर्याये सत्यशब्दार्थमाह तथाहेति सोपीत्यपिशब्दो धर्मोदाहरणार्थः द्वयोरपि प्रकारयोर्विनियोगं विभजते सामा
न्यरूप इति उभयत्र समवेतशब्दस्तत्कारणत्वेनानुगतार्थः ~~द्वयोरपि प्रकारयोर्विनियोगं विभजते सामान्यरूपेति~~ यश्चायमस्मिन्नित्या
दिवाक्यस्य विषयमाह तथाध्यात्ममिति सत्यस्य पृथिव्यादौ कार्यकरणसंघाते चकारणत्वे प्रमाणमाह सत्येनेति इदं मानुषमित्यत्र मानु
षग्रहणे सर्वजात्युपलक्षणमित्यभिप्रेत्याह धर्मसत्याभ्यामिति कथं तन्नरेषां जातिः सर्वेषां भूतानां मधु भवतीत्यत्राह तद्वेति भोगभूमिः स

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रमस्यार्थः यश्चायमस्मिन्नित्यादिवाक्यद्वयस्य विषयभेदं दर्शयति तत्रेति व्यवहारभूमावितियावत् धर्मादिवदित्यपेरर्थः निर्दिष्टः स्वशरी
रनिष्ठाज्ञानिराध्यात्मिका शारीरोतनराश्रितात्तद्बाह्योतिभेदः वस्तुतस्तत्रैनोभयत्र्यात्वमित्यभिप्रेत्यनिर्देशभागित्युक्रमेतिसंपर्यायमवतार
यति यस्त्विति आत्मनः शारीरेणगतत्वात्स्वनरूक्तिन्नुपपन्नमेनेतिशंकते नन्विति अवयवावयविविषयत्वेनपर्यायद्वयमनुक्रमितिप
रिहरति नेत्यादिना परमात्मानंमावर्तयति सर्वभूतेति चेतनमवक्तिनत्ति कार्येति यश्चायमस्मिन्नित्यादिवाक्यस्वविषयमाह तस्मिन्नि
ति यश्चायमध्यात्ममित्यादिकिमितिनोक्तमित्याशंक्याह एकदेशेनेति अवेत्येतत्पर्यायोक्तिर्यश्चायमात्मेत्यस्यार्थमाह यस्त्विति सर्वाश्रय
मात्मेत्यस्यार्थमाह यस्मिन्निति परिशिष्टः एवंभूपर्यायेष्वनुपदिष्टोऽत्र पर्यायेषु यश्चायमात्मेत्युक्तो विज्ञानमयो यस्मिन्नात्मनि लिङ्गस्य दर्शना
वचसा प्रवेशितस्तेन परेणात्मना तादात्म्यं गतोऽविद्वान् तत्प्रशाह्यार्थ इत्यर्थः उक्तमात्मशाह्यार्थमनूद्य सर्वेषामित्यादिव्याचष्टे तस्मिन्निति अवि
द्ययाकृतः कार्यकरणसंघातप्रवेशोपाधिस्तेन विशिष्टे जीवे तस्मिन्परमार्थात्मनि ब्रह्मणि ब्रह्मविद्यया प्रवेशितेसति सम्प्रदायमात्मा यथोक्त
विशेषणः सर्वैरुपास्यः सर्वेषांभूतानामधिपतिरितिसंबंधः व्याख्येयपदमादाय तस्य वाच्यमर्थमाह सर्वेषामिति तस्यैव विवक्षितोऽर्थः सर्वै
रुपास्यत्वेऽहेतुः स्वातंत्र्यमतिरेकद्वारा स्फोरयति नेत्यादिना सर्वेषांभूतानां राजेत्येतावतैवयथोक्तार्थसिद्धौ किमित्यधिपतिरिति विशेषण
मित्याशंक्याह राजत्वेति राजत्वजात्यनाक्रांतोऽपि कश्चित्सदृचितपरिपालनादिव्यवहारवानित्युपलक्षणं तत्स्वस्वातंत्र्यं राजपरत्वेऽन्वा
तस्मात्तेनान्वक्षेऽर्थमधिपतिविशेषणमित्यर्थः राजाधिपतिरित्युभयोरपि मिथो विशेषणविशेष्यत्वमभिप्रेत्य वाक्यार्थं विनिगमयति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं॰
११३

एवमिति उक्तस्य विद्याफलस्य तृतीयेनैकवाक्यत्वमित्याह यद्वक्षमिति तदेव व्याख्यातं स्फोरयत्येवमिति मैत्रेयीब्राह्मणोक्तक्रमेणेतिया
वत् एवमित्यस्यार्थं कथयति यथेति मधुब्राह्मणे सर्वं ब्रह्मणेचोक्तश्रवणादित्रयं संपाद्य विद्वान् ब्रह्मा भवतीति संबंधः नन्वमोतावस्था
यामेव विदुषो ब्रह्मत्वमपरिच्छिन्नत्वं च न प्राग्माम विद्यादशायामित्याशंक्याह तस्मादिति समानाधिकरणे पंचमी अयं एवं लक्षणान्ब्रह्मा
स्मीति श्रवणादिकृतात्तत्त्वसाक्षात्कारादिति यावत् अब्रह्मत्वादिधर्मैः किं कृथमित्याशंक्याह तांस्त्विति इत्थमनूद्योत्तरग्रंथमवतारय
ति परिसमाप्त इति यस्य कृत्स्नस्यार्थो विद्याप्रयोजनात्मा ब्रह्मकंडिकायां च तद्योदोच प्रस्तुत तस्यार्थो यथोक्तन्यायेन निर्द्धारित इत्यन्तुवा
दार्थः सर्वात्मभूतत्वे सर्पादिवत्कल्पितानां सर्वेषामात्मभावेन स्थितत्वे सर्वं ब्रह्म तद्रूपत्वे सर्वात्मत्वे सर्वपदं आत्मान इति कुतो भेदो किं तस्मै क्व

मा

स्य श्रान्तीयत्वादित्याशंक्याह जलं चेद्भवतीति दार्ष्टान्तिकभागस्य संपिंडितमर्थमाह सर्वमिति उक्तस्य सर्वात्मभावस्य तृतीयेनैकवाक्य
त्वं निर्दिशति यद्वक्षमिति सर्वात्मभावे विदुषः सप्रपंचत्वं स्यादित्याशंक्याह सएष इति सर्वकल्पितेन द्वैतेन सहितमधिष्ठानभूतं ब्रह्म स्वप्रम
भावेन पश्यन् विद्वान् सर्वोपाधिस्तद्रूपेण स्थितः सर्वो भवति तदेवं कल्पितं सप्रपंचत्वमविद्वद्दृष्ट्या विदुषो भीष्टमित्यर्थः विद्वद्दृष्ट्यात्वस्य
निष्प्रपंचत्वं दर्शयति विरूपाधिरिति रूपाद्यत्वे शब्दप्रत्ययागोचरत्वं ब्रह्मणः सप्रपंचत्वमविद्याकृतं निष्प्रपंचत्वं तात्त्विकमित्यागमार्थः
त्रिरोपपत्तिः कथं तर्हि तार्किकमीमांसकाश्च शास्त्रार्थविरुद्धं पश्यंतो ब्रह्मास्ति नास्तीत्यादि विकल्पयंतो मोमुह्यंते तत्राह तमेतमिति वादिना
मोहस्यानात्मत्वसत्त्वापह्नुते ब्रह्मणो हेतुत्वप्रमाणमाह तमित्यादिना तैत्तिरीयश्रुतावादि शाहे नाहमन्नमन्नमहं तमद्मीत्यादिश्रुत्यंते क्तो

११३

नि३ १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देशपरिमाणावादिशङ्केन सत्यकामः सत्यसंकल्पो विजरो विमृत्युरित्यादिश्रुतिरीति श्रुतिसिद्धे देहादेर्व्यतिरिक्तमपि संवादयति तथेति पूर्वोक्तप्र
कारेणागमार्थे विरोधसमाधाने विद्यमानेऽपि तद्दहराकाशाद्यतिरिक्तमुपसंहरतीत्येवमादीनि विकल्पमेवमुपस्करयत्यस्तीति सर्वत्र श्रुतिस्म
तिप्रसिद्धात्मनीति यावत् केनेति दिशा ब्रह्मविद्यायाः समधिगतेत्यत्राह तस्मादिति ब्रह्मज्ञानफलमाह तथैवेति तद्यथेत्यादिवाक्यार्थं
विस्तरेण व्याकुर्वन्नेकीभवतीति परिसमाप्तेति ब्रह्मविद्यापरिसमाप्तिमाचेत्किमुत्तरग्रन्थेनेत्याशंक्याह तस्मादिति इयमिति प्रवर्ग्यप्रकरणस्था
माख्यायिकां परामृशति तानीतेदं वैतन्मधित्यादिना ब्राह्मणेनेति शेषः तदेतदृषिरित्यादेस्तात्पर्यमाह तस्मादिति तद्धानेरस्यादिरे।
कोमन्त्रः प्राधर्वणायेत्यादिरपरः मन्त्रब्राह्मणाभ्यां वक्ष्यमाणरीत्या ब्रह्मविद्यायास्तुतत्वं तदाद्यापि चेति अपिशब्दः स्तावकब्राह्मणसंभा
वनार्थः मन्त्रद्वयसमुच्चयार्थश्चशब्दः एवंशब्दसूचितं स्तुतिप्रकारमेव प्रकटयति इंद्रेति तस्माद्दुष्प्राप्यत्वे हेतुमाह यस्मादिति महत्त्वमाया
सस्करयति ब्राह्मणस्येति कृतार्थेनापीन्द्रेण रक्षितत्वे विद्यायाः दौर्लभ्येन फलितमाह तस्मादिति न केवलमुक्तेनैव प्रकारेण विद्यास्तूय
ते किं त्वप्रकारान्तरेणापीत्याह तदापि चेति तदेव प्रकारान्तरं प्रकटयति सर्वेति केवलयेत्यस्यव्याख्यानं कर्मनिरपेक्षयेति तत्र हेतुमाह य
स्मादिति किमिति कर्मप्रकरणे प्रासापि प्रकरणान्तरे कथ्यते तत्राह कर्मणेति प्रसिद्धमुभयोर्पायये कर्मत्यक्त्वा विद्यायामेवादरे तदधिकता
समधिगतेति फलितमाह तस्मादिति प्रकारान्तरेण ब्रह्मविद्यायाः स्तुतिं दर्शयति अपि चेति अनात्मज्ञा अपि त्यक्त्वात्मज्ञेवात्मरतिरेतत्वात्म
हतीयं विद्येत्यर्थः विधान्तरेण तस्याः स्तुतिमाह तदापि चैवमिति कथं ब्रह्मविद्याभार्यायै प्रीत्यर्थमेवोक्तेति गम्यते तत्राह प्रियमिति प्राप्यापि

तत्ते किं सिद्धा
तीत्याशङ्क्याह
वेदेति तस्मा
मुक्तिसाधनत्वं
दृष्टान्तेन स्फुटय
ति यथेति केन
प्रकारेण ब्रह्म
विद्या प्राप्ता ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं·
११४

कायाः स्तुत्यर्थत्वं प्रतिपादयन्नुत्तमनुवाकोत्तारूर्वकं तामवतारयन्नाकरोत्यवेत्यादिना ब्रह्मविद्यास्तमस्पर्थः पदार्थमुक्त्वा वाक्यार्थमाह
यदिति दध्यङ्ङिति त्वाद्रिरङ्गाकर्वणाकोत्तारूर्वकं प्रवर्ग्यप्रकरणस्थामाख्यायिकामनुकीर्तयति कथमित्यादिना अश्विभ्यामश्विभ्यामितिया
वत् केन प्रक्रमेणोवाचेत्यपेक्षायामाह तदेतदृषिरिति एनयोरश्विनोस्तन्मधु प्रीत्यास्पदमासीत् तद्दधीचाभ्यां प्रार्थितो ब्राह्मणस्तदुवाचे
त्यर्थः यदश्विभ्यां मधु प्रार्थितं तदनेन वक्ष्यमाणेन प्रकारेण प्रयुक्तवैवैनयोरश्विनोराचार्यत्वेन ब्राह्मणसमीपगमनेकृतवानित्याह त
देवेति आचार्यत्वानन्तरं ब्राह्मणस्य वचनत्वं दर्शयति सहोवाचेति एतत्कृत्वा मधु नमव विषयः यद्यथा यत्कृत्यं तत्कृत्यं स्तदीयं वांशुवाशुप
नेष्यं शिष्यत्वेन स्वीकरिष्यामीति यावत् तौ देवभिषजावश्विनौ शिरश्छेदनिमित्तेन मरणं पंचमर्त्यः तावाचावाशुपनेष्यसे शिष्यत्वेन स्वीकरिष्य
सि यदेति यावत् अथ यत्र तद्दृशीत्यर्थं ब्राह्मणस्यानुज्ञानानन्तर्यमथे तत्के मधुप्रवचनानंतर्यं तत्तोयस्याथ शाह्यस्यार्थः यदश्वस्य शिरो ब्राह्म
णेति बहूनेतस्य छेदनानन्तर्यं तदपि यस्यार्थ शाह्यार्थः घस्त्वमिमसेब्वा तदिदं समस्तमपि मधुप्रवर्ग्यप्रकरणप्रदर्शितमेवेति कृतमनेनब्राह्म
णेनेत्याशंक्याह यावदिति प्रवर्ग्यप्रकरणेस्थिताख्यायिका किमर्थमत्रानीतेत्याशंक्य तस्या ब्रह्मविद्यायाः स्तुत्यर्थेयमाख्यायिकेत्य
ग्रोमस्मृपसंहरति तद्वेति ब्राह्मणभागगताख्यायिकां निगमयतीदमिति तद्दामित्यादिमंत्रमुत्याप्य व्याचष्टे तदेतदिति कथं लाभायापिक्रूर
कर्मानुष्ठानमनुमत्याह लोभेति तन्नुपतिविधेयशुद्धो नकारः कथमिवार्थव्याख्यायते तत्राह नकारस्त्विति वेदपदादुपरिष्टाद्यो नकारःश्रु
तः सत्वः स्यूपचारःशुपमार्थोपि संभवति न निषेधार्थोपवेत्यर्थः तच्चोदाहरणमाह यथेति अग्निर्न शुभ्रमश्विनेत्यत्र नकारो यथोपमा

११८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धीयत्वस्य यथा प्रकृतेपीत्यर्थः तदेवमस्य ध्ययतीत्यस्य मिवेति यद्वदिति उपमार्थीयेन कारे सति वाक्यस्य रूपमनूद्य तदर्थं कथयति तद्वां नरेत्या
दिना विद्यास्तु निहारानहंतावस्थितावचनस्तु यते किं तु क्रूरकर्मकारित्वेन निंद्यते तदा चाख्यायिका विद्यास्तुत्यर्थं तस्य शुक्रमिति शंकते ना
स्विति ग्राह्याख्यायिकाया विद्यास्तुत्यर्थत्वमविरुद्धमिति परिहरति नैष इति लेशमात्रमपि न हीयते इति यस्मात्तस्माद्विद्यास्तुत्यात्तद् तोः स्तु
तिरेवाववि वर्तितेनेति योजना यद्यपि क्रूरकर्मकारिणो रक्षितो न दृष्टा निःस्यादृष्टानिः स्यादेवमाशंकाकैमुतिकन्यायेनाह नचेति क
थं पुनर्निंदायां दृश्यमानायां स्तुतिरित्यनेनाह निंदामिति तदिति निंदा निंद्यं निंदितमपि तद्विधेयं स्तोतुमिति त्यागादित्यर्थः यद्यपि निंदा नति
द्यं निंदितमेव तथा स्तुतिरपि स्तुत्यं स्तोतव्यमेव न भवति किं तु निंदितमपि तथा वचनानयोर्व्यवस्थितत्वमित्याह तथेति तद्वामित्यादिमंत्रस्य
पूर्वोत्तरव्याख्याव्याख्यायिकायाः स्तुत्यर्थत्वविरोधं चोद्यमानराई व्याचष्टे दध्यङ्ङ्हेति यत्कल्पेनानाभ्येमधु तदाथर्वणो वाभ्याम श्वस्य
शिरसा प्रोवाच यच्चामीमधु उवाभ्यामुक्तवांस्तदहमाविष्कृणोमीति संबंधः समानार्थत्वे किमिति पुनरुच्यते तत्राह मंत्रांतरेति तत्रार्थस
ब्राह्मणस्य तात्पर्यमाह तथेति विशेषणकृत्यं दर्शयन्व्याकरोति दध्यङ्ङ्हेति प्रथममस्थामित्यादिपदार्थवचनमश्वस्येत्यादौ तिरेत्यस्य
कर्मोक्तिरश्वोपि रस्त्येतेत्वन्वयार्थं शुक्रमिति विभागः येनाप्येवंकारिणामीदृशी प्रवृत्तिरश्वक्ते इति शंकित्वा समाधत्ते स किमर्थमिति कृतार्थ
स्थित्यर्थं स्थितिस्मर्थं कथयति जीविताद्यपीति यत्तस्य शिरो छिद्यते देवा अश्विनावश्ववन्नभिषजो स्यारत्तं यत्तस्य शिरः प्रतिधत्तमित्यादि कृत्वे
तरमाश्विन्याह यत्तस्येत्यादि प्रवर्ग्यकर्मण्येवं प्रवृत्तेपि प्रकृते विज्ञाने किमायातं तत्राह तथेति उक्तमेवं स्मरयतीति यत्तस्येति यद्यप्यात्मदर्शने

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रानं·
११५

तस्माद्दङ्मधुपश्चेतन्मधुतस्या वोचदितिसंबंधः अध्यायद्वयप्रकाशितेस्तृतीयचतुर्थाभ्यामध्यायाभ्यांप्रकटितमितियावत् उक्तमंत्राभ्यांवद्ब्रा॰
ह्मणमंत्रयोरपुनरुक्तत्वार्थवत्त्वंवक्तुंद्वेमंत्रेकीमेयमृक्काविति आख्यायिकाविशेषणप्राप्तमेकोचंपरिहरति द्वयोरिति उत्तरमंत्रद्वयप्रवृत्तिंप्रति
जानीते ब्रह्मेति संप्रत्यवांतरसंगतिमाह यक्तेत्वेति हिरण्यगर्भकर्तृकंशरीरनिर्माणमत्रोच्यतेकिंतत्प्रकरणवशादीश्वरकर्तृकमित्याह
यतइति शरीरसृष्ट्यपेक्षयालोकसृष्टिप्राथम्यंपुरस्ताद्देहसृष्ट्यनंतरंप्रवेशात्पूर्वमितियावत् सइतिसर्वेषुशरीरेषुवर्तमानः पुरिशेतइतिपुरु
षःपुरिशयः समूहबोभवतीत्यस्याप्रकारांतरेणपुरुषत्वंव्युत्पादयति नेत्यादिना वाक्यद्वयस्यैकार्थत्वमाशंक्य सर्वंजगदात्मतत्त्वेनात्म
त्वामितस्यार्थविशेषमाशंक्याह बाह्यभूतेनेति दर्शितेसत्यात्मनोदिव्योह्यमूर्तः पुरुषइत्यादिश्रुतिमाश्रित्यफलितमाहैवमिति मंत्रब्राह्म
णयोरर्थैकमत्यमाशंक्याह पुरइति प्राचीनमेवब्राह्मणमनूद्यमंत्रांतरमवतारयति रूपमिति प्रतिशब्दस्तंत्रेणोच्चरितः रूपंरूपंप्रत्युपाधिभे
दंप्रति प्रतिरूपोरूपांतरंप्रतिबिंबंबभूवेत्येतत्प्रतिरूपोबभूवेत्यत्रविवक्षितमितियोजना अस्यरूपोवेत्युक्तंविवृणोति यादृगित्यादिना उक्तम
र्थमनुभवारूढंकरोति तदीति रूपांतरमवनेकत्वेनतरंवारयति सएवहीति प्रतिख्यापनायशास्त्राचार्यादिभेदेनतत्प्रकाशनायेत्यर्थः ने
देवव्यतिरेकेणात्मरूपेणचस्फुरयति यदिदीत्यादिनामायाभिःप्रज्ञाभिरितिपरपक्षश्चेत्कार्यपक्षमाह मायाभिरिति मिथ्याधीहेतुभूताना
मनिर्वाच्यादंशयमानानानवशात्देववद्बहुरूपोभातिप्रकारभेदात्बहूनिकितिविवाक्यार्थमाहैकरूपएवेति अविद्याप्रज्ञाभिर्बहुरूपोगम्य॰
तरतिहर्वेणसंबंधः परस्यबहुरूपत्वेनिमित्तप्रश्नपूर्वकंनिवेदयति कस्मादित्यादिना यथारथेयुक्तावाजिनोरथिनःस्वगोचरंदेशंप्राप

११५

यितेप्रवर्तितेनयास्यप्रतीचोरथस्यानीयेशरीरेयुक्ताहरयः स्वविषयप्रकाशनायपस्मात्प्रयतंतेतस्मादिंद्रियाणांतद्विषयाणांचबहुल
त्वात्तद्रूपैरेवबहुरूपोभातीतियोजना हरिशब्दसंदिंद्रियेषुप्रवृत्तौनिमित्तमाह हरणादिति प्रतीचोविषयान्प्रतीतिशेषः इंद्रियबाहुल्येहेतुमा
ह प्राणीति इंद्रियविषयबाहुल्यात्प्रत्यगात्मावहुरूपइतिशेषः नन्वात्मानंप्रकाशयितुमिंद्रियाणिप्रवृत्तानिनतुरूपादिकमेवतत्कथंवि २२
षयत्वप्रकाशनात्मनोनप्राप्नोतीत्याशंक्याह तत्प्रकाशनायेति तस्मादिंद्रियविषयबाहुल्यादित्यध्याहृत्योपसंहरति तस्मादिति यद्वायथोक्त
क्रतिवशेनलब्धमर्थमाह तस्मादिति यस्मादिंद्रियाणिपराग्विषयेप्रवृत्तानितस्मान्निरिंद्रियैर्विषयरूपैरेवायंप्रत्यगात्मागम्यतेनतुस्वा
साधारणेनरूपेणेत्यर्थः युक्ताहीतिसंबंधोक्तिमाक्षिप्यशंकते एवंतर्हीति अयमित्यादिवाक्येनपरिहरत्येवमिति तत्रेंद्रियादिरूपे
णात्मनएवाविद्ययाभानात्संबंधस्यचकल्पितत्वाच्चाद्वैतहानिरित्यर्थः इंद्रियानंत्येहेतुमाह प्राणिभेदस्येति वाक्यार्थमाख्यानार्थमित्थं
गतेनसंदर्भेणभूमिकामारचय्यतत्परंवाक्यमवतार्यव्याकरोति किंबहुनेत्यादिना नकेवलमध्यायद्वयस्यैवार्थोऽत्रसंक्षिप्योपसंहृतः किंत
सर्ववेदांतानामित्याहैषइति तस्योभयविधफलार्थरूपत्वमाहैतदिति वक्तव्यांतरपरिशेषशंकांपरिहरति परिसमाप्तेति ॥ ब्रह्मविद्या
संप्रदायविस्मरणभ्रांतिप्रतिपाद्यवंशब्राह्मणतात्पर्यमाहाथेति महाजनपरिगृहीताहिब्रह्मविद्यातेनसामहाभाग्याधेयेतिस्तुतिः ब्राह्मणस्या
र्थांतरमाह मंत्रश्चेति स्वाध्यायःस्वाधीनोच्चारणात्मकत्वेसत्यध्यापनेजपस्तुप्रत्यहमावृत्तिरितिभेदः यथोक्तरीत्याब्राह्मणारंभेस्थितेवं
शाणाद्यर्थमाह तवेति तदेवस्फुटयति यथेति शिष्यावसानोपलक्षणभूतात्पौतिमाष्यादारभ्यनदादिर्वंशाख्यब्रह्मफलपर्यंतोवंशः प

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भाने॰
११६

वंशः पूर्वेणो मिथुन इति संबंधः वंशशब्देन निष्पन्नमर्थमाहाम्नायवंश इत्यस्येति अथात्र शिष्याचार्यवाचकशब्दाभावे कुतो वंशस्थितिस्तत्रा-
ह तन्वेति परमेष्ठी ब्रह्मणः शिष्य इत्येकार्थत्वमाशंक्याह परमेष्ठीति कुतस्तर्हि ब्रह्मणो विद्याप्राप्तिस्तत्राह तत इति स्वयंप्रतिभातवेदो हिरण्यग-
र्भो नाचार्यांतरमपेक्षते ईश्वरानुगृहीतस्य तस्य बुद्धावाविर्भूताद्वेदादेव विद्यालाभसंभवादित्यर्थः कुतस्तर्हि वेदो जायते तत्राह ब्रह्मेति
परस्यैव ब्रह्मणो वेदरूपेणावस्थानात्तस्य नित्यत्वान्न हेत्वपेक्षेत्यर्थः आचार्यवंशे चक्रुतमंगलार्थं याः प्रचारिणो भवंतीति द्योतयितुमंते ब्र-
ह्मणे नमस्करोति तथा चाहैव तस्मा इति ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानंदपादशिष्यभगवदानंदज्ञान-
कृतायां बृहदारण्यकभाष्यटीकायां चतुर्थोऽध्यायः ॥ ४ ॥ मधुकांडेनेत्यादिकं तस्येति मधुब्राह्मणं व्याख्यातं संप्रति कांडांतरारंभं प्रतिजा-
नीते जनक इति नन्वपूर्वस्मिन्नध्याये व्याख्यातमेव तत्त्वं पुनरत्रापि वक्ष्यते तथा च पुनरुक्तेरलं मुनिकांडेनेति तत्राहोपपत्तीति तत्त्वं पु-
उपपत्तिप्रधानत्वं मधुकांडस्यापीति चेन्नेत्याह मधुकांडं हीति नन्वप्रमाणादागमादेव तत्त्वज्ञानं पुनस्तस्य किमुपपत्त्या तत्प्रधानेन कांडेन चे-
त्तत्राहागमेति करणत्वेनागमस्य तत्त्वज्ञानहेतुत्वे उपपत्तिरुपकरणतया पदार्थपरिशोधनद्वारा तद्धेतुरित्युपगमकमाह श्रोतव्य इति कर-
णोपकरणयोरागमोपपत्त्योस्तत्त्वज्ञानहेतुत्वे सिद्धे फलितमुपसंहरति तस्मादिति यद्योक्तरीत्या कांडारंभे पि किमित्याख्यायिका प्रणी-
यते तत्राख्यायिका त्विति विज्ञानवतो सहजानश्रुत्यमुख्यना दृश्यते तथा च विज्ञाने महाभाग्येयमिति स्तुतिरत्र विवक्षितेत्यर्थः विद्याग्रह-
णोदानाख्योपायप्रकारज्ञापनपराख्यायिकेत्यर्थांतरमाहोपायेति कथं पुनर्दानस्य विद्याग्रहणोपायत्वं तत्राह प्रसिद्धो हीति गुरुशु-

११६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शुश्रूषया विद्या शुल्केन धनेन चेत्यादौ दानाख्यो विद्याग्रहणोपायो यस्मात्त्वमिदं तस्मात्तस्य तदुपायत्वेनास्ति वक्तव्यत्वमित्यर्थः दानेन सर्वं।
प्रतिष्ठितमित्यादिश्रुतिषु विद्वद्भिरेव विद्याग्रहणोपायो दृष्टस्तस्मात्तस्योपायत्वे विवरितव्यमित्याह विद्वद्भिरिति उपपन्नं च दानस्य वि
द्याग्रहणोपायत्वमित्याह दानेनेति भवतु दानेन विद्याग्रहणोपायस्तथापीयमाख्यायिका कथं तत्प्रदर्शनपरेत्याशंक्याह प्रभूतमिति
ननु समुदितेषु ब्राह्मणेषु ब्रह्मिष्ठत्वमनिर्द्धारयितुं राजा प्रवृत्तः ततः कथमन्यपरेण ग्रंथेन विद्याग्रहणोपायविधानायाख्यायिकारभ्यते ता
त्राह तस्मादिति उपलंभोपयोगकृत्यत्वं हि वाक्यार्थः इयमाख्यायिका विद्याप्राप्त्युपायप्रदर्शनपरेत्यादावपि चेति तस्मिन्नेव देशे विद्या येषां ते तद्वि
द्यास्तैः सह संबंधस्तैरेव प्रश्नप्रतिवचनद्वारा वादकरणे च विद्याप्राप्त्युपाय इत्यत्र गमकमाह न्यायविद्यायामिति तत्त्वनिर्णयफलो हि।
वीतरागकथामिश्रेति तद्विद्यसंयोगादेर्विद्याप्राप्त्युपायत्वेऽपि कथं प्रकृते तत्प्रदर्शनपरत्वमतस्त्वाह तद्वेति तद्विद्यसंयोगादीतियावत् तन्न के
वलं तर्कशास्त्रवशादेव तद्विद्यसंयोगे प्रवृत्ता वृद्धिः किं तर्हि श्रुतिवशादपीत्याह प्रत्यक्षाचेति आख्यायिकातात्पर्यमुपसंहरति तस्मादिति
राजसूयाभिषिक्तः सार्वभौमो राजा सम्राडित्युच्यते बहुदक्षिणेन यज्ञेनायजदिति संबंधः अश्वमेधे दक्षिणाबाहुल्यमश्वमेधप्रकरणे स्थि।
ते ब्राह्मणा अभिसमेता बभूवुरिति संबंधः कुरुपंचालानामिति कुतो विशेषणं तत्राह तेषु हीति तत्र यज्ञशालायामिति यावत् विजिज्ञासा
मेवाकांक्षापूर्वकं व्युत्पादयति कथमित्यादिना अनूचानत्वमनुवचनसमर्थत्वमेषां मध्येऽतिशयेनानूचानोऽनूचानतमः स कस्मादिति योजना
एकस्य पलस्य चत्वारो भागास्तेषामेको भागः पाद इत्युच्यते प्रत्येकं शृंगयोर्दश दश पादाः संबद्धा आसन्निति शेषः कान्निगाकतें विभजते पंचेति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

याज्ञ.
११७

एकैकस्मिंश्छृंगे ग्रावद्वावभृत्विति एवं तत्र संबंधः ब्राह्मणा वेदाध्ययनसंपन्नास्तदर्थं निष्ठा इति यावत् उत्कालयतरूपमथतयतो याज्ञव।
ल्क्याद्यजुर्वेदविदः सकाशाद्दृश्यचारि सामविधिस्यणोति ऋत्वचाद्यात् दृष्टे सामगीयते त्रिष्टुब्वचवेदेष्वंतर्भूतोऽथर्ववेदस्तस्मादर्थाद्यजुर्वेदि
नो मुनेः शिष्यस्य सामवेदाध्ययनानुपपत्तेर्वेदचतुष्टयविशिष्टो मुनिरित्यभ्यस्तादिति निमित्तनिवेदनं एवंकं ब्राह्मणानां सभ्यानां क्रोधप्रा
प्तिं दर्शयति याज्ञवल्क्येनेति क्रोधानंतरं मयशाट्यार्थं कथयति कुह्वेष्विति प्रश्नलप्रश्नस्य प्राप्यमेदेशूनजेति याज्ञवल्क्यमित्यनुवादो
न्वयप्रदर्शनार्थः प्रश्नमेव प्रश्नमेवं विशदयति कथमित्यादिना यनैाह्नत्वं ब्रह्मविदो लिंगमिति सूचयति किमिति नर्हिस्वशहान्मति
गावो ब्रह्मिष्ठ एव णभूतानीनानास्तन्नाहेदानीमिति ननस्यतादृशी प्रतिज्ञा प्रतिभातीत्याशंक्याह नमएवेति नत्रप्रश्नमेमुनेराभिमुख्यमाया
दयितुं संबोधयति याज्ञवल्क्येतीति अकरीत्याप्रश्नप्रश्नेप्रस्तुतेतस्योऽष्टीयाधिकारेण संगतिमाह नवेति मधुकांडे सर्ववेदव्याख्यातेयड
ष्टीयप्रकरणे तस्मिन्नामं गापाप्मनोऽश्यमोरत्ययः समुच्चितेन कर्मणा संदेपनोव्याख्यातेति संबंधः तस्यैवोऽष्टीयदर्शनस्येति यावत् परी
त्वाविषयोविचारभूमिरयं प्रश्नप्रतिवचनरूपोग्रंथ इत्यर्थः तत्कृहः समनंतरनिर्दिष्टग्रंथविषयः दर्शनमुद्गीथोपासनेतस्यविशेषोवा
गादेरध्यात्मत्वविज्ञानेनतत्सिद्धयर्थोयं ग्रंथक्रमः एवमवांतरसंगतमुक्त्वा प्रश्नात्तराणि व्याचष्टे यदिदमिति श्रुत्वनामसमित्यनेन मृत्युना।
भिपन्नमित्यस्यगतार्थत्वमाशंक्याह नकेवलमिति कर्मणोऽश्वत्वान्नेनमृत्योरत्ययायोगात् न दत्वयसाधनेदर्शनमेवकिंचिद्वाच्यमित्या।
शयेनपृच्छति केनेति दर्शनविषयं प्रश्नमाक्षिपति नन्विति येनमुख्यप्राणात्मदर्शनेनातिमुच्यतेतदुद्गीथप्रक्रियायामेवोक्तं तथाच श्रु।

११७

त्योरन्योपायस्य विज्ञानस्य निर्देशात्तत्त्वालोकेनेति प्रश्नानुपपत्तिरिति योजना तस्यैव परीक्षाविषयोयमित्याशङ्क्य क्रमाद्यपरिहरति वाद इति
ति उद्गीथप्रकरणे वागादेरग्न्याद्यात्मत्वदर्शनरूपो यो विशेषो वक्तव्योऽपि नोक्तस्तदुक्तपर्यायं प्रश्नप्रतिवचनरूपो ग्रन्थ इति कृत्वा लोकेनेत्या
दिप्रश्नोपपत्तिरित्यर्थः कीदृक्तद्दर्शनेनेत्युत्तरसाधनं होत्रेत्याद्युक्तमित्याशंक्याह तस्येति व्याचष्टे वागेवेत्यस्येत्यादिनेति शेषः व्या
ख्यानमेव विशदयितुं पृच्छति कः पुनरिति दर्शनविषयं दर्शयन्नुत्तरमाहोच्यत इति यज्ञस्याहस्य यजमानेन दृष्टप्रयोगो नास्तीत्याशंक्या
ह यज्ञ इति यजमानस्य या वागग्न्यात्मैव साधियत्रे होतास्तु तथापि कथं तयोर्देवतात्मना दर्शनमित्याह कथमिति तयोरग्न्यात्मना द
र्शनप्रकारं वाक्यावष्टंभेन व्याचष्टे तत्त्वेति कथं पुनर्वागग्न्योरेकत्वमित्याह तदेतदिति तयोरेकत्वेऽपि कृतो रक्षत्वदैक्यमित्याशंक्याह स
चेति समुक्तिरित्येतदवतारयितुं भूमिकां करोति यदेतदिति न केवलमेतदुभयं स्वरूपेणासंस्पृष्टमेव किं तर्ह्येनवशीकृतं चेत्याह स्वाभा
विकेनेति मृत्युना सम्मृत्युनाभिपन्नमित्यनयोरर्थमनूद्य होत्रेत्यादेरर्थं मनुवदति तद्येनेति साधनद्वयं तद्धृत्यर्थः यजमानग्रहणं
होतृरूपत्वग्रहणं उक्तेर्थे समनन्तरवाक्यमवतार्य वाक्यमवतार्य व्याकरोति तदेतदादेति मुक्तिशब्दस्तत्साधनविषयः पदार्थमुक्त्वा
वाक्यार्थमाहाग्निस्वरूपेति वाचो होतुश्चाग्निस्वरूपेण दर्शनमेव मुक्तिहेतुरिति यावत् उक्तमर्थं प्रपंचयति यदैवेति समुक्तिरित्यस्यार्थं
मुपसंहरति तस्मादिति वाक्यान्तरमुत्थाप्य व्याचष्टे सातिमुक्तिरिति मुक्त्यतिमुक्त्योरसंकीर्णत्वं दर्शयति साधनद्वयस्येति प्राप्तिरतिमु
क्तिरिति संबंधः तामेव स्पष्टयति यत्फलभूतेति फलभूता याऽमत्स्यादिदेवतात्मभाव सा कथमतिमुक्तिशब्दोपपत्तिरित्याशंक्याह तस्मादिति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु वागादीनामग्न्यभावो न श्रूयते यजमानस्य तन्न किं विरुध्यते तत्राह यजमानस्येति तर्हि तेनैव गतार्थत्वादनर्थकमिदं ब्राह्मणमि
त्याशंक्य बाढमित्यादिनोक्तं स्मारयति नन्वेति दर्शनवत्फलेऽपि विशेषः स्यादित्याशंक्याह कृत्स्नामाप्नोतीति प्रश्नोत्तरमवतार्य तात्पर्य
माह याज्ञवल्क्येतीति अग्न्याधानादिकानि तानीत्याशंक्याह दर्शपूर्णमासादीति प्रतिलक्षणमन्यथात्वं विपरिणामः अग्न्यादिसा
धनान्याश्रित्य कामं कर्म संश्रूयते नतु स्वरूपेणोत्पद्यते तेषां साधनानां विपरिणामहेतुत्वात्कालो मृत्युस्ततो विमुक्तिर्वेत्कर्मणेति ग्रंथार्थः।
भइत्यर्थः कर्मणो मुक्तिश्चेत्कालादपि मोक्षे वत्तस्य कर्मान्तर्भावेन मृत्युत्वादित्याशंक्याह एषामिति कर्मनिरपेक्षतया कालस्य
मृत्युत्वं सूत्रयति क्रियेति कालस्य पृथङ्मृत्युत्वे सिद्धे फलितमाह तस्मादिति उत्तरग्रंथस्य पूर्वग्रंथयोर्विषयभेदं कालेभिनत्ति सचेति
आदित्यसंबंधेनेति कर्तृभेदाद्धि विधान्वयं कालस्य द्वैरूप्यमत्यायकं ऽकाविषयमाह तत्रेति अहोरात्रयोर्मृत्युत्वे सिद्धे ताभ्यामतिमुक्ति
र्वक्तव्या तदेव कथमित्याशंक्याहोरात्राभ्यामिति यज्ञसाधनं च तयाकालाभ्यां जायते वर्द्धते नश्यति चेति संबंधः प्रतिवचनव्याख्यानेयत्ता।
शब्दार्थमाह यजमानस्येति सम्मुक्तिरित्यस्य तात्पर्यार्थमाह यजमानस्येत्यादिना तस्यैवाहरार्थं कथयति सोध्वर्युरिति अथोक्तरीत्या
दित्यात्मत्वेऽपि कथमहोरात्रलक्षणान्मृत्योरतिमुक्तिरत आह आदित्येति नेत्रे तानान्त्वमेनेत्यादिश्रुतेरादित्येव स्तुतो नाहोरात्रलक्षणाचतरा
त्मनि विद्युच्यापि न तेसंभवतीत्यर्थः कं इदिकान्तरस्य तात्पर्यमाहेदानीमिति नत्वहोरात्रादिलक्षणे काले तिथ्यादिलक्षणस्य कालस्यान्ता।
भावान्नेति पक्षापक्षा यातिथ्यादिलक्षणार्थपि कालात्प्रसाक्ष्म्ये वेति कुतः पृथगारंभो ते तत्राहाहोरात्रयोरिति अविशिष्टयोर्हि दि

तेदत्यप्तुदंरात्रा
का[illegible]:वुमीति
परवा[illegible]गाय
[illegible] दिवसनंचनास्मि ज्ञानिरूप्याति रात्रिमित्येकवद्भाव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यश्चान्ययोरिति यावत् कथं तर्हि तिष्ठ्यादिलक्षणानेकालादृतिशुक्तिरतत्याहानलक्षणपत्येति चेदप्राप्तानित्याद्यन्ययोमाङ्गोदिनश्च
त्वोच्यते का एवश्रुत्यानवाप्नुभावापन्नानन्दत्वयज्ञश्रुत्याव श्रुत्योर्विरोधकः समाधिरित्याशंक्याह तवेति का एवश्रुतावितियावत्
उद्गातारपि प्राणात्मकवायुरूपत्वश्रुतिद्वयानुसारेणादर्शयति सपवेति नकेवलमुद्गातः प्राणत्वप्रतिज्ञामात्रेण प्रतिपन्नं किंत्वविद्या
यनिर्द्धारितं चेत्याह वाचेति प्राणं चेदममेसोऽश्वेकत्वमसाङ्गाधिकारेनिर्द्धारितमित्याह वाचेति उद्गाथारीत्या प्राणादीनामेकत्वे श्रुत्योरवि
रोधं फलितमाह प्राणेति मनोब्रह्मणोऽश्वं इमसा प्राणोद्गातोऽश्ववायुनोपासत्वेनोपसंग्रहे श्रुतयोर्विशेषो नास्तीति श्रुत्योर्विक
ल्पेनोपपत्तिरित्यर्थः उपसंहरति प्राणमुद्गातारं च तद्रूपेणोपासतया संगृह्णाति का एवश्रुतिरित्यर्थः इतश्च का एवश्रुतिरुपपन्नेत्या
हापिचेति वायुः सूत्रात्मा तन्निमित्तो ऽस्यावयवस्य चेदमसोऽहृदिस्थासौ सूत्राधीना हि चेष्टादेर्जगतस्थितिरित्यर्थः इत्यादिदेवत्वे फलित
माह तेनेति कर्तैश्वर्यमस्येत्यर्थः वायोश्चेदमसिकारयित्वेऽपि प्रकृते किमायातं तदाह तत्र इति उदितानुदितहोमवद्विकल्पोपपत्या
विरोधमुपसंहरति तेनेति अन्यन्तरं मात्रोदिनश्रुतिः साधनद्वयस्येत्यभयवसंबद्धा तेन तत्रादौ मनसो ब्रह्मणोऽश्वेत्यर्थः उत्तरत्र प्राणस्यो
द्गातृत्वेत्यर्थः तत्कृत्स्नं इह विषयः यदिदमंतरिक्षमित्यादिप्रश्नान्तरं च तानुवादपूर्वकमुपादत्ते मनोसीति व्याख्यानव्याख्येयभावेन कि
वापदेनेतस्येत्यनन्तरं इह पञ्चमते समनंतरवाक्येनेति यावत् तस्याचष्टे यदिदमिति केनेति प्रश्नस्य विषयमाह यत्विति प्रश्नविषयप्र
पंचयत्यन्यथेति आलंबनमंतरेणेति यावत् प्रश्नार्थं संक्षिप्योपसंहरति केनेति प्रत्युत्तरन्यासोदाहरणमर्थं उद्दिष्टमिति यावत् मनोवै

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं०
११५

यज्ञस्येत्यादेरर्थमाह तत्रेति व्यवहारभूमिः सप्तम्यर्थः वाक्यार्थमाह तेनेति तृतीयातृतीयाभ्यां संबध्यते दर्शनफलमाह तेनेति वागा
दीनामग्न्यादिभावेन दर्शनमुक्तं त्वगादीनां त्ववाय्वादिभावेन दर्शनेन वक्तव्यं तत्कथं वक्तव्यशेषे सत्युपसंहारोपपत्तिरित्याशंक्याह सर्वा
णीति वागादावुक्तन्यायस्य त्वगादावतिदेशोऽत्र विवक्षित इत्याहैवंप्रकारा इति अथशब्दो दर्शनप्रभेदकथनानन्तर्यार्थः केयं संपन्नामे
त्युक्ते संपन्नामेति उत्तरमाह केनचिदिति महतो फलवतोऽश्वमेधादिकर्मणोऽकर्मत्वादिना सामान्येनाल्पीयः स्वकर्मत्वं विवक्षित
फलसिद्ध्यर्थं संपत्तिः संपद्युच्यते यथाऽग्न्यग्निहोत्रादिनिर्वर्तनेनाश्वमेधादिमयानिर्वर्त्यते इति ध्यानं संपदित्यर्थः यदाफलस्यैव देवलो
कादेरुज्ज्वलत्वादिसामान्येनाल्पाद्युक्तमिति संपादनं संपदित्याह फलस्येति संपदनुष्ठानावसरमादर्शयति सर्वोत्साहेनेति अश्वमेधा
नुष्ठानस्य यदेति शेषः कर्मिणामेव संपदनुष्ठानेऽधिकार इति दर्शयितुं अश्वमेधादित्याग्निः संनिकृष्टमग्निहोत्रादीनामिति निर्धारणे षष्ठी य
थासंभवं वर्णाश्रमानुरूपमिति यावत् आदायेत्यस्य व्याख्यानमालंबनीकृत्येति न केवलं कर्मित्वमेव संपदनुष्ठानेऽपेक्ष्यते किंतु त
त्फलविद्यावत्त्वमपीत्याह कर्मेति तदेवकर्मफलं चेत्यर्थः कर्माण्येव फलवंति न संपदस्तत्कथं तासां कर्तव्यत्वमाशंक्याहान्यथेति वि
हिताश्वमेधस्यार्थे तानानुष्ठानादिपरंपरया फलवत्त्वमिष्टं न चाश्वमेधादिषु सर्वेषामनुष्ठानसंभवः कर्मस्वधिकृतानामपि त्रैवर्णिकानां
केषांचिदनुष्ठानासंभवात् तस्तेषां तदध्ययनार्थत्वं तदुपपत्त्या संपदामपि फलवत्त्वमेष्टव्यमित्यर्थः महतोऽश्वमेधादिफलस्य कथमल्पी
यस्यां संपदः प्राप्तिरित्याशंक्याशास्त्रप्रामाण्यादित्यभिप्रेत्याह यदीति तदाऽतत्वाऽः साध्यायाद्यपवेति एवं प्रबंधः अध्ययनस्य फलवत्त्वे।

११५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कर्मत्वेफलित्वमाह तस्मादिति तेषां राजसूयादीनामितियावत् ब्राह्मणादीनां राजसूयाद्यध्ययनसामर्थ्यात्तेषां संपादितत्फलप्राप्ता
वपि किं सिध्यतीत्यत आह तस्मात्संपरायमिति कर्मणामिवेतिदृष्टान्तार्थोपि शब्दः तासां फलवत्वे फलित्वमाहात्त इति संपदामारंभमुपपाद्य
प्रश्नवाक्यमुत्थापयति यानवल्क्येतीति प्रतीकमादाय व्याचष्टे कतिभिरयमित्यादिना कतिभिः कतमा इति प्रश्नयोर्विषयभेदं दर्शयि।
यति संख्येयेति स्तोत्रीयानामान्यापिका विद्रकजातिरस्तीत्याशंक्याह सर्वोस्त्विति अन्यावेति शब्दजातिग्रहः विधेयभेदात्सर्वशब्दः उ
तत्क्रियत्वस्य संपत्तिकरणादित्यर्थः संख्यासामान्याद्भिन्नविशेषादितियावत् प्राणभृज्जाते लोकत्रयं विविदिते प्रथमः संख्याविषयो
द्वितीयस्तु संख्येयविषयः प्रश्न इतिविभागं लक्षयति श्रवेवदिति तेन सामान्येनोज्वलत्वेनेतियावत् उक्तमर्थं संक्षिप्याह देवलोकाख्यमि।
ति कथं मासाद्याहुतीनां पितृलोकेन सदृशयोगात्तु सामान्यमत आह पितृलोकेति ऊर्ध्वगमनमपेक्ष्येति अस्तिहि सोमाद्याहुतीनामध
स्ताद्गमनमस्तिच मनुष्यलोकस्यापापचुरस्यतादृग्गमनेन तदपेक्ष्येत्यर्थः अतः सामान्यादितियावत् दक्षिणत आह वनीयस्येति शेषः
प्राक्तनिके बहुवचनमित्यत्र प्रकरणस्यैकयादीति तत्पक्षयाप्रश्नस्तेनेत्यह दितिधायबहूकेणैस्यतरमाराध्येति मनसो देवतात्वसाध
यति मनसेति वर्तनीवर्त्मनी तयोर्वाध्वनसयोर्वेत्मनो रन्यतरां वाचमनसामौ तेन ब्रह्मा संस्करोतिवाग्विसर्गोपाय स्थित विधानादिश्रुत्य

ति

तरस्यार्थः तथापि कथं संपदः सिद्धिरत आह तचेति देवाः सर्वे यस्मिन्मनस्येकं भवंति अभिन्नत्वं प्रतिपद्यंते तस्मिन्विश्वेदेवरूपाभवतमेवे
तलोकप्राप्तिरिति श्रुत्यन्तरस्यार्थः अनंतमेवेत्यादि व्याचष्टे तेनेति उक्तेन प्रकारेणेतियावत् तेनमनसि विश्वेदेवदृष्ट्याध्यासेनेत्यर्थः सह।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यपाशकोक्तिः सर्वं वदित्यभिमुखीकरणायेत्यर्थः प्रतिवचनमुपादत्ते सोतिस्रावेति प्रगीतमृग्जातं स्तोत्रमप्रगीतं शस्त्रं कतमास्ता
स्तिस्र इत्यादेस्तात्पर्यमाह लोकेति प्रश्नांतरेहन्नमन्त्र्यमुपादत्ते तावेति यत्ताधिकारः सप्तम्यर्थः पुरोनुवाक्यादिना लोकत्रयजयलक्ष
णफले केन सामान्येनेत्यपेक्षायां संख्याविशेषेणेत्युक्तं स्मारयति यदितीति अधियज्ञे त्रयमुक्तं स्मारयित्वाध्यात्मं विशेषं दर्शयितुमुत्तरो
ग्रंथ इत्याहोच्यत इति प्राणादौ पुरोनुवाक्यादौ च पृथिव्यादिलोकदृष्टिरितिप्रश्नपूर्वकमाह कतमा इति अपानेयाज्या हृष्टो हेत्वंतर
माह अपानेनहीति हस्तादादानव्यापारेणेति यावत् प्राणापानव्यापारव्यतिरेकेण शस्त्रप्रयोगस्याकृतत्वं तरेसिद्धत्वाद्व्यानेन शस्याह
ह्यैतिस्याह प्राणत्विति तत्र पुरोनुवाक्यादिष्वेतियावत् इहेत्यनेनतरवाक्योक्तिः सर्वमन्यदितिसंख्यासामान्योक्तिः किंतद्विशेषसं
बंधसामान्यं तदाह लोकेति पृथिवीलक्षणेन लोकेन सह प्रथमत्वेन संबंधसामान्यं पुरोनुवाक्यायामस्तीत्यनेनतया पृथिवीलोकमेव
प्राप्नोतीत्यर्थः अश्वलस्य तूष्णीभावं भजतोभिप्रायमाह नायमिति ॥ प्रथमं ब्राह्मणं १ ॥ ब्राह्मणांतरमवतारयन्नाख्यायि
काकिमर्थेतिशंकमाने प्रत्याहाख्यायिकेति याज्ञवल्क्याद्विद्याप्रकर्षवशादत्र जाभागी लक्ष्यते नार्तभागस्तथाविद्यासंघा
दतो विद्यास्तुत्यर्थमाख्यायिकेत्यर्थः इदानींब्राह्मणार्थं वक्तुं वृत्तं कीर्तयति मृत्योरिति मृत्युस्वरूपं पृच्छतीति कः पुनरसाविति तत्स्व
रूपनिरूपणार्थं ब्राह्मणमुत्थापयति सचेति मृत्युरितिसंबंधः स्वाभाविकं नैसर्गिकमनादिसिद्धं अज्ञानं तस्मादासंगस्तस्मात्स्पष्टमेवा
सारंगस्य सतत्वेतिविग्रहः तस्यविषयमुक्त्वाव्याप्तिमाहाध्यात्मेति तस्य स्वरूपमाह ग्रहेति यथोक्तमृत्युव्याप्तिमप्यादीनां कथयति ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्मादिति नान्यपि ग्रहातिग्रहशरीरान्येवार्थेंद्रियसंसर्गित्वादित्यर्थः नह्यत्र विशेषोऽग्न्यादिनान्नोहहिभेदइति यावत् कश्चिद्यात्मेन
इतिसंबंधः सत्रस्यापि शत्रुग्रस्तत्वमभिप्रेत्याह तच्चेति ग्रन्थ्यादिन्याद्यात्मकं मोक्षपरमिति यावत् फलयोर्योक्तमृत्युग्रस्तमिति शेषः
किमितिपृष्ट्वाबंधनस्वरूपस्वरूपमुच्यते तत्राहैः तस्मादिति नन्वेमोचेकन्मेत्ववंधहेपोपवर्गानमत्रपयुक्तमित्याशंक्याह बंधस्येति
ग्रन्थ्यादीनां यद्योक्तं शत्रुत्वमात्मत्युक्तौ व्याख्यीकरोति यस्पीति प्रविनिर्दिष्टरूपत्वातिमुक्तोपीति शेषः तथापि कथं सत्रस्य यद्योक्तं शत्रुत्वमा
त्मित्याह तथाचेति तथापि कथमग्न्यादीनां शत्रुत्वमात्मनेहितत्वमाणमस्तितत्राहैकइति बहवाइतिक्रोटसे तथापि विद्वेषोशत्रुत्वो
रत्विशक्तस्यनतद्वाप्तिरित्याशंक्याह तदात्मेति सैवेपदेशस्याप्तिप्रकारान्तरेणप्रकटयति नचेति मनसिकार्यकरणरूपेणतिष्ठत्वादि
वक्ष्यादित्यस्यैकत्वमस्तु तथापि कथंग्रहातिग्रहशरीरत्वं सत्रस्येत्याशंक्याह मनश्चेति वागादेर्वक्ष्यादेश्च ग्रहत्वेतिग्रह ग्रह त्वेचहिर
ण्यगर्भेकिमायातमित्याशंक्याह तच्चेति कर्मफलस्यसंसारत्वाच्चतत्फलेसौत्रंपदेशस्तुत्वग्रस्तमेवेत्याह सविचारेचेति यदेवकर्मबंध
प्रवृत्तिप्रयोजकं तदेवबंधनिवृत्तेर्न्नकारणमतः कर्मफले हैरण्यगर्भपदेबंधनमेवेत्यर्थः स्वमतमुक्त्वामतान्तरमाह केचिदिति सर्व
मेवकर्मेतिशेषः स्वर्गकामवाक्येरहाम्नत्वनिवृत्तिर्योरोहनवाक्ये स्वतंत्राधिकारनिवृत्तिर्नित्यनैमित्तिकविधिष्वर्थान्तरोपदेशेनस्वा
भाविकप्रवृत्तिनिरोधो निषेधेषुसाक्षादेवनैसर्गिकप्रवृत्तयो निरुध्यन्ते तदेवंसर्वमेवकर्मकारनिवृत्तिद्वारेणमोक्षपरमित्यर्थः नन्व
शनायाद्यात्मकमृत्युप्रेरितानन्तरं कार्यकरणसंघातमनिशाय वेतमानोऽयमात्मातिपद्यमानः सच्चानान्सेवस्यान्मृच्यतेतत्कुतोनिवृत्तिप

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रा॰वे॰
१२१

स्तेकर्मकांडस्येत्याशंक्याह नः कारणादिति यद्यपीश्वरार्पणतस्तस्याऽतिशयफलं प्राजापत्यपदं तदपि प्रासादारोहणक्रमेणाऽऽवृत्तिद्वारा
मोक्षमवतारयितुमेव न तु तत्रैव प्राजापत्यपदे क्षीणे तस्मात्ययं तस्यापि निरतिशयफलत्वाभावादित्यर्थः फलितमाह इत्यत इति यस्मात्सर्वे
पूर्वं परित्यज्योत्तरमुत्तरं प्रतिपद्यमानस्तत्तन्निवृत्तिद्वारा मुक्त्यर्थमेव तत्तत्प्रतिपद्यते ततस्तत्पदप्राप्त्यर्थमेव वाक्यं पर्यवसितं तस्मात्तव
त्वेनाफलत्वात्तस्माद्धेतुत्वपर्यंतं सर्वोऽपि फलविशेषो मृग्यस्तत्त्वात्प्रासादारोहणन्यायेन मोक्षार्थो वर्तिष्यते हिरण्यगर्भपदप्राप्त्या
द्वैततद्धेतवस्तु तो शून्यो रात्रिमतीत्य परमात्मस्वरूपेण स्थिता शक्तो भवति तथा च मनुष्यभावाद्ब्रह्म सर्वोऽपि परमात्मभावात्मध्येयावतस्य
इत्याधिः सात्विकत्वादेति कीर्तितीगौणीशक्तिरेतद्द्वयोः सर्वोऽपि वैत्यर्थः सर्वमेतदुक्तेत्यामात्रेणारचितं ततद्वंद्वारणकस्य फलं तस्य वा
धेइतिद्वयति सर्वमेतदिति सर्वैकत्वलक्षणामोक्षो द्वंद्वारणकार्यवासासमिरुध्यते तत्कथमसस्मत्क्रमबाह्यद्वारणकमितिशंकते
नन्विति अंगीकरोति बाढमिति अंगीकृतमंशं विशदयति भवतीति एतस्यैकत्वमारणकार्यो भवत्यपीति योजना कथं तर्हि सर्वमेत
देवाबाह्यद्वारणकमित्युक्तं तत्राह नन्विति तदुक्तयारीत्या कर्मस्तुतीनां यद्यो क्रमोक्षार्थत्वं न यदस्ति तेन सर्वमेतद्दोऽस्ये तिकं तच्चोक्तमित्य
क्रमित्यर्थः कर्मस्तुतीनां मोक्षार्थत्वाभावं समर्थयते यदि हीति तस्मात्तासां न मोक्षार्थतेति शेषः किंच संसारस्तावद्धर्माधर्महेतुकस्तौ च
विधिनिषेधाधीनौ तयोश्चैतदुक्तरीत्या मोक्षार्थत्वे तदाऽरेत्वभावात्संसार एव न स्यादित्याह यदि चेति विधिनिषेधयोर्निवृत्तिद्वारा मुक्त्या
र्थत्वेऽपि विद्वदादिनानादत्तनिष्ठादिलोपः कर्मपरार्थत्वस्यायं स्वभावो यद्धतकर्मारमतर्थं न तु तत्कृतीति वोदयन्नाहेति मोक्षार्थमपि कर्म

१२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कांडं संसारार्थं भवतीत्यत्र हेतुमाह यद्येति प्रमाणाभावेन परिहरति नेति न त्वेवमनकांक्षितार्थत्व इति ग्रंथस्य बंधस्येति यावत् अत्रो
पपत्तिं स्फोरयति न प्रत्यक्षमिति कर्मेत्युक्तिवाक्यस्यावांतरतात्पर्यं यद्यप्यनेनार्थे श्रुत्या नेति निह्नितिर्हानश्रुतौ न महातात्पर्यमित्यंगीकृत्य शं
कते उभयमिति कृत्रिमाः स्वशः सरितः ऊत्यात्तासां प्रणयनं शास्त्रं स्वर्ग्यपानीयार्थं माचमनीयाद्यर्थं च भवति पश्वग्रासादृशोभार्थं कृताना।
मनादि हेतुरपि भवति वृक्षमूले च सेचनमनेकार्थं तथा कर्मकांडमनेकार्थमित्युपपादयति ऊत्येति एकस्य वाक्यस्य यथाक्ततेनार्थेना
र्थवत्त्वं संभवति नान्यत्र तात्पर्यैकत्वे कल्पकाभावान्न च तत्स्तुत्यर्थमीरयारीत्यानेकार्थत्वलक्षणो धर्मो वाक्यस्यैकस्योपपद्यते अर्थैकत्वादेकं वा
क्यमिति न्यायादिति परिहरति नचैवमिति वाक्यस्यानेकार्थत्वाभावेऽपि तदर्थस्य कर्मणो बंधमोक्षयोस्तात्पर्यानेकार्थत्वं स्यादित्याशं
क्याह नचेति परोक्तं हेतुं विघटयति कल्पेति विद्यां चाविद्यां चेत्यादयो मंत्राः समुच्चयपराः दृष्टाः समुच्चयश्च कर्मकांडस्य निवृत्तिद्वारा।
मोक्षार्थत्वमित्यस्मिन्नर्थे सिद्ध्यतीति शंकते यद्यपीति कर्मकांडस्योक्तरीत्या मोक्षार्थत्वे नास्ति प्रमाणमिति परिहरत्यपमेवेति मंत्राणां स
ध मुच्चयपरत्वात्तस्य च यथोक्तार्थोपयोगित्वात् कृतास्यार्थस्य प्रमाणान्तरमस्तीत्याशंक्याह मंत्राः श्रुतेरिति तेषां समुच्चयपरत्वे त्वग्रे वक्ष्यामीति भविष्य
तीत्यर्थः परमतासंभवे स्वमतमुपसंहरति तस्मादिति बंधनिरूपणमनुपयोगीत्याशंक्याह तस्य मोक्षार्थं तदिति यत्तु कर्मकांडं बंधाय प्रक्र।
येवान भवति किं त्वेतराचस्थानकारणमिति तत्तदूषयति नचेति यथा न जागर्ति न स्वपितीति विषयग्रहणक्लिष्टं तराले वस्थाने दृष्टं
था वाहं कर्तृयाः पाकार्थमहं च समवायेति कौशलेनोपलभ्यते तथा कर्मकांडेन बंधायनापि साक्षान्मोक्षायेति व्याख्यानेकत्वेन ज्ञानी

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मद्रन्वर्थः यत्कश्चन्निरेवोमरोमरपदप्रात्समभिधानव्याजेनमोक्षहेतुरूषमवतारयतीतितत्राह यन्निति मृत्योरामिमतीत्युच्यतेइत्यका
यदेतदितिग्रहवचनेनतदयंसर्वैःसाध्यसाधनलक्षणोबंधइत्यनेनाभिप्रायेणोच्यतेतस्यार्थेनमृत्युपदार्थेनात्वयदर्शनादितियोजना
श्रर्थसंबंधादित्यर्थंस्फुटयति श्रद्दातिश्रद्दाविनिर्मोकादिति एकादिश्च निर्बंधमेवप्रतिपादयति ननमोक्षहेतुरूषमवतारयतीतिभावः
ननुपुरुषस्यावेहितात्मोत्क्षःप्रतिपाद्यतेकिमित्यनर्थात्माबंधःप्रतिपाद्यतेतत्राह निगडेहीति बंधज्ञानेविनातन्मोविश्लेषायोगान्मु
मुक्तेःसप्रयोजकबंधज्ञानार्थत्वेनानेनरज्ञाज्ञानप्रवृत्तिरित्युपसंहरति तस्मादिति कतिप्रकारइत्यादिःप्रथमसंख्याविषयःप्रश्नःकत
मेतदितिद्वितीयःसंख्येयविषयइत्याह एवंवदिति संप्रतिप्रश्नमाक्षिपति नचेत्यादिना आद्येप्रश्नमाक्षिप्यद्वितीयमाक्षिपत्यपिचेति वि
शेषतस्त्वज्ञातेऽपीतिचप्राह्यार्थः शुक्तिशुक्तिपदार्थद्वयप्रतियोगिकेनोबंधनाख्येग्रहातिग्रहोसामान्येनप्राप्तोप्रश्नस्तुविशेषबुभुत्सा
यामितिप्रश्नाचोदयति ननुचेति तथापिप्रश्नद्वयमनुपपन्नमित्यादेशङ्कते ननुनचेति वाच्यैवयत्तस्यदेतत्यादावितियावत्तन्निर्ज्ञातत्वा
द्विशेषस्येतिशेषः अतिमोक्षोपदेशेनत्वगादेरपिसत्त्वितत्वात्तेषुचतद्धेयस्यानिर्द्धारणादविशेषेणप्रतिपन्नेष्वात्मादिषुविशेषबुभुत्सा
यांसंख्यादिविषयत्वेनप्रश्नस्योपपन्नार्थत्वान्नाक्षेपोपपत्तिरितिसमाधत्ते नावधारणार्थत्वादिति तदेवस्पष्टयति नहीति नचशर्वेवा
ऽत्मशरीरादिष्वितियावत् फलितंप्रथमप्रश्नोपपत्तिंकथयतीत्येतिति नन्वग्रहणामेवशर्वज्ञोपदेशादिदेशाभ्यांप्रतिपन्नत्वान्नेषुवि
शेषबुभुत्सायांकतिप्रकारइतिप्रश्नेप्यतिग्रहणामप्रतिपन्नत्वात्कथंकत्यतिग्रहाइतिप्रश्नःस्यादतआह तस्मादिति शर्वस्यातत्त्वाह्मणादि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लिपावत् वागाद्योवक्तव्यादयश्चत्वारोग्रहाश्चानिग्रहाश्चयद्यपिविशेषतोनिर्देशोनास्त्यपाप्यतिदेशेनाभासश्चत्वारोविशेषतो
नताः पंतेतेनतेषुविशेषतैस्तानसिद्धयेप्रसूत्रस्यभिप्रेतस्वविशिनष्टि नियमेनेति द्वितीयेप्रश्नेपरिहारमुत्थापयति नन्वाहेति प्राणशब्द
स्यानुसारिविषयत्वेहर्षेवीतरश्रेणयोवागादीनांप्रकृतत्वेहेतुमाह प्रकरणादिति तस्यांगंधेनगृहीतत्वसिद्ध्यर्थंविशिनष्टि वायुसहितत्वेति
अपानशब्दस्यगंधविषयत्वेगंधस्यापानेनाविनाभावेहेतुमाहापानेनेति तच्चैवहेतुतरमाहापानोपहृतेहीति अपसारोऽपानशब्दा
र्थः इन्द्रियेषुवाक्पानयति तदेतदिति वाचोग्रहत्वमुपपादयति वाचादीति आसंगस्यविषयः शब्दादिरेवास्यदृष्यावाचतयेतिविश
दः तस्मिन्नुपर्थमध्यात्मपरिच्छिन्नयेतिविशेषणमसत्यपरपीडाकरमिथ्यावचनेनदेवस्वाहष्टमात्रविरोध्यनृतेनविपरीतेनवाप्रतिपदेः
नेष्टानिष्टोक्तिग्रहः वाचिप्रकृतायोसनाशेतिकथमुच्यतेतत्राह सर्वागमाख्येति वक्तव्येनवाचोवशीकृतत्वंसाधयति वक्तव्यार्थेति
तात्पर्येणवचनकरणत्वेनेतियावत् वचनार्थंवाचोवक्तव्येनवशीकृतत्वेफलितमाह तेनेति अतःकार्यंवचनेमातस्यासाधारणा
देवतात्मनिपर्यवसानेवक्तव्यार्थोकिंविनावाचोपर्यवसानेसिद्धमर्थमाहात इति वाचेतिग्रहःगृहीतत्वमन्वभवेनसाधयति वक्त
व्येति वाचादीत्यादेरपानेनगृहीतेत्यादिनातुल्यार्थत्वाद्व्याख्येयत्वमाह समानमिति घ्राणंवाजिह्वावक्षुश्रोत्रेमनोहस्तौत्वगित्यु
क्तानग्रहानतिग्रमयति इत्येतदिति गंधोनामरसोरूपंशब्दःकामःकर्मस्पर्श इत्यतिग्रहानपिनिगमयति स्पर्शपर्यन्ताश्चेति प्रतीकमा
दायव्याचष्टे यदिदमिति यदिदंव्याकृतंजगत्सर्वंमृत्योरन्नमितियोजनातस्यतदन्नत्वंसाधयति सर्वमिति मृत्योरन्नत्वसंभावनायो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्राने०
२२३

कृत्वांतरं संबोधयति मृत्युरिति मृत्योरेतन्मधिकृत्य प्रश्नस्य करटेतनिरूपणवत्प्रयोजनतत्वमाशंक्याहायमिति सत्येव ग्रहातिग्रहलक्षणोऽश्वयौ
मोक्षो भविष्यतीति चेन्नेत्याह यद्धेति अस्त्वनर्थं ग्रहातिग्रहनाशे मुक्तिरित्यत आह यद्यपीति न च मृत्योर्मृत्युरस्त्यनवस्थानादित्युक्तमिति भावः
पक्षे नवस्थानात्पक्षे चाप्रमुक्तेरित्यतः शंकार्थः अस्तिपक्षं परिगृह्णात्यस्तित्वावदिति मृत्योर्मृत्युरुस्येव्यात्मसाक्षात्कारो विवक्षितः तस्याप्यन्यो मृत्यु
रस्ति चेदनवस्थानास्ति चेन्नद्वैतज्ञानस्यापि स्थितेरमुक्तिरिति शंकिते नन्विति तत्रास्तिपक्षं परिगृह्य परिहरति नानवस्थेति यथोक्तस्य मृत्योः
स्वपरविरोधित्वान्न किंचिदवधिमित्यर्थः उक्तं पक्षं प्रश्नद्वारा प्रमाणारूढं करोति कथमिति दृष्टत्वस्य दृष्टत्वमशिस्त्वावदिति दृष्टफलमाच
ष्टे शस्त्रमिति तस्य कार्यं कथयति तेनेति अपपुनर्मृत्युं जयतीत्यस्यार्थं निक्षं करोति तस्मिन्निति उक्तमेव व्यक्तीकरोति बंधनेहीति अस्मा
धितं मृत्योरपि मृत्युरस्तीति प्रदर्शनेनेति शेषः मोक्षोपपत्तौ फलितमाहातत इति पुरुषप्रयासः शमादिपूर्वकश्रवणादिः तत्फलस्य ज्ञानस्य फ
लं दर्शयित्वा कं योजयत्यत इति ज्ञानं पंचम्यर्थः सम्यग्ज्ञानस्यापपुनर्मृत्युं जयतीत्युक्तं फलं विशदीकर्तुं प्रश्नांतरमुत्थापयति परेति परे
णमृत्युना परमात्मदर्शनेनेति संबंधः ग्रहातिग्रहलक्षणो बंधः सन्नम्यर्थः ग्रहणात्मेन प्रयोज्यराशिर्हीनः नामादीनां स्थूलानां वर्द्धिष्ठत्वेन
स्वरूपस्य कृत्वात्कथं तदुत्क्रांतिः पृष्टस्तेनेत्याह वासनारूपाइति तेषामनुत्क्रांतौ उत्क्रमसंभवं सूचयति प्रयोजकाइति उत्क्रांतिपक्षे फ्रवं जन्मप्र
तस्य चेति न्यायात्सुनरुत्पत्तिः स्यादनुत्क्रांतिपक्षे मरणप्रसिद्धिर्विरुध्येतेति भावः द्वितीयं पक्षं परिगृह्य परिहरति नेति होवाचेत्यादिना कार्या
णि करणानि च सर्वाणि परेणात्मना सहाविभागं गच्छंतीति संप्रत्यस्मिन्नेव विदुषि समवनीयंत इति संबंधः तेषां विदुषि विलये हेतुमाह स्वयोना

२२३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विति विद्वानेवदिदृवेमविद्ययानेषांयोनिरासीत्तस्मिन्विद्यादृष्टायांतद्बलाद्विद्यायामपनीतायांपरिहार्णेतत्वेनेषांपर्यवसानंसंभवती
त्यर्थः कारणेकार्याणांप्रविलयेदृष्टान्तमाहेमेघइति प्राणादीनांकारणेसंप्रगाह्योलयश्चेत्यन्नन्यक्तिःस्यादित्याशंक्याहानेसत्यज्ञानवं
मात्रैवमित्यभिप्रेत्याह तथाचेति सविषयाण्येकादशेन्द्रियाणिवायवस्पंचचेतिषोडशकलाः तासांस्वातंत्र्यमाशंक्यांतरेचवारयति
पुरुषायणाइति तासांनिरूपिमस्यपुरुषव्यतिरेकेणनास्तीतिसूचयति पुरुषंप्राप्येति प्राणस्येत्रोत्क्रामंति तर्हिमृतोनभवतीतिप्रतीतिवि
रोधेशंकितेपरिहरति नतर्हीत्यादिना इतिशब्दोभस्त्राविषयः प्रकृतेवाक्यंप्रत्यक्तमिहदेहमरणानुवादकमित्यभिप्रेत्याह बंधनेति
प्राणानोत्क्रामंतीतिविशेषणमाश्रित्यप्रश्नांतरमाहते पुरुषस्येति पदद्वयेपिप्रयोजनेकथयन्नाचष्टेत्यादिना यत्स्वदेशाद्यभूतदधुनाना
ममात्रावशेषमित्युक्ते नावशिष्टंकिंचिदिति यथावगम्यतेतथात्रापिनाममात्रेध्रियमाणेविद्वांसेनजहातीत्युक्तेनकिंचिदवशिष्टमिति
हृष्टिस्यादितिप्रत्युक्तिलाक्षयेमाह सर्वमिति यथाश्रुतमर्थमाश्रित्यप्रत्युक्तिंव्याचष्टे नाममात्रेणेति विदुषोनामनित्यत्वेहेतुत्वेतरसूत्रवा
क्यावष्टंभेनदर्शयति विमुच्यतीति ब्रवंतपशोह्योनाशोव्यक्तिप्राचुर्येप्रतिभातिकुतोनित्यतेत्याशंक्याह नित्यत्वमेवेति व्यक्तिभेदस्यप्रसिद्ध
त्वाच्चवक्ष्यमाणब्रह्मविदः स्वदृष्टानामापिनविद्यते पररूपानदवशेषोक्तिः शुकोस्मृतइत्यादिव्यपदेशदर्शनाद्येनामनित्यत्वमाचारिक
मितिभावः ब्रह्मासीतिदर्शनेनविश्वेदेवानामत्वेनोपरमानंतेलोकंजयतीतिसिद्धान्तवादेब्रह्मविद्यांस्तोत्यमित्यभिप्रेत्यानेनरवाक्य
माहते नंतानंत्यति तत्राचष्टे तन्नामेति यत्रास्येत्यादेस्तात्पर्येद्वतानुवादस्सर्वकंकथयति यत्रास्यपुरुषस्येत्यादिना किमेनमित्यादिवाक्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यस्वर्गाद्योयुक्तायत्रेत्यादेस्तात्पर्यं चोक्तमिदानीं भर्तृप्रपंचप्रस्थानमुपन्यस्यति अत्रेति किमेतमित्यादाविति यावत् समुच्चयानुष्ठाना
दृष्टयोः सप्रयोजनकयोर्नाशोपि उक्तो उक्तिर्नैवेत्यर्हि तस्य बद्धत्वायोगात्कामसौदृशामवलंबतामित्याशंक्याह नामावशिष्टमिति द्वितेहष
स्वरूपावस्थितात्मा विद्यायाः परस्मात्पारिच्छिन्नश्चेदात्मा तर्हि बंधः पतत्स्यैवाँत्व्रतभोज्या जगतो व्याप्तत्विरित्याशंक्याह उच्छिन्नेति सर्वस्य कर्मा
दिफलस्य स्वात्मनः समुच्चयानादितस्य भोगात्प्राप्तार्थाभावात्कामासिद्धाकर्माभावात् प्रयोजकनाशोच्छिन्निरित्यर्थः किमेनमित्या
दावंतरालावस्थस्य विद्याधिकारिणो निर्द्धारणान्नदृष्टेति विद्याशेषत्वेनोपसत्प्रभृतेरारंभं संभावयति नस्येति इति शास्त्रेवर्णयं
तीत्यनेनसंबद्ध्यते तर्हि यज्ञोपसत्प्रभृतेर्ब्रह्मविद्योच्यते तस्यैवारंभो युक्तो यज्ञस्येत्यादिस्तत्त्वेत्याशंक्य फलवद्विद्याप्राप्तिशेषत्वेनेति
वर्णश्रुतप्रयोजनकनिर्द्धारणार्थोयं चेत्यादिरित्यभिप्रेत्याह एवमिति हिरण्यगर्भादन्यो नन्यो वा विद्याधिकारी प्रथमेपि दृतस्यजीवतो
वा विद्याधिकारी विवक्षितस्तत्त्वयेतिदृष्ठ्यति तदेति तत्राद्यमादिपति विशीर्णेष्विति आत्मेपेसुदृटयितेतदीयाशुक्तिमनुवदति समवनी
नेति नामभ्यावशिष्टस्याधिकारो विद्यायामिति शेषः समवनीतप्राणस्येत्यत्र श्रुतिसंवादयति मृत इति कथमेतावतायथोक्तार्थाहे
पसिद्धिस्तत्राह मनकोरथेनेति उपसंहृतप्राणस्य श्रवणाद्यधिकारित्वमेतच्छब्दार्थः द्वितीयं शंकते येति अपात्तो विद्याधिकारीति शेषः
जीवतो भोज्याद्यावर्त्तनेन समपरिधियं विनाउःशाकमिति मत्वा शंकति नविवेति अप्राप्तेकामो भवति प्राप्ते निवर्त्ततइति प्रसिद्धेरपरविद्याक
र्मसमुच्चितयाहैरण्यगर्भपदप्राप्तिरेवनिवृत्तिकारणमिति शंकते समस्तेति अपरविद्यासमुच्चितं कर्म हैरण्यगर्भभोगप्रापकं न भोगपाप्ति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वृत्तिसाधनमितिनिरस्तीयेभ्युत्थादितमितिनिपतिरहति तत्सर्वमेवेति उक्तमेवव्यक्तीकुर्वन्विभजते कर्मसहितेनेति अथैकमेवसमुच्चितंकर्मो
भयार्थंकिंनस्यादतआह नचेति उभयार्थत्वाभावंसमर्थयते हिरण्यगर्भेत्यादिना समुच्चितंकर्मनोभयार्थमित्यत्रहेतुमाह नहीति
हिरण्यगर्भोविद्याधिकारीतिपक्षंनिश्चितपक्षस्थेति दूषयति ततइति नतुमहानुभावानामस्मादृशिष्टानामेवब्रह्मविद्योपदिष्टमात्मामो
क्षफलयतिनास्माकमित्याशंक्याह सर्वेषामिति नचत्वन्मतेपिग्रहाराश्रवणादिकृत्वाविद्योदयस्तद्वारैवचिदात्मनोमुक्तिसिद्धेःकृता
मितरत्रश्रवणादिनेतिवाच्यं द्वारभेदस्यानुष्ठातृविभागाधीनप्रवृत्तिमयुक्तप्रयोजनवद्विद्योदयस्यचकाल्पनिकत्वेनयथाप्रतीतिव्यव
स्थोपपत्तेर्वस्तुतोनिर्विशेषचिन्मात्रेणविद्याविद्येबंधमुक्तीवेत्यभिप्रेत्यपरपक्षनिराकरणमुपसंहरत्यश्रुतिव्याख्यानेप्रसक्तेति तस्मादिति
कर्तव्येश्रुतिव्याख्यानेयत्रेत्याद्याकांक्षायामेवैकमवतारयति नचेति नत्रपुरुषशब्देनविद्वानुक्तानंतरवाक्येनतस्येनिषेधेरित्याशंक्यावक्ष्यमा
णकर्मणीश्रयत्वलिंगेनबाध्यःसनिषिधिरित्यभिप्रेत्याहासम्यग्दर्शिनइतिसनिषिधिबाध्येलिंगांतरमाह निधायतइतीति तस्यहिपुनरादाना
योगपदस्यनिधानेप्रयोगदर्शनादिहापिपुनरादानेलोहितादेराभात्यतःप्रसिद्धसंसारिगोचरएवायमश्रुत्यर्थः अविद्वषोवागादिलयाभा
वाहाख्रनसिद्दर्शनादित्यादिव्याख्यानस्यचात्रश्रुतेविद्वानेवपुरुषस्तदेयकलाविलयस्यश्रुतिप्रसिद्धत्वादित्याशंक्याह सर्वत्रहीति अग्न्या
द्युपानांवागादिषाहितानामप्रक्रमणेपिकरणानांतदभावेतदधिष्ठानस्यदेहस्यापिभावेनभोगासंभवान्नप्रश्नावकाशोस्तीत्याशंक्याह
नचेति देवतांशोपसंहृतेष्वितियावत् तेषांताभिरनधिष्ठितत्वेसत्यपिक्रियातमत्वेफलतीत्याह यस्मेति करणानामधिष्ठातृहीनानांभो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रके.
१२५

गदेतत्त्वाभावे विकल्पमात्रपक्षो भोक्तुः स्यादित्याशंक्याह विदेहस्येति पक्षं विवृणोति यमाश्रयमिति आह देत्यादि परिहारमवतारय-
त्यचेति मीमांसकालोकायतजैननैयायिकवैशेषिकादेवताकांक्षीयाविज्ञानवादिनो माध्यमिकाश्चेत्यनेके विप्रतिपन्ना राजल्पन्यायेन परस्य
रस्यावेलितमात्रपर्यंतेन विचारेणेतियावत् अत्रेति प्रश्नोक्तिः ननु प्रश्नार्थभागो याज्ञवल्क्यस्य प्रतिवक्तेनिहाविरोपलभ्येत तथा च तत्तो देत्यादि
वचनमयुक्तं तत्तीयस्यात्राभावादित्यत आह तौ हेत्यादीति तत्रेत्येकांते स्थित्वा विचारावस्थायामिति यावत् नकेवलं कर्मैक कारणभूतः किं तत
देवकालादिषु हेतुषु मध्यगतेषु सत्सु प्रशंसा सतराँ प्रशंसावचनात् कर्मणः प्राधान्यं गम्यते ननु कालादीनामहेतुत्वं तेषां कर्मस्वरूपा-
निष्पत्तौ कारकत्वस्यागुणभावदर्शनात् फलकाले पि तत्प्राधान्येनैव तद्धेतुत्वसंभवादित्याह नकेवलमिति पुण्यो वै पुण्येनेत्यादिवाक्या-
छे यस्मादित्यादिना ॥ द्वितीयं ब्राह्मणं २ ब्राह्मणांतरमवतार्य वृत्तं कीर्तयत्यथेत्यादिना उक्तमेवतस्य वृत्तत्वेनाक्ष्यी करोति यस्मा-
दिति मुग्धिर्वैश्चुतत्वमित्यादावुक्तं स्मारयति तस्माद्धेति यत्राऽयमित्यादावुक्तमनुद्रवति पुरुषस्येति यत्रास्येत्यादौ निर्णीतमनुभाषते तत्रेति
पूर्वब्राह्मणस्यांत्यग्रंथः सप्तम्यर्थः तस्य चावधारितमित्यनेन संबंधः संसारं तासु कर्माननानां च यानि कार्यकरणानि तेषामिति वैयधिकर-
ण्येन वानुपादानमुपादानमित्युभयत्र कार्यकरणानामितिसंबंधः कर्मणो भावाभावाभ्यां बंधमोक्षाविति तत्र भावद्वारा कर्मणो मोक्षहेतु-
त्वं स्फुटयति तत्त्वपचेति तस्य भावद्वारा बंधहेतुत्वं प्रकटयति तत्रेति पुण्यपापयोरुभयोरपि संसारफलत्वाविशेषात्पुण्यफलवत्
पापफलमप्यववरुद्धमन्यथा तत्तो विनागायोगादित्याशंक्यावर्णिष्यमाणस्य तात्पर्यं वक्तुं भूमिकां करोति तत्रेति पुण्यश्च पुण्येषु चेति नि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्वाराणार्थो सप्तमी स्वभावतः स्वेच्छया लेशितुमशक्यतः संबध्यते तर्हि गुणफलमपि सर्वलोकप्रसिद्धत्वान्नात्र वक्तव्यमित्याशंक्याह यस्त्वि
ति शास्त्रीयः सत्वानुभव इति शेषः इहेति ब्राह्मणोक्तिः शास्त्रीयं कर्म सर्वमपि संसारफलमेवेति वक्तुं ब्राह्मणमित्युक्ताशंको ऽमरत्वे नापि
नश्वन्तारयति गुणमेवेत्याह दिना मोक्षस्य गुणसाध्यत्वं विधानेनेण साधयति यावद्यावदिति कथं तस्यानिवर्तनमित्याशंक्याह ज्ञानसहितस्ये
ति समुच्चितमपि कर्म संसारफलमेवेत्यत्र हेतुमाह आकृतेति मोक्षेपि स्वर्गादाविव गुणाधायकत्वाविशेषात्कर्मणो व्यापारः स्यादित्याशंक्याह
नन्विति अकार्यत्वमुत्पत्तिहीनत्वं नित्यत्वं नाशशून्यत्वमव्याकृतधर्मित्वं व्याकृतनामरूपराहित्यं अशब्दमस्पर्शमरूपमित्यादिश्रुतिमाश्रि
त्याह नामेति निष्कलं निष्क्रियमित्यादिश्रुतिमाश्रित्याह क्रियेति चतुर्विधक्रियाफलविलक्षणो मोक्षे कर्मणो व्यापारेण संभवतीति भावः
नन्वास्थाणोरा च प्रजापतेः सर्वत्र कर्मव्यापारात् कथं मोक्षे प्रजापतिभावलक्षणे तद्व्यापारो नास्ति तत्राह यद्येति कर्मफलस्य सर्वस्य संसा
रत्वमेवेति अतः सिद्धमिति तत्राह तस्मादिति विद्यासहितमपि कर्म संसारफलं विद्यैव मोक्षार्थेति स्वपक्षशुद्ध्यर्थं विचारयन्पूर्वपक्षयति यत्विति
यथा केवलं विषदध्यादि मरणज्वरादिकरमपि मंत्रशर्करादियुक्तं जीवनपुष्ट्यादारभते तथा स्वतो बंधफलमपि कर्म फलाभिलाषमंतरे
णानुष्ठितं विद्यासमुच्चितं मोक्षायालमित्यर्थः श्रुतेः साध्यत्वांगीकारे समुच्चितकर्मसाध्यत्वं स्यान्नतत्स्याः साध्यत्वधीमात्रायत्तत्वादित्य
तरमाह नचेति हेतुमेव साधयति बंधनेति किं तद्बंधनं तदाह बंधनं चेति अविद्यानाशोपि कर्मारभ्यो भविष्यतीति चेन्नेत्याह अविद्यायाश्चे
ति मोक्षो न कर्मसाध्यो विद्यासमयत्वात् रज्ज्वविद्यासमयवदित्यर्थः नचैव हेत्वंतरमाह दृष्टविषयत्वाच्चेति मोक्षेपि स्वर्गादाविव गुणाधायकत्वो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नकर्मसाध्याशुक्तिरितिशेषः नदेवस्यहेयत्वमस्तीति उक्तमेवसामर्थ्यविषयमन्वयव्यतिरेकाभ्यांसाधयन्नुत्पादयितव्यमिति अप्रसिद्धत्वा
दितिहेतुः उत्पत्त्यादीनामन्यतमत्वान्मोक्षस्यापिकर्मसामर्थ्यविषयतास्यादितिचेन्नेत्याह नचेति नित्यत्वादात्मत्वात्कूटस्थत्वान्नित्यशुद्ध
त्वान्निर्गुणत्वाच्चेत्यर्थः आत्मभूतोयथोक्तोमोक्षस्तर्हिकिमितिसर्वैर्ध्यानप्रयत्नैस्त्वाशंक्याहविद्येति उक्तंकर्मसामर्थ्यंपूर्ववाद्यंगीकरो
ति बाढमिति अंगीकारमेवस्फोरयति भवतीति एवंस्वभावतोत्पादनादौसमर्थताकानहिविप्रतिपत्तिरित्याह विद्यासंयुक्तस्येति अ
न्यथास्वभावस्यतद्विरुद्धक्रियाफलविलक्षणेपिमोक्षेसमर्थेनेतियावत् उत्पत्त्यादौसमर्थस्यकर्मणोविद्यासंयुक्तस्यतद्विलक्षणेपिमो
क्षेसामर्थ्यमस्तीत्यत्रदृष्टान्तमाह दृष्टेहीति उक्तदृष्टान्तवशात्कर्मणोपिकेवलस्यसंसारफलस्यविद्यासंयोगान्मुक्तिफलत्वमपिस्यादि
त्याह तथेति समाधत्ते नेत्यादिना अतीन्द्रियत्वात्कर्मणोमुक्तिसाधनत्वेप्रत्यक्षाद्यसंभवेप्यर्थापत्तिरस्तीतिशंकते नन्विति नित्येषु
कर्मसुमोक्षातिरिक्तस्यफलस्याश्रुतस्याभावेतदुपलभ्यमानचोदनायामोक्षफलत्वंविनानुपपत्तेस्तेषांतत्साधनत्वमानमित्यर्थः ननुवि
श्वजितायजेतेत्यत्रयागकर्तव्यतारूपोनियोगोवगम्यते तस्यनियोज्यसापेक्षत्वात्सस्वर्गःस्यात्सर्वान्प्रत्यविशिष्टत्वादितिन्यायेनस्वर्ग
कामोनियोज्योंगीकृतस्तथानित्येष्वपिकर्मसुभविष्यतिस्वर्गोनियोज्यविशेषणमित्याह नहीति जीवन्जुहुयादितिजीवनविशिष्टस्य
नियोज्यस्यलाभान्ननित्येषुस्वर्गोनियोज्यविशेषणमित्यर्थः ननुजीवनविशिष्टेपिफलाभावेननियोज्यःस्यात्तथाचकर्मणापितृलोक
इतिश्रुतंफलंतेषुकल्पयिष्यतेनेत्याह नापीति नित्यविधिप्रकरणेपितृलोकवाक्यस्याश्रवणादित्यर्थः नहिफलाभावाच्चोदनैवमाभूः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दिति चेन्नेत्याह वेद्यंत्वे चेति तथापि फलांतरं कल्प्यतामित्याशंक्याकल्पकाभावान्नैवमित्यभिप्रेत्याह पारिशेष्यादिति शुक्तेर्यत्कल्पकं
तदेव फलांतरस्यापि किं न स्यादित्याशंक्य तस्य निरतिशयफलविषयत्वात् शुक्तिकल्पकत्वमेवेत्यभिप्रेत्याहाम्नायेति अनुपपत्त्याचेत्क्रियोज्य
लाभाय नित्येषु फले कल्प्यते कथं तर्हि विश्वजिन्न्यायेन प्राप्नोतीति सिद्धांतीयाशंकते नन्विति उक्तमेव विवृणोति मोक्षे चेति अकल्पिते मती
नित्येहेतुः अकृतार्थापत्त्या विधेः अकृतस्य प्रवर्त्तकत्वानुपपत्तेरिति यावत् विश्वजितीव नित्येषु मोक्षे फले कल्प्यमाने सति फलितमाह नन्वेवमिति
कथमित्यक्षामनुपपत्तिमेव स्फुटयति फलं चेति फलकल्पनायां विश्वजिन्न्यायावतरति मोक्षस्य स्वरूपस्थितित्वेनानुत्पाद्यत्वात्फलमेव न
भवतीति शंकते मोक्ष इति निग्रहमुद्भावयन्नुत्तरमाह नेति प्रतिज्ञाहानिं स्फुटयति कर्मेत्यादिना कर्मकार्यत्वं मुक्तेरुपेत्योक्तं तदेवानुक्रामि
त्याह कर्मकार्यत्वे चेति फलत्वेपि कर्मकार्यत्वं मुक्तेरस्तीत्युक्ते दोषं परिहर्तुं चोदयत्यथेति प्रतिज्ञाविरोधेन प्रतिविधत्ते नित्यानामिति
फलत्वमंगीकृत्य कार्यत्वेनंगीकृते कथं व्याघातः इत्याशंक्याह नचेति विशेषार्थं गान इति शेषः फलत्वमंगीकृत्य कार्यत्वानंगीकारे व्याघा
तस्योक्ता वैपरीत्येपि तं स्फुटयत्यथ फलं चेति व्याघं व्याघातं दृष्टांतेन स्पष्टयति नित्यानामिति दृष्टांतेन व्याघातपरिहरन्नाशंकते ज्ञानवदिति
चेदिति तदेव स्फुटयति यथेति दृष्टांतं विघटयति नेति ज्ञानस्य मोक्षं प्रत्यव्यवधिभूताज्ज्ञाननिवर्त्तकत्वान्मोक्षस्तेनाक्रियमाणोपि तत्कार्यमि
त्यपदेशभाक् भवतीत्यर्थः तदेव स्फुटयत्यज्ञानेनेति दार्ष्टांतिके निराचष्टे नन्विति यत्कर्मणाम निवर्त्यं तत्तन्मोक्षस्याव्यवधानांतरं कल्प्यि
तमिति संबंधः व्यवधानं दर्शयति कर्मणोऽप्रवेशोपि ज्ञानावेव तत्प्रवेशः स्यादिति चेन्नेत्याह नित्यत्वादिति कर्मनिवर्त्यव्यवधानांतरं माभूदि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ज्ञाने·
१२७

ज्ञानमेवं तन्निवर्त्यं भविष्यतीति तथा च मोक्षस्य कर्मकार्यत्वे शक्यमुपपादयितुमिति शंकते अज्ञानमेवेति कर्मणो ज्ञानाद्विलक्षणत्वाज्ज्ञा
ज्ञाननिवर्तकत्वमित्युत्तरमाह नविलक्षणत्वादिति वैलक्षण्यमेव प्रकटयति अनभिव्यक्तिरिति इतश्चाज्ञाननिवर्त्यमेवाज्ञानमित्या
ह यदीति अन्वयमेन नित्यादिनान्वयेन समस्तेन वा श्रौतेन स्मार्तेन वेत्यर्थः कर्मज्ञानयोरविरोधो हेत्वर्थो ज्ञाननिवर्तकत्वे कर्मणो
नान्वयव्यतिरेकसिद्धं किंत्वदृष्टमेव कल्प्यमिति शंकते अथेति दृष्टे सत्यदृष्टकल्पनानन्याय्येति परिहरति नज्ञानेनेति उक्तमर्थं दृष्टान्ते
नतु दृष्टावारोपयति यथेत्यादिना अदृष्टेतिच्छेदः अस्य ज्ञानादज्ञानध्वस्तिः किंतु कर्मसमुच्चितादित्याशंक्याह ज्ञानेनेति नतु कर्मभिरविरुद्धा
मपि हिरण्यगर्भादिविज्ञानमस्ति तथा च समुच्चितं ज्ञानमज्ञानध्वंसि भविष्यतीत्याह यदविरुद्धमिति विद्यायाः कर्मणां समुच्चितानामसमु
च्चितानां वा स्वरूपस्थितौ मोक्षे तत्प्रतिबंधकाज्ञानध्वंसो वा नादृष्टं सामर्थ्यं कल्प्यमित्युक्ते इदानीं तत्कल्पनामंगीकृत्यापि दूषयति किं चेति
कर्मणां नास्ति मोक्षे सामर्थ्यमित्येतदुक्तादेव कारणान्न भवति किंत्वन्यच्च कारणं तत्रास्तीत्यर्थः तदेव दर्शयितुं विचारयति कल्प्ये चेति वि
रोधमभिनयति इत्येति कार्यत्वाभावं समर्थयते यस्मिन्निति पक्षान्तरमाह किं चेति सामर्थ्यविषये विशदयति यच्चेति कथमिह नि
णीयस्तत्राह पुरुषेति कल्पयितव्यं फलमिति संबंधः उत्पाद्यादीनामन्यतमो हि कर्मभिरविरुद्धो विषयस्तत्रैव नित्यकर्मचोदनानुपपत्ते
रूपणत्वान्नित्यकर्मफलत्वेन मोक्षस्य चावधानाज्ञातनिवृत्तिर्वा न शक्यते कल्पयितुं कर्माज्ञानयोर्विरोधाभावात् दृष्टं सामर्थ्यं यस्मिंस्तु
तस्यादौ तद्विषयत्वाच्च कर्मणस्तद्विलक्षणो मोक्षे न व्यापारस्तथा च नित्यकर्मविधिवशात्प्रत्यवायप्रहतिसंपादनाय फले चेत्कल्पयितव्यं न।

१२७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्हितद्रुत्तरस्यादीनामसत्यत्वमद्वैतवादविरुद्धं कल्प्यमित्यर्थः इतिशङ्काः कृतार्थापत्तिपरिहारसमाप्त्यर्थः मोक्षएव नित्यानां कर्मणां फलत्वे
न कल्पितव्यः पारिशेष्यन्यायादिति शंकते पारिशेष्येति पारिशेष्यन्यायमेव विशदयति सर्वेषामिति सर्वस्वर्गपश्वाद्यादीति यावत्
तथापि मोक्षाख्यस्यैव नित्यकर्मफलत्वे किं नस्यादित्यत आह नचेति मोक्षस्यापीतरकर्मफलनिवेशमाशंक्याह परिशिष्टस्येति तस्य फलत्वमेव कथमि
त्यत आह सचेति परिशेषयातमर्थं निगमयति तस्मादिति पारिशेष्यासिद्धिं दूषयति नेति कर्मफलत्वस्यानन्यत्र प्रसक्तेऽभ्यनति नहीति फलव
त्फलसाधनानां फलविषये क्रमोनानात्वं कथयति तत्साधनानामिति तदानेत्यादेहेतुमाह नियतेति इच्छाद्यानन्त्यादेहेत्वन्तरमाह गुणवेति एता
वत्वे नाम नास्ति नियमः यत्र मेवंधः गुणग्रामे च फलेशोभनाद्यासविषयभूतेतत्रविषयगणशोभनाद्यासेन प्रयुक्तत्वादिति हेत्वर्थः इच्छाद्यानन्त्यमश
क्तिमेदेषु दर्शयित्वा तदानन्त्यमेकैकस्मिन्नपि प्राणिनीदर्शयति प्रतिप्राणि चेति इच्छाद्यानन्त्यफलितमाह तदानन्त्याचेति साधनादिस्वतावत्वा
नां नेपि किं स्यादिति चेन्नदोषः तानेचेति इतिशङ्काः पारिशेष्यानुपपत्तिसमाप्त्यर्थः प्रकारान्तरेण पारिशेष्यं शंकते कर्मेति तामेव शंकां विशद
यति सत्यपीति तथापि कथं मोक्षस्य परिशिष्टत्वं तत्राह मोक्षस्येति परिशेषफलमाह तस्मादिति शंकितं परिशेषं दूषयति नेत्यादिना अ
र्थापत्तिपरिशेषौ पराकृत्यार्थापत्तिपराकरणं प्रपंचयितुं प्रस्तौति तस्मादिति अन्यथानुपपत्तिप्रकरणमस्तीति नित्यानामनुत्पाद्यफलत्वे
ऽपि मोक्षस्य तत्फलत्वं सिद्ध्यतीति शंकते वक्ष्यमाणमिति तत्र मोक्षस्योत्पाद्यत्वं दूषयति नतावदिति उभयत्रातः शाङ्को नित्यत्वपरामर्शोऽत्र संस्कार्य
त्वे हेत्वन्तरमाह साधनेति तदेवव्यतिरेकमुखेन विवृणोति साधनात्मकं हीति इतश्च मोक्षस्य संक्रियमाणत्वमित्याह नचेति यथादर्शस्तल

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रा॰वे॰
१२८

षाप्रोक्षणाभ्यंजनादिना संस्क्रियते यथा चाहवनीयः संस्कारेण निष्पाद्यते न तथा होमो नित्यशुद्धत्वान्निर्गुणत्वाच्चेत्यर्थः पक्षांतरमनु।
भाष्य दूषयति पारिशेष्यादित्यादिना एकत्वश्रवणेत्वसाधनत्वेन लक्षणं फलत्वेन लक्षणं कल्पयतीति शंकते इतरेतरेति हेतुत्वेन लक्षणसिद्धौ
कल्पकाभावात्फलत्वेन लक्षणासिद्धिरिति दूषयति नकर्मत्वेति निमित्तकृतत्वेन लक्षणावशात्फल वेलक्षणसिद्धिरितिशंकते निमित्तेति
निमित्तत्वेन लक्षणं फलत्वेन लक्षणस्या निमित्तमिति परिहरति नक्षामवत्यादिभिरिति तदेव प्रपंचयति यथाहीति यस्याहिताग्नेरग्निर्गृहान्
दहेदग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदित्यत्र दहेदिति विधिविभक्त्या प्रसिद्धार्थं यत्कृत्वोपहितया गृहदाहाख्यनिमित्तपरामर्शेनाग्न।
ये क्षामवते पुरोडाशमित्यादिना क्षामवती विधीयते यस्याभयं दृविरार्तिमार्छेत् सऐंद्रं पंचशरावमोदनं निर्वपेदित्यत्र चार्छेदिति विधिविभ
क्त्या निर्वपेदिति धात्वर्थमानेन निर्वापेन निमित्तं दृविरार्तिमनूद्य निर्वापो विधीयते भिन्ने जुहोति स्कन्ने जुहोत्यत्र यस्य पुरोडाशौ क्षायतस्तं यज्ञं वरु
णो गृह्णाति यदा तद्धविः संतिष्ठेताथ तदेव हविर्निर्वपेद्यो ह्यन्यस्य प्रायश्चित्तमिति च भेदनादि निमित्ते प्रायश्चित्तं श्रूयते न च तस्य किं फलं तथा।
निमित्तभेदेपि न नित्यकर्मशुद्धिफलमित्यर्थः क्षामवत्यादिवत्त्वेन नित्यकर्मणोंगत्वेन लक्ष्यमित्याशंक्याह नैवेति क्षामवत्यादिभिरिति।
यावत् प्रविशेषेदेतन्नैमित्तिकत्वेनेति तदेव कथमिति चेत्तत्राह जीवनादीति दार्ष्टांतिकं स्पष्टयति तथेति नित्यकर्मकर्मांतरादिलक्षण
मपि न मोक्षफलमित्यत्र दृष्टांतमाह लोकस्येति चक्षुरंतरैरुलूकादिवत्तद्दोषे लक्षणेपि न रसादिविषयत्वमित्यत्र हेतुमाह रसादीति वै।
लक्षण्येन तदिंद्रियोपयुज्यते तत्राह स्वहस्तमपीति मनुष्यान्विहायोलूकादीनां त्वापीति यावत् यद्विषये दृष्टा दृविस्त्यर्थः विशेषोहरस्तस्मादि

वि

१२८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रतिप्रायः हाष्टं इति कं सर्ववादानुवादपूर्वकमाचष्टे यत्स्वनित्यादिना तत्रैवेतियावत् तदेव विवृणोति निरभिसंधेरिति विद्यासंयुक्तं कर्म
विशिष्टकार्यकरमित्यत्र शास्त्रं प्रमाणयति देवयाजीति तदाहुरित्युपक्रम्य देवयाजी श्रेयानित्यादौ काम्यकर्मदेवयाजिनः स
काशादात्मशुद्ध्यर्थं कर्म कुर्वन्नात्मयाजी श्रेयानित्यात्मयाजिनो विशेषश्रवणात् सर्वं क्रतुयाजिनामात्मयाजी विशिष्यत इति स्मृते
श्च विशिष्टस्य कर्मणो विशिष्टकार्यारंभकत्वमविरुद्धमित्यर्थः क्वचिदात्मेष्यपि विद्याशून्यस्य कर्मणो विशिष्टकार्यारंभकत्वं दृष्टमित्याह
यदेवेति नत्वात्मयाजिशब्दो नित्यकर्मानुष्ठायिविषयो न भवति सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि समं पश्यन्नात्मयाजी स्वाराज्य
मधिगच्छतीत्यत्र परमात्मदर्शनविषये तस्य प्रयुक्तत्वादित्यत आह यस्त्विति यदि समं पश्यन्भवेत्तदा परेणात्मनैकीभूतः स्वराड्भवतीत्या
त्मज्ञानस्तुतिरत्र विवक्षिता महती हीयं ब्रह्मविद्या यद्ब्रह्मविदेवात्मयाजी भवति न हि तस्य तदनुष्ठाने दृष्टापेक्षेत्ते ब्रह्मविल्लयं कृतेति
चवत्यतीत्यर्थः परदर्शनवत्यात्मयाजिशब्दस्य गौणत्वं तरमाराध्यवेति भूतायापूर्वे स्थितिस्तामपेक्ष्यात्मयाजिशब्दो विदुषीत्यर्थः तदेव प्र
पंचयत्यात्मेति तेषां न संस्कारार्थत्वे प्रमाणमाह इदमिति तत्रैव स्मृतिं प्रमाणयति तथेति गर्भसंबंधिभिरैर्मौंजीनिबंधनादिभिश्चवै
जिकमेनः शमयतीत्यस्मिन्प्रकरणे नित्यकर्मणां संस्कारार्थत्वं निश्चितमित्यर्थः संस्कारोपि क्वचोपयुज्यते तत्राह संस्कृतश्चेति यो हि नि
त्यकर्मानुष्ठायी स तदनुष्ठानजनितापूर्ववशात्परिशुद्धबुद्धिः सम्यग्धीयोग्यो भवति महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुरिति स्मृतेरि
त्यर्थः कदा पुनरेषां सम्यग्धीकृत्यद्यते तत्राह तस्येति उत्पन्नस्य सम्यग्ज्ञानस्य फलमाह समम् इति कथं पुनः सम्यग्ज्ञानवत्यात्मयाजिशब्द

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ०वे०
१२९

इत्याशंकापूर्वोक्तंस्मारयन्नात्मेति किमितीदृग्भूतपूर्वंगालिराप्नितेतितत्राह ज्ञानयुक्तानामिति ऐहिकैरामुष्मिकैर्वा कर्मभिः शुद्धबुद्धेः श्र
वणादिवशादैकात्म्यज्ञाने मुक्तिफलप्रदेति कर्मेत्र विद्यासंयुक्तमपि संसारफलमेवेतिभावः तत्रैव हेत्वंतरमाह किंचेति विद्यायुक्तमपिक
र्मबंधायैवेत्यत्र न केवलमयुक्तमेव कारणं किंत्वन्यच्च तदुपपादकमस्तीत्यर्थः तदेवदर्शयति ब्रह्मेति सात्विकी सत्वगुणप्रसूतज्ञानमयु
क्तितकर्मफलभूतामिति यावत् अत्रहि विद्यायुक्तमपि कर्म संसारफलमेवेतिसूच्यते एषसर्वः समुद्दिष्टस्त्रिप्रकारस्यकर्मणः त्रिविधः कर्मसं
सारः सार्वभौतिकः इत्युपसंहारादिति चकारार्थः किंच प्रवृत्तं कर्म संसेव्य देवानामेति सार्ष्टितामिति कर्मफलभूतदेवतासदृशैश्वर्यप्राप्तिरु
क्तातदतिरेकेण निवृत्तं सेवमानस्तु भूतान्यत्येति पंच चेति भूतेष्वप्ययवचनात् समुच्चयस्य मुक्तिफलतेत्याह देवसार्ष्टीति निवृत्तं सेवमानस्तु
भूतान्यत्येति पंच चेति पाठान्मुक्तिरेव समुच्चयानुष्ठानाद्भवतीति चेन्नेत्याह भूतानीति ज्ञानमेव मुक्तिहेतुरितिप्रतिपादकोपनिषद्विरो
धान्नायं पाठः साधीयानित्यर्थः ननु विग्रहवतीदेवतैव नास्ति मंत्रमयी हि सा देवता शब्दप्रत्ययालंबनमतो ब्रह्मा विश्वसृज इत्यादेरर्थवा
दत्वात्तत्तद्भलेन नित्यकर्मणो मुक्तिसाधनत्वनिराकरणं अशक्यमतआह नचेति ज्ञानार्थस्यसर्वशब्दज्ञानस्यायाजीत्यादेरिति विशेषः किंच श्रु
त्यैव विहितं कर्म निंदितं च समाचरन् प्रसज्जेश्चेंद्रियार्थेषु नरः पतनमृच्छति शरीरजैः कर्मदोषैर्याति स्थावरतां नरः वाचिकैः पक्षिमृगतां
मानसैरंत्यजातितां श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणां चंडालपुल्कसानां च ब्रह्महा योनिमृच्छतीत्यादिवाक्यैः प्रतिपादितफला
नां प्रत्यवायानामपि दर्शनाद्यथा तत्र नाभूतार्थवादत्वं तथा यथोक्ताध्यायस्यापि नाभूतार्थवादत्वेत्याह विहितेति किंच वेदादिदेशेष्वदि·

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तापघ्नादिप्रेतानां प्रत्यक्षत्वात् अध्ययनरहितानामपि स्त्रीशूद्रादीनां वेदोच्चारणदर्शनेन ब्रह्मग्रहसद्भावावगमाच्च न ब्रह्मादिवाक्यस्यार्थवाद
तेत्याह वेतेति ननु स्थावरादीनां श्रौतस्मार्तकर्मफलत्वाभावान्न तद्दर्शनेन वचनानां भूतार्थत्वशंकां कल्पयितुमतश्चाह नचेति सेवादिदृष्ट
कारणसाम्येपि फलवैषम्योपलंभात् दृष्टमतीद्रियं कारणं वाच्यं न च तत्र श्रुतिस्मृतीविरहात् अन्यन्मानमस्ति तथा च श्रौतस्मार्तकर्मफला
न्येव स्थावरादीनि फलानीत्यर्थः संनिहितासंनिहितेषु स्थावरादिषु प्रत्यक्षानुमानयोर्यथायोग्यं प्रवृत्तिरवसेया स्थावरादीनां जीवशून्य
त्वात् कर्मफलत्वमिति केचिन्मन्यन्ते तत्राह नचैषामिति अस्मदादिवदेव शुक्त्यादीनां चेष्टादिदर्शनात् सजीवत्वप्रसिद्धेस्तस्मात्सर्पतिपाद
पा इत्यादिप्रयोगाच्च तेषां कर्मफलत्वसिद्धिरित्यर्थः स्थावरादीनां कर्मफलत्वे सिद्धे फलितमाह तस्मादिति ब्रह्मादीनां उग्रकर्मफल
त्वेपि प्रकृते किं स्यात्तदाह तस्मादिति कर्मविपाकप्रकरणस्याभूतार्थवादत्वाभावे दृष्टांतेपि तत्स्यादिति शंकते तत्रापीति अंगीकरो
ति भवत्विति कथं तर्हि वैधर्म्यदृष्टांतसिद्धिरतश्चाह नचेति वैधर्म्यदृष्टांताभावमात्रेण कर्मविपाकाध्यायस्याभूतार्थवादत्वे तस्यस्या
प्यस्यैव बाधः साधर्म्यदृष्टांतात् पितत्सिद्धेरित्यर्थः ननु प्रजापतिरात्मनो वपामुदखिदत् इत्यादीनामभूतार्थवादत्वाभावे कथमर्थवा
दाधिकरणं चरितार्थं स्यात्तत्राह नचेति तद्द्वयमपि नास्मत्पक्षे दृतिस्वैव तद्भूतार्थवादत्वं तत्र जतत्सहिरोधादित्यर्थः ननु कर्मवि
पाकप्रकरणस्यार्थवादत्वाभावेपि ब्रह्मादीनां काम्यकर्मफलत्वान्नतान संयुक्तनित्यकर्मफलत्वं तेनामोक्त एव तत्फलमित्यतश्चाह
नचेति तेषां काम्यानां कर्मणामिति यावत् देवमार्ष्टिनायाः देवैरिंद्रादिभिः समानैश्वर्यप्राप्तेरित्यर्थः उक्तत्वात्पूर्वमनेककर्मसंभेदादेवाना।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मेतिसार्थिकंतामित्यत्रैतिविशेषः ननुविद्याङ्गत्वेनानित्यानांकर्मणांफलत्वंश्रुत्यादिभावश्चेत्कथंतानिज्ञानोत्पत्त्यर्थानिग्राह्याणीत्यत्रेनत्राह तस्मादि
ति कर्मणांशुद्धिफलत्वाभावमलङ्कृत्यर्थः साभिसंधीनांदेवताभावेफलेऽनुरागवतामितियावत् नित्यानिकर्माणिश्रौतानिस्मार्तानिचा।
ग्निहोत्रसंध्योपासनप्रभृतीनिनिरभिसंधीनिफलाभिलाषविकलानिपरमेश्वरार्पणबुद्ध्याक्रियमाणानिग्राह्याणिशास्त्रोमनोविषयः कर्म
णांचित्तशुद्धिद्वाराज्ञानोत्पत्त्यर्थत्वेप्रमाणमाह ब्राह्मीति कथंतर्हिकर्मणांमोक्षसाधनत्वंकेचिदाचक्षतेतत्राह तेषामिति संस्कृतबुद्धी
नामितियावत् कर्मणांपरंपरयामोक्षसाधनत्वंकथंसिद्धवदुच्यतेतत्राह यथाचेति अयमर्थस्तत्रेतिशेषः निरस्तमप्यधिकविवक्षा।
याऽनूद्यवदति यत्त्विति विशेषादेर्मेशादिसहितस्यजीवनादिहेतुत्वंप्रत्यक्षादिसिद्धमतोदृष्टांतेकार्यारंभकत्वेविरोधोनास्तीत्याह
तत्रेति कर्मणोविद्याङ्गस्यकार्यांतरारंभकत्वलक्षणोऽर्थः शास्त्रेनैवगम्यतेननत्प्रमाणांतरमस्तिनचसमुच्चितस्यकर्मणोमोक्षारंभक
त्वप्रतिपादकंवाक्यमुपलभ्यतेतदभावेकर्मणांविद्याङ्गत्वेपिविविदिषाद्यादिसाधर्म्यकल्पयितुंनयुक्तमित्याह यत्त्विति कर्मसाध्यत्वे।
चमोक्षस्यानित्यतास्यादितिभावः अपामसोमममृताअभूमेत्यादिश्रुतेर्मोक्षस्यकर्मसाध्यस्यापिनित्यत्वमितिचेन्नेत्याह नचेति यत्कृत॰
कंतदनित्यमित्यनुमानानुगृहीतेनयथेहेत्यादिवाक्येनविरोधेनार्थवादश्रुतेःस्वार्थेप्रामाण्यमित्यर्थः प्रमाणांतरविरुद्धेर्थेप्रामाण्यश्रु
तेर्नोत्पद्यतेचेद्दृष्टेतश्रुतेरपिकथंप्रत्यक्षादिविरुद्धेस्वार्थेप्रामाण्यमित्याशंक्याह श्रुतेस्त्विति तत्त्वमस्यादिवाक्यस्यषड्विधतात्पर्यलिंगैः
सदद्वैतपरत्वेनिर्णीतेसद्वैतविषयस्यप्रत्यक्षादेराभासत्वंभवतीत्यर्थः तदेवदृष्टांतेनसाधयति यथेत्यादिना यदविवेकिनांयथोक्त्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यहेतन्यद्यपि प्रथमभावित्वेन प्रबलं निमित्तं तथापि तस्मिन्नेवाकाशादौ विषये प्रवृत्तस्य प्रमाणवाक्यादेर्मानांतरस्य यथार्थत्वे सति तद्विरुद्ध
श्चौक्तमविवेकिप्रत्यक्षमप्याभासीभवति तथेदं द्वैतविषयं प्रत्यक्षादि द्वैतागमविरोधेनैवाभासमित्यर्थः नन्वागमस्यैते नागमपुरुषस्य मनोध
र्मेत्तदूषणाद्वेदद्वैतश्रुतेर्यथार्थत्वं नहि प्रतिपुरुषमन्यथैवतात्पर्यदर्शनान्नद्दश्यादन्यथैव श्रुत्यर्थः स्यादित्याशंक्य दार्ष्टांतिके निगमयति
तदेवमाह तस्मादित्यादिना तात्पर्यमर्थपरत्वं तथात्वं याथार्थ्यं शब्दधर्मस्तात्पर्यं तच्च षड्विधलिंगगम्यं तथा च शब्दस्य पुरुषाभिप्रायवा
श्यानपेक्षया याथार्थ्यमित्यर्थः उक्तमर्थं दृष्टान्तेन स्पष्टयति नहीति विचारार्थमुपसंहरति तस्मादिति विद्यासंयुक्तस्यापि कर्मणो मोक्षारंभ
कत्वासंभवस्तद्धेत्वर्थः माभूत्कर्मणो मोक्षार्थत्वं किं तावतेत्याशंक्य ब्राह्मणारंभं निगमयत्यत इति ब्राह्मणारंभमेवं प्रतिपाद्य तदक्षराणि
व्याकरोत्यथेति याज्ञवल्क्यमभिमुखीकृत्य पृष्टुः स्वस्य स्वनिर्देशं कथं कथयति नामवतारयति अश्वमेधस्वरूपं तत्फलं च विभज्य दर्शय
त्यादाविति कृतकृत्यत्व इति शब्दार्थसंबंधः कर्तोर्हि विद्यामाह ज्ञानेति अश्वमेधस्य द्विधा विभक्तस्य सर्वकर्मोत्कर्षे हेतुरिति सर्वकर्मणामिति
तस्य गुणप्रयोक्तृत्वमानमाह गुणत्वेति समष्टिव्यष्टिफलत्वेनोक्तं स्पष्टयति तेनेति अश्वमेधेन सहकारिकामनाभेदेन समष्टीः समनु
गतरूपा व्यष्टीश्च प्राप्य तद्रूपो देवताः प्राप्नोतीत्यर्थः कथं पुनर्व्यष्ट्यो विवक्षितेत्याह तत्रेति अग्निरादित्यो वायुरित्याद्या व्यष्टयो देवताः सो
ग्निरभवदित्यादावेवं दर्शितं वेदितव्या अश्वमेधफलभूता दर्शिता इत्यर्थः का तर्हि समष्टिदेवतेत्याशंक्य तत्रैवोक्तं स्मारयति मृत्युरिति तामेव समष्टिरू
पां देवतां प्रपंचयितुमिदं ब्राह्मणमिति वक्तुं पातनिकां करोति मृत्युस्थेति प्राणात्मकबुद्धिधर्मोऽशनाया कथं मृत्योर्लक्षणं तत्राह बुभुक्षे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं.
१३१

ति तर्हि बुद्धेर्व्यष्टित्वात्समष्टित्वमपि न स्यादित्याशंक्याह समष्टिरिति प्रागेव व्यष्ट्युत्पत्तेरुत्पन्नत्वेन समष्टित्वं साधयति प्रथमज इति सर्वाग्र-
जत्वं दर्शयति सूत्रमिति तच्च वायुर्वै गौतमेत्यादिवाक्यं प्रमाणमिति सूचयति वायुरिति तथापि कथं प्रथमजत्वं भूतानां प्रथममुत्पत्तेरित्या-
शंक्याह सत्यमिति हिरण्यगर्भस्योक्तलक्षणत्वेपि किमायातं सूत्रत्वस्येत्याशंक्याह हिरण्यगर्भ इति जगदेव समष्टिव्यष्टिरूपेण सूत्रमित्याशं-
क्याह यदात्मकमिति हि तेन व्यष्टिरूपमेकत्वं समष्टिरूपेण तत्सर्वं यदात्मकं तस्येति संबंधः तस्योक्तप्रमाणत्वं प्रकटयति यः सर्वेति विज्ञानात्मा
नेत्यावर्तयति लिंगमिति तस्य स्वत्वे परस इति श्रुतिमतत्वादाश्रयैवेति तत्साधनाश्रयत्वं दर्शयति यदाश्रितानीति तस्यैव फलाश्रयत्वमा-
ह यः कर्मणामिति परागतिरित्यस्यैव व्याख्यानं परं फलमिति एवं भूमिकामारचय्यानंतरं ब्राह्मणमवतारयति तस्येति प्रश्नमेव प्रकटया-
ति कियतीति सर्वतः परितो मंडलभावमासाद्य स्थितेति यावत् तत्र किमिति सावकत्वात्तस्याप्युक्तायामपि व्यक्त्यसंसारावशेषादाकां-
क्षाविश्रांत्यभावादत आह तस्येति इयानवबोधो नाधिको न्यूनो वेत्यन्यव्यवच्छेदेन बंधपरिमाणपरिच्छेदार्थं कर्मफलव्याप्तिरत्रोच्यते तत्परि-
च्छेदश्च वैराग्यद्वाराशुद्धिहेतुरिति भावः ब्राह्मणस्यैवं प्रवृत्तावपि किमिति भुज्युः स्वस्य पूर्वं निर्दिष्टां लोककथामाहेत्याशंक्याह तस्यचेति समा-
ष्टिव्यष्ट्यात्मदर्शनस्यालौकिकत्वप्रदर्शनेन वा किं स्यात्तदा हैतेन चेति इति मन्यते भुज्युरिति शेषः जल्पे परपराजयेनात्मजयस्येष्टत्वादित्य-
र्थः पितृत्वमग्नेरूपास्यत्वं अग्निर्वै देवानां होतेति श्रुतिमाश्रित्याह ऋत्विगिति यथोक्तगंधर्वशब्दार्थसंग्रहे लिंगमाह विशिष्टेति तस्यास्तथा-
सिद्धिं दर्शयति नहीति ग्रहेणैनमित्यादेरर्थं विवृणोति भुवनेति भवत्वेवं गंधर्वं प्रतिभवतः प्रश्नस्तथापि किमायातमत आह सचेति तेन गंधर्वे

हिरण्यगर्भपदे
सूत्रोपाधिष्ठो
विज्ञानात्मपदे
नोच्यत इत्यर्थः

१३१

वचनेनेति यावत् दिव्येभ्यो गंधर्वेभ्यः सकाशादित्येतत् एतत्ज्ञानाभावे त्वज्ञानमप्रतिभाद्विशिष्टत्वप्रतिज्ञाहानिश्चेत्याह ज्ञानइति शुश्रुमि
प्रायशुक्ता प्रश्नाक्षराणि व्याचष्टे सोहमिति प्रथमान्तावत्क पारिक्षिता अभवन्निति किं गंधर्वप्रश्नार्थो द्वितीयान्तरउत्तरप्रतिवचनार्थो योहि
कपारिक्षिता अभवन्निति प्रश्नो गंधर्वप्रतिकृतस्तस्य प्रश्नं किं सर्वो सो सम्यग् अब्रवीदिति तत्र विवक्षते तृतीयान्तरमुनि प्रतिप्रश्नार्थे निवि
भागः प्रज्ञानादिति निग्रहं परिहरन्नुत्तरमाह सहोवाचेति स्मरणार्थो गंधर्वोक्तस्य ज्ञानस्येति शेषः किं स्वाचेत्यपेक्षायामाह गच्छन्निति
प्रश्नार्थेनाहित्यरथगत्या यावान्पंथा मितस्तावान्देशो द्वात्रिंशदहानि ततः तत्किरणव्याप्तः स च देश इति सव्यापेन देशेन साकं पृथिवी त्वय
ते रविचंद्रमसौ यावत्तमयूखैरवभास्यते समसुद्रसरिच्छैला तावती पृथिवी स्मृतेति स्मृतेरित्याह द्वात्रिंशतमित्यादिना अयं लोक इत्यस्या
र्थमाह तावदिति तत्र लोकसारं विभजते यत्रेति उक्तं लोकमनूद्यावशिष्टस्यालोकत्वमाहैतावानिति तमिति प्रतीकमादाय व्याचष्टे
लोकमित्यादिना अन्वयं दर्शयितुं लोकमिति पुनरुक्तिः तत्पौराणिकसंमतिमाह यद्येलोष्टमिति उक्तं द्विगुणस्यास्य समंतात्क्रमं निवि
ष्टवतोदधि समंता द्धनतोयेन धार्यमाणः सतिष्ठतीति यावतीत्यादेस्तात्पर्यमाह तत्रेति लोकादिपरिमाणोपयोगो क्रीत्याभिप्रेते सती
तियावत् कपालविवरस्याणुप्रयुक्तत्वात्किं तत्परिमाणमित्यपेक्षायामाह येनेति व्यवहारभूमिः समस्यर्थं परमात्मानं व्यावर्तयति यो व्यम
धरति सुपर्णो भूत्वा रूपेण साहृत्य परमात्मनात्यस्विति प्रतिबिंबितं दर्शयति यदिह्वयमिति उक्तार्थं एष सुद्रवदति सुपर्णइति भूत्वेत्यस्यार्थमा
ह पदेति तत्रचित्याग्नि रंडाद्वहिरस्वमेधयाजिनो शरीरत्वास्व यमेवयाऽक्रतेति किमितितान्वायवे प्रयच्छतितत्राह मूर्तत्वादिति ज्ञानेति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा॰वं॰
१३२

यस्माद्वेतियावत् नन्वेवं शास्त्राद्धर्माद्देशोऽस्तीति पृष्ठे वायवे प्रदानमिति शेषः आत्यन्तिकामसमाप्तिमिति शब्दः परितो दुरितं तीयते ये
न सपरो हि हिरण्यमेधस्तस्य यजिनः पाविङ्लितास्तेषां भातिं वायुमिति संबंधः पुनिवचनेवर्तमाने कथमात्यन्तिकामसमाप्तिमित्यत आह समानेति
वायुप्रवेशमात्यो हेतमाह यस्मादिति किं पुनर्यथोक्तवायुतत्वविज्ञानफलं तदाह एवमिति ॥ ब्राह्मणं ॥ ब्राह्मणान्तरमवतारयत्यथे
ति तस्मात्पुनरुक्तमर्थं वक्तुमात्मभागप्रश्नेनोच्चैःकीर्तयति उषस्तेति भुज्यु प्रश्नात्सिद्धमर्थमनुवदति उषस्तश्चेति नामरूपाभ्यां कृतेजा
गद्धिरण्यगर्भात्मकं तद्विषयमुक्तं पुरुषं विशिनष्टि समष्टीति कथं यथोक्तोत्कर्षस्य पुण्यकर्मफलत्वं तत्राह देवेति संप्रत्यनेन ब्राह्मणस्य
विषयं दर्शयति यत्स्विति माध्यमिकानामन्येषां चाद्यो विवादः किं लक्षणो देहादीनामन्यतमस्तेभ्यो विलक्षणो वेति यावत् इत्येवं विप्र
पन्नानां देहादिभ्यो विवेकेनाधिगमायेदं ब्राह्मणमित्याह इत्यात्मन इति विवेकाधिगमस्य भेदज्ञानत्वेनानर्थकरत्वमाशंक्य कूटो
स्थमात्मानमर्थं संगृह्णाति तस्य चेति ब्राह्मणसंबंधमुक्त्वात्यन्तिकासंबंधमाहात्यन्तिकेति विद्यास्तवार्थो द्वितीयावबोधार्थो वात्यन्ति
यिके त्वर्थः भुज्यु प्रश्ननिर्णयानन्तर्यमथशब्दार्थः संबोधनमाभिमुख्यकरणार्थं दृष्टुरव्यवहितमित्युक्ते व्यवहितं दृष्टुरव्यवधाने गौणमि
ति शंकाते तन्निराकर्तुमपरोक्षादित्युक्तं मुख्यमेव दृष्टुरव्यवहितं स्वरूपं ब्रह्म तथा च दृष्टधीनसिद्धित्वाभावात्स्वतोऽपरोक्षमित्यर्थः श्रो
त्रे ब्रह्म मनो ब्रह्मेत्यादि यथा गौणं न तथा गौणं दृष्टुरव्यवहितं ब्रह्माद्वितीयत्वादित्याह यच्चेति उक्तमव्यवधानमाकांक्षाद्वारा प्र
नेन रवाक्येन साधयति किं तदित्यादिना तस्य परिच्छिन्नत्वशंकां वारयति सर्वस्येति सर्वनामभ्यां प्रत्यक्षब्रह्मविशेषेणं समर्थ्यते इत्यै

१३२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्पर्शाद्यैर्विशेषगुणानीति विभागमभिप्रेत्याह यद्यः शब्दाभावमिति इति रूपानन्तरत्वेनेन संबध्यते इति शब्दो द्वितीयः प्रश्नसमासार्थः तमे
व प्रश्नं विवृणोति विस्पष्टमिति त्वमर्थे वाक्यार्थान्वयेऽप्येवं शेषे तत्स्पष्टदर्शनार्थं प्रश्नक्रमवतारयन्नेव पृच्छति सर्वान्तर इति विशेषो
क्ताः प्रश्नस्य विशेषणत्वं गुणानामनास्थामाशंक्याह सर्वविशेषणेति एष सर्वान्तर इति भागस्यार्थं विवृणोति यः साक्षादिति एवं शा
स्त्रार्थं प्रश्नपूर्वकमाह कोसाविति शास्त्रशब्दार्थं स्फुटयति येयमिति येनेत्यत्र समासो हेतुः वक्ष्यमाणं स्पष्टयति न चेति मध्यान्तरस्य
स्यापि प्रतिवक्ति नेत्यादिना सर्वान्तरत्ववान्कस्मात्केसतीति यावत् नत्वीयोमात्स्यादीयात्मा येन प्राणान्विशिष्टः क्रियत इति याव
त् कथमेतावतास्तदेहो याकृतेत्याशंक्य विवक्षितमनुमानेन वक्तुं व्याप्तिमाह सर्वो इति यावत्त्वचेतनप्रवृत्तिः सा चेतनाधिष्ठानपूर्वि
का यथा रथादिप्रवृत्तिरित्यर्थः येन क्रियन्ते सोस्तीति संबंधः दृष्टांतस्य साध्यवैकल्यं परिहरति नहीति संप्रत्यनुमानमारचयति तस्मा
दिति विमता चेष्टा चेतनाधिष्ठानपूर्विका अचेतनप्रवृत्तित्वात् रथादिचेष्टावदित्यर्थः प्रतिपद्यते प्राणादीनिति शेषः अनुमानफलमाह
तस्मात्सोस्तीति चेष्टयति कार्यकरणसंघातमिति शेषः प्रश्नप्रतिवचनयोरननुरूपत्वमाशंकते सदेवा चेति दृष्टांतमेव स्पष्टयति
यथेत्यादिना प्रत्यक्षं गामश्वं वा दर्शयामीति एवं प्रतिज्ञाय पश्चाद्यश्चलत्यसौ गौर्यो वा धावति सोश्व इति चलनादिलिंगैर्यथा गवा
दिव्यपदिशत्येवमेव ब्रह्म प्रत्यक्षं दर्शयामीति मत्वा अनुसारेण प्रतिज्ञाय प्राणनादिलिंगैस्तद्व्यपदिशतस्ते प्रतिज्ञाहानिर् नवधेयव
चनत्वाच्चस्यादित्यर्थः प्रतिज्ञाप्रश्नावनुसृत्य चोद्योत्थितिः सर्वंकारिणेति फलितमाह किं बहुनेति प्रकृतिमत्ययेमाह यथेति प्रतिज्ञानु

आनं·
१३३

वर्त्तनमेवाभिनयति तत्रचेति कतमो याज्ञवल्क्येत्यादिप्रश्नस्य तात्पर्यमाह यत्तनरिति न दृष्टेरित्यादिवाक्यस्य तात्पर्यं वदन्नुत्तरमाह
तदशक्यत्वादिति आत्मनो वस्तुत्वाद्घटादिवद्विषयीकरणेनाशक्यमिति शंकते कस्मादिति वस्तुस्वरूपमत्रसत्यपरिहरत्याहेति घटा
देरपि तर्हि वस्तुस्वाभाव्यान्माभूद्विषयीकरणमिति मन्वानः शंकते किं पुनरिति इत्यादिसाक्षित्वं वस्तुस्वाभाव्यं तत्राविषयत्वेन वै
वं वस्तुस्वाभाव्यं घटादेरस्तीत्युत्तरमाह दृष्ट्यादीति दृष्ट्यादिसाक्षित्वेऽपि दृष्टिविषयत्वं किं न स्यादित्याशंक्याह दृष्टेरिति यथाप्रदीपालो
किकज्ञानेन प्रकाश्येन स्वप्रकाशकं ज्ञानं प्रकाशयति तथा दृष्टिसाक्षी दृष्ट्या न प्रकाश्यत इत्यर्थः दृष्टेर्द्रष्टैव नास्तीति सोतात्मास्त्वत्र(
त्याह दृष्टिरितीति लौकिकीं व्याचष्टे नत्वेति पारमार्थिकीं दृष्टिं व्याकरोति यास्त्विति नत्वात्मा नित्यदृष्टिस्वभावश्चेत्कथं द्रष्टेत्यादिव्यपदे
शः सिध्यतीत्यत आह साक्रियमाणयेति मात्रबुद्धिनदृष्टिगतं कर्तृत्वं क्रियात्वं चाध्यासिकं नित्यदृष्ट्यपेक्षया व्यक्रियत इत्यर्थः आत्मनो नित्य
दृष्टिस्वभावत्वे कथं पश्यति न पश्यति चेति कादाचित्कोऽयं व्यवहार इत्याशंक्याह यास्त्विति यावद्रूपविशेषणा लौकिकी दृष्टिरसौ नित्य
तिच्छायेति संबंधः तथा च नित्यतिच्छायायातया व्याप्तैवेति यावत् किमित्यौपचारिकोऽयं व्यपदेशो मुख्योऽस्तु किं न स्यादित्याशंक्याह नत्विति
दृष्टेर्वस्तुतो न विक्रियावत्त्वमित्यत्र वाक्यशेषमनुकूलयति तथा चेति उक्तेऽर्थे न दृष्टेरित्यादिश्रुतिमवतार्य व्याचष्टे तमिमामित्यादिना
उक्तमेव प्रपंचयति यास्त्विति न दृष्टेरित्यादिवाक्यार्थं निगमयति तस्मादिति उक्तन्यायमुत्तरवाक्येष्वतिदिशति तथेति उक्तं वस्तुस्वा
भाव्यमुपसंहृत्य फलितमाह एषइति न दृष्टेरित्यत्र स्वपक्षमुक्त्वा मतं प्रपंचयन्नाह न दृष्टेरिति कथमन्तराणामन्यथा व्याख्येत्याशं

१३३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कानतदिष्टमत्वार्थमाह दृष्टेरिति इतिषाष्ठ्याश्चतन्तरस्थेनेनमेबध्यते एवं व्याकुर्वन्तमभिप्रायमाह दृष्टेरितीति कर्मणि षष्ठीमेव स्फुटय
ति साहृष्टिरिति षष्ठीव्याख्यानाय द्वितीयां व्याचष्टे दृष्टारमितीति पदार्थमुक्त्वा वाक्यार्थमाह नेवेति उक्तां परकीयव्याख्यां दूषयति न
चेति दृष्टिकर्तृत्वविवक्षायां दृज्ञेनैव तत्सिद्धेः षष्ठी निरर्थिकेत्यर्थः कथं पुनर्व्याख्यातारो यथोक्तदोषं न पश्यन्तीत्यत्राह पश्यन्तश्चेति ष
ष्ठीनैरर्थक्यं प्रागुक्तमाक्षेपादानसमर्थयन्ते कथमित्यादिना क्रियमहीदार्थवैरस्याशंकाह नेवेति तत्र हेतुमाह यस्मादिति क्रिया
धात्वर्थः कर्म प्रत्ययार्थः तथा चैकेनैव पदेनोभयलाभात् पृथक्क्रियाग्रहणमनर्थकमित्यर्थः दृष्टेरित्यस्यानर्थक्यं दृष्टान्तेन साधयति
गन्तारमित्यादिना ग्रन्थवादत्वेन तर्हि दृष्टमुपात्तमित्याशंक्याह नचेति विधिशेषत्वाभावादस्मादुक्तरीत्या चार्थवत्त्वसंभवादित्यर्थः अ
थ परपदेन निरर्थकमेवेदं पदं प्रमादात्प्रयुक्तमिति चेन्नेत्याह नचेति सर्वेषां कात्यायनादीनामिति यावत् कथं तर्हीदं पदमनर्थक।
मिति परेषां प्रतीतिस्तत्राह तस्मादिति कथं पुनर्मेधातिथिमपि दृष्टेरिदं उपादानमुपपद्यते तत्राह यथा त्विति प्रदर्शयितव्यपदार्थपरिष्कारि
तिशाद्वोरदृष्ट्यः कर्तृकर्मविशेषणत्वेनातिसादृश्यसमर्पकत्वेनेति यावत् तत्समर्पणमपि ऊर्ध्वोपयुज्यते तत्राह दात्मेति दृष्यादिसादृश्या।
त्मानन्तर्हि विषयमिति तत्स्वरूपनिरूपणार्थं सादृश्यादिसमर्पणमित्यर्थः आत्मानित्य दृष्टिस्वभावो न दृश्यायां दृष्टेर्विषय इत्येवं चेन्न दृष्टेरित्या।
दिवाक्यस्यार्थस्तदा नदीत्यादिना सैकवाक्यत्वसिद्धेरिति तस्माद्यथोक्तार्थत्वमेव न दृष्टेरित्यादिवाक्यस्येत्याह नहीति आत्मा कूटस्थदृ।
ष्टिरित्यत्र तत्त्वकारः संवादयति तथा चेति तस्य कूटस्थदृष्टित्वे हेतुत्वं तरमाह मायाचेति तमेवन्यायं विशदयन्नेवमेवेति विपदे।
श्रुतिं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं.
१३४

दोषमाह विक्रियावत्त्वेति इतश्चात्मनो नास्ति विक्रियावत्त्वमित्याह ध्यायतीवेति अन्यथा विक्रियावत्त्वे सतीति यावत् अविक्रियत्वे हि
श्रुत्यवहरणमनुपपन्नानीति शंकते नन्विति न तेषां विरोधो दृष्टेद्रष्टादिकरेत्वमनुस्मृत्यप्रवृत्ते लौकिके वाक्ये तद्यथानुवादित्वादुक्तञ्च
त्यवहरणानां स्वार्थे प्रामाण्याभावादिति परिहरति नेत्यादिना न दृष्टेरित्यादीन्यपि तर्हि श्रुत्यवहरणानि स्वार्थे प्रामाण्यानीत्याशंक्याह
न दृष्टेरिति अन्योऽर्थो दृष्ट्यादिकर्तृत्वे यथा कोऽर्थो दृष्ट्यादिसाक्षीत्युपदेशस्य साक्षित्वविषयत्वेन सिद्धेर्दृष्टेरिति साक्ष्यसमर्पणात्तदर्थवत्त्वोपप
त्तिरित्युपसंहरति तस्मादिति पक्षांतरं निराकृत्य स्वपक्षमुपपाद्यानंतरवाक्यं विभजते एष इति अन्यदार्त्तमिति विशेषणसामर्थ्यसि
द्धमर्थमाह नेदेवेति ॥ ब्राह्मणं ४ ॥ ब्राह्मणत्रयार्थसंगतिवक्रममनुवदति बंधनमिति चतुर्थब्राह्मणार्थं संक्षिपति यस्त्वेति
तत्र ब्राह्मणतात्पर्यमाह तस्येति उशस्तप्रश्नानंतर्यमथशब्दार्थः पूर्ववदित्यभिमुखीकरणार्थं संबोधितवानित्यर्थः बंधध्वंसित्वान
प्रश्नो नात्र प्रतिभाति किं त्वनुवादमात्रमित्याशंक्याह यदेवेति नेत्याचक्षतेति एवंलक्षणसंबंधः प्रश्नयोरवांतरविशेषप्रदर्शनार्थं परा
मृशति किंचेति तत्र पूर्वं पक्षं गृह्णाति भिन्नाविति तीति उक्तमर्थं व्यतिरेकद्वारा विवृणोतीति यदि हीत्यादिना प्रत्येकं वाक्यं वस्तुपरं त
स्यार्थवादो द्वितीयं वाक्यं नेत्याह नेति द्वयोर्वाक्ययोस्तुल्यलक्षणत्वे फलितमाह तस्मादिति तत्राद्यं वाक्यं तेत्वमधिकरोति द्विती
यं परमात्मानमित्यभिप्रेत्याह द्वे त्विति ब्राह्मणद्वयेनार्थद्वयं विवक्षितमिति भ्रमं प्रपंचप्रस्थाने प्रत्याह नेति प्रश्नप्रतिवचनयोरे
कत्वात्स्वार्थभेदोऽस्तीत्युक्तमुपपादयत्येषत इति तथापार्थभेदे का नुपपत्तिरित्याह नेति जातितः स्वभावतः अत्रमहत्त्वमित्येकाका

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्मादिति तर्हि लक्षपदविशेषोद्देश्यविधेयभावो येन पुनरुक्तिरर्थवतीत्याशङ्क्याह ॥ ४

रस्फुरणादित्यर्थः इतश्च न तत्त्वभेद इत्याह द्वयोरिति तदेव स्फुटयति यदीति द्वयोर्मध्ये यद्येकं ब्रह्मागौणं तदेतरेण गौणेनावश्यं
भवितव्यं तथात्मत्वादि यदेकस्येष्टं तदितरस्यानात्मत्वादिकं ततः स्यादिति चेत्तत्राह विरुद्धत्वादिति उक्तोपपादनपूर्वकं हि प्रवणा।
स्याभिप्रायमाह यदीत्यादिना एकस्य मुख्यत्वासंभवादन्ततः परिच्छिन्नस्य घटवद्ब्रह्मत्वादनात्मत्वाच्चैकमेव मुख्यं प्रत्यग्भूतं ब्रह्मेत्यर्थः यदि
जीवेश्वरभेदाभावात्तयोर्नार्थभेदस्तर्हि पुनरुक्तिरनर्थिकेत्याशङ्क्याह एवमिति अत उक्तविशेषकथनार्थं स्वरूपविमाणं निर्णीतमुक्तावुवाद
श्वेद उक्तो विशेषस्तर्हि प्रदर्श्यतामिति शङ्कते कः पुनरिति बुभुत्सिते विशेषं दर्शयन्नुच्यत इति शाङ्कः क्रियापदेन संबध्यते किमित्येव विशे-
षो निर्दिश्यत इत्याह यद्विशेषेति अर्थभेदासंभवे फलितमाह तस्मादिति योऽशनायेत्यादिना तु विवक्षितविशेषोक्तेरिति विशेषः एकमेवात्मत-
त्वमधिकृत्य प्रश्नाविव चोदयति नत्विति विरुद्धधर्मवत्त्वान्मिथो भिन्नौ प्रश्नार्थौ विल्पेतत् दूषयति नेति परिहृतत्वमेव प्रकटयति नामरू-
पेति तयोर्विकारः कार्यकरणलक्षणसंघातः स एवोपाधिभेदस्तेन संपर्कस्तस्मिन्नहं ममाध्यासस्तेन जनिता भ्रान्तिरहंकर्मेत्यायत्ता वन्ध्या च
संसारित्वमित्यनेकशो भिन्नत्वादि तन्नस्मान्नास्ति वस्तुतो विरुद्धधर्मवत्त्वमित्यर्थः किंच सविशेषत्वनिर्विशेषत्वरूपत्वो विषयविभागः किं प्रस-
गेन संसारित्वस्य मिथ्यात्वमथ ब्राह्मणानेवोच्यामेत्याह विरुद्धेति कथं तर्हि विरुद्धधर्मवत्त्वप्रतीतिरित्याशङ्क्याह यथेति परेणारुहवेणत्वाने
नवाध्यारोपितैः सर्पत्वादिभिर्धर्मैर्विशिष्टा इति यावत् स्वतस्त्वाध्यारोपेण विनेत्यर्थः प्रतिभासतो विरुद्धधर्मवत्त्वेऽपि देवेत्तेश्वरयोर्भिन्नत्वादि-
ध्यार्थौ वेव प्रश्नाविति चेन्नेत्याह नचैवमिति निरुपाधिकरूपेण संसारित्वं सोपाधिकरूपेण संसारित्वमित्यविरोध इत्यर्थः इदानीं पुणाद्यभुपग-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मेसद्दयत्वेमतः घटादेरूपाधित्वहेत्विति शंकते नामेति सलिलातिरेकेण न संति फेनादयो विकारा नापि घटाद्यतिरेकेण तद्विकारस्य घ
टादेरयः संतीति दृष्टांतात्म्ये युक्तिबलादविद्यमानेदं परिचितकार्यकरणसंघातस्याविद्यामात्रत्वान्नस्याविद्ययानिरासान्नैवमिति परिह
रति नेत्यादिना कार्यसत्वमभ्युपगम्योक्तमिदानीं तदपि निरूप्यमाणे नास्तीत्याह यदात्विति नेह नानास्ति किंचनेत्यादिश्रुत्यनुसारिभिर्वेद
द्रष्टा निरूप्यमाणे नामरूपे परमात्मतत्वादन्यत्वेनान्यत्वेन वा निरूप्यमाणे तत्वतो वस्त्वंतरे घटादौ वस्त्वंतरमिति संबंधः मृदादिविकारवदित्यस्य प्रकट
यति सलिलेति तदात्म्यपरमात्मतत्वमपेक्ष्येति योजनीयं कदा तर्हि लौकिको व्यवहारस्तत्राह यदात्विति अविद्यया स्वाभाविक्या ब्रह्मयदो
पाधिभ्यो विवेकेन नावधार्यते तदा लौकिकव्यवहारस्तर्हि विवेकिनो नासौ स्यादित्याशंक्याहास्ति चेति भेदभानप्रयुक्तो व्यवहारो विवेकिना
मविवेकिनां च तुल्य एव वस्त्वंतरास्तित्वाभिनिवेशस्तु विवेकिनो नास्तीति विशेषः ननु यथाप्रतिभासं वस्त्वंतरं पारमार्थिकमेव किं न स्यात्तत्रा
ह परमार्थेति किं द्वितीयं वस्तु तत्वतोस्ति किं वा नास्तीति वस्तुनि निरूप्यमाणे श्रुत्यनुसारेण तत्वदर्शिभिरेकमेवाद्वितीयं ब्रह्मव्य
वहार्यमिति निर्धार्यते तेन व्यवहारदृष्ट्याश्रयणेन भेदकृतो मिथ्याव्यवहारः तत्वदृष्ट्याश्रयणेन च तदभावविषयः शास्त्रीयो व्यवहार इत्युभ
यविधव्यवहारसिद्धिरित्यर्थः तत्र शास्त्रीयव्यवहारोपपत्तिं प्रपंचयति नहीति तथा च विद्यावस्थायां शास्त्रीयो भेदव्यवहारः तदितरव्यवहा
रस्त्वाभासमात्रमिति विशेषः अविद्यावस्थायां लौकिकव्यवहारोपपत्तिं विवृणोति नहि नामेति उभयविधव्यवहारोपपत्तिमुपसंहरति तस्मा
दिति उक्तरीत्या व्यवहारद्वयोपपत्तौ फलितमाह तत इति प्रत्यक्षादि श्रुवेदांतैश्चेति शेषः ज्ञानाज्ञाने ईश्वरस्य कृत्यव्यवहारः शास्त्रीयो लौकिकः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रुतिनास्माभिर्वेवोच्यते किं त्वसर्वेषामपि विपरीतकारणमेतत्सम्मतं संसारदशायां क्रियाकारकव्यवहारस्य मोक्षावस्थायां च तदभावस्ये
त्युक्ताद्वित्याह सर्ववादिनामिति निरुपाधिके परस्मिन्नात्मनि विद्यादावेनाद्यविद्याकल्पितोपाधिकृतमशनायादिमत्त्वं वस्तुतस्त्वद्वैतमि
त्युपपादयन्नेतरप्रश्नमुत्थापयति वक्ष्यतेस्मादित्यादिना कल्पितकल्पितयोरात्मस्वरूपयोर्निर्द्धारणार्थासप्तमीयोग्यतेति समस्तोत्तरत्वादि विशेष
णत्वमात्मेति शेषः ननु परेणाशनायादिमान प्रसिद्धेनापि जीवत्वयात्तस्य परस्माद्व्यतिरेकादित्यत आह अविवेकिभिरिति परमार्थतस्तु
भयतः संबध्यते ब्रह्मैवाविदुरं सत्तिरेदानंदमनाद्यविद्यातत्कार्यबुद्ध्यादिसंबद्धमाभासते तथा चास्तु भवाद्दशनायादिमत्तामत्ये तत्त्ववस्तुतोः
विद्यायासंबंधादशनायाद्यतीतं नित्यशुद्धं तिष्ठतीत्यर्थः अशनायापिपासादिमद्ब्रह्म गमयमाणमिति वदन्नाचार्यो नानाजीववादस्यानिष्ट
त्वं सूचयति परमार्थतो ब्रह्मणो ऽशनायाद्यसंबंधमानमाह न लिप्यत इति बाह्यत्वमसंगत्वं लोकदुःखेनेत्यशुद्धेर्लोकस्यानात्मनो दुःखे सं
बंधानुभवमादित्याशंक्याह बाह्य इति अशनायापिपासयोः समस्योपादानेहेतुमाह प्राणेति अशनिवाचीशोकशब्दो न कामविषयः इ
त्याशंक्याह देहमिति कामबीजत्वमवलेह्यभवेनाभिव्यनक्ति तेन हीति कामस्य शोको बीजमिति सकामतया व्याख्यातः अनित्याशुचिदुः
खोनात्मसु नित्यशुचिसुखात्मख्यातिर्विपरीतप्रत्ययस्तस्मात्मनसि प्रभवति कर्मेद्याकर्तेद्या विवेकः स लौकिकः सम्यक्ज्ञानविरोधान्मो
विरोधेनूच्यते तस्मात् सर्वानर्थोत्पत्तौ निमित्तत्वेमूलाविद्यायास्तूपादानत्वेनदेतदाह मोहस्त्विति कामस्य शोको मोहो हेतुः त्वस्य हेतुरितिभि
न्नकार्यत्वेन हि केदरत्वकार्यकरणसंघातस्तत्र हेतुरर्थः संसाराद्धि रकस्य पारिव्राज्यं वक्तुमरवाक्यमिस्यभिप्रेत्य संक्षेपतः संसारस्वरूपमा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रा॰ने॰
१२६

श्रि

ह येनेत्यादिना तेषामात्मधर्मत्वेत्यावर्त्तयितं विशिनष्टि प्राप्नोति तेषां स्वरसतो विच्छेदशंकां वारयति प्राप्तिश्चेति प्रवाहरूपेणैवेत
यैर्णो दृष्टांतमाहारोहो राज्ञा दिवरिति तेषामतिचपलत्वे दृष्टांतः समुद्रोर्मिवदिति तेषां देयत्वं द्योतयति प्राप्तिश्चेति येषां योक्तः प्राप्तिश्च शना
याद्यस्ते तेषु संसारेऽस्यैत्यंतहेति योजना एतद्वैतमित्यत्र नकृतार्थश्च सप्रश्नोक्तं तत्पदार्थं कथयति योसाविति एतत्कृतार्थकहेतु प्रश्नो
क्तेनत्पदार्थं दर्शयत्नपस्यानायेति तयोरैक्यं सामानाधिकरण्येन सूचितमित्याह तमेतमिति ज्ञानमेव विशदयन्नपर्यमित्यादिना ज्ञात्वाश्रम
णाश्चत्याद्यमित्याचर्ये चरन्तीति संबंधः संन्यासविधायके वाक्ये किमित्यधिकारिणि ब्राह्मणपदं तत्राह ब्राह्मणानामिति उक्षर्णामेवण्या।
मेवविद्वणोति श्रवेणेति ततोऽनुत्थाने संगृह्णाति दारसंग्रहमिति वित्तैषणा याश्चानुत्थानं कर्त्तव्यमित्याह वित्तेति वित्तं हि विधं मानुषं।
दैवं च मानुषं गवादि तस्य कर्मसाधनस्योपादानश्रवणं तेन कर्म कृत्वा केवलेन कर्मणा पितृलोकं जेष्यामि दैवं वित्तं विद्या तत्संयुक्तेन
कर्मणा देवलोकं केवलया च विद्ययानमेव जेष्यामीति इत्युक्ता वित्तैषणा तत्र चानुत्थानं कर्त्तव्यमिति व्याचष्टे कर्मसाधनस्येति एतेन लोके।
षणायाश्चानुत्थानमुक्तं वेदितव्यं दैवाद्धि मानुत्थानमाक्षिपति दैवादिति तस्यापि काम्यत्वात्ततो व्युत्थानमिति परिहरति तदसदिति त
र्हि ब्रह्मविद्यायाः सकाशादपि व्युत्थानात्तन्मूलध्वंसे न ह्याघा स्यादित्याशंक्याह हिरण्यगर्भादिति देवतोपासनायाविद्या हितविद्या।
त्वे हेतुमाह देवलोकेति तस्याप्रि हेतुत्वं ब्रह्मविद्यायामपि तुल्यमिति चेन्नेत्याह नहीति तच्चफलांतरश्रवणं हेतु करोति तस्मादिति इत
श्च ब्रह्मविद्यादैवाद्धितात्तद्धिरेवेत्याह तद्धेलेनेति प्रागेव वेदनं सिद्धं चेत्किं श्रवणं स्यानेनेत्याशंक्य प्रयोजकज्ञानतत्प्रयोजकश्रवणतत

त्या
१२६

तः३
६२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वसाक्षात्कारणमितिविवक्षित्वाह तस्मादिति प्रयोजनज्ञानेपंचम्यर्थः शुश्रूषायमिताचर्यंचरंतीति संबंधः शुश्रूषानस्वरूपप्रदर्शनार्थं
एषणास्वरूपमाहैषणेति किमेतावतेत्याशंका शुश्रूषानस्वरूपंग्राहैतस्मिन्निति संबंधस्तु एवंवतु यांछे वेत्यादिश्रुतेस्तात्पर्यमाह सा
वीहीति फलेनेच्छतिसाधनंचचिकीर्षतीति व्याख्यानात्फलेच्छान्तर्भूतेवसाधनेच्छातत्प्रयुक्तमेषणैकामित्यर्थः श्रुतेस्तदैक्यमुपपादय
कत्वप्रश्नपूर्वकंमुपपादयति कथमित्यादिना फलेषणान्तर्भावेसाधनेषणायाः समर्थ्यते सर्वेइति उभेहीत्यादिश्रुतिमवतार्यव्या
चष्टे यालोकैषणेति प्रयोजनज्ञानवतः साध्यसाधनरूपात्संसाराद्विरक्तस्य कर्मतत्साधनयोरसंभवेसाक्षात्कारस्यहिश्यफलितत्से
व्यासंदर्शयत्यतइति व्युत्क्रान्ताः ब्राह्मणाः किंप्रयोजयेत्यादिप्रकाशिताः तेषांकर्मकर्मसाधनंचयज्ञोपवीतादिनास्तीति एवंणसं
बंधः देवपितृमानुषनिमित्तमिति विशेषणंविशदयति तेनहीति प्राचीनावीतेपितॄणामुपवीतेदेवानामित्यादिशास्त्रार्थः यस्मा
न्मूर्वैप्रयोजनज्ञानवंतोब्राह्मणाविरक्ताः संन्यस्यतत्प्रयुक्तंधर्ममत्यतिष्ठंस्तस्मादधुनातनोपिप्रयोजनज्ञानीविरक्तोब्राह्मणस्त्यागाङ्क
र्यादित्याह तस्मादिति विदित्वैनयतिश्चैवेत्यादिस्मृतेर्नपरमहंसपारिव्राज्यमत्रविवक्षितमित्याशंक्याह त्यक्त्वेति तस्यहृद्यार्थत्वात्प्रा
ह्वमित्याज्यत्वंसूचयति केवलमिति अप्रयोज्यत्वाच्चतस्यत्याज्यतेत्याह पारिव्राज्येति तथापित्रिदण्डिसंन्यासोनस्मृतिकारैर्निबद्धइति
चेन्नेत्याह विद्वानिति प्रत्यक्षश्रुतिविरोधाच्चस्मार्तसंन्यासोप्रयोज्योनभवतीत्याशयेति एतेवैतमित्यादिवाक्यस्यविधायकत्वमुपेत्यसर्वं
कर्मतत्साधनपरित्यागपरत्वमुक्तमाक्षिपति नन्विति इत्यश्रुयज्ञोपवीतमपरित्याज्यमित्याह यज्ञोपवीत्येवेति याजनादिसमभिव्याहारा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्राने·
१३०

इत्यस्मामिविषयमेतदित्याशंक्याह पारिव्राज्येनात्मवदिति वेदत्यागेदोषश्रुतेरन्यत्यागेपिकथंपारिव्राज्येयज्ञोपवीतित्वमित्याशंक्या
होपासनइति इत्यनेनवाक्येनगुर्वाद्युपासनाङ्गत्वेनयज्ञोपवीतस्यविहितत्वात्परिव्राजकधर्मेषुगुरूपासनादीनांकर्तव्यतयाश्रुतिस्मृ
तिषुचोदितत्वाद्यज्ञोपवीतपरित्यागोवगतेनैवशंक्यतइत्यन्वयः संप्रतिप्रौढिमाहहोमस्त्यानेविधिमंगीकृत्यापिदूषयति यद्यपी
त्यादिना एषणाभ्योव्युत्थानेसत्येषणात्वाविशेषात्कर्मणस्तत्साधनाच्चव्युत्थानेसत्यतीत्याशंक्ययज्ञोपवीतादेरेषणात्वमसिद्धमित्या
शङ्क्येनाह सर्वेति अश्रुतत्वकरणे श्रुतत्यागेवाकुर्वन्विहितंकर्मेत्यादिस्मृतिमार्गमाश्रित्यदूषणमाह तथाचेति नचदृष्टफलेयज्ञोपवी
तादिलिङ्गत्यागःसकस्मान्निराक्रियतेतत्राह तस्मादिति नेयमंधपरंपरेतिपरिहरति नेत्यादिना ब्रह्मचर्यादेवप्रव्रजेदित्यादिवि
ध्युपलंभेपिप्रौढवादेनात्मज्ञानविधिबलादेवसंन्यासंसाधयित्वमात्मज्ञानपरत्वेनावद्वउपनिषदामुपन्यस्यत्यपिचेति इतश्चास्तिसं
न्यासेविधिरितियावत् नहिविधिबलादेवसन्यासस्यसिद्धिरितिशेषः कथंसर्वोपनिषदामात्मज्ञानपरत्वमुच्यतेकर्तृस्तुतिद्वाराकर्मविधिशे
षत्वेनार्थवादत्वादित्याशंक्याहात्मेत्यादिना अस्तुयथोक्तंवस्तुविज्ञेयंतथापिप्रत्यनेकिमायातंतत्राह सर्वाहीति नवतस्यकर्मशेषत्वे
पिकथंकर्मतत्साधनत्यागसिद्धिरतआह आत्माचेति विपक्षेदोषमाहातइति साधनफलान्तर्भूतत्वेनात्मनोज्ञानमविद्येत्यत्रप्रमाण
माहान्योसावित्यादिना क्रियाकारकफलविलक्षणस्यात्मनोज्ञानंकर्मशेषंनतत्सामर्थ्यात्साध्यसाधनत्यागःसिद्ध्यतीत्युक्तंसंप्रत्यविद्या
विषयत्वाच्चसाध्यसाधनयोर्विद्यावतात्याज्यतेत्याह क्रियेति तस्माविद्याविषयत्वेश्रुतीरुदाहरति यत्रेति अविद्याविषयत्वेपिसाध

१३०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नादिविद्यावत्तत्त्वभविष्यतिविद्याविद्ययोरस्मदादिष्वसाहित्योपलंभादित्याशंक्याह नचेति विद्याविद्ययोःसाहित्यासंभवेफलित
माह तस्मादिति इतस्त्वप्रयोजकत्वानवत्वासाध्यसाधनभेदोनदृष्टो विवक्षितोनतत्त्वसाक्षात्कारविरोधित्वादित्याह सर्वेति भवत्वि
द्याविषयाणांविद्यावत्त्वस्यागस्त्यापिक्रतोर्यज्ञोपवीतादीनांत्यागस्तत्राह यज्ञोपवीतादीति नहिविषयत्वादित्यत्रतत्क्रतोर्विद्याविष
यःएषणात्वाच्चयज्ञोपवीतादीनांत्याज्यतेत्याह तस्मादिति नेयत्वेनप्रसक्तत्वादितियावत्साध्यसाधनविषयानदात्मिकेषणात्याज्ये
त्यक्तेतमाह विततमोति शुक्लार्थेरूपादिपदीतामाहयेत्यर्थः साध्यसाधनयोरेषणात्वेसाध्ययज्ञभेदीति तथापियज्ञोपवीतादी
नोकर्मणांचकथमेषणात्वमित्याशंक्यसाधनोनतर्भावादित्याह यज्ञोपवीतादीति तयोरेषणात्वेकथंप्रतिज्ञामात्रेणसेत्स्यतीत्याशंक्या
ह्यभेदीति तयोरेषणात्वेसिद्धेफलितमाह यज्ञोपवीतादीति शास्त्रतानविधिरेवसंन्यासविधिरितिकल्पाच्छ्रुत्यायेत्यसतास्तिविधि
त्वमितिशंकते नत्विति श्रुत्यायविदित्वेतिपावक्रममतिक्रम्यश्रुत्यानेभवत्येवायंविविदिषोर्विधिरितिपरिहरति नविधित्विति ने
पावक्रमेपिप्रयोजकत्वानवत्वोविरक्तस्यभवत्येवायंविधिरित्यभिप्रेत्याह नहीति अक्रमेवाव्ययश्रुतेनोदाहरणाहारविहृणाति श्रु
कर्तव्यानामिति श्रुमिपुस्यसोमस्यकंडनेकृत्वारसमादायेत्यर्थः पावक्रममेवाश्रित्यशंकते विधेति प्रयोजकत्वानवत्वोविरक्तस्या
त्मज्ञानविधिसामर्थ्यलब्धस्ययज्ञोपवीतादित्यागस्यकर्तव्यात्मज्ञानेनसमानकर्तृकत्वश्रवणादतिशयेनावश्यकत्वसिद्धिरित्य
त्रमाह नतत्वनामिति श्रुत्यानेदर्शितेत्यायेभिक्षाचर्यमतिदिशति तथेति भिक्षाचर्यस्यचात्मज्ञानविधिनैकवाक्यत्वमस्तीत्येवदा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हौयोपपत्तिरितिसंबंधः श्रुत्यानादिवाक्यस्यार्थवादत्वमुक्तमनूद्य दूषयति यत्तु नेत्यादिना औदुंबरो यूपो भवतीत्यादौ लेट्परिग्रहेण।
विधिस्वीकारवदस्यापि पंचमलकारेण विधिसिद्धेर्नार्थवादत्वशंकेत्यर्थः संप्रति प्रकृते वाक्ये पारिव्राज्यविधिमंगीकृत्य तस्य स्वरूप्याः शंकते
श्रुत्यायेति कार्तर्हि विप्रतिपत्तिरित्यत आह पारिव्राज्येति लिंगेति दंडत्वादिरूपतां यज्ञोपवीतं विसृज्य न वस्त्रयादाद्याश्रमं प्रविशेत् त्रिदंडीक
मेखलुमानित्याद्याश्रुतयस्तत्रस्थ एषणात्वाद्यज्ञोपवीतादीनामपि त्याज्यत्वमुक्तमित्याशंक्य श्रुतिस्मृतिवशाद्ध श्रुत्याने संकोचमभि
प्रेत्याहात इति उदाहृतश्रुतिस्मृतीनां विषयांतरं दर्शयन्नुत्तरमाह नेत्यादिना न देवविहृणोति यद्वीत्यादिना तस्मात्मज्ञानांगत्वे हेतु
माहात्म्यज्ञानेति एषणात्यागस्य हि शेषित्वमेव कुतः सिद्धं तत्राह विधेरिति तर्हि यथोक्तानां श्रुतिस्मृतीनां किमालंबनं तत्राह तद्व्यतिरेकेणेति
श्राश्रमत्वेन निरूप्यते वस्तुतस्तु नाश्रमस्तदाभास इति यावत् तस्यात्मज्ञानांगत्वे वा रचयति अह्येति अथ श्रुत्यानवाक्योक्तमुख्यपारिव्राज्य
विषयत्वमेव लिंगादिविधानस्य किं न स्यात्तत्राह न चेति एषणारूपाणि साधनानि यज्ञोपवीतादीनि तेषामुपादानमनुष्ठानं तस्याश्रमध।
मेमा वेणोक्तस्य यथोक्ते संन्यासाभासे विषये सति प्रधानबाधेन मुख्यपारिव्राज्यविषयत्वमयुक्तमित्यर्थः कथं पुनर्मुख्यपारिव्राज्यविषय
त्वे यज्ञोपवीतादेः प्रधानबाधनं तत्राह यज्ञोपवीतादीति साध्यसाधनयोरसंगो न हि लक्षणस्यात्मनो ज्ञाने बाध्यते चेत् कातोहानिरि।
त्याशंक्याह नचेति भिक्षाचर्यत्वावहितेति विहितानुष्ठानं च यज्ञोपवीतादि विना न संभवतीति प्रत्येवात्मज्ञाने यज्ञोपवीतादिविरोधिवा।
धित्वमिति शंकते भिक्षाचर्यमिति शंकामेव विशदयन्नपपीत्याह यथाङ्गत्वशेषस्य महतां विहितमपि नरक्याते पकं परिशिष्टकोपादा

नो१

तेन प्रवृत्तेस्तथा सर्वस्वत्यागे विहिते परिशिष्टभिक्षापात्रादेर्नविहितमपि भि चरणमुपवीताद्यनाक्षेपकमित्यत आह नेत्यादिना दृष्टांत
मेव स्पष्टयति शोधेति तद्वत्त्यागमिति संबंधः अप्रयोजकं दृष्ट्वा विरोधस्यानाक्षेपकमिति यावत् यद्वा दार्ष्टांतिकमेव स्फुटयति शोधेति
सर्वस्वत्यागे विहिते शोधस्य कालस्य शरीरपातांतस्य प्रतिपत्तिकर्मस्य मात्रभिक्षाचर्यमेतेन न तदुपवीतादिप्रापकमित्यर्थः किंच भिक्षाच
र्यस्य शरीरस्थित्यैव वा हि मत्वा त्वत्रापि विधिर्हेवेन दृष्टाद्युपवीतादिसिद्धिरित्याह संस्कारत्वाच्चेति तदेव स्फुटयति भक्षणमिति एककालच
रेद्भैक्षमित्यादिनियमवत्संस्कृत्य सिद्धोपवीतादिकमपि प्राप्नोतीति चेत्तत्राह नियमेति विरुद्धोस्तु तदिष्टमपि नोपवीताद्याक्षेपकं त्वा
नोत्पादकं श्रवणाद्युपयोगिदेहस्थित्यर्थत्वेनैव चरितार्थत्वादिति भावः तर्हि यथाकथंचिदुपनतेनान्नेन शरीरस्थितिसंभवाद्भिक्षाचर्यं चरे
दिति वाक्यमपार्थमिति शंकते नियमादृष्टस्येति भिक्षाचर्येणैवान्नेन प्रतिग्रहादिनिवृत्त्यर्थत्वाद्वाक्यस्य नानर्थकमित्युत्तरमाह नाद्येति
निवृत्त्युपदेशेन वाक्यस्यार्थवत्त्वेपि तदुपदेशस्यानार्थवत्त्वं कृतस्यात्मज्ञानेनैव सर्वनिवृत्तेः सिद्धेरिति शंकते तथापीति यदि निष्क्रियात्म
ज्ञानाद्दोषनिवृत्तिः स्यात्तर्हि तदस्माभिरपि स्वीक्रियते सत्यमित्यंगीकरोति यदीति यदि तत्त्ववधादिदोषप्राबल्याद्दात्मानं निष्क्रियमपि वि
ज्ञात्वा स्वस्वार्थेनादिपरो भवति तदा निवृत्त्युपदेशोपि भवत्यर्थवानिति भावः प्रागुक्तवाक्यविरोधाच्च निवृत्त्युपदेशो वाक्य इति चेत्तत्राह यानीति
शुद्ध्युपरिवाद्दिषयत्वेदोषसंस्कारयतीतरश्चेति निवृत्त्युपदेशानुग्राहकत्वेन स्तुतिकृदाहरणविनाशिवमित्यादिना शुद्धबुद्ध्येस्यासिविष
यत्नोसंभवात्सुबुद्ध्युपरिवाद्दिषयबुद्ध्यानवाक्यमवतार्यव्याचष्टे यस्मादित्यादिना उक्तमेव स्फुटयन्नास्पष्टयति दृष्टेति विवेकवैराग्याभ्या

वि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ० नं०
१२५

षणाभ्यो व्युत्थाय स्थित्वाचार्येभ्यः कर्मसंन्यासेन निःशेषं कृत्वा बाल्येन तिष्ठासेदिति व्यवहितेन संबंधः पांडित्यं निर्विद्येत्येतेनैव व्यु-
त्थाने विहितमित्याह एषणेति नहि पांडित्यमेषणाभ्यो व्युत्थानस्यावसाने संभवति तदर्वाग्व्युत्थानविधिरित्यर्थः तदेव स्फुटयत्येषणात्या-
दिना नासंतिरस्कारेण पांडित्यं निर्विद्येत्यत्र तेभ्यो व्युत्थानविधानमुचितमित्यर्थः विनापि व्युत्थानेन पांडित्यसंभवाद्विच्छिन्नमिति चेन्नेत्याह
नहीति पांडित्यं निर्विद्येत्यत्र व्युत्थानविधिमुक्तमुपसंहरति इत्यात्मज्ञानेनेति नहि किमिति विहित्वा व्युत्थायेत्यत्र व्युत्थानेन विधिरनु-
पगतस्य वा ह आत्मज्ञानेनेति आत्मज्ञानेन व्युत्थानस्य समानकर्तृत्वेक्त्वा प्रत्ययस्योपादानमेव लिंगभूतमाश्रुतिस्तयाह दृढीकृतं नियमेन प्रा-
प्तिं व्युत्थानमित्यर्थः बाल्येनेत्यादिवाक्यमुत्थाप्य व्याकरोति तस्मादिति विवेकाद्विशदे एषणाभ्यो व्युत्थाय पांडित्यं संपाद्य तस्मा-
त्पांडित्यात् ज्ञानबलभावेन स्थातुमिच्छेदिति योजनाकेयं ज्ञानबलभावेन स्थितिरित्याशंक्य तां व्युत्पादयति साधनेत्यादिना विहायेति
विवेकिनो किः यथोक्तबलभावाद्वहेभेकरणानां विषयपारवश्यनिवृत्त्या मुमुक्षस्यापि तत्पारवश्यनिवृत्तिः फलतीत्याह नहीति उक्तमे-
वार्थं व्यतिरेकमुखेन विशदयति ज्ञानबलेति ननु यद्यपि ज्ञानस्य बलं कीदृगिति तन्नायतेनत्याह बलनामेति बाल्यवाक्यार्थमुपसंहरति त-
स्मात् यथा ज्ञानबलेन विषयाभिमुखी दृष्टिस्तिरस्क्रियते तथेति यावत् आत्मना तद्विज्ञानातिशयेनेत्यर्थः वीर्यं विषयदृष्टितिरस्करणसा-
मर्थ्यमित्येतत्तद्बलहीनेन विषयदृष्टितिरस्करणसामर्थ्यरहितेनायमात्मा न लभ्यो न प्राप्यः साक्षात्कर्तुमित्यर्थः बाल्येनेत्यादिवाक्यमा-
दाय व्याचष्टे बाल्येचेति पूर्वोक्तयोस्तत्रयहेतुत्वद्योतनार्थो यश्शब्दः तदेवोपपादयत्येतावदिति च वाक्यांतरमुत्थाप्य व्याकरोत्यमौनं चे-

१२५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ण्यादिना मौनामौनयोर्ब्राह्मण्यं प्रतिसामग्रीत्वद्योतकोऽथशब्दः ब्राह्मणमुपपादयति आत्मा इति आचार्यपरिचर्यापूर्वकं वेदान्ता
नां तात्पर्यावधारणं पाण्डित्यं गुरुकृतो नाम बहिःष्ठितिरस्कारो बाल्यम् अहमात्मा परं ब्रह्म न मत्तोऽन्यदस्ति किंचनेति मननं सैवात्मानुसंधानं मौनमब्रा
वाक्यावगतिर्ब्राह्मण्यमिति विभागः प्रागपि प्रसिद्धं ब्राह्मण्यमिति चेत्तत्राह निरुपचरितमिति ब्रह्मविदः समाचारं पृच्छति स इति
ब्रह्मनिष्ठस्तस्याचरणमित्युक्तमस्त्वाह येनेति अकलङ्कलक्षणं कृतकृत्यत्वं स्वात्मावस्थितं चरणमित्युक्ता ब्रह्मविदो यथेष्टचेष्टाभीष्टा स्यात्तथाच
यद्यदाचरति श्रेष्ठ इति स्मृतेरितरेषामप्याचारेऽनादरः स्यादित्याशङ्क्याह येन केनचिदिति विदितसमाचरणानि निषिद्धवत्त्यजतः शुद्धबुद्धेः
श्च तादृशात्मस्पर्शी स्याद्यते तस्य च वासनावशात्स्वावस्थितैव चेष्टा नास्वावस्थितेति न यथेष्टाचरणप्रयुक्तदोष इत्यर्थः अतोऽन्यदित्यादि
व्याकरोत्यत इति स्वप्नेत्यादि बहुदृष्टान्तोपादानेन दार्ष्टान्तिकस्य बहुरूपत्वद्योतनार्थं अतोऽन्यदिति उक्तो विशेषणमित्याशङ्क्याह ब्रह्मैवेति
ब्राह्मणं ॥ ५ ॥ इदं ब्राह्मणयोरात्मनः सर्वान्तरत्वमुक्तं तन्निर्णयार्थमुत्तरब्राह्मणत्रयमिति संगतिमाह यत्साक्षादिति उक्तमेव संब
द्धं विवृणोति पृथिव्यादीनीति ग्रन्थबहिर्भावेन स्थूलसूक्ष्मस्य तारतम्यक्रमेणेत्यर्थः बाह्यं बाह्यमिति वीप्सोपरिष्टान्नकुद्योऽद्भ्यो यतः
दोर्नित्यसंबन्धात् निराकुर्वन्नाह अश्वदः सर्वान्तरमात्मानं प्रतिपद्यते तथा सत्ययोगः विशेषणादर्शयितव्यमस्त्वन्तरं ग्रन्थारंभ इति योज
ना कहोलप्रश्ननिर्णयानन्तर्यमथशब्दार्थः यस्मात्पार्थिवं धातुजातं तदिदं सर्वमप्स्वित्यादि योजनीयं परार्थमुक्त्वा वा कार्यमाहाद्भिरिति
पार्थिवस्य धातुजातस्याद्भिरोतप्रोतत्वाभावे दोषमाहान्यथेति किमत्र गार्गी विवक्षितमिति तदाह इदं तावदिति तदेव दर्शयितुमाभिमाह

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा॰टी॰
१४०

यत्कार्यमिति कारणेन व्यापकेनेति शेषः यत्कार्यं तत्कारणेन व्याप्तं यत्परिच्छिन्नं तद्व्यापकेन व्याप्तं यच्च स्थूलं तत्सूक्ष्मेण व्याप्तमिति ।
त्रिप्रकारा व्याप्तिरिति शास्त्रस्य तात्पर्यार्थः व्याप्तिभूमिमाह यथेति संप्रत्यनुमानमाह तथेति पूर्वं पूर्वमित्यबाधे धर्मिणो निर्देशः उत्त
रेणोत्तरेण वाय्वादिना कारणेनापरिच्छिन्नेन सूक्ष्मेण व्याप्तमिति शेषः विमतं कारणेन व्यापकेन सूक्ष्मेण व्याप्तं कार्यत्वात्परिच्छिन्न
त्वात्स्थूलत्वाच्च पृथिवीवदित्यर्थः सर्वान्तरादात्मनोऽर्वागुक्तन्यायेन सर्वत्र संचारयतीत्येषेति ननु तद्व्यापिभूतपंचकव्यतिरिक्तानां गंध
र्वलोकादीनामप्यन्तरत्वेनोपदेशात्कथं भूतपंचकमुद्दासेन सर्वान्तरप्रतिपत्तिर्विवक्षितेति तत्राह तद्वेति उक्तरीत्या प्रश्नार्थे स्थिते स
नीति यावत् भूतात्मस्थितिनिर्धारणे वा समसमीक्ष्य परमात्मानं भूतानि च हित्वा पृथगेव गंधर्वलोकादीनि वस्तुत्वेन ताभिविच्छति नेत्य
त्याह तद्वेति गंधर्वलोकादीन्यपि भूतानामेवावस्थाविशेषास्ततः सत्यं भूतपंचकं तस्य सत्यतरं ब्रह्म नान्यदंतराले प्रतिपत्तव्यमित्य
र्थप्रतिषेधार्थौ च शास्त्रे तात्पर्यमुक्ता प्रश्नसूत्राण्यनन्तरहत्तराणि व्याकरोति कस्मिन्नित्यादिना कस्मिन्नु खल्वा वायुरित्यादावुक्तन्यायम
तिदिशत्येवमिति वाय्वादिव्यपदुक्ता प्रत्यक्षेरपामग्निकार्यत्वात् ग्रावितिवक्तव्यत्वादिविप्रकृते नन्विति अग्नेरुदकव्यापकत्वेपि काष्ठवि
शुद्धादिपारतंत्र्यात्तेजसा केन चिरपां व्याप्तिर्वक्तव्येत्याशंक्य हित्वा तत्कारणो वायुर्विवक्षितो वायोश्च स्वकारणं तेजस्त्वेपि नोदकं तेजोतेनिन
व्यापकत्वासिद्धिरित्युत्तरमाह नैष दोष इत्यादिना अन्तरिक्षलोकशब्दार्थमाह तान्येवेति प्रजापतिलोकशब्दार्थं कथयति विराडिति
अन्तरिक्षलोकादीनां प्रत्येकमेकत्वात्कुतो बहुवचनमित्याशंक्याह सर्वत्रेति एवं वदतनुमानेन सूत्रं परस्तं तु गार्गी प्रतिषेधति सहोवाच ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चेत्यादिना उक्तमेवस्पष्टयत्वाकार्यमाहागमेनेति प्रतिषेधातिक्रमेदोषमाह एकंत्वाहेति मूर्द्धपातप्रसंगंप्रकटयन्प्रतिषेधमुपसं
हरति देवतायाइत्यादिना ॥ ब्राह्मणं ॥ सर्वस्मिन्ब्राह्मणेस्तात्पर्यवान्मनेनव्यापकसूत्रमिदानींसंचेतरंतर्यामिणंचनिर्वक्तुमनंतरब्रा
ह्मणमितिसंगतिमाहइदानीमिति ब्राह्मणतात्पर्यमुक्त्वाख्यायिकातात्पर्यमाह तद्भागमेनैवेति आचार्योपदेशो ह्यागमशास्त्रार्थः गा
र्ग्यः मूर्द्धपातभयादुपरतेरनंतरमित्यत्रशास्त्रार्थः सोब्रवीदिति प्रतीकोपादानेनतस्यतात्पर्यमाह सूत्रेति इतिशास्त्रार्थमाहैवमिति नाथं।
वेत्यादि उक्तः प्रकारः स लोकोऽयं च वेत्थेति संबंधः विशेषणांक्रिसर्वकं तानेवलोकानत्रवदति भूतानीति सब्रह्मविदित्यादिनोक्तं सेति
पति सर्वंचेति तथाभूतंसूत्रेणविधृतमंतर्यामिनंच नियम्यमानमितियावत् सूत्रतत्स्तुतिप्रयोजनमाह इत्येवमिति भवतेवंतवसत्यादि
तानेममकिमायातमित्याशंक्याह तच्चेदिति किंतेनेत्यत्रतस्येत्यध्याहारः कार्यंणदर्शयेत्सूत्रंविद्वाणोति यदीति याज्ञवल्क्योक्तेस्तात्पर्य
माह ब्रह्मलोकाइति इत्यभीष्टमागमविदामित्याह त्वाद्यसेतिप्राह स्याज्ञनाप्रश्नांतरस्त्रविषयंगौतमवाक्यंवेशास्त्रार्थमाह सत्य
दिति तत्स्वतेहृष्टांतमाहाकाशवदिति वायुमेवविशिनष्टि यदात्मकमिति पंचभूतानिदशबाह्यानींद्रियाणिपंचवृत्तिः प्राणश्चतुर्विध
मंतःकरणमितिसप्तदशविधत्वेकर्मणांवासनानांचोपरक्षितेलिंगप्राणिभिरर्जितनामान्यपत्वादपेक्षितमेवलिंगमित्याह कर्मेति
तस्यैवसामान्यविशेषात्मनावबद्धरूपत्वमाह यत्तदिति तस्यैवलोकपरीक्षकप्रसिद्धत्वमाह यस्येति तस्यसूत्रत्वंसाधयति वायुनेति प
सिद्धमेतत्सूत्रविदामितिशेषः लौकिकीप्रसिद्धिमेवप्रश्नपूर्वकमनंतरश्रुत्यवष्टंभेनसंपादयति कथमित्यादिना उक्तमेवदृष्टांतेनव्यन।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं॰

किं सर्वेत्यादिना वाक्ययोः सर्वत्वे सिद्धे फलितमाहानेनेति नियन्तृत्वस्य लौकिकनियन्तृवत्कार्यकरणवत्त्वमाशंक्याह यस्येति पृथिव्याः श
रीरत्वमेव न तु शरीरत्वमित्याशंक्याह पृथिवीति पृथिव्येवायतनं करणं तद्देवतास्य करणं चेति योजना कथं पृथिव्याः शरीरेन्द्रियवत्त्वं तदाह स्व
कर्मेति तद्देवतादेहत्वं तत्रेण स्फोरयति यश्चेति यः पृथिवीमित्यादिवाक्यतात्पर्यमाह देवतेति तत्र वाक्यमवतार्य व्याचष्टे य ईदृश इति नियम
पृथिवीदेवताकार्यकरणाभ्यामेव कार्यकरणवत्त्वमीश्वरस्येति पृथिवीपर्याये दर्शितं न्यायं पर्यायान्तरेष्वतिदिशति समानमिति सर्वत्र प्राणादौ
तिष्ठंस्तस्यामीशितृत्वात्मेति संबन्धः वाक्यान्तरमवतार्य व्याचष्टे कस्मादित्यादिना यथा मनसि नियन्तृत्वादि अपि संनिधानाद्दृष्टं तेनेति षा
वृत नवेति एवं सर्वमोक्तिः अन्वयव्यतिरेकाभ्यामतोऽन्य इत्युक्तं पदार्थान्व्याकरोत्यत इति अन्योऽद्रष्टा नास्तीति संबन्धः एष त इत्यादिवाक्यस्या
र्थमाह यस्मादित्यादिना ॥ ब्राह्मणं ॥ पूर्वस्मिन्ब्राह्मणे सूत्रान्तर्यामिणोः प्रश्नप्रत्युक्तिभ्यां निर्द्धारितो सोऽयं प्रस्तुतब्राह्मणतात्पर्यमाहानः पर
मिति सोपाधिकवस्तुनिर्धारणानन्तर्यमथशब्दार्थः ननु यस्माद्याज्ञवल्क्यं गार्गी सर्वं वृत्तपरत्वात्तस्य तदवस्थानात्मकं पुनः सा प्रष्टुं प्रवर्तते तत्राह
सर्वमिति हेतोरसम्भवमाह यदीति नवैजात्विति प्रतीकमादाय व्याचष्टे कदाचिदित्यादिना अन्वयं दर्शयितुं कश्चिदिति विधिलिङ्कि संधीयते
सउत्थातेति प्रोक्तः प्रश्नयोरवस्थप्रश्नत्रयाणामेव हि प्रश्नत्वाङ्गीकारो देवेरित्याह ब्रह्मविदेति सूत्रस्याधारे पृष्टे किमिति सर्वं जगदव्याकृते तेन
ग्राह तत्सर्वमिति एवंविधं सर्वं जगदात्मकमिति यावत् यथा प्रश्नप्रत्युक्तिमात्रे नेह होवाचेति तत्राव्याचष्टे यदेतदिति यज्जगद्व्याकृतं सूत्रा
त्मकमेतद्व्याकृताकाश एवेत्याह इति संबन्धः त्रिष्वपि कालेष्विति यदूर्ध्वं तद्व्यावृत्तमनाविति वक्ष्यमाणं वाक्यमन्यदिमुच्यते तदेव प्रश्नप्रतिवा॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वचनरूपमनुवदति साक्षेति श्रुवत्केरकिंचित्करत्वं व्यावर्तयन्मुक्तमेवेति यतिवचनानुवादतात्पर्यमाह सामर्थ्येति अश्वाभिधानं प्रकरणान्त
काशमेवेति अप्रतिपन्निर्विषयतिपत्तिश्रुतेर्दोषद्वयं सामान्येनोक्तं विशेषतोऽज्ञातं रचयति किंतदिति अश्वत्वादिवाक्यमवतात्पर्यं व्याकरोत्येवमित्या
दिना यदेवेत्यादिनोपमित्यादिस्फूर्तिमात्रमित्याद्याशयइति अशाब्दविशेषणेनापणविशेषणमपउनहक्लिमाशंकाज्ञापितकइति अमावमि
तिमात्रमेवायत्वयोनिराक्रियते नमेव्यासोक्तिः संपिंडितमर्थमाह सर्वेति तदुपपादयन्नेकमिति अथ यथोक्तयारीत्याक्रमेवावतारितवे
ज्ञापितेवक्तव्याभावादुक्तदोषद्वयोद्धृतेस्तिलत्राहानेकेति यदस्ति तत्सविशेषणमेवेति लौकिकीवृद्धिः आशंकानेनास्य तदंरं निर्विशेषणमिति
दोषः प्रतियोगिनि जगत्कारणे परस्मिन्ननुमानसिद्धे विवक्षिते निरुपाध्यत्वरेखस्यति जगत्कारणत्वस्योपलक्षणतयाजन्मादिसूत्रेस्थितत्वादु
पलक्षणद्वारकस्वरूपलक्षणप्रवृत्तेरेतद्योगिनिलप्तुमारब्धत्वेऽपि उक्तेनिभावः अनुमानस्कत्वदपि व्याकरोति यद्येतदिति प्रशासने
सूर्याचंद्रमसौ विधृतौ स्यातामिति संबंधः उक्तमर्थं दृष्टान्तेन स्फोरयति यथेति अत्रापि एवं वदन्वयः जगद्व्यवस्थाप्रशासितृत्वविकाव्यव
स्थात्वाज्जगद्व्यवस्थावदित्यर्थः सूर्यांमसावित्यादौ विवक्षितमनुमानेनाह सूर्येत्यादिना तादर्थ्येन लोकप्रकाशार्थत्वेन प्रशासितृत्वानि
मितावितिसंबंधः निर्माणविशिष्टविज्ञानवत्वमाचष्टे तद्विधेयमानेति सूर्याचंद्रमसोर्नक्षत्राणां च विमलो विशिष्टविज्ञानवता निर्मितौ प्र
काशत्वात्प्रदीपवदित्यर्थः विमतौ नियंतृ एवं कौ विशिष्टचेतनवत्वात् [illegible] इत्यभिप्रेत्याह विधृताविति प्रकाशोपकारकत्वेन जनक
त्वेन निर्माणविशिष्टविज्ञानसंभावनार्थं साधारणेति विशेषणं साधारणः सर्वेषां प्राणिनां यः प्रकाशः तस्य जनकत्वादिति यावत् दृष्टान्ते लो

वे.सू.
CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रानं०
१४२

किंच विशेषणं प्रासादादिविशिष्टदेशनिविष्टत्वसिद्ध्यर्थं अनुमानफलमुपसंहरति तस्मादिति विशिष्टचेष्टावत्त्वादित्युपदिष्टे हेतो
स्पष्टयति नियतेति नियतौ देशकालौ नियतं च निमित्तं यस्याः एतद्दृष्टं तद्दैतोऽसूर्याचंद्रमसावुद्यतावस्तं यतौ च येन विधृतावुदयास्तमया
भ्यां वृद्धिह्रासाभ्यां च वर्तेते उदयश्चास्तमयश्च उदयास्तमयं वृद्धिश्च ह्रासश्च वृद्धिह्रासौ तयोरिति निर्देशः शरीरत्वादिवचने एवंकर्तृत्वेन विधारयितव्ये
नचेत्यर्थः विमतेषु प्रयत्नवत्ताधृतेष्वावयवत्वेऽपि स्फुटितत्वात् गुरुत्वेऽपि पातित्वात् संयुक्तत्वेऽपि विभक्तत्वाच्चेतनावत्त्वेऽपि स्वतन्त्रत्वाच्च हस्तन्यस्त
पाषाणादिवदिति द्वितीयपर्यायस्य तात्पर्यमाह सावयवत्वादित्यादिना किमित्येतस्य प्रश्नस्य द्यावापृथिव्यौ वर्तेते तत्राह कतरेति पृथि
व्यादिव्यवस्था नियंतारं विना अनुपपन्ना तत्कल्पिकेत्यर्थः तथापि किमित्येते विधृते द्यावापृथिव्याविति तत्राह सर्वमर्यादेति एष सेतुर्विधर
ण इति श्रुतं तत्तरमाश्रित्योपकल्पितमाह द्यावा तोनास्पेति द्वितीयपर्यायार्थमुपसंहरति तस्मादिति तत्कर्तृपात्रमपर्यो स्फोरयन्नप्यव्यभिचारीति अ
व्यभिचारित्वं प्रकटयति चेतनावत्त्वमिति पृथिव्यादेर्नियतत्वमेतत्क्षार्थः नियेरसिद्धावपि कथमीश्वरसिद्धिरित्याशंक्याह येनेति
उग्रत्वं पृथिव्यादेः तेन नावदृष्टिमानि देवतावत्त्वेन स्वातंत्र्यं येन स्वस्तभितं येन नाकः यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम
सत्वहिरण्यगर्भोऽधिष्ठातेश्वरः पृथिव्यादेर्नियन्तोच्यते न हि हिरण्यगर्भमात्रस्यास्मिन्प्रकरणे सर्वोपरं ग्रंथ्ययोरुच्यमानेन निरंकुशं सर्वनियन्तृत्व
संभवतीति भावः एतेन कालावयवविधृतास्तिष्ठंतीति संबंधः तत्राप्यनुमानं वक्तुं हेतुमाह सर्वस्येति यः कलयिता स नियंतृपूर्वकः इति व्याप्तिमू
लिमाह यथेति राष्ट्रीतिकं दर्शयन्ननुमानमाह तथेति निमेषादयोऽनियंतृपूर्वकाः कलयितृत्वात् संप्रतिपन्नवदित्यर्थः कालानवद्यत्वा

१४२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वेदायामाह गंगायामिति अनयापापवर्ज्जितशुभस्य हेमानं लं तत्र देवतानां चैतन्नत्वेन स्थानं तं विमला नियंतृ सर्वका नियतप्रवृत्तित्वाद्द
स्यादिप्रवृत्तिविरतिनिवृत्त्यर्थं पर्यायार्थः नियतप्रवृत्तिमत्वं तत्र देवतादि सिध्यते तच्चेतस्य व्यभिचारितेति किं विमतेति विशिष्टस्थानवदालके कर्म
फलत्वात्सेवाफलवदित्यभिप्रेत्य पंचमपर्यायमुत्थापयति किंचेति दाता प्रतिग्रहीता दानेऽपि च वा फले दास्यति किमीश्वरेणेत्याशंका
ह नचेति दात्रादीनामिहैव प्रत्यक्षेणानायोग्यत्वेनेनत्यमुपस्पृश्य दृष्टउपभोगो नकश्चिदस्तीत्यर्थः अदृष्टं उपहारार्थं प्रत्याहारे दृष्टेति
समागमः फलप्रतिलंभः स चैहिको न भवति किं तु पारलौकिकस्य याचनामात्रेणैव विनष्टदात्रादिसंग्रहः संभवतीत्यर्थः तर्हि फल
दातरभावात्स्वार्थे स्वार्थंशो हि मूल्वेनेति न्यायादात्मप्रशंसैव माभूदित्याशंक्याह तथापीति फलसंयोगादृष्टेरेतमाह प्रमाणत्वेति
हिरण्यदानप्रभृतत्वं यजेतेत्यादिप्रमाणं तथापि कथमीश्वरसिद्धिः तत्राह कर्त्रेति तर्हि दातृप्रशंसनेविशिष्टनियंतृपर्यवसानमुपपद्येत
तेकल्पकमित्यर्थः दानक्रियावशादेव तत्फलसिद्धौ कृतं नियंत्रेति चेत्तत्राह दानेति कर्मणः क्षणिकत्वे फलस्य च कालांतरभावित्वा
त्तत्साधनत्वोपपत्तिरित्यर्थः अनुमानार्थापत्तिभ्यां सिद्धमर्थमुपसंहरति तस्मादिति अदृष्टवशेनैव फलदातृत्वात् [दत्त] मीश्वरेणेति शंकते
अदृष्टमिति चेदिति स्वयमचेतनं चेतनानधिष्ठितं चादृष्टं फलदातृ न कल्प्यं प्रमाणिकत्वादिति परिहरति नेति ईश्वरद्वेषी शंकते प्र
माणत्विति सद्भावे प्रमाणत्वोपपत्तिरिति शेषः परिहरति नागमेति कथं कार्यपरस्यागमस्य स्वरूपप्रतिपाद्यशंका शांतोवाचामेति क
र्मविधिर्हि फलदातृत्वे तेनोपपद्यते नच कर्माणि तत्र विनाशिकालांतरभाविफलानुकूलेन दर्थापत्तिसिद्धैरेवैकवाक्यमानात्सिद्धिरिति।

अनुकरणं लोकदृष्ट्या हेः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्यायशंकयाह किंचेति न केवलं सञ्ज्ञावेद्यमात्मत्वमेवापूर्वे दृष्टं किंत्वन्यच्च किंचिदस्तीति यावत् तदेव प्रकटयत्यपूर्वेति अपूर्वं
स्य कल्पनाया यागार्थापत्तिः प्रमाणं तेन तस्याः कल्पितमपूर्वं मंतरेणानुपपत्तेः तस्य स्यादिति योजना अन्यथानुपपत्तिं विवृणोति सेवेति
यागादिफलमपीश्वरात्संभवतीति शेषः कथमीश्वराधीना यागादिफलप्राप्तिः तत्राह सेवायाश्चेति आदिपदेनेंद्रादिदेवताराध्यते
विमता विशिष्टज्ञानवतादीयमानफलवती विशिष्टक्रियात्वात्संप्रतिपन्नवदिति भावः इतश्चापूर्वकल्पनानयुक्तेत्याह दृष्टेति दृष्टे से
व्याधर्मत्वेन सामर्थ्यस्य व्याप्तफलप्रापकत्वेन तत्त्वमूत्यदानादौ फलप्राप्तिसंभवे तन्निरासेनापूर्वाख्यकल्पनान्यायाहृष्टानुसारित्वात्क
ल्पनाया न दृष्टविरोधिकल्पनायोगादित्यर्थः अपूर्वस्य फलहेतुत्वे दोषांतरमाह कल्पनेति तदाधिक्यं वक्ष्यपराभृशतीश्वर इति नापूर्वक
ल्पनेति मतांतरमकल्पनाधिक्यमित्याशंक्याह तत्रेति व्यवहारभूमिः समन्वयार्थः भूमिकां कृत्वा कल्पनाधिक्यं स्फुटयति तत्रेत्यादिना
अपूर्वस्याहेतुत्वे सतीति यावत् इति कल्पनाधिक्यमिति शेषः त्वन्मतेपि तत्त्वाकल्पनेत्याशंक्याह हेत्विति स्वपक्षे धर्मिमात्रं कल्प्यमपरथ
दृष्टधर्मी धर्मश्चेत्याधिक्यं तस्मात्फलमत उपपत्तेरितिन्यायेन परस्यैव फलदातृत्वेति भावः धर्मिणोपि प्रामाणिकत्वेन कल्प्यत्वमित्यभिप्रे
त्याह श्रुतानुमानेति ईश्वरासिद्धेर्हेत्वंतरमाह तथाचेति येदेवा यजमानमन्वायत्ता इति संबंधः जीवनार्थे जीवनेनिमित्तीकृत्येति यावत् दे
वानामीश्वराणामपि हव्यार्थित्वेन मनुष्याधीनत्वाद्धीनवृत्तिभाक्त्वेनियत्कल्पकमित्यर्थः योनकस्यचित्प्रकृतित्वेन विकृतित्वेन
वा वर्तते सदेवतास्तदेवमः ईश्वरासिद्धेर्हेत्वंतरमाह तत्रश्चेति मोहदेवज्ञानविषयत्वेनापि तदस्तीत्याह भवितव्यमिति यदज्ञानान्मुक्तिर्यात

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ज्ञानात्मा निवर्त्तत इत्यर्थः कर्मवशादेव मोक्षसिद्धेरलं ज्ञानविषयत्वेनाहं तेनाभ्युपेयमिति शंकते नचिकेता इति उत्तरवाक्येनोत्तरमा
ह नेत्यादिना यस्माज्ज्ञानात्स्वकृतकर्मविपाकफलान्यपि सर्वाणि कर्माणि संसारमेव फलयन्ति तज्ज्ञानमद्वयं नास्ति मम गुरूक्तं
साराभावप्रसंगादिति भावः श्रुतान्यपि दैवेऽत्वनरमाहात्म्ये चेति एवं वाक्यं जीवदवस्थायां दृष्टविषयमिदं तु परलोकविषयमिति वि
शेषमतोऽनन्तरवाक्यमवतारयन्नाचष्टे नेहेत्यादिना प्रधानवादिनः श्रोकामनृयोत्तरवाक्येन निराकरोत्यन्यत्रेत्यादिना पुरुषाद्वा
स्यतो चेतनत्वमित्याह किंचेति नास्तीत्यन्वयप्रदर्शनमतोऽन्यदिति विशेषणात्सिद्धमर्थमाह नेति अन्यद्वा पूर्वोक्तमव्याकृतादिरू
पं तेनेति गमनवाक्यमुदाहृत्य तस्य तात्पर्यमाह नत्विति परा काष्ठा परं पर्यवसानं तस्मात्तु परिशिष्टाद्विधिष्ठाने किंचिदस्तीत्यर्थः ना
स्त्येव परमपुरुषात्पर्यन्तमाह एवेति पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिरिति दिक् स्यान्तरं ब्रह्म सा स्मादन्यदस्तीति चेन्नेत्याह
न इति तत्र च तत्त्वैस्तस्य स्वस्य ब्रह्मव्याख्यातं श्रुतं तेनैवमिति चेन्नेत्याह तत्स्थितिमाहेरिति किं तद्वचनं तदाह तदेवेति बहुमानवि
षयत्वेन वस्तुत्वदिति किं तदिति यदात्ममहत्त्वं वचनेन तदेव बहुमानयोग्यमित्याह यदिति तथा करोत्यस्मा इति नमस्कारे कृत्वास्मादन्तो प्रा
प्तेर्निशेषः तदेवेति प्राथमिकवचनात्किः किमिति हितीयं एवं वचो बहुमन्यामहे नेदं तु न विमध्यामा इनेत्याह नयत्विति नन्वप्रश्नपूर्वं
के एवोक्तमेव बहुमानविषयभूतेन वाक्यमवतारयन्नाचष्टे कस्मादित्यादिना परानिमित्तयायागार्त्यावचोनोपादेयमित्याशंक्याह प्रश्नो चेदि
ति ननु प्रश्नमिति यायानन्तस्य सम्यक्त्वं प्रतिपद्यमानस्य निरितिनेवोक्तेत्यर्थः ॥ अन्तर्यामीति तेजसो हृदं रस्येति गामवानरविशे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं.
२४४

चपरदर्शनार्थं प्रकृतत्वं दर्शयन्नंतर्यामीति तत्रांतर्यामिणः प्रकृततत्वं प्रकटयति यमिति तेनतस्य प्रकृतत्वं स्फुटयति येचेति अव
रस्य प्रस्तुतत्वं प्रत्याययति यश्चेति सर्वेषां विषयाणां दर्शनश्रवणादिक्रियाकर्तृत्वेन चेतनाधातुरिति यत्तद्भ्यां रश्मिकस्मिन्न्वयः तेषु वि
चारमवतारयति कस्त्विति तस्मिन्विचारे स्वरूपम् अनतश्रुत्याप्ययति नचेति तेनतस्याप्रस्तुतत्वशंकां वारयति यस्तमिति यथा परस्मा
त्मनोंतर्यामी जीवस्तस्य च स्वदेहकल्पने तथा तस्यैवान्याः पंचावस्थाः पिंडो जातिर्विराट्सूत्रं दैवमिति सेवंतत्त्वमहाभूतसंस्थानभेदेन
कल्पयंतीत्याह तथेति उक्तरीत्या कल्पनायां पिंडो जातिर्विराट्सूत्रं दैवमव्याकृतं साक्षी तेनतस्य षडवस्था ब्रह्मणो भवंतीति वदंतः
कल्पयंतीति संबंधः अवस्थापदतदुक्ताशक्तिपदं समाहृत्यरति तच्छब्देनावयवपदं दर्शयन् विकारपदं निर्दिशन्व्याचष्टे विकारेति तत्र पदद्व
येशब्याहावस्थेति अंतर्यामिप्रभृतीनामिति शेषः तस्य संसारिकधर्मातीतत्वश्रुतावपि कथमवस्थावत्त्वं शक्तिमत्त्वं वानसिद्ध्यतीत्या
शंक्याह नहीति अवस्थिरूपतद्वयनिराकरणप्रागेव प्रत्तंतस्मारयति विकारेति परपतनिराकरणमुपसंहरति तस्मादिति परकीय
कल्पनासंभवेऽप्यकृति कल्पहीति उत्तरमाहोपाधीति आत्मनिस्वतो विशेषाभावे हेतुमाह सैंधवेति तत्रैव हेत्वंतरमाहार्ष्वमिति बाह्य।
कार्यमाभ्यंतरं कारणं ताभ्यां कल्पितान्यां स्वहाधिष्ठानत्वेन समासस्फुरितं प्रदत्तयावर्त्तते ब्रह्मस्वभावतत्त्वं तस्मादि सर्वविक्रियाशून्यं कू
टस्थं तदित्यापर्वणाश्रुते रर्थः आत्मनिस्वतो विशेषायोगे फलितमाह तस्मादिति निरुपाख्यत्वं वाचां मनसां वा गोचरत्वं तत्र निर्विशे
षत्वमेकत्वं देहेन निरुपाधिकस्येति निर्विशेषत्वं प्रमाधितमुक्तं तत्र चवीप्सावाक्यं प्रमाणं कृतं कथं उत्तरे वेविधस्यवस्तुनः संसारित्वं वदा।

२४४

द्वाविंशेति तैर्विशिष्टं यत्कार्यकरणं तेनोपाधिनोपहितः परमात्मा जीवः संसारीति व्यपदेशभाग्भवतीत्यर्थः तथापि कथं तस्यांत
र्यामित्वं तत्राह नित्येति नित्यं निरतिशयं सर्वज्ञप्रतिबद्धं ज्ञानं तस्मिन्सत्वपरिणामे सत्वप्रधाना मायाशक्तिरूपाधिस्तेन विशिष्टः स्वात्मा
सर्वान्तर्यामीति चोच्यत इत्यर्थः कथं तर्हि तस्मिन्ब्रह्मत्वशास्त्रप्रवृत्तिस्तत्राह स एवेति निरुपाधित्वशुद्धत्वे हेतुः केवलत्वमद्वितीयत्वे तथापि
कथं तत्र हिरण्यगर्भादिशास्त्रप्रवृत्तिरित्याशंक्याह तथैवेति यथैकस्मिन्नेव परस्मिन्नात्मनि कल्पितोपाधिप्रयुक्तं नानात्वं तथा तद्जनितत्वे
जनीत्यादिवाक्यमाश्रित्य शौगेणोक्तमित्याह तथैवेति कल्पनया परस्मिन्नानात्वं वस्तुतस्त्वेकरसमस्मिन्नत्र श्रुती उदाहरति तथैत्यादिना
ध्रुवस्य शक्तिविकारावयवप्रतिबिंबपि यथोक्तश्रुतीनामुपपत्तिमाशंक्याह कल्पनांतरेष्विति औपाधिकोंतर्याम्यादिभेदो न स्वाभाविक
इत्युपसंहरति तस्मादिति स्वतो वस्तुनि नास्ति भेदः किंत्वेकरस्यमेवेत्यत्र हेतुमाह एकमिति ॥ ब्राह्मणं ॥ ब्राह्मणांतरस्यापयस्ये
ति गार्गिप्रश्ने निर्णीते तयोर्ब्रह्मवटनेपत्येतस्मान्नास्तीति सर्वोन्मुतिकथनानंतरमित्यर्थमाहार्थः संगतिवक्तुं रूपमेकीनयति पृथि
व्यादीनामिति यस्मात्तादित्यादि प्रस्तुत्य सर्वांतरत्वनिरूपणद्वारा सात्त्वादिकमार्थिकं ब्राह्मणत्रये निर्दिष्टमित्यर्थः अंतर्यामिब्रा
ह्मणे पुनस्तेनो निर्दिष्टमर्थमनुवदति तस्यचेति नामरूपाभ्यां व्याकृतो विषयो द्वैतप्रपंचस्तत्र तस्य भेदाये पृथिव्यादयस्तेषु नियमो श्रुति
यंतृत्वं तस्योक्तमिति योजना किमिति व्याकृतविषये नियंतृत्वमुक्तं तत्राह व्याकृतेति तत्र द्विपरतेत्रस्य पृथिव्यादेर्ग्रहणान्नियम्यत्वस्पष्टत
रत्वेंगमिति तत्रैव नियंतृत्वमुक्तमित्यर्थः वृत्तमनूद्योत्तरस्य ब्राह्मणस्य तात्पर्यमाह तस्यैवेति नियंतव्यानां देवतानां भेदानां ग्रहणं तः संको

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वोविकाशस्थानेत्यपर्यंतेन तद्ब्राह्मणप्रकृतस्यैव ब्रह्मणः साक्षादपरोक्षात्त्वेन पृष्ठनेतिनेत्यात्मेत्यादिनाधिगंतव्येऽस्तीति कृत्वा प्रथमं देवता।
संकोचविकाशोपाधिद्वारेणैव वस्तुनिर्देशः स्यादित्येतदर्थमेतद्ब्राह्मणमित्यर्थः ब्राह्मणारंभमेवमुक्त्वा तदक्षराणि व्याकरोत्यथेत्यादिना निवि
दिश्यं येनेलावेनो देवा इत्यत्र संबंधः केयं निविदिति शंकते निविन्नामेति उत्तरमाह देवतेति पदार्थमुक्त्वा वाक्यार्थं कथयति तस्यामि
ति यद्यपि भाष्ये निविज्ञाख्योलानत्थापि प्रश्नद्वारा कृत्वा तां व्याख्याति काप्युनरित्यादिना अनुज्ञावाक्यं व्याकरोत्येवमिति मध्यमांख्या
ख्याधिकत्रिशताधिकत्रिसहस्रलक्षणा कत्येवेत्यादि प्रश्नानां एवं प्रश्नेन पौनरुक्त्यमाशंक्य परिहरति पुनरित्यादिना कतमे ते [illegible] त्रयस्त्रिंशेत्या
दिप्रश्नस्य विषयभेदं दर्शयति देवतेति कति तर्हि देवा निविदि भवंतीत्याह परमार्थतस्त्विति यद्यपि शतो देवानां स्वरूपं प्रश्नद्वारा निर्द्धारय
ति कतमे त इति उत्तरप्रश्नप्रपंचकप्रतीकं गृहीत्वा तस्य तात्पर्यमाह कतम इति तेषां वस्वादीनां प्रत्येकं वस्वादिरूपेण प्रतिगणनमिह प्रजाप
तौ चैकैकस्येत्यर्थः तेषां वसुत्वमेतेषु हीत्यादि वाक्यावष्टंभेन स्फुटयति प्राणिनामिति तेषां कर्मणां तत्फलस्य चाश्रयत्वेन तेषामेव निवा
सत्वेन च शरीरेंद्रियसंघाताकारेण विपरिणमंतो ग्रामाह यो जगदेतद्वासयंति स्वयं च तत्र वसंति तस्माद्युक्तं तेषां वसुत्वमित्यर्थः वसुत्वं निगम
यति ते यस्मादिति प्राणग्रहणार्थमाह कर्मेति ते यदास्मादित्यादि वाक्यमनुसृत्य तेषां रुद्रत्वमुपपादयति ते एते प्राणा इति मरणकालं स
मर्थ्यः तेषामादित्यत्वमप्रसिद्धमिति शंकते कथमिति एते हीत्यादि वाक्येनोत्तरमाह तेते हीति प्रसिद्धं वस्तु अनुवर्तयति वीर्यमिति तदे
वसंतानं निघ्नत्वेन स्फुटयति बलमिति किं तद्बलमिति चेत्तत्राह यत्प्राणिन इति प्रमापणं हि सनेकधा तस्येंद्रत्वमुपचारादित्याहेंद्रस्य।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रीति पञ्चत्वं यज्ञत्वप्रसिद्धमित्याशंक्याह यज्ञस्यहीति कारणे कार्योपचारं साधयति यज्ञस्येति अमूर्त्तत्वात्तत्साधनव्यतिरि
क्तरूपाभावात् यज्ञस्य पशुसाध्यत्वाच्च पशवो यज्ञ इत्युच्यत इत्यर्थः पञ्चेहीति श्रुतीकमादाय व्याचष्टे यस्मादिति यच्चयस्मिंश्चादायुक्ते
तत्सर्वमेतत्पंचयस्मात्तस्मादेतेषु भवतीति योजना अष्टसार्थमुक्त्वावाक्यार्थमाह सर्वोहीति प्रतिज्ञासमासाविति शब्दःतत्र रे
तेषुहीति वेदलक्षणकृता केषांचिद्विषयतो दर्शितो लोकास्तथा लोकान्तरस्य स्पष्टप्राधान्यानुलार्थ इत्याह इत्येवइति एकस्याध्यर्द्धत्वमा।
हिपति तद्वेति इत्यपहृत्त्वकथमित्यत्र संबध्यते परिहरति यदस्मिन्निति प्राणस्य ब्रह्मत्वं साधयति स एवेति तेन महत्त्वेनेति यावत्
तस्य परोक्षत्वप्रतिपत्त्यै प्रयत्नगौरवादर्थकथयति त्यदित्तीति उक्तमर्थप्रतिपत्तिसौकर्यार्थं संगृह्णाति देवानामिति एकत्वप्राणेपर्य।
वसाने नानात्वमाने त्यष्ट्रपिकत्रिशताधिकत्रिसहस्रसंख्याकानामेव देवानामवोक्तत्वात् कथं तदानंत्यमित्याशंक्य शतसहस्रपा
ह्याभ्यामनंतत्वायुक्तं वेत्याशायेनाहानंतानामिति एकस्मिन्प्राणे पर्यवसानेयावद्भवति तावत्पर्यन्तमुक्तमेतन्मत्रेषु त्रयस्त्रिंशदादिषु ते
षामप्युत्पत्तिभावइत्याह तेषामपीति प्राणस्यैकस्मिन्नन्तर्भावस्तत्राह प्राणस्यैवेति सहशरीरमर्थयपतंह्ररत्येवमिति एकस्यानेकधा
भावे किं निमित्तमित्याशंक्याह तद्वेति उक्तरीत्या प्राणस्य रूपेष्विति एतत्तीति यावत् देवस्यैकस्यप्रकृतस्यप्राणस्यैवेत्यर्थः प्राणिनां
नानेकर्मणांतदधिकारस्य स्वामित्वस्य भेदोऽधिकारभेदस्तन्निमित्तत्वेन देवस्यानेकस्यानपरिणामसिद्धिः प्राणिनोदिश्यानेकमेवा
नुष्ठायसहंगांशसज्ञानादिरूपमापद्यते तदुक्तं यथायोगं भेदइत्यर्थः संकोचविकाशाभ्यां प्राणस्यरूपोक्त्यानेनरमवसरप्राप्तमितिरितानी

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मित्युच्यते उपदिश्यते ध्यानार्थमिति शेषः अवयवशो वाक्यं योजयति पृथिवीति संपिंडितवाक्यतात्पर्यार्थं कथयति पृथिवीत्या
दिना वैशब्दो वधारणार्थः तं परायणं एवं विजानीयात्स एव वेदितास्यादिति संबंधः अस्य केन रूपेण पृथिवीदेवस्य कार्यकरणसं
घाते प्रत्यगयत्वं तत्राह मातृजेनेति पृथिव्या मातृशब्दवाच्यत्वाद्य एवं देवो रेतः स्थितस्मीति मन्यते स एव शरीरारंभक मातृज कोश
त्रयाभिमानितयावर्तते तथा च तस्य तेन रूपेण पितृजनितत्वं च कार्यलिंगं च करणं प्रत्यगयत्वं संभवतीत्यर्थः पृथिवीदेवस्य पा
रायणत्वगुणप्रधानेन तु वाक्यशुल्यापप्राप्त्य स वै वेदितेति तथापि समकिमायातमित्याशंक्याह याज्ञवल्क्येति सगुरुबोधनेन।
विशेषणेन विशिष्टत्वं हि शेषणं बुध्यमानेन स्तुतिर्विनुत्का तदेवाह यदेवेति शारीरं हि पंचभूतात्मकेन च पार्थिवांशेन जनकत्वेन।
स्थितः शारीर इति यावत् तस्य जीवत्वं व्यावर्तयति मातृजेति पृथिवीदेवस्य निर्णीतत्वात् शंकां वारयति किं चेति याज्ञवल्क्य वक्ता
सन् प्रष्टारं शाकल्यं प्रति कथयेव दैवेति कथयति तत्राह पृच्छेति तो भितस्यामर्षवशगत्वं दृष्टा तस्य तो वेति प्राकरणिकं देवताशब्दा।
र्थमाह यस्मादिति पुरुषो निष्पत्तिकर्मोवघस्योच्यते लोहितनिष्पत्तिहेतुत्वमन्नरसस्यान्वयभवेन साधयति तस्माद्धीति तस्य कार्यमाह
तत्स्त्रेति लोहितात्सहितीयपदार्थनिष्ठानन्तकार्यत्वग्रामरुधिररूपं बीजस्यास्थिमज्जाशुक्रात्मकस्याश्रयभूतं भवतीत्यर्थः पर्यायसम
क्रमाय पर्यायेण तुल्यार्थत्वात्र रूपणाख्याव्याख्यानायेदमित्याह समानमिति उत्तरपर्यायेष्वपि येषां पदानामर्थभेदस्तेषां तत्र कथनार्थं प्रती
के स्फुरतीति काम इति वाक्यार्थमाह कामशरीर इत्यस्यार्थ इति सवहृदयदर्शनो मनसा संकल्पयेनेति पूर्ववत् तस्य विशेषणांतरं दर्शयति

पकस्त्रीशु
रीरनिष्ठात २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यद्येवेति आध्यात्मिकस्य कामभयस्य पुरुषस्य कारणं पृच्छति तस्येति तस्यास्तत्कारणत्वमत्र भवेन्नद्यनक्ति स्त्रीत्येहीति रूपशरीरस्य
वतद्दर्शनस्य मनसा संकल्पयितृत्वेदेवस्य कथमादित्यपुरुषो विशेषणमित्याशंक्याह सत्यमेवेति रूपमात्राभिमानिनो देवस्यादित्यस्य
पुरुषो विशेषणं वक्ष्येदः स च सर्वरूपप्रकाशकत्वात्सर्वैः रूपैः स्वप्रकाशनाधारत्वात्तस्मात्पुरुषं यद्योक्तं विशेषणमित्यर्थः कथं चक्षुषः
सकाशादादित्यस्योत्पत्तिरित्याशंक्याच चक्षोः सूर्योऽजायतेति श्रुतिमाश्रित्याह चक्षुषोरीति तथापीतिश्रोत्रे किंः प्रतिश्रवणं वा
दः प्रतिविषयं श्रवणं वा सर्वो णि श्रवणानि तावद्दशाया मितियावत्तद्दिशस्तत्राधिदैवतमितिश्रुतिमाश्रित्याह दिग्भ्योरीति आ
धिदैवतं पुरुषं रीश्वरोपसृष्टेनेवेदमाप्तं तमासीदिति श्रुतेः स च तस्माज्ज्ञानमयस्याध्यात्मिकस्य पुरुषस्योत्पत्तिकारणमविवेकिप्रवृत्ते
रीश्वराधीनत्वादीश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वेति पठेति तदाह मृत्युरिति पुनरुक्तिं प्रत्याह रूपेमिति आधारशब्दो भावप्रधान
स्तथा च बिंबस्याधारत्वे यत्र तदित्युक्तं भवति आदिशब्देन स्वच्छस्वभावं रत्नादि गृह्यते प्राणेन दिति गृह्यमाणे दर्पणादौ प्रतिबिंबाभि
व्यक्तियोग्यरूपविशेषो निष्पद्यते ततो युक्तं प्राणस्य प्रतिबिंबकारणत्वमित्यभिप्रेत्याह तस्येति आप एव यस्यायतनं य एवायमप्सु
पुरुषस्तस्य भयत्रसामान्यविशेषभावो न प्रतिभातीति शंकमानं प्रत्याह साधारणा इति कथं पुनर्वापीकूपादिविशेषायतनस्य वरुणो देवता
नतिदेवतात्मनो वरुणस्य तदधिष्ठानत्वं तत्कारणत्वं तत्राह वरुणादिति आपो वापीकूपाद्याः पीताः सत्यो ह्यात्मशरीरे मूत्रादिसेचनेऽक्ले
दं तिना च वरुणा इव तिवरुणशब्देनापएव वरस्मिद्वाराभूमिं पतन्तोऽभिधीयन्ते तथा च तापव वरुणात्मिका वाप्या द्यं पापीयमानानाम्

श्रा०वे
१४०

त्वनिकारणमिति उक्तं वक्तृणामवापीतरकाद्यायत्तत्वेनोक्तत्वं प्रतिकारणत्वमित्यर्थः वाक्यद्वयं गृहीत्वा तात्पर्यमाह विशेषेति
पुत्रमयमात्मेत्यर्थं व्याचष्टे पुत्रमयः इति चेति प्रा[illegible]कल्पेतिरेवावेत्यादि श्रेयस्तात्पर्यं वक्तुं दृष्टान्तेकीर्तयत्यपृथ्वेति लोकः सामान्या
कारः पुत्रेषामविशेषावृक्तेरादेवस्तत्कारणमनेनप्रकारेण त्रिधा त्रिधात्मानं प्रविभज्य स्थितो यपकैकोऽदेवउक्तः प्रा[illegible]णएवसत्रात्मा
नद्दैरत्वात्सर्वोक्तस्यसर्वस्य सचोपासनार्थं मनुष्योपदिशेषपत्रादित्यर्थः उत्तरस्य तात्पर्यं दर्शयन्नवतारयति प्रविभक्तस्य जगतः सर्वस्य
तिशोषं आत्मप्राप्तो हृदविषयः यास्तवतत्क्वाकाश्यपशाकल्पोपदृष्ट्यं हृदि सर्वकारित्वापादकत्वं दर्शयति यदेतेति सर्वेषामेव
ब्रात्मणानां प्रायेण हृतकृत्वेन संमतो भवानिति श्रुनेरभिसंहितं शाकल्यस्य कालचोदितत्वान्नरज्वरोधिनीमन्यथा प्रतिपत्तिमेवा
शयचोदयतीत्याह यदिदमिति श्रुतेर्दिग्विषयं ज्ञानं ज्ञानेन तस्मात्स्वीत्यर्थः नत्वविज्ञानेकेवलं दिग्मात्रस्य न भवति किं तद्देवैः प्र
तिष्ठाभिश्च सहितानादिशो वेदेत्याह नद्रेति यत्रवनादितस्य वाक्यस्यार्थं संक्षिपति सप्रतिष्ठमिति प्राच्यां दिशि कादेवतेति वक्तुमेकचममस्याश्च
तेनप्राह सोऽहीति आत्मानमात्मीयमिति यावत् यधोक्तं हृदयमात्मत्वेनोपगम्येति संबंधः तथापि प्रत्यक्षं प्राचीं दिशामधिकृत्य प्रश्ने को देव
शितिचेन्नप्राह एकोऽभिमुख इति यद्यपि दिगात्माहमस्मीति स्थितस्तथापि कथं सर्वं जगदात्मत्वेनोपगम्य तिष्ठतीत्यवगम्य तेनेत्याह सप्रतिष्ठ
ति सप्रतिष्ठा दिशो वेदेति वचनात्सर्वमपि हृदयद्वारा जगदात्मत्वेनोपगम्य स्थितो भूतिरिति प्रतिभातीत्यर्थः प्रतिज्ञातं यशारित्वाद्वायप्रश्नो
क्तिमानित्याह यदेति अहमस्मिदिगात्मेति प्रतिज्ञातं यथारितया पिप्रश्ने देहपातोत्तरभावी देवतभावः एकलेस्मिन्देहे ध्यानवस्त्रज्ञावा योगा

१४०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दित्याशंक्याह सर्वत्रेति इतिनभाविदेवताभावः प्रमाणगोचरइतिशेषः उक्तेर्थेवाक्यशेषमनुकूलयति तथाचेति प्रमाणार्थमुपसंहर
त्यस्मामिति ग्रहित्वस्यचदेवप्रतिष्ठितत्वंप्रकटयितुंकार्यकारणभावेनयोगरशीयमध्यात्मनइति वह्नेः सूर्योरश्मायतेत्याद्योमंत्र
वादाग्नरत्नसाविणिश्चब्राह्मणवादाः भवतुकार्यकारणभावस्तथापिकथंचदेवादित्यस्यप्रतिष्ठितत्वमतआह कार्यदीति कथंचदे
वेरूपेषुप्रतिष्ठितत्वेनत्राह रूपग्रहणायेति तथापिकथंपृथ्वाक्रमाधाराधेयत्वमतआह येहीति चक्षुषोरूपारब्धत्वेफलितमाह
तस्मादिति उपसंहृतमर्थंसंगृह्णाति चक्षुरिति हृदयारब्धत्वंरूपाणांस्फुटयति रूपाकारेणेति हृदयेरूपाणांप्रतिष्ठितत्वेहेतुत्वंतस्मा
ह यस्मादिति हृदयशब्दस्यमांसखंडविषयत्वंव्यावर्तयति हृदयमिति कथंपुनर्बहिर्भूतानिरूपाण्यन्तरेहृदयेस्यात्तेपारयतितत्रा
ह हृदयेनहीति तथापिकथंतेषांहृदयेप्रतिष्ठत्वमतआह वासनात्मनेति शब्दादिकमेवज्ञानमिति दक्षिणायामिति यमस्ययज्ञकार्यत्व
प्रसिद्धमितिशंकित्वासुस्पष्टयति कथमित्यादिना तस्ययज्ञकार्यत्वेफलितमाह तेनेति यज्ञस्यदक्षिणायांप्रतिष्ठितत्वंसाधयति
दक्षिणयेति कार्यंचकारणेप्रतिष्ठितमितिशेषः दक्षिणायाः श्रद्धायांप्रतिष्ठितत्वंप्रकटयति यस्मादिति हृदयेश्रद्धाप्रतिष्ठितेत्यत्र
हेतुमाह हृदयस्येति हृदयव्याप्त्याचश्रद्धायास्तत्प्रतिष्ठत्वमित्याह हृदयेनहीति हृदयस्यश्रद्धाद्वारत्वंतथापिप्रस्तुतेकिमायातंत
दाह चेतिश्रुति रेतसोहृदयकार्यत्वंसाधयति कामइति तथापिकथंरेतोहृदयस्यकार्यंतत्राह कामिनोहीति तत्रैवलोकप्रसिद्धिंप्र
माणयति तस्मादिति अपिशब्दः संभवनार्थः ध्रुवधारणाद्वीचादीनांयोर्मस्यप्रतिष्ठितत्वंप्रसाधयति दीक्षितोदीक्ष्यादिना दी

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्राने
१५८

हायाः सत्यप्रतिष्ठत्वमप्रसिद्धमिति शंकित्वा समाधत्ते कथमित्यादिना प्रतिशब्दोवधारणार्थः सत्यंवदेतिवदतामभिप्रायमा
ह कुर्वतीति येषामर्थो जायाः इति तेषामभिप्राय इति शेषः प्रकृतोपसंहारः सत्येहीति कथं पुनरर्थादिगमवस्थिताध्रुवेत्युच्यते
मेदोष्टिति ततोऽग्रेऽपि वर्णत्वं प्रकटयति ऊर्ध्वायामादीति दिशावेदेत्यादिश्रुत्याजगतो विभागेन पंचधात्वं ध्यानार्थमुक्तं इदानीमुक्तविभा
गवादिन्याः श्रुतेरभिप्रायमाह नवेति यथोक्तं विभागो सतीतियावत् उक्तमर्थं संक्षिपति सर्वत्रइति तत्रावान्तरविभागमाह यद्रूप
मिति प्रायेण यो येन हृदयेन रूपमग्रं पंचोपसंहारो दर्शितः हृदये ह्येव रूपाणीति श्रुतेरित्यर्थः दक्षिणायामित्यादिपर्यायत्रयेणातद्वेवक्र
मेणोपसंहार उक्तः इत्याह यत्केवलमिति यद्धि केवलं कर्मतत्फलादिभिः सह दक्षिणादिदिगात्मके हृद्युपसंह्रियते यज्ञस्य दक्षिणादि
हारात् हृदये प्रतिष्ठितत्वोक्तेर्दक्षिणास्यादिगात्मत्फलत्वात् पुत्रजन्माख्यं च कर्म प्रतीच्यात्मकं तत्रैवोपसंहृतं हृदये ह्येव रेतः प्रतिष्ठितं
मिति श्रुतेः पुत्रजन्मनश्च तत्कार्यत्वात् तानसहितमपिकर्मफलं प्रतिष्ठादेवताभिः सहोदीच्यात्मकं तत्रैवोपसंहृतं सोमदेवतया
दीक्षादिद्वारा तत्प्रतिष्ठत्वश्रुतेरेवं दिक्चयेसर्वं कर्म हृदि संहृतमित्यर्थः पंचमपर्यायस्य तात्पर्यमाह ध्रुवयेति नामरूपकर्मस्वपसं
हृतेष्वपि किंचिदुपसंहर्तव्यमन्तरमवशिष्टमस्तीत्याशंकां निराकरोत्येतावद्धीति प्रश्नान्तरमुत्थापयति सत्त्वात्मकमिति हृदय
पदेन नामाद्याधारवद्हृत्स्विकशाह्रे नापि हृदयाधिकरणं विवक्ष्यते वाक्याकांक्षायासामर्थ्यादित्याशंक्याह नामान्तरेणेति यदनिलीयत
इति विशेषप्रेतवाचिनेति शेषः देहे हृदयं प्रतिष्ठितमिति व्याख्यास्यति यत्रैतस्मादिति तस्मिन्काले शरीरं शून्यं स्यादिति शेषः [illegible] शरी

१५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्य हृदयाश्रयत्वं विभावयति धीरूपादिना [illegible] देहादत्यन्तहृदयस्यावस्थानेऽपि योऽसौ तत्र विशेषमिति शङ्केन
वराभृश्यफलितमाह इन्द्रियादिना देहस्तर्हि ऊर्ध्वप्रतिष्ठितस्त्वित्याह शरीरस्येति हृत्पद्ममध्यप्रदेशान्तरमुपादत्ते इदयेति प्राणपाह्यस्या
सत्वविषयत्वमवकेत तत्र हि विशेषणं प्राणस्यापाने प्रतिष्ठितत्वव्यतिरेकव्यास्फोरयति सापीति प्राणापानेऽप्यभयोरपि व्याप्तिनाथी
नत्वे साधयति साप्यपानेति तिरश्चीनाभूमीनाशुक्रानाशुद्धानेनिबद्धत्वे दर्शयति सर्वाइति विश्वदि. तिलानानागतिलेवोक्तिः कस्मिन्नुह
दयमित्यादेः समानान्तरस्य तात्पर्यं ग्राहेतेति नेदंप्रपञ्चमेकं दर्शयति विज्ञानमयेति स एष इत्यादेस्तात्पर्यमाह सर्वमिति यस्माद्धद
स्य हृदि मात्रस्यानर्थामित्वकल्पनाधिष्ठानस्यात्मानवशात्प्रशासनेद्यावापृथिव्यादिस्थितेः स परमात्मैव प्रत्यगात्मैवेति यद्यथोर्ध्वं
विवक्षितत्वमाह स एष इति निषेधद्वयं मूर्तामूर्तब्राह्मणोक्तव्याख्यातमित्याह स योनेति योऽसौ मधुकाण्डे चतुर्थे नेति नेतीति निषेधमुखेन निर्दि
ष्टः स एषकृचं ब्राह्मणे तस्मिन्नेवं वर्ण्यते इति योजना निषेधद्वारा निर्दिष्ट एव स एष इति सोऽयमिति कार्यधर्माः शब्दादयोऽशनायादयश्च
इत्युक्ते देवमवतार्यं व्याचष्टे अगृह्य इत्यादिना न हि परीतत्वं करणागोचरत्वेन च वृष्टेत्यादि स्मृतेः न हि परीतत्वा दृष्टेत्यादिति यावत् श
ब्दाद्युभयत्र तद्विपरीत्वमेतदेवाग्रतः शब्दार्थं स्फुटयन्नुक्तमुपपादयति अशीर्येति कार्यधर्माः शब्दादयोऽशनायादयश्च प्राकृताः नन्वश
कल्याचनवत्का योः संवादात्मिके यमाख्यायिका तत्र कथं प्राकल्येनात्मात्मानेऽयान्तवल्क्योव्याचष्टेत्याह क्रममिति विज्ञानादि
वाक्येन त्वमात्मा त्वांकिमित्यत्र तन्निर्देश इत्याशङ्क्याह त्वयेति एवं त्वया विस्पादिवाक्यस्य हृदयं त्वात्मगतिमाशङ्क्याह ततः श्रुतिरिति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निश्चयेनागमयिष्यन्नेतेन देवस्मह्ययति अद्येति प्रव्रज्योपसंहरत्येति यावत् औपनिषदत्वं तु हृदयस्य मुख्यादयमनुपनिषत्त्वेवेति नेदे
स्यादित्याह यास्क्वल्क्यस्य वामध्यास्य वाचाक्यमिति शंकां वारयति समामेति ब्रह्मविद्विद्वेषपरलोकविरोधोपि स्यादित्याह किंचेति सू
द्योतेविपनिष्कृतीति सूई इति पातितेशापेन किमित्यग्निहोत्रं [illegible] ग्निसंस्कारमपि शाकल्यान प्राप्तवानित्याशंक्याह सर्वेषमेति नामेवाख्या
यिकामनुक्रामन्त्यष्टाध्याय्यामिति अष्टाध्यायी हृदारण्यकाख्याचीनाकर्मविषयाः तेषु एवहेयानतिरिक्ते दोषाः प्रतिषेधः उपपतिष्ठिन्नमे
कालेग्रस्थीनिचतेत्यत्र च नष्टा ह्योपपर्थः उपवादीपरिभवककर्मीतद्भूह्यार्थमाहोतरीति किमिति यमाख्यायिकाद्रविद्याप्रकरणे सत्रिते
त्याशंक्याह मैवेति ब्रह्मविद्विविनीतेन भवितव्यमित्याचारः महतीरीयं ब्रह्मविद्याया नविशिष्टावक्ता यमैहिकामुष्मिकविरोधः स्यादि
ति विद्यास्तुतिः अथैदेत्याद्युत्तरग्रंथमवतारयति यस्येत्यादिना जनानामूलेचवक्तव्यमित्याख्यायिकामेवाश्रित्याहेति संबंधः आ
ख्यायिकाकिमर्थेत्यत आह आख्यायिकेति इतिशाह्यः संबंधसमामर्थः नत्र ब्राह्मणेषु तत्सौत्रं तेषु प्रतिषेधे तु भावात्त गोधनेरर्थे
किमितितामतियाज्ञवल्क्योवदतीत्यत आह न्यायमन्वेति ब्रह्मस्वेहिब्राह्मणेनुमतिमनापाद्यनीयमाने संयोगः स्यादितिन्यायः
संबंधोवाचेति संबंधः योवरतिप्रतीकमादाय व्याचष्टे युष्माकमितिव्याख्यानं भागमर्हद्युव्याख्येयमादाय व्याकरोति योवरत्यादि
ना यथोक्तप्रश्नानंतरं ब्राह्मणानामप्रतिभां दर्शयति तेहेति स्वकीयज्ञानप्रकर्षप्रकटनार्थमेव प्रश्नांतरमवतारयति तेषिति हृदेवा
नस्पतिरितिपर्यायपल्लवानन्तरं किमित्याशंक्याह हृतस्येति नत्वगस्य महत्त्वमाहेत्यनुवत्तकेः पुरुषस्य हृतस्यावधम्येनेतरस्य चैतत्साध

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्म्यमेव स्फुटयति तस्येत्यादिना नीरसात्वगुणत्यादिकेत्युक्ते उत्पत्तेरोहत्वनिर्बंधः विशेषाभावमेवाभिनयति यथेति साधर्म्येण
ति वैधर्म्येवक्तमशक्यमित्याशयेनाह यद्यदिति इदमपि साधर्म्यमेव किं न स्यादित्याशंक्याह यदेतस्मादिति एतस्माद्विशेषणा
त्यागवद्विशेषणत्युक्ते तत्सर्वेषूभयोः सामान्यमवगतमिति संबंधः वृत्तसांगस्येति शेषः साध्यत्वस्य प्रयोगाणामिति चेदेत्याह भवि
तव्यं चेति ध्रुवं जन्म मृतस्य चेति स्मृतिरित्यर्थः जीवतो हि रेतो जायते सप्रवक्तृतो भवतीति विचार्य तेन चासिद्धेनासिद्धस्य साधनं
न च पुरुषांतरादिति वाच्यमेकासिद्धावन्यतरप्रयोगानुपपत्तेरिति मत्वा नोहेतुमाह यस्मादिति वैधर्म्योदाहरणमाह यापि चेति कांडले
ष्ठापीत्यपेरर्थः वैशब्दः प्रसिद्धिद्योतक इत्यभिप्रेत्याह वैहूत इति ग्रंजसेत्यादेरर्थं प्रकाशयावाक्यार्थमाह धानाकोपीति तथापि कथं
वैधर्म्यमित्याशंक्याह यद्यदीति पुरुषस्यापि पुनरुत्पत्तिर्माभूदित्याशंक्य पूर्वोक्तं निगमयति तस्मादिति स्वभाववादमुत्थापय
ति जातइति इतिशब्दः चोद्यसमाप्त्यर्थः तदेव स्फुटयति जनिष्यतोऽहीति न जायतइति भागेनोत्तरमाह नेत्यादिना स्वभाववादे
दोषमाहान्यथेति स्वभाववादासंभवे फलितमाह जातइति उक्तमेव स्पष्टयति जगतइति ब्रह्मविदां श्रेष्ठत्वे याज्ञवल्क्यस्य सिद्धे
फलितमाह जातइति समासव्याख्यायिकेति ब्राह्मणाः सर्वे यथायथं जग्मुरित्यर्थः विज्ञानादिवाक्यमुत्थापयति यज्जातइत्यादिना
विज्ञानशब्दस्य करणादिविषयत्वं वारयति विज्ञानमिति ज्ञानेरविशेषणस्य कृत्यं दर्शयति नेत्यादिना प्रसक्तेदुःखहेतुना काम
क्रोधादिना संबंधरहिते शिवे कामादिकारणेनाज्ञानेनापि संबंधशून्ये सातिशयत्वप्रयुक्तदुःखादित्यमाहानंदमिति साधन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

साध्यत्वाधीनदुःखवैधुर्यमाह [illegible] नायासमिति दुःखनिवृत्तिमात्रं सुखमिति पदं प्रतिबिंबयति नित्यतृप्तमिति
आनंदो ज्ञानमिति निर्ब्रह्मण्याकारभेदमाशंक्याह एकरसमिति फलमतउपपत्तेरितिन्यायेन ब्रह्मणो जगन्मूलत्वमाह शक्तिरित्या
दिना ब्रह्म संसृतत्वमेतीति श्रुत्यंतरमाश्रित्य तस्यैव मुक्तोपसृप्यत्वमुपदिशति किंचेति मृत्युरव्याख्यानसमाप्ताविति शब्दः सचि
दानंदात्मकं ब्रह्म विद्याविद्याभ्यां बंधमोक्षास्पदमित्युक्ते इदानीं ब्रह्मानंदे विचारमवतारयन् विगीतमर्थमाहाद्येति तथापि प्रकृ
तेवाक्ये किमायातमिति तत्राहाद्यचेति न केवलमत्रैवानंदशब्दो ब्रह्मविशेषणार्थकत्वेन श्रुतः किं तु तैत्तिरीयकादावपीत्याह श्रु
त्यंतरे चेति ब्रह्मणो विशेषणत्वेनानंदशब्दः श्रूयते इति संबंधः अन्याः श्रुतीरेवोदाहरत्यानंद इत्यादिना एवमाद्याः श्रुतय इति शे
षः तथापि कथं विचारसिद्धिस्तत्राह संदेहेति लोकप्रसिद्धेरद्वैतश्रुतेश्च ब्रह्मण्यानंदः संवेद्योऽसंवेद्यो वेति विचारः कर्तव्य इत्यर्थः
उभयत्र फलं दिदर्शयिषति ब्रह्मानंदस्येति अन्यथा लोकवेदयोः शब्दार्थभेदादविशिष्टत्वं वाक्यार्थ इति न्यायविरोधः असंवेद्यत्वे तु न
रद्वैतश्रुतिरविरुद्धेति भावः विचारमाक्षिपति नन्विति विरुद्धश्रुत्यर्थनिर्णयार्थं विचारकर्तव्यतां दर्शयति नेति संग्रहवाक्यं विवृ
णोति सत्यमित्यादिना एकत्वे सति विज्ञानप्रतिषेधश्रुतिमेवोदाहरति यत्रेत्यादिना इत्यादिश्रवणमिति शेषः फलितमाह विरुद्ध
श्रुतीति श्रुतिविप्रतिपत्तेर्विचारकर्तव्यतामुपसंहरति तस्मादिति तत्रैव हेत्वंतरमाह मोक्षेति तामेव विप्रतिपत्तिं विवृणोति सांख्य
इति विचारपूर्वकं पूर्वपक्षं गृह्णाति किं तावदित्यादिना आनंदादिश्रवणाद्धि ज्ञानमानंदं ब्रह्मेति श्रुतेर्मोक्षे सुखं संवेद्यमिति युक्तमि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तिसंबंधः तदेववाक्यांतरादुदाहरति जहदित्यादिना पूर्वपक्षमाक्षिपति नन्विति मोक्षे चेदिष्यते तत्त्वज्ञानं तर्हि तदनेककार
कसाध्यं वाच्यं क्रियात्वाद्यागादिवत् सर्वैकत्वे च मोक्षे कारकविभागाभावादनुपपन्नं संवेदनं न संभवतीत्यर्थः जन्यस्य कारकापेक्षाया
मपि तत्त्वज्ञानस्याजन्यत्वादनुपपन्नं रूपेतेत्याशंक्याह क्रियायाश्चेति याक्रियासानेककारकसाध्येति व्याप्तेर्गमनादावदृष्टत्वात् ज्ञानस्या
पि धात्वर्थत्वेन क्रियात्वादनेककारकसाध्यतासिद्धेरित्यर्थः श्रुतिप्रामाण्यमाश्रित्य पूर्ववादी परिहरति नैष दोष इति तदेव स्फुटय
ति विज्ञानमिति यद्यप्येवं ब्रह्मणि श्रुतिप्रामाण्यादानंदज्ञानप्रसंगमाक्षिपति नन्विति यद्येवं श्रुतिविरोधाद्ब्रह्मणि विज्ञानक्रियाकारक
विभागापेक्षा नोपपद्यते नहि विज्ञानमानंदमित्यादिवचनानि मानांतरविरोधेन विज्ञानक्रियां ब्रह्मण्युत्पादयंति तेषां विज्ञापकत्वात्
ज्ञापकस्य चाविरोधापेक्षत्वादन्यथातिप्रसंगादित्यर्थः लौकिकज्ञानस्य क्रियात्वेपि मोक्षे तत्त्वज्ञानं क्रियैव न भवति नन्वविज्ञानादिवा
क्यस्याहृतं श्रुतिविरोधोस्तीत्याशंक्याह नचेति पयःपावकयोः सर्वत्रैकरूप्यवद्विज्ञानस्यापि लोकवेदयोरेकरूपत्वमेवेति भावः माना
तरविरोधाद्ब्रह्मण्यानंदज्ञानस्य सत्वमेव वा निषिध्यते तस्य क्रियात्वं वा निराक्रियते तत्राद्यं दूषयति नेत्यादिना तदेव स्पष्टयति नविज्ञा
नमिति तत्त्वज्ञानस्य गुणत्वांगीकारात् क्रियात्वनिराकरणमिष्टमेवेति मत्वा द्वितीयमनूद्यतेत्विति अनुभवमेवाभिनयति तत्त्वेति यद्यपि
श्रुतिविरोधः स्यादित्याशंक्य प्रत्यक्षानुसारेण सापि नेतव्येत्यभिप्रायेणाह नस्यादिति आत्मन्यानंदज्ञानस्य क्रियात्वानंगीकारान्न कार
कभेदापेक्षाभावादित्यर्थः गुणत्वपक्षे च प्रत्यक्षस्यानुगुणत्वादागमस्य विरोधिनस्तदनुसारेण नेयत्वादविरुद्धागमस्य भूयस्त्वादित्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तिशयः प्रविविक्तार्थत्वविज्ञानादिस्फुरणेनेति विशेषः गुणगुणिभावेपि नाद्वैतक्षतिः शंक्यानेनाभिप्रायेणाशंक्य स्ववेद्यत्वपक्षमाश्रित्या
ह तस्मादानंदमिति यद्यानंदोपि ब्रह्मणानंदस्य वेद्यत्वे श्रुतीनामानुगुण्यमस्तीत्याह तथेति आनंदो वेद्यो ब्रह्मणोतीति चोदिते सि
द्धांतमाह नेति आगंतुकमनागंतुकं वा ज्ञानेन मुक्तो वानंदं गोचरयति नाद्य इत्याह कार्येति अनुपपत्तिमेव स्फोरयति शरीरेति का
र्यकरणयोरभावेपि मोक्षे ब्रह्मानंदज्ञानं जनिष्यते संसारे हि देहत्वपक्षे त्याशंक्याह देहादीति द्वितीयं दूषयत्येकत्वेति नहि ब्रह्मस्वरू
पज्ञानेनैव वेद्यानंदस्वरूपं भवितुमर्हति विषयविषयिणोरेकत्वविरोधात्तत्त्वज्ञानागंतुकमपि ज्ञानं मुक्तोनानंदमधिकरोतीत्यर्थः किं
च ब्रह्म वा मुक्तो वा संसारी वा ब्रह्मानंदं गोचरयेत्त्राद्यमनुवदति परं चेदिति तस्मिन्पक्षे ब्रह्मस्वरूपानंदं चेति तेनैक्यादेकत्वविषयविष
यित्वानुपपत्तेरुक्तत्वादिति दूषयति तथेति नापि संसारी ब्रह्मानंदं गोचरयति सकलत्वनिवृत्ते संसारे संसारिणमात्मानमभिमन्यमानो न
ब्रह्मानंदमाकलयितुमलं संसारे निवृत्ते तु ततो विनिर्मुक्तो ब्रह्मस्वाभाव्यं प्रतिपद्यमानस्तदानंदं तद्वदेव विषयीकर्तुं नार्हतीति तृतीयं
प्रत्याह संसार्यपीति मुक्तोपि ब्रह्मणोभिन्नोभिन्नो वेति विकल्प्याभेदपक्षमनुभाषते तथेति ब्रह्माभिन्नस्य मुक्तस्य तदानंदविषयी
करणमुक्तन्यायेन निरस्यति तदेति भेदपक्षमनुवदत्यथेति ब्रह्मानंदं प्रत्यगात्मानमिति संबंधः वेदनप्रकारमभिनयन्नाह समिति
तत्त्वमस्यादिश्रुतिविरोधेन निराकरोति तदेति मुक्तो ब्रह्मणः सकाशाद्भिन्नो वा माभूद्भिन्नाभिन्नस्तस्यादित्याशंक्याह तृतीयेति स
र्वत्र भेदाभेदवादस्य दूषितत्वादित्यर्थः ब्रह्मणः स्वानंदस्यावेद्यत्वे हेत्वंतरमाह किंचान्यदिति तदेवोपपादयति निरंतरं चेति आ

मम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ख्यातप्रयोगस्यतस्य नहि किंचित्कार्यं वक्तव्यं तत्राहातद्विज्ञानेति देवदत्तादिबुद्धिरेवंकारित्वावस्थायां स्वात्मानमन्यं च विविच्य जानाति
नान्यदेतदुभयथात्वदर्शनात्तत्राख्यातप्रयोगो [illegible] युज्यते नैवं ब्रह्मण एव ज्ञानप्रसंगोस्ति नित्यज्ञानस्वभावत्वात्तथा
च तत्राख्यातप्रयोगो नार्थवानित्यर्थः ब्रह्मण एवं तत्प्रयोगानर्थक्यं दृष्टान्तेन स्पष्टयति नहीति प्रत्यगात्मनि नित्यज्ञानत्वात्सिद्धिं श
कयन्नयेपति विक्रिन्नमिति क्रियाविशेषणं परिहरति विज्ञानस्येति आत्मनो विज्ञानस्य क्रिडं मंतरालमसत्त्वावस्थातदापि विज्ञानम
स्ति चेत्तस्यात्मविषयत्वप्रसंगः तथा च यत्रान्यन्यस्यतीत्यादिश्रुतेरात्मनो मन्यत्वापत्तिः नचेत्तदा विज्ञानं तदापाषाणवदचेतनत्वे वित्त
स्त्रिरूपत्वानंगीकारादित्यर्थः आत्मनोः नित्यज्ञानत्वेदोषान्तरमाहात्मनश्चेति आनंदज्ञानेब्रह्मणि विषयविषयित्वायोगाश्चेत्क
यं विज्ञानादिवाक्यमित्याशंक्योपसंहरति तस्मादिति ब्रह्मण एव तद्रूपावेद्यत्वेश्रुतिविरोधमुक्तं स्मारयति नत्विति सर्वं ह्यात्मनो।
शुक्रस्यैकैकस्मिन् योगयादिष्वपाजन्मनाद्विप्राप्तंतथैवतदवत्वादित्वाद्यस्याश्रुतेर्नविरोधोस्तीतिपरिहरति नेत्यादिना तदेवप्रपंच
यति शुक्रस्येति किमनुवादे फलमितिचेन्नदात्मस्येति शुक्रस्य योगयादिषु सर्वज्ञात्मभावादेवतत्प्राप्तं जन्मनादि शुक्रस्यतयेनदि
तेन्माप्तंत्ववादवैयर्थ्यमित्यर्थः विद्वषः सर्वात्म्येन योगयादिषु प्राप्तजन्मनाद्यनुवादेसादतिप्रसक्तिरितिशंकते यथाप्राप्तेति श्रुतिप्र
संगमेव प्रकटयति योगयादिष्विति अविद्यात्मकनामरूपविरचितोपाधिद्वयसंबंधनिबंधनमिथ्याज्ञानाधीनत्वादात्मनिदुःखित्वाद
द्विप्रतीतेर्नतत्त्ववस्तुतोदुःखित्वेनचजन्मनाद्यपिवास्तवमाविद्यस्यैवशुक्रस्यतयेनवादादातदुःखित्वस्यतत्त्वनानुवादेनहीनत्वप्राप्तेरि

तिपरिहरति नेत्यादिना यत्तु विरुद्धफलदर्शनादागमार्थो नित्यो न भवतीति तत्राह विरुद्धेति वेद्यत्वादिधर्माणां सोपाधिकनिरुपा
धिकविषयत्वेन मधुकाण्डे समवस्थापितत्वमित्यर्थः ब्राह्मणार्थमुपसंहरति तस्मादिति ब्रह्मण्यानंदस्य वेद्यताया दुर्निरूपत्वे तद्धेत्वर्थः य
थैवोक्तं तथैव तेन विवक्षितः सर्वात्मभावस्य प्रकृतत्वात् यथा विज्ञानादिवाक्ये ब्रह्मानंदस्य वेद्यता न विवक्षिता तथास्मिन्नपि स्यात् तद्वेद्यताया दुष्प्र
तिपादनत्वात् तस्मादनतिशयानंदं चिदेकतानं वस्तु सिद्धमित्यर्थः ॥ इति श्रीमत्परमहंसपरिव्राजकश्रीशुद्धानंदपूज्यपादशि
ष्यभगवदानंदकृतायां बृहदारण्यकभाष्यटीकायां पंचमोऽध्यायः ॥ ५ ॥ सर्वस्मिन्नध्याये जल्पन्यायेन सच्चिदानंदं ब्र
ह्म निर्धारितं इदानीं वादन्यायेन तदेव निर्धारयितुमध्यायांतरमवतारयति जनक इति तत्र ब्राह्मणद्वयस्यावांतरसंबंधं प्रतिजानी
ते स्मेति तमेव वक्तुं वृत्तं कीर्तयति शारीराणीति निरुह्य प्रत्यस्ह्येति विस्तार्य व्यवहारमापद्येत्यर्थः प्रत्यस्य हृदये पुनरुपसंहृत्येति
यावत् जागरितात्मनीत्यध्याहृतो निःस्वरूपशाखेन तत्कारणे श्रूयते प्रतिक्रमणं तत् गुणदोषात्स्पष्टत्वं ग्रंथेनेत्तर ब्राह्मणद्वयतात्पर्यमा
ह तस्यैवेति वागाद्यधिष्ठात्रीत्मस्मादि देवताद्वयस्य रहितेष्टादारेत्यर्थः सर्वोक्तान्वयव्यतिरेकादिसाधनापेक्षयोत्तरशास्त्रः आचार्यवताद्य
ष्टादिसंपत्त्वेन विद्यालब्धयेत्याचारः अप्राप्तप्राप्तियोगः प्राप्तस्य रक्षणं क्षेम इति विभागः भारतस्य वर्षस्येदमवस्थेन पर्यंतस्य देशस्येति
यावत् तत्र राजानं प्रति प्रश्नप्रवृत्त्यापद्यति किंत्विति कश्चिदिति विशेषणस्य तात्पर्यमाह राजेति शास्त्रपणमात्रत्वं यद्योः कार्यार्थानुमोदने
शक्तिमाह नहीति यद्योक्तं ब्रह्मविद्यया कृतकृत्यत्वं मत्वा नेराजानं प्रत्याह किंत्विति आयतनप्रतिष्ठयोरेकत्वान्नतत्क्रिमाशंक्याचि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भजते आयतनं नामेति एकपादेपि ब्रह्मणस्तदुपासनादिष्टसिद्धिरिति चेन्नेत्याह त्रिभिरिति बुद्धिप्रतिष्ठामायतनं चेति शेषः प्रज्ञेये
वविवृणोति किंस्वयमेवेति श्रुतानिमित्तेयस्या वाचः सा तथा द्वितीयपदं विशदयति यथेति व्यतिरेकपदं निषेधति नेति आकां
ताह्वेकंपदोतं गृह्णाति कथंतरीति बलिदानमुपहारसमर्पणमादिशब्देन स्रक्चंदनवस्त्रालंकारादिग्रहः विद्यानिष्क्रयार्थमुपा
वाचेति संबंधः पितेरेतन्मतमस्त्वेतत्किमायातं तदाह ममापीति यथा वागग्निर्देवता तद्वदित्याह एवमेवेति प्राण एवायतनमि
त्यत्र प्राणशब्दः करणविषयः पतितादिकमित्यादिपदमकुलीनयद्वार्थं उग्रो जातिविशेषः आदिपदेन म्लेच्छगणो गृह्यते वधत्रे
स्याणः सम्यत्वे साधयति यस्मादिति उक्तमेवोपपादयति यत्विति दिशामानंत्येपि श्रोत्रस्य किमायातं तदाह दिशो वा इति तथापि
कथमानंदत्वमनसः संभवति तत्राह मयेनेति कथं हृदयस्य सर्वभूतायतनत्वं तत्प्रतिष्ठात्वं च तत्राह नामरूपेति तस्मादिति सा
कल्यनाद्यपरामर्शः भूतानां हृदयप्रतिष्ठत्वे फलितमाह तस्माद्धृदयमिति ॥ ब्राह्मणं ॥ एवंस्मिन्ब्राह्मणे का नाचिदुपासना
नि ज्ञानसाधनान्युक्तानि इदानीं ब्रह्मणस्तैजसस्वप्नजागरादिद्वारा ज्ञानार्थं ब्राह्मणांतरमवतारयति जनको हेति राज्ञो ज्ञातिन्वा
भिमाने शिष्यत्वविरोधिन्यपनीते गुणिं प्रति तस्य शिष्यत्वेनोपपत्तिं दर्शयति यस्मादिति नमस्कारे हेतुमुपन्यस्यत्यनुमेति
अभीष्टमनुशासनं कर्तुं प्राचीनज्ञानस्य फललाभासहेतुत्वात्किं द्वारा परमफलहेतुरात्मज्ञानमेवेति विवक्षित्वा नवरात्मो जिज्ञा
सामापादयति समेत्यादिना यथोक्तगुणसंपन्नस्येदृढं तर्हि कृतार्थत्वान्नमे कर्तव्यमस्तीत्याशंक्याह एवमिति याज्ञवल्क्यो रा

तं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेनित्यत्वमात्मायाःस्वरूपत्वानीत्यरति परवस्तुविषयेणानेनयोगात्प्रविषयं विवक्षितं संदिपति किंवस्त्विति रागात्वकीयं तत्त्वतुरीयेत्यपि
ध्यानेनस्वीकृतेप्रत्यक्षमेवतारयति प्रयेति तत्रापेक्षितमप्यशङ्कस्य चितेनहरयति यद्देवमिति प्रात्तापनमञ्चितमितिशंकांवारयति
यदीति प्रमाणाभिव्यक्तमात्मनः स्पष्टयति श्रुतिवदिति विश्वतैजसप्राज्ञानुवादेन तुरीयं ब्रह्म दर्शयितुमारोपितमनुवदतीत्यर्थः इति कोऽ
सौविधनामेतिचेत्तमाह यस्मादिति अधिदैवतं तु हृदयमन्त्राध्यात्मिकेन दर्शयति योयमिति तस्य पूर्वस्मिन्नपि ब्रह्मणो ग्रस्तत्वमाह
नेति प्रकृतेषु रूपेषु विराड्रूपं मस्तिमाह तेनापन्नमिति इंधनं साधयति यो हीति प्रमत्तस्य परोक्षेण व्याख्यानेन तमाह यस्मादिति एक
मेवपैश्वानरस्योपासनार्थं प्रासंगिकमिदं दृष्टान्तविचेति मिथुनं कल्पयत्यद्येत्यादिना प्रासंगिकध्यानाधिकारार्थो ध शब्दः यदेतन्मिथु
नेजागरिते विश्वशब्दितं तद्देवैकं स्वप्ने तैजसशब्दवाच्यमित्याह तदेतदिति तैजसमधिकृत्य प्रवृत्तमिति कथमिति किंतस्य स्थानेरूपकाने
प्रतिबात्रावरणं वा मार्गो वेति विकल्प्याद्यमत्याह तयोरिति संस्तवं संगतिमितियावत् द्वितीयं प्रत्याहा चेति प्रश्नातिरेकेणास्थित्यः
मेवमात्मस्वरूपत्वादित्यथयार्थः लोहितपिंडस्य त्वान्नरसंख्याव्याख्याने भक्तितस्यान्नस्य ताव द्विभागमाहारान्नमिति यदन्यत्तमन्नमिति
योऽन्नरीयं तदेतत्प्रयाह तयोमध्यमस्त्यादिशेषो योऽन्यः उपाधुपहितयोरेकत्वमाशित्याह यं तैजसमिति तस्यान्नत्वमुपपादयति सत
योरिति व्याख्यातेऽर्थेवाक्यस्यान्वितावयवत्वमाह तदेतदिति यदिशावरणं प्रच्छन्नतेन ज्ञाह किंवान्यदिति भोगसाधनं तस्य शब्दार्थः
प्रावरणप्रदर्शनस्य प्रयोजनमाह अकुर्वतोरिति इहेतिमोक्षमार्गयोरिंद्राण्योर्विभिः हृदयजालकयोराधारोपेयत्वमविवक्षितं तत्तेषे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चेतनावान् मार्गेश्चेत्युक्त्वेनैतन्नाड्याह्यायेति नाडीभिः शरीरं व्याप्तमस्यास्य प्रयोजनमाह तदेतदिति तस्मादित्यादिवाक्यमादाय व्याचष्टे
यस्मादिति तथापि प्रविविक्ताहारतरस्तेव वक्ष्यमाणप्रविविक्ताहारतर इति कस्मादुच्यते तत्राह चिरेति यस्मादित्यस्यापेक्षितं कथ्यते
भवतीति शारीरादिति निष्कृष्यते कथं शारीरादात्मन इत्युच्यते तत्राह शारीरे भवतीति उक्तमर्थं संक्षिप्योपसंहरत्यात्मन इति तस्य प्राचीदिति॥
त्यादिवाक्यस्य तात्पर्यमाह भूमिकां करोतीति स एष इति प्राणादीनां प्रत्यगात्मप्राप्तो शुद्ध्यते एवं भूमिकां कृत्वा वाक्यमादाय व्याक-
रोति तस्येत्यादिना तैजसं प्राज्ञस्य प्रत्यगात्माने हृदयाकाशमापन्नस्येति उक्तमर्थं संक्षिप्याह एवं विद्वानिति विश्वस्य जागरिताभि-
मानिन तैजसस्य च स्वप्नाभिमानिनः सुषुप्त्यभिमानिनि प्राज्ञे क्रमेणान्तर्भावं जानन्नित्यर्थः स एष नेति नेत्यात्मेत्यादेर्भूमिकां करोति
तस्यैवात्मानमिति तद्वाक्यमवतार्य पूर्वोक्तं व्याख्यानं स्मारयति स एष इति तुरीयादपि प्राप्यमभयमस्तीत्याशंक्याहाभयमि-
ति गतमर्थं च स्वाभीप्सुपक्रम्यावस्थात्रयातीतं तुरीयं पदिशन्नाभ्यामुपदिष्टः केचिद्विदाराना वचरतित्याग विषयेतानानितिवत्तेनेत्याशं-
क्याह तदेतदिति विद्यायाः फलं तिरोभावमभिप्रेत्याह सहोवाचेति कथं पुनरन्यस्य स्थितस्य नष्टस्य वान्यप्रापणमित्याशंक्याहो-
पाधीति पूर्वस्मादिकं दर्शितं तत्संभवतीत्याशंक्य तस्योक्तविद्यानुरूपत्वं नास्तीत्याह किमन्यदिति वस्तुतो दर्शितावज्ञातभावयुक्ता-
वतीतिमाश्रित्याहानइति प्रकृतार्थं शक्त्वावाक्यार्थमाह यथेष इति ॥ द्वितीयं ब्राह्मणम् ॥ एवं मिन्नाद्रूपेण जागरितादिद्वारा तत्त्वं
निर्दोषितं संप्रति ब्राह्मणान्तरमवतार्य तस्य पूर्वेण संबंधं प्रतिजानीते जनकमिति तमेव संबंधं वक्तुं वृत्तं कीर्तयति विद्यानम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं·
१५४

वि

वदति यद्ब्रह्मसाक्षादपरोक्षात्सर्वांतर आत्मा स एष एव विज्ञानमय आत्मेत्यत्र देहमाह नान्य इति विज्ञानमयः पर एवेत्यत्र वाक्यांत
रेषदति स एष इति वदन्नाशिष्यादावुक्तमनुवदति वदन्नादीति ताद्धीयमर्थमनूद्य चात्मर्थिकमनुवदत्यस्तीति यदि मधुकांडे गार्ग्ये।
काश्यपसंवादे प्राणादीनां कर्तृत्वादिनिराकरणेन तेभ्यो व्यतिरिक्तोऽस्ति विज्ञानात्मेति सोऽधिगतस्तर्हि किमिति पंचमेन तत्सद्भावे सूत्या।
घतेतत्राह इतरेति यद्यपि विज्ञानमयसद्भावस्तत्र स्थितस्तथापि तत्र रोषस्य प्रश्नस्य प्राणेन प्राणितीत्यादिना प्राणनादिलिंगद्वयन्य
स्ततल्लिंगगम्यः सामान्येनाधिगतः स एष इत्यादिना कूटस्थदृष्टिस्वभावो विशेषतो निश्चितः तथा च पंचमे पितृब्रुत्यादतश्चित।
मित्यर्थः आत्मा कूटस्थदृष्टिस्वभावश्चेत्कथं तस्य संसारस्तत्राह तस्याचेति अज्ञानेनत्कार्यवांतःकरणादिपरोपाधिशाद्धार्थः संसारस्या
त्मनौपाधिकत्वे दृष्टांतमाह यथेति दार्ष्टांतिकस्यानेकरूपत्वादनेकदृष्टांतोपादानमित्यभिप्रेत्य दार्ष्टांतिकमाह तथेति यथोक्तदृष्टा
ताउसारेणात्मन्यपि परोपाधिः संसार इति यावत् सोपाधिकस्यात्मनः संसारित्वमुक्ता निरुपाधिकस्य नित्यमुक्तत्वमाह निरुपाधिकर
ति निरुपाख्यत्वं वाचां मनसां चागोचरत्वे कथं तर्हि तत्रागमप्रामाण्यं तत्राह नेति नेतीत्युपदेशादिति कहोलप्रश्नोक्तमनुवदति साक्षा
दिति अंतरब्राह्मणोक्तं स्मारयति अंतरमिति अंतर्यामिब्राह्मणोक्तं स्मारयत्यंतर्यामीति शाकल्यब्राह्मणोक्तमनुसंदधाति सोपनिषद
इति पांचमिकमर्थं सिद्धमनूद्य यातीतेब्राह्मणादये द्वतमनुभाषते तदेवेति यत्साक्षादपरोक्षात्सर्वांतरं ब्रह्म तदेवाधिगमनोपायवि। १५४
शेषोपदर्शनद्वारः सहेतरधिगानमिति संबंधः वृत्ताचार्यब्राह्मणार्थं संक्षिपत्युक्तं ब्राह्मणार्थं संक्षिपतीत्यधरस्यादिना इंधस्य विशेष

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

णं प्रविविक्ताहारइति हृदयेंतर्योलिंगात्मा स एतेनो वैश्वानराद्विधात्मविविक्ताहारतरइतियोजना विश्वतैजसाभ्युत्क्रामप्राज्ञतर्येश्वर।
र्घयति ततः परेणेति ततस्तस्माद्विश्वातैजसाच्चपरेणाद्यवस्थितेनयोजगदात्मा प्राणोपाधिरव्याकृताख्यप्राज्ञस्ततोपितमप्युपाधिभूते
जगदात्मानं केवलेप्रतीचि विविद्यया प्रविलाप्य सम्पद्यते नेति नेतीतिघनेरीयं ब्रह्मतद्यधिगतमिति संबंधः विद्ययोपाधिविलापनेहृष्टां।
तमाह रज्जावहाविति यथा यथैव जनकेनाप्यादावुत्क्रमसद्वदात्मैवमिति कृत्वं ब्राह्मणोक्तमर्थमनुभाषितेनेतिद्वाराद्वचेति अन्यप्रसंगेना
पासनानां क्रममुक्तिफलत्वप्रदर्शनप्रसंगेनेतियावत् तेषामुपन्यासमेवाभिनयतीधद्न्यादिना हृत्तमरूद्धोवरब्राह्मणस्यनात्यधेमा
देहानीमिति आदिशब्दः सर्वत्रितरीयसंग्रहार्थः तर्केसमहत्वेचत्वविधदोषराहित्येनाबाधितत्वअधिगमस्तस्यैवप्रस्तुतस्यब्रह्मणा
इतिशेषः कर्तव्य इतीदमिदानीमारभ्यतइतिसंबंधः किमिदं ब्रह्मणोधिगमस्यकर्तव्यत्वंनामतदाहाभयमिति अधिगंतव्यमर्थीतरमा
ह सद्भावश्चेति आगपिसद्भावस्तस्याधिगतस्तत्क्रिमर्थं उक्तलाद्यर्थेन प्रयपनेतत्राह विप्रतिपत्तेति बाह्यानां विप्रतिपत्त्यानास्तित्वेण
कायेतत्रिरासद्वारात्मनः सद्भावोधिगंतव्य इत्यर्थः आत्मनोस्तित्वेपिकेचिद्देहादौतदंतर्भावमभ्युपयंतितानन्यत्याह अतिरिक्तत्वमिति
देहादिव्यतिरिक्तोप्यात्मा कर्ताभोक्ता चेत्येके भोक्तैव केवलमित्यपरे तान्प्रत्याहअशुद्धत्वमिति तस्याजडत्वपक्षे प्रत्याचष्टे स्वयंज्योतिष्ट्वमिति
तच्चकुरस्यदृष्टिस्वभावत्वेहेतुमाहाद्भुतत्वमिति एतेनविज्ञानस्यगुणत्वपक्षोपिप्रतिवदितव्यः येत्वानेहमात्मगुणमाहुस्तान्प्रत्याह निरति।
शयेति आत्मनः सर्वप्रपंचत्वपक्षं प्रत्याहद्विशेति अद्वैतत्वंचेति ब्राह्मणतात्पर्यमभिधायाध्यायिकानां तात्पर्यमाहाध्यायिकानिति विद्यायाः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्राके॰
२५५

संप्रदानेशिष्यस्तस्यग्रहणविधिः श्रद्धादिप्रकारस्तस्यप्रकाशनार्थंयमाख्यायिकेतियावत् प्रयोजनांतरंतस्मादर्शयति विद्येति १
कर्थंकर्मभ्योविशेषतोविद्यायाःस्तुतिरत्रलक्ष्यतेतत्राह वरेति कामप्रश्नमात्मस्वरस्ययाज्ञवल्क्येनराज्ञेदत्तत्वात्तेनचावसरेब्रह्मज्ञान
स्यैवपृष्टत्वादनेनविधिनाविद्यास्तुतेः सूचनात्साप्यत्रविवक्षितेत्यर्थः तात्पर्यमेवमुक्त्वाख्यायिकामक्षराणामारभते जनकमित्यादि
ना संवादंनकरोमीतिव्रतंचेत्किमितिगच्छतीत्याशंक्यते गमनेति उत्तरमाह योगेति अथहेत्याद्यवतारयति नेत्यादिना श्रोत्रंतरवे
नेतिशेषः पूर्वंचेति कर्मकांडोक्तिः नन्वग्निहोत्रप्रकरणेकामप्रश्नोवरोदत्तस्तत्किमितितत्रैवात्मयाथात्म्यप्रश्नप्रतिवचनेनास्तु विद्या
तोतत्राह तत्रैवेति कर्मनिरपेक्षायाब्रह्मविद्यायामोक्षहेतुत्वात्पृथक्कर्मप्रकरणेतदनुक्तिरित्याह विद्यायाश्चेति सर्वापेक्षाधिकरण
न्यायात्रतस्याःस्वातंत्र्यमित्याशंक्याह स्वतंत्राहीति साहित्योत्पन्नोस्वफलेवाकर्माण्यपेक्षतेनाद्योऽभ्युपगमात्रद्वितीयोतएवाग्नीधना
द्यनपेक्षेतिन्यायविरोधादित्यभिप्रेत्याह सहकारीति इत्यस्माच्चहेतोस्तत्रैवानुक्तिरितिसंबंधः याज्ञवल्क्यस्यव्रतभंगेहेतुमुक्त्वाजन
कस्यप्रश्नमुत्थापयति हेयाज्ञवल्क्येति अक्षरार्थमुक्त्वाप्रश्नवाक्यविवक्षितमर्थमाह किमयमित्यादिना स्वशब्दोऽयमर्थःपुरुषवि
षयः ज्योतिः कार्यमित्यासनादिव्यवहारोक्तिः इत्येतदितिकल्पद्वयंपराभृश्यतेपक्षद्वयेपिफलेएकमिति किंचेति समसमर्थ्येतस्मिः उत्तर
माह सूर्यावेति तत्रैतिपक्षद्वयोक्तिः कारणंफलमितियावत् प्रथमपक्षमङ्गीकृत्यस्वपक्षसिद्धिफलमाह यदीत्यादिना बहीश्चक्षुमधि
करोतिकारणभूतंज्योतिर्नेहश्यते तत्कार्यत्वासनाद्युपलभ्यतेतत्रापिविषयेस्वप्रामाण्यवितियावत् अनुमानमेवाभिनयति व्यतिरि

२५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

केति विषमसमतिरिक्तज्योतिराधीनव्यवहारत्वात्संमतवदित्यर्थः पत्रांतरमनुग्रहलोकायतपत्रसिद्धिफलमाहाशेषेत्यादिना अ
प्रत्यहेपीत्यत्यतिरिक्तमेवेतिच्छेदः कल्पांतरमाहाग्येति अनिर्णयं व्याकरोति व्यतिरिक्तमिति तस्मिन्यहे व्यवहारहेतौ ज्योतिष्या
निश्चयाज्ञहिकारो व्यवहारोपिनस्थैर्यमालंबेतेत्याह ततइति व्याख्यातं प्रश्नमुपसंहरति एवमिति प्रथममाक्षिपति नन्विति
व्यतिरिक्तज्योतिर्बुधस्य याथात्म्याभविष्यतीति चेत्तत्राह स्वयमेवेति राज्ञोनुमानकौशलमंगीकरोति सत्यमिति किमित्यतआह
कृतीत्याशंक्याह तथापीति व्याप्यव्यापकयोस्संबंधस्य चातिसूक्ष्मत्वादेकेनदुर्ज्ञानत्वात्तज्ज्ञाने याज्ञवल्क्योप्यपेक्षितइत्य
र्थः कथं तेषामतिसूक्ष्मत्वं तत्राह बहूनामपीति लिंगादिष्वनेकेषामपि विवेकिनां दुर्बोधतास्ति किमुतैकस्य तेषु दुर्बोधतावाच्ये
त्यर्थः तेषामत्यंतसौक्ष्म्यमानं वीक्ष्यस्ति प्रमाणयत्यतएवेति कुशलस्यापि सूक्ष्मार्थनिर्णये पुरुषांतरापेक्षायाः सत्वादेवेतियाव
वत् पुरुषविशेषो वेदविद्ब्राह्मणविदित्यादिः तत्रसमत्यर्थं संक्षिपति दृष्टेति उक्तेहि धर्मेण्याधिगतो येस्तु वेदः सपरिबृंहणः
ते शिष्टाब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः दृष्टाचरतापरिषद्यं धर्मं परिचक्षते अवरत्वापिदृष्टत्वस्यास्तुधर्मं न विचारयेत् त्रैविद्यो
हैतुकस्तर्की नैरुक्तो धर्मपाठकः त्रयश्चाश्रमिणः पूर्वे परिषदेषादशावरा ऋग्वेदविद्यजुर्विच्चसामवेदविदेवच त्र्यवरापरिषत्ज्ञे
याधर्मसंशयनिर्णये इति एकोवेत्यध्यात्मविदुच्यते कुशलस्यापि राज्ञो याज्ञवल्क्यं प्रतिप्रश्नोपपत्तिमुपसंहरति तस्मादिति सू
क्ष्मार्थनिर्णये पुरुषांतरापेक्षायाश्च दुःसंमतत्वादितियावत् तत्रैव हेत्वंतरमाह विज्ञानेति राज्ञो याज्ञवल्क्यापेक्षामुपपाद्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पक्षांतरमाहाथवेति तथाचात्र राज्ञोपुत्रनेकोविवक्षितत्वाभावात्किमिति राजा पुनिमनुसरतीति चोद्यं निरवकाशमिति शेषः प्रश्नोप
पत्तेः प्रतिवचनमुपपन्नमेवेति मत्वा नस्तदनुत्थापयति याज्ञवल्क्योपीति श्रुतिरिक्तज्योतिषि प्रष्टुं राज्ञोभिप्रायस्तदभिज्ञतया तथाविधे
ज्योतिः राजानं बोधयिष्यन्व्यतिरिक्तज्योतिरावेदकं वक्ष्यमाणं लिंगं गृहीत्वाग्निके प्रसिद्धं भवतितथा नत्वामित्यादेरण्यस्थलमादित्य
ज्योतिरित्यादिना श्रुतिरपि प्रतिपन्नवानित्यर्थः आस्मिन्नुपलभ्यमानः इकृति कथमिति योव्यवहारः सोतिरिक्तज्योतिरधीनोयथास
विदधीनोजाग्रद्व्यवहारः इति व्याप्तिं व्याकरोत्यादित्येनेति एवकारं व्याचष्टे स्वावयवेति आदित्यापेक्षामंतरेण चक्षुर्वशादेवार्थव्य
वहारः केस्यातीत्याशंक्याह चक्षुषेति आसनाद्यन्यतमव्यापारव्यपदेशोव्याप्तिसिद्धेर्यथाविशेषणाबद्धत्वमित्याशंक्याहास्तेति
आसनादीनामेकैकव्यभिचारेदेहस्यान्यथाभावेपिनानुग्राहकंज्योतिरन्यथाभवत्यतस्तदनुग्राह्याद्देहाद्विलक्षणमितिविवक्षि
त्वाव्यापारचतुष्टयमुपदिष्टमित्यर्थः तथापिकिमर्थमादित्याद्यनेकपर्यायोपादानमेकेनैवव्याप्तिग्रहसंभवादित्याशंक्याह वा
क्येति देहेंद्रियमनोव्यापाररूपं कार्यलिंगं तस्यव्यतिरिक्तज्योतिरव्यभिचारसाधनार्थमनेकपर्यायोपन्यासो बहवो हि दृष्टांता व्याप्तिं
दृढयंतीत्यर्थः इंद्रियं व्यावर्तयति वागिलीति शब्दस्यज्योतिष्ट्वं स्पष्टयितुं पातनिकां करोति शब्देनेति तदीपनकार्यमाह श्रोत्रेति
मनसिविषयाकारेपरिणामे सतिकिंस्यात्तदाह तेनेति तत्प्रमाणमाह मनसा हीति एवंपातनिकां कृत्वा वाचो ज्योतिष्ट्वसाधनार्थं
इकृति कथमिति काप्युनरत्रानुपपत्तिस्तत्राह वाच इति तत्रान्नं तत्र वाक्यशब्दस्वेनान्यापव्याकरोत्यत्र आदेत्यादिना प्रसिद्धिमेवा

कोत्साहपूर्वकं स्फुटयति कथमित्यादिना उपैवेत्यादि व्याचष्टे तेनशब्देनेति ज्योतिःकार्यत्वं तज्जन्यव्यवहाररूपकार्यवत्त्वमिति यावत्
तत्रवाक्ज्योतिष इत्यत्र चतुर्थ्यर्थपर्यायः समर्थ्यः किमितिरोधारयः शब्देनोपलक्ष्यते तत्राह गंधादिभिरिति प्रश्नान्तरस्तुत्यापयस्येवमे
वेति तथापि स्वप्नादौ तस्य प्रवृत्तिदर्शनात्तत्कारणीभूतं ज्योतिर्वक्तव्यमिति शेषः कथं पुनरन्तरशब्देनैव ज्योतिरन्तरमित्याशंक्याभ्युप
भिप्रायमाह एतदुक्तं भवतीति योव्यवहारः सोतिरिक्तज्योतिर्निमित्तो यथादित्यादिनिमित्तो जाग्रद्व्यवहार इति व्याप्तिमुक्तां निगमयति प
वं तावदिति व्याप्तिज्ञानकार्यमनुमानमाह तस्मादिति तादृगवस्थायां सर्वज्योतिःप्रत्यस्तमयदशायामिति यावत् विमतो व्यवहा
रोतिरिक्तज्योतिरधीनो व्यवहारत्वात्संप्रतिपन्नवदित्यध्यस्तादेवानुमानमावेदितमिति भावः हेत्वाश्रयासिद्धिमाशंक्यापरिहरति दृ
श्यतेचेति प्रादिशब्देन देशान्तरादौ कर्मकरणं गृह्यते प्राश्यैकदेशासिद्धिमाशंक्याह स्वप्नाश्चेति ध्यानदशायामिष्टदेवतादर्शने
वकाशार्थः प्रत्युमानफलं निगमयति तस्मादिति यथोक्तादनुमानाज्ज्योतिःसिद्धं चेत्किं प्रश्नेनेत्याशंक्याह किंपुनरिति सर्वज्योतिरु
पशमे दृश्यमानस्य व्यवहारस्य कारणतयानुमानतो ज्योतिर्मात्रसिद्धावपि तद्विशेषबुभुत्सया प्रश्नोपपत्तिरित्यर्थः प्रतिवचनमवता
र्यं व्याकरोत्यात्मनेत्यादिना प्रवभासकत्वे दृष्टान्तमादावित्यादीति तत्र व्यतिरिक्तत्वं साधयति यश्चेति उपरतेष्वात्मज्योतिरिति शेषः
नत्वेतर्हि माभूदितिचेत्तत्राह कार्यमिति स्वप्नादौ दृश्यमानेव्यवहारे हेतुकल्पफलितमाह यस्मादित्यादिना विमतमेतःस्थमतीद्रि
यत्वादादित्यवदिति व्यतिरेकीत्यर्थः व्यतिरेकान्तरमाह किंचेति संप्रतिलोकायतस्फोटयति नेत्यादिना तत्तनमर्थं व्याचष्टे यदितीति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा.वे.
१५८

उक्तं देहे तेष्वत्र सर्वे कं विभजते कस्मादित्यादिना [illegible] यद्यपि देहादेरुपकार्यस्योपकारकमादि
त्यादि सजातीयं दृष्टं तथापि नात्मज्योतिरुपकार्यं सजातीयमनुमेयमित्याशंक्याह यथाहं चेति तदेव स्पष्टयति यदिनामेति वि
मतमेतः स्यमतिरिक्तं चातीन्द्रियत्वादादित्यवदिति परोक्तं व्यतिरेक्यनुमानमनूद्य दूषयति यत्तु तदित्यादिना अनैकान्तिकत्वमनक्ति
क्रियत इति अतः स्यात्मव्यतिरिक्तानि च संघातत्वादिति इष्टं व्यभिचारफलमाह तस्मादिति विलक्षणमनस्यं चेति मतत्वं किं च चैत
न्यं शरीरधर्मस्तद्भावभावित्वाद्रूपादिवदित्याह कार्यकरणेति विमतं संघाताद्भिन्नं तद्भासकत्वाद्दीपादिवदित्यनुमानान्न संघातधर्म
त्वमित्युक्तं चैतन्यस्येत्याशंक्याह सामान्यतो दृष्टस्येति लोकायतस्य हि देहावभासकमपि चक्षुस्ततो न भिद्यते तथा च व्यभिचारान्न ब
दनुमानप्रामाण्यमित्यर्थः मनुष्योऽहं जानामीति प्रत्यक्षविरोधाच्च त्वदनुमानममानमित्याह सामान्यतो दृष्टेति नन्वनेन प्रत्यक्षेणतस्य
र्थेनामिति चेन्नेत्याह न चेति इतस्य देहस्यैव चैतन्यमित्याह तथैवेति ज्योतिषो देहव्यतिरेकमंगीकृत्यापि दूषयति यदिनामेति विम
तं ज्योतिरनात्मा देहोपकारकत्वादादित्यवदित्यर्थः आत्मत्वे तर्हि कस्येत्याशंक्याह यथैव त्विति अनुमानादात्मनो देहव्यतिरिक्तत्व
मुक्तमित्याशंक्याह प्रत्यक्षेति नान्य आत्मेति एवं तत्संबंधः देहस्यात्मत्वे कादाचित्कं इष्टत्वं घोरत्वाद्ययुक्तमिति शंकते नन्विति स्व
भाववादी परिहरति नैष दोष इति कादाचित्के दर्शनादर्शने संभवतो देहस्वाभाव्यादित्युच्छृंखलमाह नहीति विमतं कारणान्तरशब्द
कं कादाचित्कत्वात् घटवदित्यनुमाने दृष्टांतेमवर्तिष्णनीत्याशंक्याग्निरनुष्ण इति वदस्वप्रत्यक्षमित्यपि दृष्टत्वादित्यनुमीयते न्यतिप्रसंगमा

१५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हानुपपत्तेश्चेति नन्वयदृष्टवत्तन्निमित्तमेव न स्वभावादृष्टवत् किंचिदस्माकं प्रसिद्धं तत्राह नचेति ग्रन्थे रोमस्य श्रुतेरकस्य शोत्पत्तिस्था
द्यपि न निमित्तं ~~स्वभावादृष्टवन्न किंचिदस्माकं प्रसिद्धं तत्राह नचेति~~ किं तस्मा एव हर्षभेदमिति शंकते प्राणीति ग्रन्थादिशब्दे
नेश्वरादिशब्द्यते गृहाभिसंधिः स्वभाववाद्याह धर्मेति प्रसंगस्येष्टत्वं शंकित्वा स्वाभिप्रायमाह क्लिष्टत्वादिना सिद्धांती स्वशास्त्रादि
सिद्धानुपपत्त्या देहातिरिक्तमात्मानमभ्युपगमयत्तन्त्रमाह नेत्यादिना नन्वनन्यथैव विभजते यदुक्तमिति स्वप्ने दृष्टस्यैव दर्शनादीति
देहभागस्यातिरेकद्वाराभिवृणोति यदिहेति जाग्रद्दृष्टस्य दृष्टः स्वप्ने न दृष्टत्वादतींद्रियस्य च संस्कारस्य चानिष्टत्वादन्यदृष्टेनान्यस्य स्वप्ना
योगात् स्वप्ने दृष्टस्यैव दर्शने देहात्मवादे संभवतीत्यर्थः मा भूद्दृष्टस्यैव स्वप्ने दृष्टिरंधस्यापि स्वप्ने दृष्टेरित्याशंक्याह यद्यपीति ग्रपिवाह्यो
द्यादन्येषः एवं दृष्टस्यैव स्वप्ने दृष्टत्वेपि कुतो देहव्यतिरिक्तो द्रष्टा सिध्यतीत्याशंक्याह तत्रैवेति ग्रन्थोभयत्र देहस्यैव दृष्टत्वे का हानिरि
तिचेत्तत्राह देहस्येति तत्र सहकारि चक्षुरभावाच्च तदंतरस्य चोत्पन्नो देहांतरस्यापि सद्योत्पत्तिसंभवादन्यदृष्टेनान्यस्य न स्वप्नः स्या
दित्यर्थः मा भूत्सर्वं दृष्टे स्वप्नो देहत्वभावादित्याशंक्याहास्ति चेति कथं तेजात्यंधानामीदृक् दर्शनमिति चेज्जन्मांतरानुभववशादिति
भूमः ग्रंधस्य देहस्यादृष्टत्वेपि चक्षुष्मतस्तस्य स्यादेव दृष्टत्वमित्याशंक्याह तस्मादिति स्वप्ने दृष्टस्यैव दर्शनादिति देहं व्याख्याय स्वतो
दृष्टस्यैव दर्शनादिति देहं व्याचष्टे तथेति दृष्टस्मर्त्रोरेकत्वेपि कुतो देहातिरिक्तो दृष्टेत्याशंक्याह यतश्चेति देहातिरिक्तस्य स्मर्तृत्वेपि
कुतो दृष्टत्वमित्याशंक्याह तस्मादिति दृष्टस्मर्त्रोरेकत्वस्योक्तत्वाद्देहातिरिक्तः स्मर्तैव द्रष्टापि न चासिध्यतीति भावः देहस्यादृष्टत्वे देहेन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्राने·
२५८

तदमाह कृतेचेति कृतस्यद्रष्टृतेतिशेषः तदेवोपपादयति देहस्यैवेति देहातिरिक्तमात्मानमुपपादितमुपसंहरति तस्मादिति चै
तन्यघनदेहोऽर्थः माभूद्देहस्यात्मत्वमिंद्रियाणांतस्मादितिशंकते चक्षुरादीनीति ग्रन्थहृदयस्येतरेणाप्रत्यभिज्ञानादितिन्यायेनपरिह
रति नेत्यादिना आत्मप्रतिपत्तिहेतुत्वान्मनसिसंभवादितिन्यायेनशंकते मनइति ज्ञातृज्ञानसाधनोपपत्तेःसंज्ञाभेदमात्रमितिन्या
येनपरिहरति मनसोपीति देहादेरनात्मत्वेफलितमाह तस्मादिति आत्मज्योतिःसंज्ञानादितिशेषः परोक्तमनुवदति यदुक्तमि
ति ग्रहग्राह्ययोःसजातीयमनुग्राहकमित्यत्रहेतुमाहाहारादित्यादिभिरिति उपकार्योपकारकभावस्यसाजात्यनियमंदूषयति तदसिद्धि
ति अनियमदर्शनमाकांक्षातापूर्वेकमुदाहरति पार्थिवैरिति उत्पलपंकजालवणादिपार्थिवस्यैवाग्निप्रत्युपकारकत्वनियममवारयति ।
नचेति तावतापार्थिवेनाग्नेरुपक्रियमाणत्वदर्शनेनेतियावत् तत्समानजातीयैरितित्यक्तः पार्थिवत्वविषयः तत्रहेतुमाह येनेति दर्श
नफलेनिगमयति तस्मादिति उपकार्योपकारकभावेसाजात्यनियमंदूपकार्योपकारकभावेपिवैजात्यनियमोनास्तीत्यर्थः तयोरुपका
र्योपकारकत्वेसाजात्यनियमाभावमुदाहरणांतरेणादर्शयति कदाचिदिति अंभसाग्निनाचाग्नेरुपशान्त्युपलंभादुपकार्योपकारकत्वेवै
जात्यनियमोपिनास्तीतिमत्वोपसंहरति तस्मादिति उक्तानियमदर्शनेनहेत्वर्थः अदेहरात्मज्योतिषःसंज्ञानेनसमानजातीयताया ।
मितिशेषः ग्रहग्राहकमनुग्राह्यसजातीयमनुग्राहकत्वादादित्यवदित्यपास्तंअन्यतीद्रियत्वहेतोरनैकांत्यंपरोक्तमनुभाष्यदूषयति २५८
यत्नवदित्यादिना विमतंज्योतिःसंज्ञानधर्मस्तद्भावभावित्वाद्रूपादिवदित्युक्तमनूद्यनिराकरोति कार्येति अनुमानविरोधमेवसाधय

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ति प्रातिस्विकीति कालात्ययापदेशप्रसङ्गाद् एवमिति द्वितीयान्तरमाह तद्भावेति ग्रहणेनादितिर्विच्छेदः यस्तु नर्विशेषेण ग्रामाभावः सामा
न्येनेति इत्याद्युत्तेनमनुमानदूषणमभिप्रेत्य सामान्यतो दृष्टस्य चेन्मा प्रसङ्गेन तन्न दूषयति सामान्यतो दृष्टस्येति विशेषतो दृष्टस्यापि दूषणं कि
मित्यनुमानाप्रामाण्ये सर्व[illegible] व्यवहारहानिरित्याशङ्क्याह पानेति तत्सामान्यात् पानत्वभोजनत्वादिसाहचर्यादिति यावत् पानभोज
नाद्युपादाने दृश्यमान[illegible] मित्यङ्के विघटयति दृश्यतीति तादृश्येन तृप्तिपिपासादिनिवृत्त्युपायभोजनपानाद्यर्थत्वेनेति यावत् देहस्यैव
दृष्टत्वमित्युक्तमनूद्य पूर्वोक्तं परिहारं स्मारयति यदुक्तमित्यादिना ज्योतिरेवान्तरमात्मेत्यादि विघटनात्मेत्युक्तं प्रत्याह्वाननेनेति संघातादेर्दृष्ट
त्वनिराकरणेनेति यावत् देहस्य कादाचित्कदर्शनादिमत्त्वे स्वाभाविकमित्यनुपपन्नं दृष्टान्तमनुभाष्य निराचष्टे यस्तु नेत्यादिना वि
हितानामपि स्वभाववादस्य कश्चिद् दृष्टान्तं परिदृश्यमनूद्य दूषयति यस्तु नेति धर्माधर्मादिदेहत्वं तदधीनफलदातृत्वं तदाहेत्वं तस्यापि
देहत्वं तदधीनफलदातृत्वमित्यनवस्थेत्युक्तं प्रत्याह्वाननेति सिद्धान्तविरोधप्रसञ्जनेनेति यावत् लोकायतमतासंभवे स्वपक्षमुपसंहरति
तस्मादिति तस्मादात्मज्योतिः संघाताद्यतिरिक्तमन्तःस्थं चेति साधितं तथा च कथं कतम आत्मेति प्रश्नस्योत्तरमाह यद्यपीति यद्यप्याह्येनोदृष्टा
दिना समानजातीयस्यादित्यादेरनुग्राहकत्वदर्शनाद् विभिन्नादनुग्राहकत्वाविशेषादात्मज्योतिरपि समानजातीयं देहादीनेति भाति
भैवतिनत्येति यावत् अविवेकतो निकृष्टदृष्टाभावादित्यर्थः व्यतिरेकसाधकस्यान्यायस्य दर्शितत्वात्कुतो भ्रान्तिरित्याशङ्क्याह न्यायेति
भ्रान्तिनिमित्ताविवेकहेतं प्रश्नप्रश्नप्रकारान्तरेण प्रश्नमुत्थापयति प्रश्नवेति प्रश्नान्तराणि व्याचष्टे कतमो सावितिज्योतिर्निमित्तेना।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रा.ने.
१५५

व्यवहारे मयोक्तो न त्वात्मेत्याशंक्याह येनेति आत्मनैवायं ज्योतिषेत्यस्मादासनादिनिमित्तं ज्योतिरात्मेत्यर्थः प्रकारांतरेण प्रश्नं
व्याकरोत्यथवेति समस्तमर्थं कथयति सर्व इति योयं त्वयाभिप्रेतो विज्ञानमयः स प्राणेषु मध्ये कतमः स्यात्तेषि हि विज्ञानमयाद्यव
भांतीति योजना उत्तरमर्थं हृद्येतेन बुद्ध्वावारोपयति यथेति आत्मनयोरवांतरविभागमाह सर्वस्मिन्नित्यादिना हृदीत्यादिप्रति
वचनमिति शेषः पक्षांतरमाहाथवेति सर्वस्य प्रश्नत्वे वाक्यं योजयति विज्ञानेति समानः सन्नित्यादि प्रतिवचनमिति शेषः द्विती
यस्तीयपदत्योरत विलक्षणयन्नाद्यं पदमंगीकरोति योयमिति यस्त्वयापृष्टः सोयमित्यात्मनस्तद्रूपत्वेन प्रसिद्धत्वादयमिति निर्दे
शइति पदद्वयस्यार्थः देहव्यवच्छेदार्थं विशिनष्टि विज्ञानमयइति विज्ञानप्राचूर्यमाचष्टे ज्ञानस्तत्प्रायत्वं प्रकटयति बुद्धीति बुद्धि
रेव विज्ञानं विज्ञायतेनेनेति व्युत्पत्तेस्तेनोपाधिना संपर्कप्रवाविवेकस्तस्मादिति यावत् तत्संपर्के प्रमाणमाह बुद्धिविज्ञानेति तस्या
हि ज्ञानमयइति शेषः ननु चक्षुर्मयः श्रोत्रमयइत्यादि हित्वा विज्ञानमयइत्येव कस्मादुपदिश्यते तत्राह बुद्धिर्हीति तस्याः साधारण
करणत्वे प्रमाणमाह मनसाहीति मनसः सर्वार्थत्वं समर्थयते बुद्धीति किमर्थानि तर्हि चक्षुरादीनि करणानीत्याशंक्याह द्वारमा
त्राणीति बुद्धेः सति प्राधान्ये फलितमाह तस्मादिति ज्ञानं परं ब्रह्म तत्प्रकृतिको जीवो विज्ञानमयइति मतं प्रपंचैरुक्तमनुवदति येषा
मिति विज्ञानमयादिशब्देषु मयटो न विकारार्थतेति तैरेवोच्यते तत्र मनःसमभिव्याहारादिज्ञाने बुद्धिर्न चात्मा न हि कारस्तस्मादस्मिन्प्र
योगे मयटो विकारार्थत्वं वदतोस्वोक्तिविरोधः स्यादिति दूषयति तेषामिति कथं विज्ञानमयपदार्थनिर्णयार्थं प्रयोगांतरमनुस्मि

द्वितीये प्रतिवचने

१५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ली

यते तत्राह संहित्यश्चेति यथा पुरोडाशं चतुर्द्धा कृत्वा बर्हिषदं करोतीति पुरोडाशमात्रं चतुर्द्धा करणवाक्यमेकार्थसंबंधिना श्रुता।
त्वात्तरीयेणाग्नेयं चतुर्द्धा करोत्यनेन विशेषविषयेन यानिश्चितार्थेनाग्नेय एव पुरोडाशो व्यवस्थाप्यते यथा वाक्ताः शर्करा उपदधातीति
तेजसा केनाक्ता इत्यपेक्षायां तेजो वै घृतमिति वाक्यशेषान्निर्णयस्तथेहापीत्यर्थः आत्मविकारत्वे मोदनानुपपत्त्या यदबाधितमायाहा
विज्ञानमयपदार्थनिश्चयस्त्वाह निश्चितेति यदुक्तं निर्णयो वाक्यशेषादिति तदेव व्यनक्ति सधीरिति चेति आधारादयर्थे सप्तमी
इष्टा माकथं व्यतिरेकप्रदर्शनार्थं त्वाशंकाह प्राणेश्वरीति फलितमसम्यर्थमभिनयति प्राणेष्विति तेषु समीपस्थापि कूपतेभ्यो।
व्यतिरिच्यते तत्राह योहीति विशेषणान्तरमादाय व्यावर्त्यांशं कामुक्ता पुनरवतार्य व्याकरोति हृदीत्यादिना विशेषणान्तरस्यन्ता।
त्पर्यमाहान्तरितीति ज्योतिः शब्दार्थमाह ज्योतिरिति तस्य ज्योतिष्ट्वं स्पष्टयति तेनेति आत्मज्योतिषा ह्ययं स्वकार्यकरणसंघातस्य व्य
वहाररूपमत्वे दृष्टांतमाह यथेति चेतनावानिवेत्युक्तं दृष्टांतेनोपपादयति यथा चेति हृदयं बुद्धिः तेनापि स्वच्छत्वादात्मज्योतिस्तदं॰
तःस्थमपि दूरस्थादिकं संघातं च सर्वमेकीकृत्य स्वकार्यं करोतीति कृत्वा यथोक्तमणिसादृश्यमुचितमिति दृष्टांतिके योजना कथमि
दमात्मज्योतिः सर्वमात्मकार्यं करोतीति तत्राह पारंपर्येणेति विषयादिषु प्रत्यगात्मा तेषूत्तरोत्तरस्य स्वच्छतातारतम्यात्तेष्वेवान्तरादि
विषयांतेषु स्थूलतातारतम्याच्च प्रतीचः सर्वस्मादान्तरतमत्वात्तत्रतत्र स्वाकारे हेतुत्वमस्तीत्यर्थः बुद्धेरात्मकार्यकत्वे समर्थयते बुद्धिस्था
वेति लौकिकपरीक्षकाणां बुद्धावात्माभिमानदर्शनलिंगकेर्थे प्रमाणयति तेनहीति अध्यादे[illegible]र्थः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बुद्धेः पश्चादात्मनस्तथापि विज्ञायते तत्र हेतुमाह बुद्धीति आत्मनः सर्वावभासकत्वमुक्तमुपसंहरत्येवमिति आत्मनः सर्वावभास
कत्वे किमिति कस्यचित्किंचिदेवात्मधीरित्याशंक्याह तेनेहीति बुद्ध्यादेरक्रमेणात्मज्ञापकत्वं तस्मादर्थः आत्मज्योतिषः सर्वाव
भासकत्वे लोकप्रसिद्धिरेव न प्रमाणं किं तु भगवद्वाक्यमपीत्याह तथा चेति नाशिनामयमनाशी चेतनानां चेतयिता रोब्रह्मादयस्तेषा
मयमेव चेतनो यद्योटकादीनामनग्नीनामग्निनिमित्तं दाहकत्वं तथात्मचैतन्यनिमित्तमेव चेतयितृत्वमन्येषामित्याह नित्यइति अनुगमन
वदनुमाने स्वगतयाभासात्मादिति शंकां प्रत्याह तस्येति येनेति लिंगवचनावेदविद्भ्वते तं तु हे तमित्यनरत्र संबंधः ज्योतिः शब्दव्याख्यान
मुपसंहरति तेनेति हृदयान्तःस्थितोयमात्मा सर्वावभासकत्वेन ज्योतिर्भवतीति योजना परांतरमादायव्याचष्टे पुरुषइति आदित्या

दिज्योतिषः सकाशादात्मज्योतिर्विशेषमाह निरतिशयं चेति प्रतिवचनवाक्यार्थमुपसंहरति सएषइति समानः सन्नित्यादिव
तारयितुं तच्छंकीर्तयति बाह्यानामिति नहि बाह्यज्योतिःसद्भावावस्थायामकिंचित्करमात्मज्योतिरित्याशंक्याह यद्यपीति व्यति
रेकमुखेनोक्तमर्थमन्वयमुखेन कथयत्यात्मज्योतिरिति आत्मज्योतिषः सर्वानुग्राहकत्वे मानमाह यदेतदिति सर्वमंतःकरणा
दि प्रज्ञानेत्रमित्येतेरयकेर्थवणोयुक्तमात्मज्योतिषः सर्वानुग्राहकत्वमित्यर्थः किंचाचेतनानां कार्यकरणानां चेतनत्वप्रसिद्धेरुप
पत्त्या सदा चिदात्मव्याप्तिरेष्टव्येत्याह साभिमानोहीति कथमसंगस्य प्रतीचः सर्वत्र बुद्ध्यादावहंमान इत्याशंक्याह्याभिमानेति कृतमनु
योगवाक्यमवतारयति यद्यपीति यद्योक्तमपि प्रत्यक्ज्योतिर्जागरिते दर्शयितुमशक्यमिति श्रुतिः स्वप्नं प्रस्तौतीत्यर्थः अशक्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेदेतद्द्वयमाह सर्वेति स्वप्नेनिष्कृष्टं ज्योतिरिति शेषः सरणाः सत्त्वसंचरंतीति संबंधः साहश्यस्य प्रतियोगि सापेक्षत्वमपेक्ष्य दृष्टा
ति केनेति अत्र प्रकृतत्वादिति प्राणानामपि तत्स्यतदिति चेत्तत्राह मनिद्विलत्वाच्चेति हेतुद्वयं साधयति हृदीत्यादिना प्रकृतत्वा
दिफलमाह तस्मादिति सामान्यप्रश्नं विशेषे विशदयति किंस्वरित्यादिना विवेकतोऽनुपलब्धिमुक्तौ कर्त्ते बुद्धिज्योतिषोः स्वरूप साहाय्यभासेति ग्र
वभासकत्वे दृष्टांत माहालोकवदिति तथापि कथं विवेकतोऽनुपलब्धिस्तत्राह्यवभासेति प्रसिद्धिमवप्रकटयति विशुद्धत्वादीति उक्तमर्थं दृष्टांतेन उ
पपादयति यथेत्यादिना दृष्टांतगतमर्थं दार्ष्टांतिके योजयति तथेति पुनः किं परिहरतीत्यत्रमिति सर्वावभासकत्वे कथं
बुद्धेरेव सामर्थ्यमित्याशंक्याह तेनेति सर्वावभासकत्वेन लक्षणार्थः किमर्थं तर्हि बुद्ध्यासामान्यमुक्तमित्याशंक्य द्वारत्वेनेत्याह बुद्धीति
आत्मनः सर्वेणसमानत्वे वाक्यशेषमनुकूलयति सर्वमयइतिचेति वाक्यशेषसिद्धे लोकभ्रांतेर्गमकत्वमाह तेनेति सर्वमयत्वेनेति
यावत् आत्मानात्मनोर्विवेकदर्शनस्याशक्यत्वे परस्य गत्यासत्त्वं मोक्षासद्भ्रसानतस्थ लोकानां मोहोभवेदित्याह इतिसर्वेति ध
र्मिविषयेमोहमभिनयत्यमिति धर्मविषयेमोहं दर्शयं त्वेवं धर्मेति तदेवस्पष्टयति करीत्यादिना विकल्पैः सर्वो लोको मोमु
ह्यत इति संबंधः समस्तानः सन्निरस्यसार्थमुक्त्वावशिष्टभागं व्याकरोत्यतद्त्यादिना आत्मनः स्वाभाविकमुभयलोकसंचरणमित्या
शंक्यानंतरवाक्यमाहतेन तथेति प्रत्यगात्मासमनुगमः यतः शाह्यवक्ष्यमाणात् शोहनसंबध्यते अत्रतोत्यमर्थमुक्त्वावाक्यार्थमा
ह ध्यानेति ध्यानवतीबुद्धिं व्याप्तस्थिरात्मा ध्यायतीव तत्र दृष्टांतमाहालोकवदेवेति यथा लव्यालोको नीलं पीतं वा विषयं व्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आनं.
२६१

श्रुत्वानलस्याकाशेरश्मयस्तेन यथा यमपि ध्यानवतीं बुद्धिं भासयन् ध्यानवानिव भवतीत्यर्थः यथोक्तबुद्ध्यवभासकत्वमुक्तं हेतुमनूद्य फलित
मात्मन इति इवशब्दार्थं कथयति नन्विति बुद्धिधर्माणामात्मन्यौपाधिकत्वेन मिथ्यात्वमुक्तं प्राणधर्माणामपि तद्वत्तथात्वं कथयति
लेलायतीति चालननिश्चलनस्यौपाधिकत्वं साधयति नेविति इवशब्दसामर्थ्यसिद्धमर्थमाह नन्विति स हीत्याद्युत्तरवाक्यमाकांक्षाद्वारोत्थाप
यति कथमित्यादिना तत्कृतो विषयः संचरणादीत्यादिशब्दो ध्यानादिव्यापारसंग्रहार्थः स्वप्नो भूत्वा लोकमतिक्रामतीति संबंधः क
थमात्मा स्वप्नो भवतीत्यत आह स यदेति उक्तेऽर्थे वाक्यमवतार्य व्याकरोत्यत्राहेति उक्तं हेतुमनूद्य फलितमाह यस्मादित्यादिना कार्यक
रणातीतत्वादेव स्वप्नात्मनो न स्वतः संसारित्वमित्याह मृत्योरिति रूपाण्यतिक्रामतीति पूर्वेण संबंधः क्रियास्तत्फलानि वाश्रयो
येषां यानि वा क्रियाणां तत्फलानां चाश्रयः तानीत्यावत् बुद्ध्यवभासकं ज्योतिरात्मेत्युक्तमयुक्तत्वाशंकाः शंकते नन्विति प्रमाणादतिरि
क्तात्मोपलब्धिरित्याशंक्य प्रत्यक्षमनुमानं चेति प्रमाणद्वैविध्यनियममभिप्रेत्य तदभावमतिरिक्तात्मानुपलंभान्नासावस्तीत्याह धीव्य
तिरेकेणेति तत्र दृष्टान्तमाह यथेति घटादिरालोकश्चेत्युभयोर्मिथः संसृष्टयोर्विवेकेनानुपलंभवदवभास्यावभासकयोर्बुद्ध्यात्म
नोर्भेदेऽपि पृथगनुपलंभादैक्यमवभासते वस्तुतस्तु तयोरन्यत्वमेवेति शंकामनुवदति नन्विति वैषम्यप्रदर्शनेनोत्तरमाह न चेति दृष्टान्तः
समस्यार्थः घटादेरन्यत्वेनेति संबंधः ज्योतिरंतरं नास्ति चेत्कुतो ग्राह्यग्राहकसंवित्तिरित्याशंक्याह धीरेवेति बाह्यार्थवादिनः सौत्रान्तिक
वैभाषिकयोरभिप्रायमुपसंहरति तस्माच्चेति इदानीं विज्ञानवादी बाह्यार्थवादिभ्यामभ्युपगतं दृष्टान्तमनुवदति यद्यपीति बाह्यार्थवा

श्री
२६१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रुपक्रियानुष्ठानाभिप्रेतेति निरूपयति तथेति उभयत्र दृष्टांतरूपं समम्यर्थः नन्वघटादेरवभास्यादालोकोवभासकोभिन्नो लक्ष्यते तेनाह
परमार्थतस्त्विति तस्यस्यापित्वव्यावर्तेयत्वमोन्य इति प्रतीतिविषयमाधानं व्यावर्तयन्नुक्तमेव व्यनक्ति विज्ञानमात्रमिति विज्ञानवादेय
घोक्तदृष्टांतवादित्वफलमित्याह यदेति शिष्यबुद्ध्यनुसारेण त्रिविधं बुद्धाभिप्रायमुपसंहरन्नेवमित्यादिना परिकल्प्येत्यतेन बाह्यार्थ
वादमुपसंहृत्य तस्यैवेत्यादिना विज्ञानवादमुपसंजहार तत्र विज्ञानवादोपसंहारं विवृणोति तत्र ग्राह्येति शून्यवादिमतमाह तस्यापी
ति तदेवस्फुटयति तदपीति पक्षत्रयेपि दोषं संभावयति सर्वोइति कथमनुष्ठांकल्पनानोहृषणमित्याशंक्य प्रथममेव बाह्यार्थवादिनंप्र
त्याह तथेति निर्द्धारणे सप्तमी यतो धीरेवावभासकत्वेन स्वाकारेतितत्राह नेति यदवभास्यं तस्मादतिरिक्तावभासभास्यत्वात् यथा घटा
दिरवभास्याचेयं बुद्धिरित्यनुमानाद्बुद्धिव्यतिरिक्तः साक्षीसिद्ध्यतीत्यर्थः दृष्टांतं साधयति तमपीति तस्यावभासकापेक्षांदर्शयितेति वि
शेषणं सालोको घट इति संश्लेषावगमान्नास्ति घटस्य व्यतिरिक्तावभास्यत्वमित्याशंक्याह तेन्द्रियेपीति भवतु न्याय्यं किं तावतेत्याश
क्याहान्यत्वे चेति व्यतिरिक्तावभासकत्वेनादृष्टावभासकसाहित्यमिति यावत् अवभासयति घटादिरिति शेषः दृष्टांतस्य साध्यविक
लत्वपरिहृते व्यभिचारमाशंकते नन्विति तदेव व्यतिरेकमुखेनाह नहीति अनैकांतिकत्वं निगमयते तस्मादिति प्रदीपस्य पदत्व
त्त्वात्तद्व्यभिचारोस्तीति परिहरति नावभास्यत्वेति अप्यन्यावभासकत्वात्तस्यानन्यावभास्यत्वमिति चेत्तत्राह यद्यपीति अवभास्यत्व
हेतोरव्यभिचारफलितमाह यदाचेति व्यतिरिक्तावभास्यत्वं तु हेतोरिति शेषः अवभास्यत्वे सत्यपि प्रदीपे व्यतिरिक्तेनैवावभास्यत्वमिति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ॰ने॰
१६२

नियमासिद्धेर्व्यभिचारतादवस्थ्यमिति शंकते नन्विति यदि प्रदीपस्य स्वावभास[illegible]नात्पूर्वमसन्विशेषः समनंतरकाले स्यात्तदा स्वात्मा
नं भासयतीति वक्तुं युक्तं न च सोस्तीति दूषयति नेत्यादिना तदेव विवृणोति यद्येति स्वावभासत्वाविशेषादित्यर्थः प्रदीपे परोक्तं विशेषम
नुभाष्य दूषयति यत्त्वित्यादिना यदा दीपेन स्वात्मानं भासयति तदानवभासमानः स्यादित्याशंक्याह नहीति विशेषाभावेपि दीपस्य
स्वेनैवावभास्यत्वं किं न स्यादिति चेत्तत्राह सहीति दीपस्य विशेषांतराभावेपि स्वात्मसंनिकृष्टसंनिधाविशेषाविस्त्याशंक्याह नहीति ।
दीपस्य तेनान्येन वा स्वस्मिन्विशेषाभावे फलितमाह स्मतीति अभिचारनिरासपूर्वकं भास्यत्वानुमानमुपपाद्यानुमानांतरमाह
चैतन्येति यद्ग्राहकं तत्स्वविजातीयग्राह्यं यथा सूर्यादिग्राहकं च विज्ञानं तस्माद्विज्ञानव्यतिरिक्तस्थिरात्मासिद्ध्यतीत्यर्थः प्रदीपस्य ।
न स्वावभास्यत्वे किंतु विजातीयचैतन्यावभास्यत्वमिति स्थिते फलितमाह तस्मादिति यत्तु ग्राह्यं तत्तद्ग्राहकांतरग्राह्यं यथा दीपो ग्राह्य ।
श्चेदं विज्ञानमित्यनुमानांतरमाह चैतन्येति तथापि कथं तद्विग्राहकसिद्धिरित्याशंक्य विवृणोति चैतन्यग्राह्यत्वे चेति कथं तर्हि दि
ग्(?)स्तत्राह इति नेत्र दृश्यमान इति अस्तु लोकानुसारी निश्चयो लोकस्तु कथमित्याशंक्याह तथा चेति तथापि कुतो विवक्षितात्म
सिद्धिरित्यत्राह यद्येति विज्ञानस्य ग्राहकांतरग्राह्यत्वे तस्यापि ग्राहकांतरापेक्षायामनवस्थाप्रसक्तिरिति शंकते तदानवस्थेति चेदि
ति कूटस्थबोधस्य विज्ञानसाक्षिणः विषयत्वायोगानवस्थेति परिहरति नेति यत्तु ग्राह्यं तत्स्वातिरिक्तग्राह्यं यथा घटादीनि ग्राह्यत्वमा
चेद्बुद्धिग्राहकस्यानंतानवस्त्वं तत्त्वे प्रदीपस्य स्वानवभास्यत्वन्यायेन लिंगयुक्तं न च बुद्धिसाक्षिणो ग्राह्यत्वमस्ति कूटस्थदृष्टिस्वभावा

१६२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्त्वकृतोनवस्थेत्युपपादयति ग्राह्यत्वमात्रं हीति साक्षीस्वातिरिक्तग्राह्यो ग्राहकत्वात् बुद्धिवदित्याशंक्याह नत्विति ग्राहकत्वं हि ग्र
हणकर्तृत्वं वा तस्माद्वित्वं वा ग्राह्ये बुद्धिसाक्षिणो ग्रहणे स्याद्ग्रहणकर्तृत्वेन किंचिल्लिंगं संभवति द्वितीये तस्य ग्राहकांतरासिद्धत्वेन कदा
चिदपि प्रमाणमस्ति तत्कृतोनवस्थेत्यर्थः ग्राहकानवस्थां परिहृत्य करणानवस्थामाशंकते विज्ञानस्येति तस्माद्धि ग्राह्यत्वे च द्वा
रिंद्रियातीयेन करणेन भवितव्यं तस्यापि ग्राह्यत्वेन्यत्करणमित्यनवस्थां दूषयति न नियमाभावादिति नियमाभावं साधयति नहीत्या
दिना वैचित्र्यदर्शनमाकांक्षापूर्वकं स्फुटयति कथमित्यादिना उभयव्यतिरेकं विशदयति नहीति तथापि कथं वैचित्र्यं तत्राह घट
वदिति नियमाभावमुपसंहरति तस्मादिति अनवस्थाद्वयनिराकरणं निगमयति तस्माद्विज्ञानस्येति बाह्यार्थवादिमतनिराकर।
णमुपसंहरति तस्मात्सिद्धमिति बाह्यार्थवादिनि ध्वस्ते विज्ञानवादी चोदयति नन्विति बाह्यार्थो विज्ञानातिरिक्तो नास्तीत्यत्र प्रमाण
माह यद्वीति नोपलभ्यते च जाग्रद्वस्तु जाग्रद्विज्ञानव्यतिरेकेणेति शेषः दृष्टांतं समर्थयते स्वप्नेति दार्ष्टांतिके विवृणोति तथेति उक्त
मनुमानमुपसंहरति तस्मादिति सर्वं विज्ञानमात्रमिति स्थिते फलितमाह नचेति किमिति तस्य मिथ्यात्वं तत्राह सर्वस्येति बाह्यार्था
पलापवादिनं दूषयति नेत्यादिना हेतुं विशदयति नत्विति विज्ञानमात्रवादिनादेकांतेन बाह्यार्थानभ्युपगतिरिति शंकते नन्वि।
ति बाह्यार्थं दृष्टांतं गीकारयति नेत्यादिना अन्वयमुखेनोक्तमर्थं व्यतिरेकमुखेन विशदयति विज्ञानादिति ज्ञानज्ञेययोरैक्ये दोषा
न्तरमाह नचेति अनर्थकं शास्त्रमुपदिशतो बुद्धस्य सर्वज्ञत्वं न स्यादित्याह तत्कर्तेरिति वाशब्दस्यार्थः इतश्च सर्वस्य नास्ति विज्ञान।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रानं॰
१६३

मात्रत्वमित्याह किंचान्यदिति नकेवलंदर्शितोपपत्तिवशादेवबाह्योर्थोभ्युपेयः किंतन्नैवान्यदपिकारणमुच्यतइत्याह यावत्तदे
वस्फुटयति विज्ञानेति एतद्ग्राह्यंतत्स्वरूपातिरिक्तग्राह्यंयत्प्रतिवाद्यादिज्ञाग्रहस्तच्चेदग्राह्यमित्यनुमानात्तद्बाह्यार्थापलापसिद्धि
रित्यर्थः दृष्टांतेविप्रतिपत्तिमप्याह नहीति निराकर्तव्यत्वेपितेषांज्ञानमात्रत्वेकिंतस्यादित्याशंक्यात्मीयज्ञानत्वमात्मज्ञानत्वेवातेषा
मितिविकल्पक्रमेणदूषयति नहीत्यादिना स्वकीयनिषेधेस्वनिषेधेवानिष्ठापत्तिमाचष्टे तथाचेति त्वदंगीकारालोचनायामपि
प्रतिवाद्यादीनांविज्ञानातिरेकः सेत्स्यतीत्याह नचेति अन्यथाविवादाभावापातादितिभावः कथंतर्हितेषामंगीकारस्तत्राह व्यति
रिक्तेति सिद्धेदृष्टांतेफलितमनुमानेनिगमयति तस्मादिति किंचचैत्रसंतानेनमैत्रसंतानोव्यवहारादनुमीयते सर्वज्ञज्ञानेनवासर्व
तज्ज्ञानानिज्ञायंते तत्रभेदस्यतेपिसिद्धेस्तदृष्टांतान्नीलादेस्तद्धियश्चभेदः शक्योनुमातुमित्याह संतत्यंतरवदिति इतिनबाह्यार्थापा
लापसिद्धिरितिशेषः तदपलापासंभवेफलितमाह तस्मादिति विज्ञानार्थभेदोग्राह्यप्रत्ययात्माज्ञानातिरिक्तउक्तः संप्रतिविमतंज्ञाना
भिन्नंग्राह्यत्वात्स्वसंग्राह्यवदित्युक्तमनुवदति स्वमइति प्रयुक्तेविज्ञानातिरिक्तत्वमर्थस्येतिशेषः दृष्टांतस्यसाध्यविकलतामभिप्रेत्य
परिहरति नाभावादपीति संग्रहवाक्यंविवृणोति भवत्वेवेति बाह्यार्थवादिभ्योविशेषमाह तदभ्युपगम्येति तथापिकथंदृष्टांतस्यसा
ध्यविकलतेत्याशंक्याह सइति घटादिविज्ञानस्यभावभूतस्याभ्युपगतस्यघटादेर्भावादभावाद्वाविषयादर्थांतरत्वाद्यस्यकस्यचिद्बा
ह्यार्थस्योपगमाद्दृष्टांतस्यसाध्यविकलतास्वप्रसिद्धेत्यर्थः माध्यमिकमतमतिदेशेननिराकरोत्येतेनेति ज्ञानज्ञेययोर्निराकर्तुमश

१६३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कत्ववच्छेदेनेति यावत् ग्राह्यत्वेनोग्राह्यस्याहमिति प्रत्यगात्मनि च ग्राह्यत इति मीमांसकमतमपि प्रसङ्गात् एकस्यैव ग्राह्यग्राहकतायामि
रस्तत्वादित्याह प्रत्यगात्मेति क्षणभंगवादिनो क्रमवद्दृश्यप्रत्यभिज्ञाविरोधेन निराकरोति यत्तु क्रमित्यादिना स्वपक्षेपि प्रत्यभिज्ञोपप
त्तिमाशंकते सादृश्यादिति दृष्टान्तं विघटयन्नुत्तरमाह ननु तत्रापीति तथापि कथं तत्र प्रत्यभिज्ञेत्याशंक्याह जातीति तन्निभिन्ना
नेषु प्रत्यभिज्ञेति शेषः तदेव प्रपंचयति कुतेष्विति प्रधानरत्निकूटः किमिति जातिनिमित्तैषा धीर्व्यक्तिनिमित्ता किं न स्यादत आह नहीति ननु
सादृश्यवशाद्व्यक्तिमेव विषयीकृत्य प्रत्यभिज्ञानं केशादिषु किं न स्यादत आह कस्यचिदिति प्रधानस्येति यावत् दार्ष्टान्तिके वैषम्यमाह इहादि
ष्विति वैषम्यमुपसंहरति तस्मादिति यत्सत्तत्क्षणिकं यथा प्रदीपादिसन्तानस्थामीभावा इत्यनुमानविरोधान्नेतत्प्रत्यभिज्ञानमित्याशंक्याह
प्रत्यक्षेणेति अनुकूलतानुमानवत्प्रत्यक्षविरोधे क्षणिकत्वानुमानेनोदेत्यबाधितविषयत्वस्याप्यनुमित्यंगत्वादिति भावः इतश्च प्रत्यभिज्ञानेसा
दृश्यनिबंधनो भ्रमो न भवतीत्याह सादृश्येति तदनुपपन्नो हेतुमाह ज्ञानस्येति तस्य क्षणिकत्वेपि किमिति सादृश्यप्रत्ययो न सिध्यतीत्या
शंक्याहैकस्येति प्रसक्तं तर्हि वस्तुद्वयदर्शित्वमेकस्येति चेन्नेत्याह नन्विति उक्तमेवार्थं प्रपंचयति तेनेत्यादिना भवतु किं तावतेति तत्राह ने
नेतिरूपमिति ध्रुवतिष्ठतघटीतिशेषः क्षणिकत्वहानिपरिहारं शंकित्वा परिहरन्त्येत्यादिना तद्धेतुमाहानेकेति परपक्षे दोषान्तरमाह
रूपदेशेति तदेव विवृणोतीदमिति रूपदेशतक्षणानवस्थानामिति इदं शंकित्वा दूषयत्यथेत्यादिना अन्यो रूपान्तरस्य रूपदेशेस्यापाशंकापरिहारम
थेत्यादिना जात्यप्रत्यभिज्ञानादीत्यादिमाहेनष्टात्वीथे साध्यसाधनादिदृश्यते क्षणिकत्वपक्षे दूषणान्तरमाशंकतेति रूपदेशानुपपत्तिमुक्त्वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रा० वे०
१६४

मादृशानः पूंकने हृदेति सादृश्यप्रत्ययस्य संवेलास्थानीयेन प्रत्ययेनैव सेत्स्यतीत्यत आह तेनेदमिति शुणसिद्धांतप्रसक्त्याप्रत्याचष्टे नेत्या
दिना नावेवाभोप्रत्ययो विषयो तदवगाहीचेत्यध्यवसायसंवेलावयवस्थानीयः प्रत्यय इति यावत् तत्पुनः नोमिथः संबंधस्तर्हि माभूदि
तिचेन्नत्राह ममेति व्यपदेशा सादृश्यप्रत्ययानुपपत्तिस्तस्थितैवेति चकारार्थः यत्नविज्ञानस्य दुःखोगुणस्ततत्वेन दूषयति सर्वस्यचेति
शुद्धत्वा॰ तत्संसर्गे दृष्टभावाच्च ज्ञानस्य दुःखादिसंप्लवः स्वसंवेद्यत्वांगीकारादित्यर्थः ज्ञानस्य शुद्धबोधैकस्वाभाव्यमसिद्धं दाडिमादि
वज्ञानाविधर्दुःखोद्यभावत्वाद्युणादित्याशंक्याह नचेति नचैवरेत्वेतरमाहानित्येति तेषांन दुर्मत्वमत्वनुभूयमानत्वान्नतो तिरिक्तत्वेषा
दृशांतांधर्मिमात्रत्वाभावात्मेयानांच मानाद्यांतरत्वात् तोयत्मेयेन तत्ज्ञानांपो यथा घटादिमेयं च दुःखादीत्यर्थः ज्ञानस्य दुःखादिध
मीनभवति किंबस्वरूपमेवेति शंकामत्रभाष्यदोषमाहाशेत्यादिना अनुपपत्तिमेवप्रकटयति स्वयंयोगीत्यादिना स्वाभाविकस्यापि
विघोगोस्तिशुक्लरक्तत्वादीनां तच्चोपलंभादित्याशंक्याह घटपीति इत्यांतरशाहेन शुक्लसंबंधिनोवयवास्तद्वतरक्तत्वाद्यारंभकाविव
हिताः विमतंसंयोगाद्यर्वके विभागत्वात्मेघादिवदित्यनुमानान्न स्वाभाविकस्यसति वस्तुविनाशोस्तीत्यर्थः अनुमानानुरूपांदर्शयति
बीजेति कार्पासादिबीजे द्रव्यविशेषसंपर्कोद्रक्तादिवासनया तन्तुष्वादीनां रक्तादिगुणोदयोपलंभात्स्वयोगिद्रव्यापगमादेवतस्या
व्यादिष्वरक्तत्वाद्युपगतिरित्यर्थः विशुद्ध्यनुपपत्तिमुपसंहरत्यतइति कल्पनांतरमनूद्य दूषयति विषयविषयीति कथंचनतीनस्यात्म
नसंसर्गाभावस्तस्यविषयेणासंसर्गादित्याशंक्याह नहीति यथान्यसंसर्गमंतरेणापिज्ञानस्यविषयाभासत्वमतस्यादितिचेन्नत्राह

१६४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तिचेति कल्पनाद्वयमप्याप्रामाणिकमनादृत्य मिश्रउपसंहरति तस्मादिति कल्पनांतरमुपपादयति यद्यपीति उपपत्तिर्निर्दोषणशाद्दा।
र्थः द्रुष्यति तथापीति फलाभावेपि फलस्यादित्विचेष्टन्याह केरकेति दार्ष्टांतिके विवृणोति यस्मादिति ननु त्वन्मतेपि वस्तुनोः द्वयत्वा
तस्यासंगस्य केनचिदपि योगवियोगयोरयोगात्फलित्वासंभवे मोक्षासंभवादिति तत्राभिमानेन शंकामाह यद्यप्यहमिति यद्यपिशंकावस्तुव
त्तितोसंगासंगोक्रियते तथापि क्रियाकारकफलभेदस्याविद्यामात्रकल्पितत्वादस्मन्मते सर्वव्यवहारसंभवान्न सामस्यमिति भावः ननु वा
र्थवादोपि ज्ञानवादस्तु निराकृतो शून्यवादो निराकर्तव्योपि कस्मान्न निराक्रियतेनत्याह शून्यवादीति समस्तस्य वस्तुनः सत्वेनभा
नात्मानात्मनोश्च सर्वेषामसद्विषयत्वाच्छून्यस्य चाविषयतयाप्रामाण्याभावेन निराकरणानर्हत्वात् सद्विषयत्वे च शून्यवादिनैव विषयनिराकरणे
कृताः शून्यस्यापक्षपातात् स्वस्वरूपस्फुरणास्फुरणयोः सर्वशून्यत्वायोगात् सदादिनस्तु सत्वासत्वयोस्तदनुपपत्तेः संवृत्तेश्चाश्रयाभावादसंभवान्न
दाश्रयत्वे च शून्यस्य स्वरूपहानात् निराश्रयत्वे वा संवृतित्वाज्ञानस्याभिन्नत्वात् निराकार्यादरः क्रियतेतस्तिरस्कृत्यायतिरिक्तं निष्प्रसिद्धमन्य
तदुद्दिष्टस्य मद्धर्मात्मज्योतिरिति भावः प्रसंगागतेन परपक्षं निराकृत्य प्रकृतव्याख्यानमेवानुवर्तयन्नुत्तरवाक्यतात्पर्यमाह यद्येति
एवमात्मादेहभेदेपि वर्तमानेजन्मान्यजन्मनिजन्मांतरे चोपादानः कार्यकरणान्यतिक्रामतीति शेषः अतः स्वप्नजागरितसंचाराद्देहाद्यति
रेकवदिहलोकपरलोकसंचारेणापि तदतिरेकस्तस्योच्यते नेतरवाक्येनेत्यर्थः संप्रत्युत्तरवाक्यं शंकोत्थाप्य व्याकरोति सवा अयमित्यादिना
पाप्मशब्दस्यलक्षणयातत्कार्यविषयत्वं दर्शयति पाप्मसमन्वायिभिरिति पाप्मशब्दस्य पापवाचित्वेपि कार्यसामान्याद्धर्मेपि वृत्तिरसंचयः।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शान्ते॰
२६५

ति धर्मार्थमिति उक्तमर्थं दृष्टान्तत्वेनानुवदति यथेति अवस्थाद्वयसंचारस्य लोकद्वयसंचारे दार्ष्टान्तिकमाह तथेति इहलोकपरलो
कावनवरतं संचरतीति संबंधः संचरणप्रकारं प्रकटयति जन्मेति जन्मना कार्यकरणयोरुपादाने मरणेन च तयोः त्यागं प्रविच्छे
देनलभमानो मोहाद्वीगानवरतं संचरन् दुःखी भवतीत्यर्थः सर्वा इत्यादिवाक्यतात्पर्यमुपसंहरति तस्मादिति तदुक्तार्थमेवस्फु
टयति संयोगेति कथमेतावुक्तौ तेभ्योऽन्यत्वेन तत्राह नहीति स्वाभाविकस्य हि धर्मस्य सति स्वभावे कुतः संयोगविभागौ वज्ञोऽस्यादि
ष्टदर्शनात्कार्यकरणयोस्तु संयोगविभागवशात्स्वाभाविकत्वे सिद्धमात्मनस्तदन्यत्वमित्यर्थः तस्येत्यादिवाक्यस्यावतरणीं शंकामा
ह नन्विति अवस्थाद्वयवल्लोकसिद्धिरित्याशंक्याह स्वप्नेति कथं तर्हि लोकद्वयप्रसिद्धिरत आह तस्मादिति तत्रान्तरत्वेनान्तरेवाक्यस्थ
स्योपव्याकरोत्यभ्यन्तर इति स्थानद्वयप्रसिद्धिद्योतनार्थो वै शब्दः अवधारणे विभूणोतीति नेति वेदनाद्युत्तेः दुःखादिलक्षणा प्रागुक्तस्य
परलोकसाधकत्वमभिप्रेत्याह तत्वेति अवधारणमाहितपति नन्विति तस्य स्थानान्तरत्वे हृष्यति नेति स्वप्नस्य लोकद्वयातिरिक्तस्था
नत्वाभावे कथं तृतीयत्वप्रसिद्धिरित्याह कथमिति तस्य संध्यत्वान्न स्थानान्तरत्वमित्युत्तरमाह संध्यमिति संध्यत्वमुत्पादयति इहेति य
त्स्वप्नस्थानं तृतीयं मन्यसे तदिहलोकपरलोकयोः संध्यमिति संबंधः तस्य संध्यत्वे फलितमाह तेनेति [illegible]स्थानान्तरत्व
मेव स्वप्नस्य किं तस्मादित्याशंक्य प्रथमश्रुतसंध्यशब्दविरोधात्तृतीयत्वमित्याह नहीति परलोकास्तित्वे प्रमाणान्तरजिज्ञासयाऽपृच्छति क
थमिति प्रत्यक्षप्रमाणयत्नत्वरमाह यत इत्यादिना स्वप्नप्रत्यक्षं परलोकास्तित्वे प्रमाणमित्युक्ते तदेवोत्तरवाक्येन स्फुटयितुं पृच्छति

३५

२६५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कथमिति कथंशब्दार्थमेव प्रकटयति किमित्यादिना वाक्यशून्यत्वेनोत्थापयति उच्यत इति तत्राथशब्दस्तु क्रमप्रश्नार्थत्वाद्वाक्या।
रोत्थ्येति उत्तरवाक्यशून्यत्वेनव्याचष्टे शृणुचेति यदुक्तं किमाश्रयइतितत्राह यथाक्रमइति यदुक्तं केन विधिनेतितत्राह तस्मात्क्रम
मिति पाप्मशब्दस्य यथाश्रुतार्थत्वे सम्भवति किमितिफलविषयत्वं तत्राह नत्विति मातादारागमादृते प्रत्यक्षेणेति यावत् पाप्मना
मेवसाक्षाद्दर्शनासम्भवस्तूक्तश्चार्थः कथंपुनरायुर्वयसि पाप्मनामानेदानां च स्वप्ने दर्शनं तत्राह जन्मान्तरेति यद्यपि मध्यमे वयसि
कृतपारलौकिकवासनया स्वप्नेदृष्टपतेतथापिकथमेतिमेवयसि स्वप्नदर्शनं तत्राह यानिचेति फलानांहेतुत्वमवलेशतोभि
क्तत्वयानीत्युपक्रमात्तानीत्युपसंहारात्तद्व्याख्यानत्वमपैहिकवासनावशाद्दैहिकानामेवपाप्मनामानेदानांचस्वप्नदर्शनसम्भवात्।
स्वप्नस्य तदेव परलोकसाधकमिति शंकते तत्कथमितिपरिहरत्युच्यत इति यद्यपि स्वप्ने मनुष्याणामिन्द्रादिभावो न तु भूतोऽपि जातितः
स्यापितद्दृष्टवैमेवदर्शनमित्याशंक्याह नचेति भाविजन्मभाविनोऽपि स्वप्नदर्शनात् प्रायेणेत्युक्तेनचनदृष्टवेदर्शनमपिसम्यक्त्तृत्ता
नस्त्वस्यानप्रत्ययबाधान्नचैवं स्वप्नधियाभाविजन्मासिद्धिर्येप्राप्तानुसंधानीकरादितिभावः प्रमाणफलमुपसंहरति तेनेति सप्र
बेत्यादिवाक्यस्याप्यवहितेनसंबंधंवक्तुंवृत्तमनूद्यादिपति यदित्यादिना बाह्यज्योतिरभावे मत्यंयेपुरुषःकार्यकरणसंघातो येन स
घातातिरिक्तेनात्मज्योतिषागमनागमनादिनिर्वर्तयति तदात्मज्योतिरस्तीति यदुक्तमित्यनुवादार्थः विशिष्टस्यानाभावे वक्त।
विशेषणाभावेनावदृश्यति तदेवेति आदित्यादिज्योतिरभावविशिष्टस्यानेयचेत्युक्तं तदेवस्थानेनास्ति विशेषणाभावादितिशे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रा॰ वे॰
१६६

षः यथोक्तस्यात्मनो भावे हेतुमाह येनेति संसृष्टो बाह्यैर्ज्योतिर्भिरिति विशेषः व्यवहारभूमौ बाह्यज्योतिरभावाभावे फलितमाह तस्मा
दिति उभयग्रंथस्तुल्यत्वेनावतारयत्यथेत्यादिना यथोक्तं सर्वव्यतिरिक्तत्वे स्वयंज्योतिष्ट्वमित्यादि ग्राह्यं स्वप्नप्रसंगोक्तीति यावत् उपादानश
ब्दः परिग्रहविषयः कथमस्य सर्वावत्त्वं तदाह सर्वावत्त्वमिति संसर्गकारणभूताः सहाज्ञानात्मादिविभागेनेति विशेषः किमुपादानं इत्या
स्यात्मस्वुक्ताकेन विधिनेत्यस्योत्तरमाह स्वयमित्यादिना आपाद्य प्रस्वापितौ तूत्तरत्र संबंधः कथं पुनरात्मनो देहविदेहत्वे जाग्रद्देहत्वक
र्मफलोपभोगोपरमणात् हि स्वविरचयते तदाह जागरितेदेहीत्यादिना निर्माणविषयं दर्शयति वासनामयमिति यथा मायावी माया
मयं देहं निर्मातितद्वदित्याह मायामयमिवेति कथं पुनरात्मनो यथोक्तदेहनिर्माणकर्तृत्वं कर्मकृतत्वान्निर्माणस्येत्याशंक्याह
निर्माणमपीति स्वेन भासेत्यत्रेत्थंभावे तृतीया करणे तृतीयां व्यावर्तयति सा हीति तत्रेति स्वप्नोक्तिः यथोक्तात्मनः करणेषूपरमे विषयत्वे
न प्रकाशमानत्वे पि स्वभासो भवतु करणत्वमित्याशंक्याह सात्वेति स्वेनज्योतिषेति कर्तरि तृतीया स्वशब्दो ह्यात्मविषयः को यं प्र
स्वापो नाम तत्राह यदेवमिति विविक्तविशेषणं विवृणोति बाह्येति स्वप्ने स्वयंज्योतिरात्मेत्युक्तमाक्षिपति नन्वस्येति वासनापरिग्र
हस्य मनोवृत्तिरूपस्य विषयतया विषयित्वाभावाद्विरुद्धमात्मनः स्वप्ने स्वयंज्योतिष्ट्वमिति समाधत्ते नैष दोष इति उक्तो वासनोपादा
नस्य विषयत्वमित्याशंक्य स्वयंज्योतिष्ट्वफलितसामर्थ्यादित्याह तेनेति मात्रादानस्य विषयत्वेनेति यावत् तदेव व्यतिरेकमुखेनाह न
त्विति यथा सुषुप्तिकाले व्यक्तस्य विषयस्याभावे स्वयंज्योतिरात्मा दर्शयितुं न शक्यते तेन तथा स्वप्ने पि तस्मान्न स्वयंज्योतिष्ट्वमत्यामाशाद्या

१६६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्यविषयत्वेप्रकाशितमित्यर्थः भवतस्तस्येवासनादानस्यविषयत्वेनतथापिकथंस्वयंज्योतिरात्माशङ्कातेविविच्यदर्शयितुमित्याशं
कयाह यदासुप्तइति स्वप्नभासंयदस्वभासंवासनात्मकंमेतःकरणमितिशेषः स्वप्नावस्थायामात्मनोवभासकांतराभावेफलितमाह
तेनेति यदुक्तंतस्येवस्वयंज्योतिरात्मेतितस्यकार्यांतरेणाक्षिपति नत्विति स्वप्नस्याहृद्येविशेषाभावकृतेचोद्येहृदयस्यच्यतइति वैलक्ष
ण्यंस्फुटयति जागरितेहीति मनस्तत्स्वप्नेप्यपिविषयत्वात्तत्स्वयंज्योतिष्ट्वविघातीतिभावः उक्तंवैलक्षण्यंप्रतीतिमाश्रित्याक्षिपति
नत्विति ननुचेत्यादिवाक्यंव्याकुर्वन्नुत्तरमाह यथेति प्रतीतिद्वैरूप्यमुपैति रथादिरूपस्यैमाक्षिपति कथंपुनरिति वासनामयीस
ष्टिःश्लिष्टेत्युत्तरमाहोच्यतइति तदुपलब्धिनिमित्तेनेत्यत्रतत्कृतेनवासनात्मिकामनोवृत्तिरेवोक्ताउक्तमेवप्रपंचयति नत्वित्यादिना
तदुपलब्धिर्वासनोपलब्धिस्तत्रयत्कर्मेतिनिमित्तेनचोदितत्तयायोगुद्भूतांतःकरणवृत्तिग्राहकावस्थातदाश्रयेतदात्मकंतद्वासनारूपे
रूपपतइतियोजना तथापिकथमात्मज्योतिःस्वप्नेकेवलंसिद्धमितितत्राह तद्यस्येति यथाकोशादसिर्विविक्तोभवतितथारूपपायातु
देर्विविक्तमात्मज्योतिरितिकैवल्यंसाधयत्यसिरिवेति तथारथाद्यभाववदितियावत् सुखान्येवविशिष्यंतइतिविशेषाःसुखसामा
न्यानीत्यर्थः तत्रेत्यानेतराद्यभावोदृष्टांतितःग्रल्पीयांसिसरांसिपल्वलशब्देनोच्यंते सरितकेत्यत्रेशिष्टार्थोयस्मादित्युक्तःतस्मात्स्व
न्नतीतिशेषः उक्तास्यकर्तृत्वसहकार्यभावादित्याशंकाह तद्वासनेति तत्कृतेनवेशांतादियहणेतदीयवासनाधारश्चित्तपरिणाम
स्तेनोद्भवति यत्कर्मतस्यस्वज्यमानतिदानत्वेनेतियावत् उपाधेःकर्तृत्वंवारयति नत्विति तत्रेतिस्वप्नेक्रियाःसाधनाभावेपिस्वप्नेक्रिया

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रा॰वे॰
१९९

षः यथोक्तस्यात्माभावे हेतुमाह येनेति संसृष्टो बाह्यैर्ज्योतिर्भिरिति विशेषः व्यवहारभूमौ बाह्यज्योतिरभावाभावे फलितमाह तस्मा
दिति उत्तरग्रन्थस्तूत्तरत्वेनावतारयत्यथेत्यादिना यथोक्तं सर्वव्यतिरिक्तं स्वयंज्योतिष्ट्वमित्यादि ग्राह्यस्वप्नप्रसंगेनेतीति यावत् उपादानश
ब्दः परिग्रहविषयः कथमस्य सर्वावत्त्वं तदाह सर्वावत्त्वमिति संसर्गकारणभूताः सहाद्यात्मादिविभागेनेति शेषः किमुपादानस्य त्वा
स्यान्तरमुक्ताकेन विधिनेत्यस्योत्तरमाह स्वयमित्यादिना प्रापाय प्रस्वपितीत्युत्तरत्र संबंधः कथं पुनरात्मनो देहविहन्तृत्वं जाग्रद्देहक
र्मफलोपभोगोपरमणाद्धि सविहन्यते तदाह जागरितेति देहीत्यादिना निर्माणविषयं दर्शयति वासनामयमिति यथा मायावी माया
मयं देहं निर्मातितद्वदित्याह मायामयमिवेति कथं पुनरात्मनो यथोक्तदेहनिर्माणकर्तृत्वं कर्मकृतत्वान्नन्निर्माणस्येत्याशंक्याह
निर्माणमपीति स्वेन भासेत्यत्रेत्थंभावे तृतीया करणे तृतीयां व्यावर्तयति सा हीति नचेति स्वप्नोक्तिः यथोक्तेनः करणस्यैव विषयत्वे
न प्रकाशमानत्वेपि स्वभासो भवत्युकरणत्वमित्याशंक्याह सात्त्वेति स्वेनज्योतिषेतिकर्तरि तृतीया स्वशब्दो ह्यात्मविषयः कोयंप्र
स्वापो नाम तत्राह यदेवमिति विविक्तविशेषणं विवृणोति बाह्येति स्वप्ने स्वयंज्योतिरात्मेत्युक्तमाक्षिपति नन्वस्येति वासनापरिग्र
हस्य मनोवृत्तिरूपस्य विषयत्वयाविषयित्वाभावाद्विरुद्धमात्मनः स्वप्ने स्वयंज्योतिष्ट्वमिति समाधत्ते नैष दोष इति उक्तो वासनोपादा
नस्य विषयत्वमित्याशंक्य स्वयंज्योतिष्ट्वं फलितमाममर्थ्यादित्याह नैवेति मायादानस्य विषयत्वेनेति यावत् तद्व्यतिरेकश्रवणेनाह न
त्विति यथा स्वसुप्तिकाले व्यक्तस्य विषयस्याभावे स्वयंज्योतिरात्मा दर्शयितुं न शक्यते तथा स्वप्नेपि तस्मान्न स्वयंज्योतिष्ट्वमात्मावा

१९९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्य विषयत्वे प्रकाशितमित्यर्थः भवतु स्वप्ने वासनादानस्य विषयत्वं तथापि कथं स्वयंज्योतिरात्मा शक्यते विविच्य दर्शयितुमित्याशं-
क्याह यदापुनरिति अवभास्यस्य तदवभासवासनात्मकं मनः करणमिति शेषः स्वप्नावस्थायामात्मनोऽवभासकान्तराभावे फलितमाह
तेनेति यदुक्तं स्वप्ने स्वयंज्योतिरात्मेति तत्प्रकारान्तरेणाक्षिपति नन्विति स्वप्नस्याहृदये विशेषाभावकृते चोद्ये हृद्यस्तूच्यत इति वैलक्ष-
ण्यं स्फुटयति जागरिते हीति मनस्तु स्वप्नेऽपि विषयत्वान्न स्वयंज्योतिष्ट्वविघातीति भावः उक्तं वैलक्षण्यं प्रतीतिमाश्रित्याक्षिपति
नन्विति ननु चेत्यादिवाक्यं व्याकुर्वन्नुत्तरमाह ध्यायतीवेति प्रतीतिं द्वरयत्येवेति रथादिसृष्टिमाक्षिपति कथं पुनरिति वासनामयी सृ-
ष्टिः स्पष्टेत्युत्तरमादावुच्यत इति तदुपलब्धिनिमित्तेनेत्यत्र तच्छब्देन वासनात्मिका मनोवृत्तिरेवोक्ता उक्तमेव प्रपंचयति नन्वित्यादिना
तदुपलब्धिर्वासनोपलब्धिस्तत्र यत्कर्म निमित्तं तेन चोदितं तथा योद्भूतं तत् करणवृत्तिग्राहकावस्था तदाश्रयेण तदात्मकं तद्वासनारूपे-
ह्रूयत इति योजना तथापि कथमात्मज्योतिः स्वप्ने केवलं सिद्ध्यतीत्याह तद्यस्येति यथा कोशादसिर्विविक्तो भवति तथा द्रष्टा बु-
द्धेर्विविक्त आत्मज्योतिरिति कैवल्यं साधयत्यस्मिन्निवेति तथा रथाद्यभाववदिति यावत् तत्तुल्योऽन्येव विशिष्यत इति विशेषः स्वसामा-
न्यानीत्यर्थः तद्युक्त्यान्तरायभावो हृष्टान्तिनः अल्पीयांसि सरांसि पल्वलशब्देनोच्यते सरित्कर्मनद्यादिर्महाश्चो यस्मादित्युक्तः तस्मात्स्व-
जतीति शेषः कुलालस्य कर्तृत्वं सहकार्यभावादित्याशंक्याह तद्वासनेति तच्छब्देन वेशान्तादिग्रहणं तदीयवासनाधारश्चित्तपरिणाम-
त्वेनोद्भवति यत्कर्म तत्सर्वजन्यमानं निदानत्वेनेति यावत् उक्तं कर्तृत्वं वारयति नन्विति तत्रेति स्वप्ने कृतिः साधनाभावेऽपि स्वप्ने क्रिया।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रा॰वं॰
१६८

किं न स्यादित्याशंक्याह नहीति न हि स्वप्नेकारकाण्यपि भविष्यंतीत्याह नचेति न हि स्वर्गेकर्मापेक्षकर्तृत्वं कथमिति चेत्तत्राह यत्त्विति उ
क्तेष्वेवाक्योपक्रमसमनुक्रमलयतीति तदुक्तमिति उपक्रमे मुख्यं कर्तृत्वमिह त्वौपचारिकमिति विशेषमाशंक्याह तत्रापी
ति परमार्थतस्तत्त्वतो निरोधाव्यापारत्वबुद्ध्याद्यवभासकत्वव्यतिरेकेण स्वतो न कर्तृत्वं वाक्योपक्रमे विवक्षितमित्यर्थः आत्मनो वाक्योप
क्रमे कर्तृत्वमौपचारिकमित्युपसंहरति यदिति सविकल्पत्वौपचारिकं कर्तृत्वमुच्यते चेत्तत्स्वध्यायतीवेत्यादिनोक्तत्वान्न तत्क्रियेत्याशंक्या
ह तदुक्तमिति सूत्रवादेः प्रयोजनमाह हेत्वर्थमिति स्वप्नेऽरण्यादिस्रष्टा विविशेषः तदेते श्लोका भवंतीत्यत्र तत्पदवृत्तीकेश्लोकं व्याचष्टे तदेतद
ति उक्तोर्थः स्वप्नज्योतिष्ट्वादिः शारीरमिति स्वार्थे वृद्धिः स्वप्नस्थानेनमालनुमेति आद्यंपदमादाय व्याचष्टे सुप्तानित्यादिना उक्तमा
नूद्यपदांतरमवतार्य व्याकरोति सुप्तानभिचाकशीतीति तथाशाहृत्यमुपात्त विशेषणसमुच्चयार्थः किमिति स्वप्नेप्राणेन शरीरमात्मा पा
लयतीत्याह रक्षन्नपरेति बहिश्चरित्वेत्युक्तेः शरीरस्य सर्वसंबंधोपलंभादित्याशंक्याह यद्यपीति तत्संबंधाभावाद्बहिश्चरित्वेत्युच्यत इति सं
बंधः देहस्थस्यैव तत्संबंधे दृष्टांतमाह तस्यैति स्वप्नस्थ विशेषांतरमाह किं चेति उच्चावचं विषयीकृत्य तेन तेनात्मनात्मैवेक्ष्य यन्
स्वमानस्तीत्यावत् आरामं विहंगोतीति आराममित्यादिना नतमित्यादेस्तात्पर्यमाह कष्टमिति हाहिंगोचरापन्नमपि न पश्यतीति संबंधः
कष्टमित्यादिनोक्तं प्रपंचयस्मरो इति श्लोकानंतातात्पर्यमुपसंहरत्यत्रेति वाक्यांतरमादाय तात्पर्यमुक्त्वा व्याख्यातोत्सर्वमक्षराणि व्याक
रोति तंवैत्यादिना तेषामभिप्रायमाह नूनमिति इंद्रियाणि हारिदास्यैति इंद्रियद्वारो जाग्रद्देहस्तस्मादिति यावत् तथापि सत्स्वप्नो बो

१६८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

च्छन्नेऽकाहानिरित्याशंक्याह नचेति सहसाबोध्यमानत्वसमर्थः किमत्र प्रमाणमित्याशंक्यानन्तरवाक्यमवतार्य व्याचष्टे तदेतदा
हेत्यादिना पुनरप्रतिपत्तौ दोषप्रसंगं प्रदर्शयति कदाचिदिति व्याहत्यामेप्रवेशस्य कार्यं दर्शयन्दुर्भिषज्यमित्यादि व्याचष्टे नतइति
उक्तां प्रसिद्धिमुपसंहरति तस्मादिति वृत्तमनूद्य मतान्तरमुत्थापयति स्वप्नोभूत्वेत्यादिना इति प्राप्ते यस्मादर्थे न देवमतान्तरं स्फोरय।
ति नेत्यादिना उक्तमंगीकृत्य फलं पृच्छति यद्येवमिति स्वप्नो जागरितदेशश्चेदेवं यदीष्टमतश्च किं स्यादिति प्रश्नार्थः फलं प्रतिज्ञाय प्र
कटयति धृतिमित्यादिना मतान्तरोपन्यासस्य स्वमतविरोधित्वमाह स्वप्नतइति स्वप्नस्य जाग्रद्देशत्वं दूषयति तदसदिति तस्य जागरि।
तदेशत्वाभावे फलितमाह तस्मादिति स्वप्ने बाह्यज्योतिषः संभवो नास्तीत्यत्र प्रमाणमाह तदुक्तमिति बाह्यज्योतिरभावेपि स्वप्ने व्यवहा
रदर्शनादत्र स्वयंज्योतिष्ट्वमात्मनो न शक्यमित्युपसंहरति तस्मादिति कथं पुनर्विद्यायामनुक्तायां सहस्रदानवचनमित्याशंक्याहूक्तेनेति।
यति स्वयंज्योतिरिति मृत्योरूपाण्यतिक्रामतीत्यत्र चकारार्थं करणव्यतिरिक्तत्वमात्मनो दर्शितमित्याहातिक्रामतीति लोकद्वयसंचार
वशादुक्तमर्थमनुस्मरति क्रमेणेति प्रागिति शरीरदेहादिविषयः स्थानद्वयसंचारवशादुक्तमनुभाषते तथेति इहलोकपरलोकाभ्यामि
तिचेतियावत् लोकद्वये स्थानद्वये च क्रमसंचारमुक्तमर्थान्तरमाह नचेति आत्मनः स्वयंज्योतिषो देहादिव्यतिरिक्तस्य नित्यस्य तत्रापि।
सत्त्वादित्यतः शङ्कार्थः कामप्रश्नस्य निर्णीतत्वान्निराकांक्षत्वमिति शंकां वारयति विमोक्षायेति सम्यग्बोधस्तद्धेतुरितियावत् ननु।
स एव प्रागुक्तो नासौ वक्तव्योऽस्तीत्याह तदुपयोगीति प्रथममित्युक्तानामप्रत्ययोक्तिः तादर्थ्यात्पदार्थज्ञानस्य वाक्यार्थज्ञानशेषत्वादि।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रा॰ने॰
१६५

तियावत् पदार्थस्य वाक्यार्थबहिर्भावं दूषयति नैकदेशएवेति कामप्रश्नो नाद्यापि निर्णीत इत्यत्रोत्तरवाक्यं गमकमाहान इति का
मप्रश्नस्यानिर्णीतत्वादित्यावत् तेनोपहितेन हेतुनेत्यर्थः विमोक्षशब्दस्य सम्यक्ज्ञानविषयत्वं सूचयति येनेति सम्यक्ज्ञानप्राप्तौ
गुरुप्रसादस्य प्राधान्यं दर्शयति त्वत्प्रसादादिति ननु विमोक्षपदार्थो निर्णीतो न्यथा सर्वसदानस्याकस्मिकत्वप्रसंगादतआह विमोक्षे
ति उत्तरकांडिकामवतारयितुं पूर्वं कीर्तयति यत्सत्यमिति आत्मनैवेत्यादिनायदात्मनः स्वयंज्योतिष्ट्वं ब्राह्मणादौ प्रस्तुतं तदत्रायमि
त्यादिना प्रत्यक्तत्वः स्वयं प्रतिपादितमिति संबंधः वृत्तमर्थान्तरमनूद्य चोद्यमुत्थापयति यत्र कामिति शब्देनातिक्रामतीत्यत्र हेतुमाह प्रत्य
ग्देहीति इच्छाहेयादिरादिशब्दार्थः तथापि कुतो शब्देनातिक्रामतीत्यत आह तस्मादिति कार्यस्य कारणादन्यत्वहेतुसंयोगादित्यावत् उ
क्तमुपपादयति कर्मणोहीति अतः स्वर्गतो शब्देन कर्मात्वेनातिक्रामतीति शेषः मा तर्हि श्रुत्योरतिक्रमो भूत् कोदोषस्तत्राह यदि चेति स्व
भावादपि श्रुत्योर्विउत्क्रमाशंक्याह नहीति उक्तं हि न हि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेरिति कथं तर्हि मोक्षोपपत्तिरित्याशंक्याह
येति एषा वाशंका मार्गे वक्तान्ताकृते निदर्शयन्नुत्तरमुत्थापयति यथेत्यादिना तद्दिदर्शयिषये त्यत्र तत्कृत्वेन श्रुत्योरतिक्रमणे शक्यते वैश्या
हस्य श्रसिद्धार्थत्वमुपेत्य प्रशाङ्कार्थमाह प्रकृतइति एवं शङ्कमनूद्य व्याकरोत्येष इति संप्रसादे स्थित्वा शब्दमतिक्रामतीति शेषः सुषुप्त्या
स्य संप्रसादत्वं साधयति जागरितइत्यादिना तत्र वाक्यशेषमनुकूलयति नीलोहीति अस्तु संप्रसादः सुषुप्तस्थानं तथापि किमायातं
मित्यत आह सवाइति एवं क्रमेण संप्रसादे स्वप्ने स्थित्वा संप्रसन्नः स शब्दमतिक्रामतीत्यर्थः उक्तमर्थमुपपादयितुमाकांक्षामाह

१६५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कथमिति इत्येतस्मादित्यादूर्ध्वेन परिहरति स्वप्नादिति पुण्यपापशब्दयोर्यथाश्रुतार्थत्वमाशंक्याह नत्विति ननु चोक्तमुभयान्पाप्म-
नः आनन्दांश्च पश्यतीत्युच्येतेति चोद्यः पुण्यपापयोर्दर्शनमेव न करणमित्यत्र फलितमाह तस्मादिति तत इष्टापितदुःखबन्धः स्यादित्या-
शंक्याभिप्रसंगात्मैवमित्याह योऽहीत्यादिना पुण्यपापाभ्यामात्मनोऽसंस्पर्शं फलितमाह तस्मादिति मृत्योरतिक्रमणे किं स्यादित्या-
शंक्याहातो नेति मृत्योरस्वभावत्वमुपपादयति श्रुतश्चेदिति इष्टापत्तिमाशंक्याह नत्विति अनन्वागतवाक्यात्संगवाक्याच्चेत्य-
र्थः मोक्षशास्त्रप्रामाण्यादपि मृत्योरस्वभावत्वमित्याह स्वभावश्चेदिति इतश्च मृत्युः स्वभावो न भवतीत्याह नत्विति अभावादिति
च्छेदः तस्मात्स्वभावत्वे लब्धमर्थं कथयति अत इति मृत्युमेव व्याचष्टे पुण्यपापाभ्यामिति स्वप्ने मृत्योः स्वभावत्वाभावेऽपि जाग्रदव-
स्थायां कर्तृत्वमात्मनः स्वभावस्तस्याविनियमेन तस्य मृत्योरतिक्रमो न सिध्यतीति शंकते नत्विति औपाधिकत्वात्कर्तृत्वस्य स्वाभा-
विकत्वाभावादात्मनो मृत्योरतिक्रमः संभवतीति परिहरति नेति कथमौपाधिकत्वं कर्तृत्वस्य सिद्धवदुच्यते तत्राह नह्येति ध्या-
यतीवेत्यादावाह इववाचकादिवशब्दादौपाधिकत्वं कर्तृत्वस्य प्रागेव दर्शितमित्यर्थः जागरेऽपि कर्तृत्वस्यास्वाभाविकत्वाभावे फ-
लितमाह तस्मादिति मृत्योः स्वाभाविकत्वशंकाभावकृतं फलमाह अनिर्मोक्षता वेति वाशब्दोऽनुकर्षणार्थः पुण्ये च पापे चेमे
तदेतद्वाक्यं व्याख्याय पुनरित्यादि व्याचष्टे तत इति स्वप्नाद्व्युत्थाय सुषुप्तिमनुभूयोत्तरकालमिति यावत् स्थानात्स्थानान्तरप्राप्ता-
वभ्यासं वक्तुं पुनः शब्दः प्रतिन्यायमित्यस्यावयवार्थमुक्त्वा विवक्षितमर्थमाह पुनरिति संप्रसादादहमिति यावत् जागरितान्तस्व।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रेततः स्वप्नमेवागच्छतीति पूर्वेणगमनं ततो वैपरीत्येन स्वप्नान्तात्प्रेजागरितेवागच्छतीति यदागमने सप्रतिन्यायः तमेव संक्षिपति य
थेति यथास्थानमागच्छतीत्येतद्विवृणोति स्वप्नस्थानादिति उभेर्थेवाक्यं पातयति प्रतियोनीति किमर्थं यथास्थानमा[illegible]ते
[illegible]गमनेनदाह स्वप्नायेति सयदित्यादिवाक्यस्याव्यवधीमाशंकामाह नन्विति तत्रवाक्यशुक्रत्वे
नावतार्थ्याकरोत्यतन्नाहेति अनन्वागतस्त्वस्यार्थंस्फुटयति नैवेति सयदित्यादिवाक्यस्यान्तरंगत्वात्परत्वार्थमाह यदिहीति
नात्मनेतियावत् स्वप्ने कृतेन कर्मणा पुनस्तेनेत्युक्त्वा अनन्वागतत्वे हेतुमाह स्वप्नादिति इष्टापत्तिमाशंक्याह नचेति स्वप्नकृतेन कर्मणा जा
ग्रद्वस्यस्यानुरूपस्यान्वागतत्वप्रसिद्धिरिति यदुच्यते तच्चापि वदारम्भमौ संप्रतिपन्नमित्यर्थः स्वप्नदृष्टेन जाग्रत्गतस्य न संगतिरित्यत्र
स्वानुभवं दर्शयति नहीति यथाकेनुभवे लोकस्यापि संमतिं दर्शयति नचेति तत्फलितमाहातइति कथं तर्हि स्वप्नेकर्तृत्वप्रतीति
स्तत्राह तस्मादिति स्वप्नस्याभासत्वात्सनतत्रवस्तुतोस्तिक्रियेत्याह उतैवेति तदाभासत्वेलोकप्रसिद्धिमनुकूलयति आख्यातारश्चेति
स्वप्नस्याभासत्वे फलितमाहातइति अनन्वागतवाक्यं प्रतिज्ञार्थंव्याख्याय असंगवाक्ये हेतुरूपमवतारयितुमाकांक्षामाह कथमि
ति सर्वस्य मूर्तान्तरेण संयोगे क्रियोपलंभादमूर्तस्य तदभावादात्मनस्त्वमूर्तत्वेनासंयोगान्न क्रियायोगात्कर्तृत्वसिद्धिरित्युत्तरं हे
तुवाक्यार्थकथनपूर्वकं कथयति कार्यकरणैरित्यादिना आत्मनोसंगत्वेनाकर्तृत्वमुक्तेसमर्थयते अतएवेति अतः शास्त्रार्थंविश
दयति कार्येति क्रियावत्त्वाभावे जन्ममरणादिराहित्यं कौटस्थ्यं फलतीत्याह तस्मादिति कर्मप्रविवेकस्यक्रमं गीकरोत्येवमिति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्य विविक्तात्मज्ञानेदार्ढ्यं सूचयति सोऽहमिति नैराकांक्ष्यं व्याचष्टे यस्त्वत इति कथं तर्हि सहस्वदानमित्याशंक्याह मोहेति काम
विवेकविषयविद्यागमभिप्रेत्य पुनरनु कामस्यात्सर्थमिति उक्तं केडिकां व्याचष्टे शंकामाह नवेति एवं केडिकासमस्यार्थः त्वव
त्वकर्तृत्वहेतुरसंगत्वं किं तावदित्याशंक्याह सोऽहं चेति एवं श्लोकोपन्यासरूपायामिति यावत् कर्मवशात्स्वप्नहेतु कर्मसामर्थ्या
दित्यर्थः आत्मनः स्वप्ने कामकर्मसंबंधेपि किमिति नासंगत्वं तत्राह कामश्चेति हेत्वसिद्धिं परिहरति नन्विति नचेद्दृशोऽसिद्धः
त्वं किं तर्हि कथं तत्सिद्धिरिति पृच्छति कथमिति हेतुसमर्थनार्थं पुनरस्य ग्रंथस्यापात्तसंगः इति प्रतियोग्याद्युवलीत्येन देहेन सर्वमित्र
के स्वप्ने कर्तृत्वाभावस्तत्कुतस्तत्राह उक्तमसंगत्वं व्यतिरेकमुखेन विशदयति यदीति संगवानित्यस्य व्याख्यानं कामीति तत्संगेन स्व
स्वप्ने विषयविशेषेषु कामात्संगवशादुत्पन्नैरपराधैरिति यावत् न तु लिप्यते पापयुक्तेन विधानस्यापि स्वप्नस्य चिन्ता शुभाशंकाति
वर्हणाद्यर्थत्वात्स्वप्नस्य तु स्मारित्वाभावादिति शेषः उक्तमर्थं दृष्टान्तीकृत्य जागरितेपि निर्लेपत्वमात्मनो दर्शयति यथेत्यादिना
नेयप्रमाणमाह नतेनेति जाग्रदवस्थायामुक्तमकर्तृत्वमाक्षिपति नन्विति तत्र कल्पितं कर्तृत्वमित्युत्तरमाह नेत्यादिना तदेव विवृणो
त्यात्मैवेति स्वतोऽकर्तृत्वे वाक्योपक्रमं संवादयति तथाचेति वाक्यार्थं संगृह्णाति बुद्ध्यादीति कर्तृत्वमिति शेषः नन्वौपाधिके कर्तृत्वे
द्वेयुक्तं हेतावीनन्निराकरणे पूर्वापरविरोधः स्यादिति शंकते त्विति उपाधिनिरपेक्षः कर्तृत्वाभाव इति शेषः तेनेत्यत्र केनेति स्फुटयति
यस्मादिति आत्मनो लेपाभावे भगवद्वाक्यमपि प्रमाणमित्याह तथाचेति अवस्थात्रयेप्यसंगत्वमनन्यागमत्वं चात्मनः सिद्धं चेद्धिमोह

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दरार्थस्य निर्णीतत्वाज्ज्ञानकस्य नैराकांक्ष्यमित्याशंक्याह नचेति यथा मे नैकदेशस्य कर्मविवेकस्य दर्शितत्वात्सर्वं च सहस्रदानयुक्तं
तथात्मा व्यतिरेकदेशस्य कामविवेकस्य दर्शितत्वान्न दानेनत्रकामप्रश्नस्य निर्णीतत्वादित्यर्थः द्वितीयतृतीयकंडिकयोस्तात्पर्यं संग्र
ह्णाति नचेत्यादिना यथा प्रथमकंडिकया कर्मविवेकः प्रतिपादितस्तथेतियावत् कंडिकात्रितयार्थं संक्षिप्योपसंहरति यस्मादिति
प्रवस्यात्रयेण संगत्वे किं सिद्धमित्यत आह तदिति प्रतीकमादाय स्वशांतशाहृतार्थमाह प्रतियोनीति कथं वृत्तत्वस्य तुत्रमविषयत्वमत
आह दर्शनहेतोरिति दर्शनेवासनामयेतस्य हेतुत्वं यस्मिन्निति बहुव्रीहिः स्वशांतदर्शनहेतुत्वस्य स्वमशाहेनैव सिद्धत्वाद्दतशाहृवैयर्थ्यमा
शंक्यातल्लयो यस्मिन्निति बहुव्रीहिः स्वशांतशाहेनन्तुत्रमत्रदेसत्वंतशाहेनस्वप्नस्वव्याहृतमुपपत्तेरत्र स्वभ्रमस्थानमेव स्वशांतशाहेनमित्य
र्थः नचैव वाक्यशेषाद्गुणस्य माहेतस्याहेति स्वशांतशाहृस्य स्वप्रप्रयोगदर्शनादिहापि तस्यैवतेनग्रहणमितिपद्मेनलक्षण्याणो गौ
करोति यदीत्यादिना सिसाधयिषितार्थे सिद्धो हेतुमाह यस्मादिति कंडिकात्रयेणासिद्धमर्थमनुवदत्येवमिति आत्मनः स्थानत्रयसं
चारादसिद्धोसंगत्वे हेतुरितिशंकते नचेति प्रतिज्ञाहेत्वोर्हेतुनिर्देशस्य समर्थः सप्रयोजकाहेतुस्याद्वैतत्वेऽपि तद्धेतुनिरस्तमित्य
वशिष्टार्थः एवं चोदितेहेतुसमर्थनार्थमस्मरामस्यवाक्यमितिसंगतिमभिप्रेत्य संगतत्वंतरमाह दृष्टैवमपीति यथाप्रदर्शितो योऽसंग
त्वेकार्येकरणविनिश्चयेत्वेवप्रहार्थत्वमप्रकंप्यत्वे स्वकंटचारित्वप्रकटयति संचरन्नपीति किंतु नर्दृष्टानेनदार्ष्टांतिके लभ्यते नत्वाह
दृष्टांतेति यवेनवाक्यमवतारयितेद्वतं कीर्तयत्यत्रचेति दृष्टसंदर्भः समर्थः देहद्वयेन प्रयोजकेनवस्तुतोसंबंधेफलितमाह स्वप्नइति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कथं तर्हि तत्त्वमस्यादिवाक्यधीरित्याशंक्याहोपाधीति औपाधिकस्यापि वस्तुत्वमाशंक्याहाविद्येति तृतीयमनूद्योत्तरग्रंथमवतारयति भूमि
कामाह तत्त्वेति स्थानत्रयसंबंधित्वेन विकीर्णं विशिष्टरूपं शुद्धमात्मानत्यां पुंजीकृत्य विवक्षिते सर्वविशेषणमाहाद्येति यावत् ए
कत्वेनेति वाक्योक्तिः तत्त्वेदं तत्त्वं तज्जाग्रदादिकं न विवक्षितमात्मोक्तिरित्याह यस्मादिति ससंगत्वाद्देहेशमानरूपस्य मिथ्यात्वस्य च यथार्थ
घ्येति तत्त्ववाक्ये विवक्षितात्मसिद्धिमाशंक्याह स्वप्नेति तर्हि स्वप्नमिवाक्ये तस्मिंदृष्टिरित्याह स्वप्नमेवेति नचाप्यविद्यातिर्मो।
कोऽनवृत्तिमातीति भावः एवं पातनिकां कृत्वा शेषं न वाक्यमादत्ते एकवाक्यतयेति एवं वाक्यानामिति शेषः कुत्र तर्हि यथोक्तमात्म
रूपं पुंजीकृत्य प्रदर्श्यते तत्राह स्वप्नेरीति तत्राभयमित्यविद्यादित्वस्य उच्यते सा च स्वप्नेस्वरूपेण सत्यपि नाभिव्यक्तासीति रुच्यते
यस्मात्स्वप्ने यथोक्तमात्मरूपं वद्यते तस्मादिति यावत् एवं रूपमित्येतदेव प्रकटयति विलक्षणमिति कार्यकरणविनिर्मुक्तमा।
कर्मादिविद्यारहितमित्यर्थः स्थानद्वयं हित्वा कथं स्वप्ने प्रवेष्टुमिच्छतीति पृच्छति तत्कथमिति स्वप्नहेतुः सोऽनुभवावस्थायां न स्वप्ने
प्राप्तोतीत्याहाहेति प्रयोजनराहित्यात् स्थानान्तरप्राप्तिमभिधत्ते तथापि किं दृष्टान्तवचनेनेत्याशंक्याह दृष्टान्तेनेति प्रस्तुतार्थस्य स्पष्ट
तिप्राप्तिरूपस्येत्यनेन स्वप्ने वार्थस्तत्त्वेति समस्यार्थः परमात्माकाशस्यावच्छेदेऽपि तद्भौतिकविशेषणं महाकाशोमेदवेगः श्येनः स्वप्न
स्वेवेगवान् नाल्पविग्रह इति भेदः धारणमात्रकर्षेवक्तं स्वयमेवेत्यक्तं स्वप्नजागरितयोरनुसारं नमं तमस्त्वात्येश्यस्य तथात् केवलस्वप्नमिति
स्वप्नजागरितयोरविशेषेण सर्वदर्शनेनिषिध्यतेति शेषः स्वप्नविशेषणात्स्वामदर्शनं निषेधयित्वा जाग्रद्दर्शनं निषिध्यते तत्राह

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

जागरितेपीति कथमयमभिप्रायः अतेरवगत इत्याशंक्य विशेषणसामर्थ्यादित्याहान्तःप्रज्ञ इति जागरितस्यापि स्वप्नेऽन्तःप्रज्ञत्वेन वैशे।
षयति तथा चेति दृष्टान्तदार्ष्टान्तिकयोर्विवक्षितमंशं दर्शयति यथेत्यादिना संयुज्यमानस्य देवदत्तस्येति शेषः सर्वसंसारधर्मविल।
क्षणमिति विशेषणं व्याचष्टे सर्वेति येनैन वाक्येनात्मनः सोऽयमेतत्पसुप्ते इदानीं नाडीखंडस्य संबंधं वक्तुं चोदयति यद्यस्येति परः स।
मुपाधिर्बुद्ध्यादिः युक्तं गन्तव्यतः स्वतो बुद्ध्यादिसंबंधाभावमुपेत्याह यद्यपीति चेति सिद्धान्ताभिप्रायमयं पूर्ववादी विकल्पयति तस्या
इति प्रागंतकत्वमस्यामभाविकत्वमाद्ये मोक्षानुपपत्तिर्विवक्षितेत्याह यदि चेति अस्वतोर्थिद्वितीये मोक्षोपपत्तिरित्याशंक्याह तस्माच्चे
ति मावाभूदविद्यात्मस्वभावस्तत्त्वमेकस्य स्वाहुर्मैतराभावादित्याह कथं चेति नद्योऽनरत्नेनोत्तरग्रन्थमुत्थापयति सर्वोन इवेति नास्योप
रमसत्त्वं त्वेदृशेनेतदर्शयति यथेति कथमन्नरसस्य वर्णविशेषप्राप्तिरित्याशंक्याह वातेति भक्तस्यान्नस्य परिणामविशेषो।
वातेवाहुल्ये नीलो भवति पित्ताधिक्ये पिंगलो जायते श्लेष्मातिशये शुक्लो भवति पित्तात्यल्पे हरितः साम्ये च धान्तनो लोहित इति तेषा
मिथः संयोगवैषम्यात्समत्वाच्च विविधावद्य वश्यान्नरसो भवति तद्व्याप्तानां नाडीनामपि तादृशो वर्णो जायते अत एव ह्येताः शिरा वातव
हा नीलाः पित्तवहाः शिराः अस्रग्वहास्तु रोहिण्यो गौर्यः श्लेष्मवहाः शिरा इति सोऽत्र वेदर्शनादित्यर्थः नाडीस्वरूपं निरूप्य तत्र जाग
रिते लिंगशरीरस्य वृत्तिं दर्शयति तास्विति एवंविधास्विति तास्वेव विवरणं सत्त्वम् स्विन्नादि पंचभूतानि दशैंद्रियाणि प्राणान्तःकरणमि
तिसमष्टिर्लिंगं जागरिते लिंगशरीरस्य स्थितिमुक्त्वा स्वप्नांतस्थितिमाह तस्मिन्निति विवक्षितमन्तःस्थितिमुक्त्वा अन्यत्र करणानि य।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यथेत्यादिना स्वप्नधर्मादित्रिभिन्नवशात् मिथ्यात्वलिंगं नानाकारमवभासते तन्मिथ्याज्ञाने लिंगात्तद्गतमूलाविद्याकार्यत्वादविद्ये
ति स्थिते सतीत्यथशब्दार्थमाह एवं सतीति तस्मिन्काले स्वप्नदर्शने विशेषमिति शेषः इवशब्दार्थमाह नेत्यादिना उक्तोदाहरणेन
सर्वत्र च्छिन्नोदाहरणान्तरमाह तथेति गर्तादिपतनप्रतीतौ हेतुमाह तादृशीहीति तादृशं विशरयन्त्यं तेति यथोक्तवासनाश्रम
वत्वकर्मणा गर्तपतनादेरवगतमित्याशंक्याह दुःखेति यदेवेत्यादिश्रुतेरर्थमाह किंबहुनेति भयमित्यस्य भयरूपमिति व्याख्याने
भयरूपते येन तत्कारणं तेनाह इत्यादिना लिंगेनेत्यस्य स्वप्ने भानीत्याशंक्याहाविद्येति अथ यत्र देव इवेत्यादेरर्थमाहाथेति तत्र तस्या
फलमुच्यत इति शेषः तास्वर्थोऽस्याथशब्दार्थमुक्त्वा विद्याया विषयस्वरूपं प्रदर्शयन्देव इवेत्यादेरर्थमाह किं विषयेति इवशब्दप्रयोगा
त्स्वप्नपक्षोऽक्ष इति शंकां वारयति देवतेति विद्येत्युपात्तिरुक्ता प्रभिषिक्तो राजत्वस्या जाग्रदवस्थायामिति शेषः अहमेवेदमित्याद्यवतारय
त्येवमिति यथाविद्यायामपकृष्यमाणायां कार्यमुक्तं तद्वदित्यर्थः यदेति जागरितोक्तिः इदं चैतन्यमहं चिन्मात्रमेव न तदतिरेकेणा
स्ति तस्मादहं सर्वः पूर्णोऽस्मीति जानातीत्यर्थः सर्वात्मभावस्य परमत्वमुपपादयति यत्रेत्यादिना तत्र तेनाकारेणाविद्यावस्थितेत्याह
तदवस्थेति तस्याः कार्यमाह तथेति समस्तत्वेऽपि गीत्वमनेनतरत्वमेकरसत्वमबाह्यत्वं यस्याः प्रत्यक्षं यथायथोक्तो लोकः सोऽस्यात्मनो लोकः।
त्मत्वोक्तानपेक्षपरम इति संबंधः वाक्यार्थमुपसंहरति तस्मादिति सोऽस्याविद्याफलमित्युत्तरत्र संबंधः तस्य प्रत्यक्षत्वे दृष्टान्तेन स्पष्टयति
यथेति विद्याफलादविद्याफलमपि स्वप्ने प्रत्यक्षमित्युक्तमनुवदति तथेति विद्याफलमविद्याफलं चेत्युक्तमुपसंहरति तत्पत इति उक्तेष

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ्रमे
१७३

लहयं विभजते विद्ययेति असर्वो भवतीत्येतत्प्रकटयत्यन्यत इति प्रविभागे फलमाह यत इति विरोधफलं कथयति विरुद्धत्वा
दिति अविद्याकार्यं निगमयत्यसर्वं इति अविद्यायाश्चेत्यादि [illegible] क्लिन्नफलत्वं तदात्मभिन्नत्वादेव यथोक्तं विरोधादिडवीरसित्यर्थः
विद्याफलं निगमयति सम्पन्नस्त्विति तत्त्वविद्यायाः सतत्त्वं निरूपयितुमारभते न च तद्यापि दर्शितं तथा च किं कृतं स्यादित्याशङ्क्याह तद
ति कार्यवशादिति यावत् इदं शाह्लार्थमेव स्फुटयति सर्वात्मानमिति ग्राहकत्वमेवात्मनस्तात्मन इति वस्तुतत्त्वोपस्थितिफलमाह
तत इति कामस्य कार्यमाह कामत इति क्रियातः फलं लभते तेन ज्ञोगकाले च रागादिमान् क्रियामादधातीत्यविच्छिन्नः संसारस्तावा।
तस्मात्कृतात्तावत्मिथ्याज्ञाननिदानमविद्याद्वारेत्याह तत इति भेददर्शननिदानमविद्येति अविद्यास्वेच्छेत्तमित्याह तदेतदि।
ति तदेवं वाक्यशेषमनुकूलयति वस्तुमात्रेणेति अविद्यात्मनः स्वभावो न वेति विचारे किं निर्णीतं भवतीत्याशङ्क्य वाक्यमेकीयमुतीद।
मिति अविद्यायाः परिक्लिन्नफलत्वमस्तितत्तो वैपरीत्येन विद्यायाः कार्यमुक्तं सच सर्वात्मभावो दर्शित इति योजना संप्रति निर्णीतम
र्थं दर्शयति सा चेति ज्ञाने सत्यविद्यानिवृत्तिरित्यत्र वाक्यशेषं प्रमाणयति न चेति अविद्यात्मनः स्वभावो निवर्त्यत्वाद्रज्जुसर्पवदित्या
ह तस्मादिति निवर्त्यत्वेऽप्यात्मस्वभावत्वे कार्यहानिरित्याशङ्क्याह न हीति अविद्यायाः स्वाभाविकत्वाभावे फलितमाह तस्मादिति
तद्धात्रसौ तदित्यन्ते तस्य वाक्यतात्पर्यमाहे दानीमिति विद्याविद्ययोस्तत्फलयोश्च प्रदर्शनानन्तरमिति यावत् सोऽस्तमेव विशिनष्टि यत्रेति
परस्य स्यात्त्वयं दर्शयन्नविवक्षितमर्थमाह तदेतदिति यत्रेत्यन्तशास्त्रिन्तं ब्रह्मोच्यते व्याख्याने पदद्वयमनूद्यवैयाख्यस्य प्रसिद्धार्थत्वेम।

१७३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वान्नोक्तपरिहार्हेनपक्षान्तःसंबंधंदर्शयति नहीति प्रतिकूलमिति प्रयोगेरेतमाह स्वपरत्वादिति कथमतिकूलमित्यात्मस्वरूपंविवक्ष्य
नेतत्प्राह कूटस्थेति कूटःशास्त्रस्यगायत्र्यादिकूटोविषयस्यकथंकामविषयत्वमित्याशंक्याहात्मेत्याहाविति गायत्र्यादिविषयत्वेस्मृत्का।
कूटस्थशास्त्रस्यकामविषयत्वमतःशास्त्रार्थः यद्यात्मस्वरूपंकामवर्जितंस्यात्तदुत्रविवक्षितंकिमितितर्हिदेहेऽप्रयुज्यतेतत्राह तथापीति स्वा
ध्यायधर्मत्वंकामस्यत्वस्वभावत्वात्मेतरेणकामवाचित्वंकूटस्थशास्त्रस्यकथमित्याशंक्याहाचिचेति तस्यकामवचनत्वेसतिसिद्धंपरस्वरूपम।
स्वरूपतस्यार्थंनुपसंहरत्यतइति तथाकामवर्जितत्ववदित्यतत नन्वधर्मवर्जितत्वमेवप्रतीयतेनधर्मवर्जितत्वेपाप्मशास्त्रस्याधर्ममात्रवच
नत्वादित्याह पाप्मशब्देनेति उपक्रमानुसारेणपाप्मशब्दस्योभयविषयत्वेविशेषणमन्तर्यविवक्षितमर्थंकथयत्यपरत्वेपि तर्हिकार्यमे
वाविद्यायानिषिद्धतेनेत्याह तत्कार्येति तस्मादर्थतत्वतः वाक्यार्थमुपसंहरति यदेतदिति कृत्वेत्यत्रणेनेपीदंस्वरूपमुक्तमित्याहदेवेति प्रा
णमवशात्तथोक्तेचेत्किमित्यत्रप्रवक्ष्यतेतत्राहेदंत्विति सविशेषत्वेचेदात्मन्वाउपपत्तिरित्यादिस्तर्कआगमसिद्धेकितर्केणन्यासेनेत्या।
शंक्याह दर्शितेति स्त्रीवाकामसंगतिवत्कंदननमनुरवस्थमिति प्रवृत्त्यागतवाक्येचात्मनश्चेतनत्वसूक्ष्ममित्याह सर्वदिति आत्मनःस
दावैतत्स्यात्तिकृत्स्नस्वरूपेणकेवलप्रकाशानमात्रेवसिद्धंकितत्रवैरोकाटतुमानात्ववस्थितिमित्याशातरति चेतनमत्रस्वयंप्रबंधवत्कामस्त्रोटय
तिमयरीति प्रवृत्तिमसुप्तिरस्य चैतन्यस्वभावस्यैवस्वसुषुप्तेविशेषज्ञानाभावेसाधयति स्वप्नतइति सुषुप्तिंसम्प्रसर्थंप्रज्ञानेविशेषज्ञानाभा
वःकोसावज्ञानदेहतस्मादेकत्वमिति जीवस्वरूपेणात्मनापदेकत्वंतत्कथंसुषुप्तेविशेषज्ञानाभावेकारणंतस्मिन्नस्यापिचेतनस्वभा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा.वं.
२३४

वानिवृत्तेरितिशंकते तत्कथमिति तत्रस्त्रीवाक्यमुत्तरत्वेनोत्थापयति उच्यतइति तत्रदृष्टांतभागमादत्ते दृष्टांतेनेति एकत्वकृतो विशे
षविज्ञानाभावो विवक्षितोर्थः परिष्वंगप्रयुक्तस्त्वाभिनिवेशाद्ज्ञाने किमितिकल्प्यते स्वाभाविकमेव तत्किं न स्यादित्याशंक्याह परिष्व
क्तस्त्विति तर्हि परिष्वंगावस्थायां स्वभावविपरिलोपासंभवाद्विशेषविज्ञानं स्यादिति चेन्नेत्याह परिष्वंगेति स्त्रीपुंलक्षणयोरात्मनोर्भिन्नत्वेप
रिष्वंगस्तु तत्कालेसंभोगफलप्राप्तिरेकत्वापत्तिस्तद्वशाद्विशेषाज्ञानमित्यर्थः दार्ष्टांतिकं व्याकरोत्येवमेवेति भूतमात्रः शरीरेंद्रियलक्ष
णोनामिश्रितात्मनस्तादात्म्याध्यासान्वितः प्रतिबिंबोजातस्ततोविभक्तत्वज्ञातीत्यत्र दृष्टांतमाह सैंधवेति तस्यैतदात्म्यवेशे दृष्टांतेन दर्शय
ति जलादाविति उपसर्गवलतश्च मर्थं कथयत्येकीभूत इति तादात्म्यं व्यावर्तयितुं निरंतर इत्युक्तं परमात्माभेदप्रयुक्तमनवच्छिन्नत्वमाह
सर्वात्मेति एवं स्त्रीवाक्यात्तत्राणिव्याख्याय चोद्यपरिहारं प्रकटयति तत्रेति प्रत्यगात्मनीतियावत् इहेति सुषुप्तिरुच्यते यथा परिष्वक्तयोः
स्त्रीपुंसयोरेकत्वं पुंसो विशेषविज्ञानाभावे कारणं तथा परेणात्मना सुषुप्ते जीवस्यैकत्वं विशेषविज्ञानाभावे तस्य तत्र कारणमुक्तमित्य
र्थः स्त्रीवाक्ये श्रौतमर्थमभिधायार्थिकमर्थमाह तत्रेति किं पुनर्नानात्वे कारणमिति तदाह नानात्वे चेति उक्तमर्थयोन्यामित्याहाविद्य
र्थः किमेतावतासुषुप्ते [illegible] विशेषविज्ञानाभावस्यायातं तत्राह तत्रेति विशेषविज्ञाने नानात्वं तत्र चाविद्याकारणमिति स्थिते
सतीतियावत् यदा तदेति सुषुप्तिर्विवक्षिता प्रविभक्तत्वं कार्यकराविद्याविरहितत्वं सर्वेणशरीरेण परमात्मना सहेत्यर्थः विज्ञानात्मा षष्ठ्या
ख्यते एकत्वफलमाह तत्रेति उक्तप्रयोजीव्यात्मकामवाक्यमवतार्य व्याचष्टे यस्मादिति आप्तकामत्वं समर्थयते यस्मात्समस्तमिति त

A

२३४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देवव्यतिरेकशून्यत्वेन विशदयति यस्मादित्यादिना विशेषणांतरमाकांक्षापूर्वकमादाय व्याचष्टे किमन्यस्मादित्यादिना सुषुप्तेरस्यत्रा।
त्मनः सकाशादन्यत्वेन प्रविभक्तोऽस्य काम्यमानः सुषुप्तावात्मैव कामस्तस्मादात्मकाममात्मरूपमित्येतद्दर्शितेनाह यद्येति प्रवस्था।
हृद्येवेत्वात्मनः सकाशादन्यत्वेन प्रविभक्तोऽस्य कामाः काम्यन्ते इति कामाः न चैवं सुषुप्तावस्थायामात्मनस्ते भिद्यंते किं तर्हि सुषुप्तस्या
त्मैव कामः स्यादात्मकामस्तद्रूपमित्यर्थः तस्यात्मैवेत्यत्र हेतुमाहाप्तत्वेति यद्यपि सुषुप्तेऽविद्या विद्यते तथापि न सा भिन्नकामालीमनर्थ
परिहारोपपत्तिरित्यर्थः कामानामात्माश्रयत्वपक्षे प्रतिदेहं तृतीयं विशेषणं शोकमध्ये शोकस्यांतरं मध्यभूतमित्यावत् तद्दिशो।
कवत्वं प्राप्नोतीत्याह सर्वथेति एतद्द्वयेऽपि शोकशून्यमात्मरूपं न हि शोको द्वयेनात्मवोऽस्य शोकवत्त्वं शोकस्यात्माधीनसत्तास्फूर्तेरात्मा
तिरेकेणाभावादित्यर्थः अत्रापीत्यादिवाक्यमवतारयितुं वृत्तमनुवदति प्रकृतमिति अविद्यानिर्मोके हेतुद्वयमद्वासंगत्वादिति यद्यपि
नागतत्वकत्वमविद्याया उक्तं तथाप्यभिव्यक्तास्मानर्थहेतुरागातकीति इष्टं स्त्रीवाक्यानिरसंयोग्यकामत्रवदति नचेति कामादिविषो।
केऽदर्शितेऽसतीति यावत् स्वभावस्यापायो न संभवतीत्यभिप्रेत्य हेतुमाह यस्मादिति शंकोत्तरत्वेन स्त्रीवाक्यमवतार्य तन्नात्पर्यं दर्शयंक्रम
शुक्तीत्येवमिति निद्दतमनूद्योत्तरं ग्रंथमुत्थापयति इत्येतदिति स्वयंज्योतिष्ट्वस्य स्वाभाविकत्वमेतच्छब्दार्थः प्रासंगिकं कामादेरागं
तुकत्वोक्तिप्रसंगादागतमित्यावत् प्रकृतमेवदर्शयत्यत्र चेति अतिच्छंदादिवाक्यं समस्यार्थः प्रत्यहतः स्वयंचैतन्यवशाद्यथोक्तात्म
रूपस्य सुषुप्ते शुद्धमात्मत्वमुक्तिमुपरमशोकद्वयेपि कामादिसंबंधवदात्मन स्वतः इति तमपि स्वपंकलिप्रमेवेत्याशंक्याह तदेतदिति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ.टी.
१२५

प्रकृतमर्थमुक्त्वोत्तरवाक्यस्य समन्वयमाह अस्मिन्निति जनकोऽप्यपिता भवतीति संबंधः पिताप्यत्रापिता भवतीत्येतदुपपादयति ।
न संबंधेत्यादिना यथास्मिन्काले पिता पुत्रस्यापिता भवति न तद्वदित्याह नचेति नास्यार्थस्य प्रतिपादकः शब्दोऽस्तीत्याशंक्याह साम
र्थ्यादिति तदेव सामर्थ्यं दर्शयति उभयोरिति सप्तमेकर्मातिक्रमे प्रमाणमाहापरतेति पुनर्लोकदेवशब्दावन्तर्वाद्यार्थौ वाक्यांतर
मादाय व्याचष्टे नचेत्यादिना साध्यसाधनसंबंधाभिधायका ब्राह्मणलक्षणा मंत्रलक्षणाश्च इति शेषः अभिधायकत्वेन प्रमाणत्वेन
प्रमेयत्वेन चेत्यर्थः अत्र स्तेनोऽस्तेनो भवतीत्यादेस्तात्पर्यमाह केवलमिति स्तेनशब्दोऽत्र चोरमात्रे भाति कथं विशेषणमित्याशंक्याह ।
भ्रूणघ्नेति भ्रूणहा च वरिष्ठब्रह्महंतोच्यते तदेव घोरकर्म विशिनष्टि येनेति महत्पातकमस्येति श्रुतत्वान्महापातकत्वेनः स्तेनादिवाक्ये
न चंडालादिवाक्यस्य गतार्थत्वमाशंक्याह नेत्यादिना प्रसक्तत्वन्नमागतं कं ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा शूद्राज्जातस्तु
चंडालः सर्वधर्मबहिष्कृत इति स्मृतिमाश्रित्याह चंडालो नामेति जातो निषादाच्छूद्रायां जात्या भवति पुल्कस इति स्मृतेः शूद्रायां ब्राह्मणाज्जा
तो निषादः स च जात्यापकृष्टत्वान्न तत्क्षत्रियायां जातः पुल्कसो भवतीति व्याख्यानमुपेत्याह ऋषेरेवेति तथा चंडालवदिति यावत् श्रमणा
दिवाक्यस्य तात्पर्यमाह तथेति परिव्राट्तापसयोरेव ग्रहणमन्यकर्मयोगेऽपि सोऽपि सन्स्ववर्णाश्रमोत्तरकर्मयोगं शंकित्वाह सर्वेषामिति आ
दिशब्देन वर्णावस्थादि गृह्यते सोऽपि सेतुरूपे प्रकृते कथमनन्वागतमिति न तृप्तकप्रयोगस्तत्राह इष्टपरत्वादिति तत्परत्वे हेतुमनुपयोगं दर्शयि
त्वमयमिति हेतुवाक्यमाकांक्षापूर्वकमुत्थाप्य व्याचष्टे किं पुनरित्यादिना यस्मादतिक्रांतदिवाक्योक्तस्वभावोऽयमात्मा तस्मात्सुषुप्तिकाले हृद

१२५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वो॰

यतिक्रान्तः सर्वान् शोकानतिक्रामति तस्मादेतदात्मरूपं पुण्यपापाभ्यामनन्वागतं शुक्लमित्यर्थः शोकशब्दस्य कामविषयत्वं साधयतीष्टे
ति कथं तस्य शोकप्राप्तिरित्याशंक्याहेष्टं हीति तेषां पर्यायत्वेपि प्रकृते किमायातं तदाह यस्मादिति शुद्धेति स्वरूपनिरूप्यते शुद्धसर्वकामा।
तितीर्णत्वादित्येतद्वचस्संबंधः नकेवलं शोकशब्दस्य कामविषयत्वमुपपन्नमेव किंतु संनिधेरपि सिद्धमित्याह नकंचनेति शोकशब्दस्यका
मविषयत्वेपि तदत्ययमात्रात्कथं कर्मात्ययः स्यादित्याशंक्याह कामस्यैवेति तत्र वाक्यशेषं प्रमाणयति वस्तुतिरीति कामस्य कर्म
हेतुत्वे सिद्धे फलितमाहातश्चेति हृदयस्य शोकानतिक्रामतीत्यत्र हृदयशब्दार्थमाह हृदयमितीति मांसपिंडविशेषविषयहृदयपदं कु
तो बुद्धिमाहेत्याशंक्याह तात्स्थ्यादिति यथा मंचाः क्रोशंतीति मंचक्रोशनशब्दसमानेमंचस्थान् पुरुषान् उपचारादाह तथा हृदयस्थत्वाद्बुद्धे।
रुपचाराद्बुद्धिर्हृदयशब्दोहारशोषतीत्यर्थः हृदयशब्दार्थस्य कामस्य संबंधं दर्शयति हृदयस्येति तानतिक्रांतो भवतीति शेषः आत्माश्रयास्ते
न बुद्धिमाश्रयंतीत्याशंक्याह बुद्धीति कथं तर्हि केचिदात्माश्रयत्वं तेषां वदंतीत्याशंक्याह भ्रांतिवशादित्याहात्मेति भवतु कामानां हृदया
श्रितत्वं तथापि तत्संबंधहारात्तदाश्रयत्वसंभवात्कथमात्मा सर्वेभ्यः कामानतिवर्ततेतत्राह हृदयेति तत्संबंधातीतत्वे श्रुतिसिद्धे फलि
तमाह हृदयकरणेति भयेत्प्रपंचप्रत्यस्तमयं स्थापयति येतितीति सत्येव हृदयेन तच्छिष्टानां कामादीनामात्मस्वरूपसंबंधेऽपि तन्निवृत्ता वित्या।
शंक्याह हृदयवियोगेपीति तन्मते श्रुतिविरोधमाह तेषामिति हृदयेन करणेनात्यायत्वादात्मविकाराणामपि कामादीनां हृदय
संबंधसंभवात्तान्निरंत्येकांश्रुतीनामितिशंकते हृदयेति न कामादिसंबंधमात्रं हृदयस्य श्रुत्यर्थः किंत्वाश्रयाश्रयित्वं तच्चकरणत्वेन।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यात्मदर्शिवत्तद्याथार्थ्यं रूपादिज्ञानं दृष्टमितिपरिहरति जहातीति चकारादुपलक्षणं समञ्जसमिति संबध्यते प्रतिपाद्यमुद्दिश्य लक्षणमितिदृतः
करणाद्यनात्माश्रितं कामादीनीति लक्षणस्यासाधारणत्ववचनमौपचारिकमित्याशङ्क्याह आत्मन्येवेति इतश्चेदं यथार्थमेवेत्याह यावती
वेति अन्यार्थासंभवादुक्तार्थानुवादकवचनस्येति शेषः दृढिमानात्मानमपश्यतीत्युक्ते वा मेनन पश्यतीति वक्तव्यमुक्तेदृष्टिश्रितादिति विशेषा
णमात्मन्यित्याशङ्कते कामाइति प्रकारान्तरेण विशेषणस्यार्थवत्त्वं दर्शयति नेत्यादिना ग्रन्थेति मकृतन्नस्येत्यक्तिः आश्रयान्तरं स्तुतिरि
क्तमात्मानुपेत्त्वस्यानात्मित्वात् कामा एव न संतीत्यपेत्तयाह दृष्ट्या अव्ययविशेषणमित्याशङ्क्याह येत्विति प्रतिपत्तेर्लो विषयदोषदर्शना
दितियावत् कामानां वर्तमानत्वनियमाभावाद्भूतभविष्यतामपि संभवेफलितमादानइति हृदयान्नाश्रितभूतभविष्यत्कामसंभवे
पि सर्वे कामाः निवृत्तेर्विवक्षितत्वाद्वर्तमानविशेषणमनर्थकमिति शंकते तथापीति अतीतानागतकामाभावः संभवति स्वतः सिद्धो
न तन्निवृत्तौ यत्नोपेक्षणेनयुक्तात्तदिह तदाणनुमयेण वर्तमानकामनिरासे यत्नाधिक्यमाधेयमिति तापयितें वर्तमानग्रहणमि
ति परिहरति नैतदिति यदि यथोक्तव्याख्यानमनादृत्यात्माश्रयत्वमेव कामानामाश्रीयते तदा कृतमेतत्संभवेनातिरिक्तफलत्वसा
दित्याह इतरथेति अकृतत्वमसिद्धमिति शंकते नवंचेति अर्थात्मात्माश्रयत्वेकृतमेव कामानामित्युत्तरदूषयति नेत्यादिना निषे
धोहि प्राप्तिमपेक्षते न वास्तवं कामानामात्मधर्मत्वं प्राप्तिस्वधान्त्यापि संभवति तस्मादात्मनो वस्तुतो न कामाद्याश्रयत्वमित्यर्थः इतश्चा
त्मनो न कामाद्याश्रयत्वमित्याह असंगेति नत्वसंगवचनमात्मनः संगाभावे साधयत्यात्मकामित्वे न विरुध्यतेतत्राह संगाश्चेति काम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्वंतदास्ततोसिद्धो हेत्वन्तरे वेति शेषः वाक्यांतरमाश्रित्यात्मनिकामाद्याश्रयत्वं शंकित्वा हृष्टयत्यात्मेत्यादिना इच्छादयः क्वचिदाश्रिताः गु
णत्वाद्रूपादिवदित्यनुमानानाम्प्रविशेषात्कामाद्याश्रयत्वमात्मनः सेत्स्यतीत्याशंकते वैशेषिकादीति क्रमत्ववंदभेनतिराचष्टे नेत्या
दिना स्वयंज्योतिष्ट्वबाधनाच्चेनात्माश्रयत्वं कामादीनामिति शेषः तदेव विवृणोति कामादीनामिति स्थितं चानुमानादिति शेषः य
घटस्यमेवेतत्तेनेन दृश्यते यथा चक्षुर्गतं कार्ष्ण्यं तेनैव चक्षुषा न दृश्यते तथा कामादीनामात्मसमवायित्वेन दृश्यत्वेन स्यात दृश्यबलेन
स्वयंज्योतिष्ट्वं साधितं तथा च तद्बाधेऽर्थांक्रमनुमानमपि बाध्येत इत्यर्थः कथं कामादीनामात्मदृश्यत्वमाश्रित्यस्वप्रस्वयंज्योतिष्ट्वमोप
दिष्टत्वेत्तत्राह दृश्विति तथापि तेषामात्माश्रयत्वे कानुपपत्तिस्तत्राह तद्बाधितमिति यत्तु परमात्मैकदेशो जीवमाश्रित्य तदाश्रितं कामा
दीतित्राह सर्वशास्त्रेति तदेव स्फुटयति परस्येति शास्त्रार्थं जातं निरवयवत्वप्रत्यगेकत्वादि तस्य कथं कोपः स्यादित्याशंक्याह तच्चेति
वस्त्वर्थे चेदुक्तदेशप्रपंचमतं निरस्तं तर्हि पुनर्निराकरणमकिंचित्करमित्याशंक्याह महदिति परेणसह रथरूपगात्मनो यदेकत्वं तत्स्य शास्त्रार्थ
स्यासिद्धत्वेऽविति यावत प्रदेशत्वादिकल्पनायामपि शास्त्रार्थसिद्धिमाशंक्याह तत्कल्पनायामिति भदेप्रपंचकल्पनायादेयत्वप्रसं
ग इति यद्येत्यादिना यदैतन्नुपश्यतीत्यादेः संबंधं वक्तुं वृत्तं कीर्तयति हीश्वरयोरिति चकारादुक्तं स्वयंज्योतिष्ट्वमिति संबद्धत्वे किमिदं
स्वयंज्योतिष्ट्वमिति तत्राह स्वयंज्योतिष्ट्वं नामेति एवं वृत्तमनूद्य योनेवाक्यस्यावसीशंक्यामाह यदीत्यादिना स्वभावस्यागमेवाभिनयति
न जानीयादिति तस्यागमाभावे सुषुप्ते विशेषविज्ञानदाह्निरस्य मूढत्वमित्याहाय्येत्यादिना ग्रात्मा चिद्रूपोऽपि सुषुप्ते विशेषं न जानाति किंतु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यातीत्याशंक्याह विप्रतिषिद्धमिति परिहरति नेति उभयं चैतन्यस्वभावत्वं विशेषवित्त्वानन्दराहित्यं चेत्यर्थः उभयस्वीकारे शंकिते विप्र
तिषेधमाक्रान्ताः पूर्वकं कृत्स्नान्निराकरोति कथमित्यादिना यद्धैतदित्यादिवाक्यं चोदितार्थानुवादः तत्परिहारस्तूपपन्नमित्यादिवा।
क्यमिति विभजते यत्रेति नहीत्यादिवाक्यनिरस्यामाशंकामाह नन्विति वह्न्यादिव्यापाराभावेऽपि चक्षुःप्रदर्शनादि किंन स्यादित्या
शंक्याह व्याहतेष्विति प्रसक्तदर्हि तत्रापि करणव्यापारेणेत्याह नचेति क्रियमिति स्वप्रमुरूपोक्तिः नयत्पद्यैवेति नियमं निषेधति
नेति नत्वहेतुकं प्रथमपूर्वकं प्रतिज्ञां प्रस्तौति किंतर्हीति तत्राक्रान्ताः पूर्वकं दैतवाक्यमुत्थाप्य व्याचष्टे कथमित्यादिना अविनाशित्वादि
त्येतद्व्याकुर्वन् दृष्टेर्विनाशाभावं स्पष्टयति यथेत्यादिना द्रष्टुर्दृष्टेर्नश्यतीत्यत्र विरोधं चोदयति नन्विति विप्रतिषेधमेव साधयति दृष्टि
श्चेति कार्यस्यापि वचनाद्विनाशः स्यादिति शंकते नन्विति तस्याकारकत्वान्नैवमिति परिहरति नवचनस्येति तदेव स्फुटयति नही
ति यत्कृतकं तदनित्यमिति व्याप्त्युपगृहीतानुमानविरोधाद्वचो न कार्यं नित्यबोधकमित्यर्थः कूटस्थदृष्टेर्वा श्रुतिशब्दार्थो न दृष्टिका
र्यो न तत्र विप्रतिषेधोऽस्तीति सिद्धान्तयति नैष दोष इति प्रादित्यादिप्रकाशकत्ववदित्यर्थः दृष्टान्तं व्याचष्टे यथेति दृष्टान्तेऽपि विप्रतिपन्नं प्रत्या
ह नहीति दर्शनोपपत्तेरित्यन्तं दार्ष्टान्तिकं विभजते तथेति आत्मनो नित्यदृष्टित्वे दोषमाशंकते गौणमिति गौणत्वस्तुत्युपेतत्वान्मुख्य
स्य चान्यस्य दृष्टत्वस्याभावान्मैवमित्युत्तरमाह नेत्यादिना तामेवोपपत्तिमुपदर्शयति यदि हीत्यादिना प्रत्यगात्मकूटस्थदृष्टित्वमंतरेणेति
यावत् दर्शनप्रकारस्यान्यत्वे क्रियात्मकत्वं तस्यानिक्रियत्वफलतिविरोधादिति शेषः दृष्टत्वान्तरानुपपत्तेः फलितमाह तदेवमेवेति नि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्मद्रष्टृत्वेनैवेत्यर्थः उक्तेऽर्थे दृष्टान्तमाह यथेत्यादिना तथात्मनोऽपि द्रष्टृत्वे नित्ये नैव स्वाभाविकेन चैतन्यज्योतिषा सिद्धमिति तदेव वद
द्रष्टृत्वमुच्यते द्रष्टृत्वात्तदनुपपन्नेति विशेषः आत्मनो नित्यदृष्टिस्वभावत्वे फलितमाह तस्मादिति नञं नेदं द्रष्टा ह्यात्मा इत्याशंकते नन्विति
द्रष्टा पश्यतीत्यक्रियाकर्तृविषयस्तृजन्तशब्दप्रयोग इति शेषः तृजन्तशब्दप्रयोगस्यानित्यक्रियाकर्तृविषयत्वेऽव्यभिचारयन्नुत्तरमाह नेति
ति वैषम्यमाशंकते भवतीति आदित्यादिस्वाभाविकप्रकाशेन प्रकाशयितृत्वमस्तु कादाचित्कप्रकाशेन प्रकाशयितृत्वस्य नेष्टसंभ
वाच्चक्षुस्त्वनित्यदृष्टिरस्ति तस्या नाभावात्तथा च कादाचित्क[illegible] दृष्ट्यैव तस्य द्रष्टृत्वेनेत्यर्थः प्रतीच्यस्ति द्रष्टृत्वस्य श्रोतृत्वात्कर्तृत्वं विना
प्रकाशयितृत्वमविशिष्टमित्युत्तरमाह नहीति कूटस्थदृष्टेरात्मनो नित्यत्वे प्रत्यक्षविरोधं शंकते पश्यामीति द्विविधो ह्यनुभवस्तस्य कूटस्थदृ
ष्टित्वमत्र गृह्णाति चक्षुरादिव्यापारस्य भावाभावापेक्षया पश्यामि न पश्यामीति धियोरात्मसाक्षिकत्वादित्युत्तरमाह न करोतीति आत्मदृष्टे
र्नित्यत्वे हेत्वन्तरमाहाद्यतेति आत्मदृष्टेर्नित्यत्वमुपसंहरति तस्मादिति नित्यत्वोक्तिफलमाहातश्चेति वाक्यान्तरमाकांक्षापूर्वकमुत्था
प्य व्याचष्टे कथमित्यादिना द्वितीयादिपदानां पौनरुक्त्यमाशंक्यार्थभेदं दर्शयति यदीत्यादिना साभासमन्तःकरणं यत्स्वरूपं दृष्टेरिति वि
शेषदर्शनेन करणप्रमाणं दृष्टेर्द्वितीयं तस्याः स्वरूपं चक्षुरादिप्रमाणं रूपादिविषये विमर्शे तस्यैव जाग्रत्स्वप्नयोर्विषयप्रतिपत्तेश्च प्रतिकालेका
रणमात्रेणागतमभिव्यक्तेर्नास्तीत्यर्थः सदृशमिति लीयमाने रूपे नास्तीत्येतदुपपादयत्यात्मन इति प्रमातृरूपं स्वरूपं नास्तीति शेषः
तथापि करणव्यापारकृते विषयदर्शने मात्मनः स्यादित्याशंक्याह द्रष्टुरिति सदृशस्यापि परिकल्प्य तत्त्वमाशंक्याह यथेति तस्य परे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लौकिकीभावफलमाह नेनेति विषयेन्द्रियभावकृतं फलमाह तदभावादिति किमिति विषयाद्यभावाद्विशेषदर्शनं निषिध्यते सत्व
मेव तस्मात्समस्तबाधीनं किं तस्मादित्याशंक्याह करणादीति तत्त्वस्याद्वये विशेषदर्शनमात्मकृतं प्रतिभाति तस्य प्रधानत्वादतत्त्वाग्रह
णकृतमिवेति नन्वित्यादेस्तात्पर्यमुपसंहरति तस्मादिति प्रमातृकरणविषयकृतत्वाद्विशेषदृष्टेस्तेषां चतुर्णामभावाभावात्तत्कार्य
स्यविशेषदृष्टेरपि तत्राभावादितियावत् तत्कृतजागरादावात्मकृतत्वेन धीप्रतिपत्तिविशेषदर्शनाभाव इत्युक्तेऽस्मिन्नर्थः यद्वेतन्नप
रूपतीत्यादावुक्तं न्यायमुत्तरवाक्ये पदर्शयति समानमिति मनोबुद्ध्योः साधारणकरणत्वात्तद्व्यापाराभावे कथं दृष्टिः दिशः स्यादित्या
शंक्याह मतेनेति वाक्यानि व्याख्याय स्वसिद्धांतस्फुटीकरणार्थं विचारयति किंपुनरिति धर्मभेदो धर्मीणां सतां मिथो धर्मिणश्च भेदो ना
स्तीतियावत् धर्मस्य दृष्टादि पदार्थस्येत्यर्थः परोपाधिनिमित्तं चत्वरादुपाधिकृतमित्येतत् धर्मान्यत्वं धर्मधर्मिणोर्मिथोऽन्यत्वं चेत्यर्थः भ
देप्रपंचमतेन सर्वं परं तं गृह्णात्यत्रेति गवादीनां सावयवत्वाद्रूपभेदसंभवात्केन रूपेणाभिन्नत्वं रूपांतरेणाभिन्नत्वमित्युभयथाऽपि निरवयवे
ष्वात्मादिषु कथमनेकरसत्वसिद्धिरित्याशंक्याह यथात्मत्वेऽपीति एकरूपत्वे वस्तुनो दृष्टांतादृष्टेर्नानारूपत्वे गवादिदृष्टांतदर्शनादेवात्र
भेदं विमतं भिन्नाभिन्नं वस्तुत्वात् गवादिवदित्यर्थः यद्यपि गगनादिषु भिन्नाभिन्नत्वमनुमीयते तथापि कथमात्मनि तदनुमानमित्याशंक्य
वस्तुत्वस्य नानारूपत्वेनाव्यभिचारादात्मन्यपि यथोक्तमनुमानं निरंकुशमसरमित्याह सर्वत्रेति यथोक्तानुमानानुग्रहाद्द्वैतदित्यादेर्भिन्ना
भिन्नं वस्तुनि तात्पर्यमिति भावः भर्तृप्रपंचोक्तं वाक्यतात्पर्यं निराकरोति नेत्यादिना चैतन्याविनाशे वाक्यतात्पर्यं चेत्कथं तर्हि दृष्ट्यादिभेद

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वचनमित्याशंक्याह यद्यस्येति नहिस्वच्छस्यवस्तुनउपाधेरंतःकरणस्यचक्षुरादिभेदाधीनपरिणामव्यापारस्यनिरुद्धेसत्याउपाधिभे
दस्यानुवृत्तस्यमानत्वात्तेनभिन्नमिवानुपलक्ष्यमाणस्वभावंयद्यपितस्यापिचक्षुर्द्वारेणजायमानानांतद्वृत्तीनांव्यक्तंचैतन्यंहृषिश्रोत्राणद्वारे
णजातानांतद्वस्यांव्यक्तंज्ञानानिनिरुपाधिभेदात्मभेदानुवादेनचैतन्यस्याविनाशित्वेवाक्यानामर्थइत्यर्थः उक्तेवाक्यानामर्थेस्थितेफलि
तमाह नचेति इत्यत्रघटाद्युपाधिभेदकल्पनानानात्वशंकेत्याह सैंधवेति नेदंवस्त्वघनेति विज्ञानघनमिति नघटाद्युपाधिभेदकल्पनेतिशेषः यथाघटा
काशोमहाकाशइत्येकरूपाह्नविषयत्वादुपाधिभेदेप्याकाशस्यैकत्वमिष्टंतथैकरूपाह्नप्रत्ययेनैकत्वंचितोपिस्वीकर्तव्यंतत्कुतोघटादि
भेदसिद्धिरित्याह प्रत्यक्षेणेति तामेवविवृणोति लौकिकीचेति यत्तुसिद्धंतेनदृष्टांतेनात्मनीतितत्राह दृष्टांतेनेति किमेकरूपत्वेवस्तुनोदृष्टां
तोनास्तिकिंवामिथ्यात्वेनज्ञानानारूपत्वस्येतिवक्तव्यंनाद्योनानारूपत्वस्यवादिभिरप्येकैकरूपस्यानवस्थापरिहारार्थमनानारूपत्वांगी
कारात्तस्मात्केदृष्टांतसिद्धेर्वस्तुत्वहेतोस्तुतथैवानैकांतिकत्वात्तस्मादेकरूपमेववस्तुस्वीकर्तव्यमितिभावः द्वितीयंदूषयति यथाहीति
तद्विषितमेवेत्यत्रतत्त्वहेतुस्वच्छस्वाभाव्यपरागरूपत्वेस्फटिकेरक्तादिधर्माणांस्वाभाविकत्वेकिंनस्यादित्याशंक्याह नचेति तस्यहिस्व
च्छस्वाभाव्यंतद्दृष्टांतेरक्ताद्युपाधिभेदसंबंधव्यतिरेकेणेतियावत् एकस्यनानारूपत्वेमिथ्यात्वदृष्टांतमुक्त्वादार्ष्टांतिकमाह तथेति आ
त्मनिमिथ्यानानात्वनिर्भासः उपहितत्वात्स्फटिकवदित्यर्थः किंवात्मामिथ्यानानात्वाधारःस्वच्छत्वात्संप्रतिपन्नवदित्याह प्रज्ञानेति कि
वात्माकल्पितनानात्वाधारोज्ञेयात्सिह्वादित्यादिज्ञातिर्वेदित्याह स्वयमिति ग्राहित्वाद्वाचकल्पितोपिभेदोस्तीत्याशंक्याविवक्षितेसा।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आले.
१७५

त्यमाह यथा चेत्यादिना अविभागं चैतस्मान्न विभागाद्योऽस्यमिति यावत् बदरादीनि चावभासयतीति संबंधः आत्मनः सर्वावभास
कत्वे वा कोपक्रमं प्रमाणयतीति तथाचेति यत्न निरवयवेष्वपि नानारूपमनुमेयमिति तत्राह नचेति आकाशादीनां दृष्टांतत्वमाशंक्य
निराचष्टे यद्यपीत्यादिना कथमाकाशस्यानेकधर्मवत्त्वमौपाधिकमित्याशंक्य तस्य सर्वगतत्वं तावदौपाधिकमिति साधयन्नाका।
शस्येति कथं तर्हि तत्र सर्वगतत्वव्यवहारस्तत्राह सर्वोपाधीति नन्वाकाशस्य सर्वत्र गमनमपेक्ष्य सर्वगतत्वं किमिति न व्यवह्रियते त
त्राह नत्विति आकाशे गमनायोगं वक्तुं तत्स्वरूपमाह गमनं हीति ननु कुतश्चिद्विभागे संयोगे च केनचिद्देशेन तत्कारणीभूता क्रि।
यापि देशेनादाविवाकाशे भविष्यतीत्यत आह साचेति सावयवे द्रव्ये परिस्पन्दात्मिका क्रिया दृश्यते आकाशं त्वविशेषनिरवयवं तत्तस्य न क्रियेत्य
र्थः तथापि धर्मान्तराण्याकाशे भविष्यन्तीत्याशंक्य तेषामपि क्रियावदेव कारणानुकृत्याय कबलीकृतत्वमाह एवमिति भेदाभेदाभ्या
दुर्वचत्वान्न तत्र धर्मधर्मिभावो न संभवतीति भावः आकाशे दर्शितं न्यायमन्यत्रापि संचारयति तथेति पार्थिवत्वे परमाणोरेकरूपगं।
धवत्त्वं चापरमित्यनेकरूपत्वमित्याशंक्याह परमाणुत्वमेवेति नहि पार्थिवत्वातिरेकि गंधवत्त्वं प्रामाणिकमिति भावः वैशेषिकपरिभा
षामाश्रित्याशंकते तथेति पार्थिवे परमाणौ रसादिमत्त्वमनौपाधिकं न भवति जलादिसंसर्गकृतत्वात् तथा च निरुपाधिकभेदेन दृष्टा
न्तमिति परिहरति नत्वत्रापीति एतन्न्यायसादृशाद्वापि समत्वं मत्वोपसंहरति तस्मादिति सति परस्मिन्नात्मनि दृगादिशक्तिभेदास्ते
षां मधेर्हक्तिस्वतंत्रात्मनानुपात्तानाचेद्युगेव परिणमते आत्मशक्तिस्वप्राणात्मनागंधात्मनाचेत्यनेन क्रमेण परस्मिन्परिणामक

१७५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्यनाभर्त्सनप्रपंचैर्याकृतत्वा साधिपरस्यैकरूपत्वोपपादनेन निरस्तत्वादेवं नेनेति उपाधिकोऽहमादिभेदो न वास्तवोऽस्तीत्युपपादयन्नाह सत्र
इवेति जाग्रदिति यद्येत्त्वायुक्तं वाक्यव्यावर्त्यमाशंक्यादर्शयति नत्विति किमस्य विशेषविज्ञानराहित्यं स्वरूपं किंवा विशेषविज्ञानवत्त्वं।
त्वेऽप्याद्येनाद्यस्त्वज्ञयोरनुपपत्तिर्द्वितीये त्वष्टमेव सिद्धिरिति भावः प्रतीचश्चिन्मात्रत्वेनाविशेषाद्विशेषविज्ञानराहित्यमेव स्वरूपं तथापि सा
विद्याकल्पितविशेषविज्ञानवत्त्वमाश्रित्यावस्थाद्वयं सिद्ध्यतीत्यन्तरं वाक्यमवतारयितुमाद्यन्तरमाहेत्यादिना तच्छेत्यादि विद्यदर्शनमित्यं।
तः सर्वात्मत्वस्य परस्परविरोधे सलिलवाक्यं व्याप्यपयति यत्रेत्यादिना तेनाविद्यायाः संतत्वेनेति यावत्तत्त्वस्तुनो भावात्तच्चेति शेषः सत्त्वमेवि
शेषविज्ञानाभावप्रयुक्तफलमाहानन्द इति सर्वमेवास्य सर्वेषोऽस्य कृत्स्नयोन्यपि तुहिणाः संपरिष्वक्तफलेऽसमस्तत्त्वमपरिच्छिन्नत्वं तत्फलेऽस्य
सदृत्त्वमप्रसादोद्दिप्तरिक्तोदाभिमानकृतः प्रमत्तत्वे ह्रत्वेनरमाद्यामकामस्येति तदेव संप्रसन्नत्वे हृद्गेनस्पष्टयति सलिलवदिति एकोऽद्वैतो
व्याख्यातानियोजयति सलिलइवेति द्वितीयस्याभावे सुषुप्तैक्यीकरोत्यविद्ययेति ब्रह्मलोकेति वाक्येऽस्य पर्केद्वेतत्स्यादासन्नात्मन्यौलि
गेऽस्य परमस्त्रकार्यत्वंद्रष्टुमवकृतस्यात्मत्वमाह ऐतदिति किमिति विषयीसमासमपेक्ष्यकर्मधारयोऽशव्यत्वेनाह परमेति प्रसिद्धमन्येत्त
सुषुप्तस्याभिनिवेशत्वपरमत्वं साधयति यावत्विति मत्वेतेऽसमस्तात्मभावे विशेषविज्ञानराहित्येन विशिनष्टि यत्रेति सर्वात्मभावात्म
स्य परमत्वमुपपादयति येन्नइति सीयतेऽपरिच्छिद्यते साध्यन्तरमिति यावत्त्वे सोऽयमस्य सर्वात्मभावस्य परमानंदत्वे विशदयति यानीति
ग्रात्मनोनवच्छिन्नानंदत्वे कर्मोदाग्रप्रक्षिसंवादयति योवैभूमेति तत्र चैवमधिकमेकेस्थानमात्मनइत्येवं चापरमिति स्वाभेदोऽभीकारादयं।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा॰ने॰
१८०

द्वांतः स्यादित्याशंकाशुद्धाशुद्धभेदेन तद्द्वैविध्यमेवमित्याह यद्वेत्यादिना किंच वस्तुतो नानात्वं वा न स्वतो निरिक्तं वैषयिकं स्यादेवमि
त्याहैतस्येति अस्मातिरिक्तत्वेतनाभावे कास्तूपजीवकानिस्तुरित्याशंकां परिहरति कानीत्यादिना विभाज्यमानमानंदस्य मात्रा अपि
लिङ्गैर्वेत्यसंबंधः यथोमनुष्याणामित्यादिवाक्यतात्पर्यमाह यस्येति यथा सैंधववाव्यवैः सैंधवाचलेलोकोबोधयति तथानंदस्याने
दस्य मात्रानामावयवास्तत्प्रदर्शनद्वारेणावयविनं परमानंदमधिगमयितुमिच्छन्नेनतरोऽयं शब्द इत्यर्थः तात्पर्यमुक्तोत्तराणि व्या
चष्टे सयः कश्चिदित्यादिना राज्ञत्वमविकलत्वं चेत्समृद्धत्वेतु न रुक्षिरित्याशंक्याह समृद्धेति तदेव समृद्धत्वमपीत्याशंकाव्याकरो।
त्युपभोगेति अन्तर्बहिःसंपत्तिभेदात् द्विनरुक्तिरितिभावः न केवलमुक्तमेवतस्य विशेषणं किंतु विशेषणान्तरं चास्तीत्याह किंचेति वि
शेषणतात्पर्यमाह द्विधेति तदनिवर्तनेत्वस्य वस्तुमात्रांगंधवीरिष्टेत्वभावः स्यादितिभावः अतिशयेन संपन्न इति शेषः अभेदनिर्देश
स्याभिप्रायमाह तथेति प्रकृतेवाक्ये समस्यार्थः आत्मनः सकाशादानंदस्येति शेषः औपचारिकत्वमभेदनिर्देशस्य भविष्यतीत्याशंक्या
ह परमानंदस्येति तस्यैवविषयत्वं विषयित्वमितिस्थितेफलितमाह तस्मादिति यथोक्तो मनुष्यानन्दह्रिपर्यमवतरतीत्याशंक्याह शु
धिष्ठिरादीति अथ ये शतं मनुष्याणामित्यादेस्तात्पर्यमाह दृष्टमिति शतगुणेनोत्तरस्यानंदस्योत्कर्षप्रदर्शनक्रमेण परमानंदमुन्नीयधि
गमयतीत्युत्तरेणग्रंथेनेतिसंबंधः परमानंदमेवविशिनष्टि यत्रेति भेदः संव्यवहारः उक्तमेव प्रपंचयति यत्रेत्यादिना परमानंदे
विहृद्दिकाष्ठांशेदेनमात्रात्येति यद्यपि यस्येत्यादिनोक्तमेव तत्तथापीदानीन्तरव्याख्यानावसरे तदेव विवृतमित्यविरोधः तत्तदानंदपर

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्मणानेनर्थेनत्रयाणामप्युपशब्दार्थः ननु तत्र क्रमो वा एवंप्रकारत्वे मनुष्यत्वादि पितॄणामानंद इति संबंधः अग्निहोत्रादिकर्मभिरित्यादि श
ह्वेन पितृत्रुपितृयज्ञादिशब्देनेके तेकर्मदेवानाम तत्राहाग्निहोत्रादीति यथा गंधर्वानंदः शतगुणीकृतः कर्मदेवानामेक आनंदस्त
था कर्मदेवानानंदः शतगुणीकृतः सन्नाजानदेवानामेक आनंदो भवतीत्याह तथैवेति ऊर्ध्वमीतनस्मत्वं तत्राहाजानदेवेभ्य इति
श्रोत्रि याहादिवाकामस्य प्रकृतानंसंगतिमाशंक्याह तस्यैवेति एवंभूतस्याविशेषणत्रयविशिष्टस्येति यावत् प्रजापतिलोकशब्दस्य ब्रह्म
लोकशब्दाद्द्वयं मेदमाह विराडिति यथा विराडात्मन्याजानदेवानंदः शतगुणीकृतः स एक आनंदो भवति तथा विराडात्मोपासिता।
श्रोत्रियत्वादिविशेषणो विराजात्मनानंदः [illegible] स्यादित्याह तथेति तच्छतगुणीकृतेनैकोहो विराडानंदविषयः श्रो।
त्रियत्वादिविशेषणवान् पि हिरण्यगर्भोपासकस्तेन तस्यानंदो भवतीत्याह यश्चेति हिरण्यगर्भानंदादुपरिष्टाद्ब्रह्मानंदो गणितभे
देप्राकरणिकेत्याशंक्याह ततः परमिति यद्योस्य परमानंद उपक्रम्य किमित्यानंदोत्तरश्रुपदर्शितमित्याशंक्याह ऐष इति तथापि सो
श्रुमेय वामत्वरूपेहितमिति चेन्नेत्याह यश्चेति प्रकृतस्य ब्रह्मानंदस्यापरिच्छिन्नत्वमाह तत्रेति अनवच्छिन्नत्वफलमाह भूम।
त्वादिति ब्रह्मानंदत्वादितरेऽपरिच्छिन्नानंदो भूमा हेतर इति अपयज्ञान्यत्पश्यतीत्यादिश्रुतेरिति भावः श्रोत्रियादिपदाभिप्रायमा
यतान्यथैदर्शयन्नाह यश्चेति मध्ये विशेषणेषु विशिष्टेति यावत् तत्र सर्वपर्यायेष्विति शेषः विशेषणांतरं विशेषमाहाकामहतत्वेति य
चोक्तं विभागमुपपादयितुमर्थसिद्धमर्थमाहाज्ञेत्यानीति यश्चेत्यादिवाक्यसमुदायार्थः तस्यैतस्यानंदस्येति देवप्राजापत्यादिनिर्देशः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा०वे० १८१

अर्थादभिहितत्वे दृष्टान्तमाह यथेति येकर्मणा देवत्वमित्यादिश्रुतिसामर्थ्याद्देवानन्दाप्तेर्यागकर्माणि साधनान्युक्तानि तथा यज्ञे
त्यादिश्रुतिसामर्थ्यादेतान्यपि श्रोत्रियत्वादीनि तत्तदानन्दप्राप्तेः साधनानि विवक्षितान्येतानीत्यर्थः ननु त्रयाणामविशेषश्रुतौ कथं श्रो
त्रियत्वावृजिनत्वयोः सर्वत्र तुल्यत्वेन हितेष्वेवं भूमिश्रुतेन तथा चाकामहतत्ववदानन्दोत्कर्षे तयोरपि हेतुतेति तत्राह तत्र चेति निर्धारणा
र्थे सप्तमी न हि श्रोत्रियत्वादिश्रुत्यः सार्वभौमत्वादिस्थलमनुभवितुमर्हतेतेन तथा च सर्वत्र श्रोत्रियत्वादेस्तुल्यत्वात्तत्तदानन्दातिरेकप्राप्ता
वसाधारणं साधनमित्यर्थः यद्वक्ष्यमाणानन्दशतगुणवृद्धिहेतुरकामहतत्वकृतो विशेष इति तदुपपादयन्नकामहतत्वेत्विति एवं च स्वं भू
मिष्ठवैराग्यपुरःसरत्वरक्षस्यानन्दप्राप्तिसाधनत्वे वैराग्यस्य तरतमभावेन परमकाष्ठोपपत्तेर्निरतिशयस्य तस्य परमानन्दप्राप्तिसाधनत्वमसं
भवादित्यर्थः यस्येत्यादिवाक्यस्य तात्पर्यमुक्त्वा प्रकृते परमानन्दे विदद्ब्रह्मभवं प्रमाणयति सएष इति निरतिशयमकामहतत्वं परमा
नन्दप्राप्तिहेतुरित्यत्र प्रमाणमाह तथा चेति प्रकृते प्रत्यग्भूते परमानन्दे मेष इति पराभृशति श्रुतिर्मेधावीत्याद्यात्तां व्याचष्टे नेत्यादिना
तथापि किं तद्भयकारणं तदाह यद्यदिति मेधावित्वात्प्रज्ञातिशयशालित्वादिति यावत् तदेव भयकारणं प्रकटयति सर्वमिति सवा
पवपतस्मिन्नित्याद्युत्तरग्रंथस्य संबंधं वक्तुं वृत्तं कीर्तयत्यत्रेति अत्रायं पुरुषः स्वयं ज्योतिर्भवतीति वाक्यस्य तमस्यार्थः वृत्तमर्थान्तरमनुद्रवा
ति स्वप्नान्तेति कार्यकारणव्यतिरिक्तत्वं प्रदर्शितमिति संबंधः उक्तमर्थान्तरमाह कामेति अथ यत्रैनं घ्नंतीत्यादावुक्तमनुभाषते पुन
श्चेति किं तत्कार्यप्रदर्शनसामर्थ्यान्निद्रीरितमविद्यायाः सत्तत्वं तदाहानन्दमैति अनात्मधर्मत्वमात्मनि चैतन्यवत्स्वाभाविकत्वमा।

१८१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विद्याकार्यवदविद्याकार्यं च स्वप्ने सर्वात्मभावलक्षणं प्रत्यक्षत एव प्रदर्शितमित्याह तद्यथेति स्वप्नेपि स्वप्नवदेतद्दर्शितमित्याहैवमि
ति साक्षात्स्वरूपं चैतन्यवशात्तदित्येतत् अत्यन्तोत्थितस्य सत्त्वपरामर्शो न स्यादिति भावः उक्तं विद्याकार्यं निगमयत्येष इति तमेव विद्या
विषयं विशदयति सएष इति उक्तानुवादपूर्वकं सरयति इत्येतदिति एवं मतेन ग्रंथेन ब्रह्मलोकान्तवाक्येनेतियावत् सोहमित्यादेस्तात्प।
र्यमनुवदति तेचेति यतो राजेत्यमन्यतेततस्तस्य सहस्रदानेन प्रकामप्रवृत्तिरित्यर्थः अत ऊर्ध्वमित्यादेरभिप्रायमनुद्रवति तेचेति यद्यपिय।
थोक्तं तत्तत्र मोक्षबंधने प्रागेवोपदिष्टेपि दृष्टान्तोक्तं सर्वं दृष्टान्तभूतमेव तयोरिति यतो राजा श्राम्यति अतो मोक्षबंधने दार्ष्टान्तिकभूते वक्त
व्ये याज्ञवल्क्येनेति मन्यमानस्तत्प्रेरयतीत्यर्थः बंधमोक्षयोर्वक्तव्यत्वेन प्राप्तयोरपि प्रथमं बंधो वर्ण्यते इति वक्तुं तद्दृष्टान्तेन स्मारयति त।
त्रेति दृष्टान्तमनूद्य दार्ष्टान्तिकस्य बंधस्य सत्त्वं तत्त्वं दर्शयति यथा चेत्यादिना उभौ लोकावित्यत्र प्रथममेव सूत्रितोऽसौ बंधः उक्तमनूद्यानेन
रप्रकरणसंगत्याययति तदिदेति अतः संसारी सन्नित्यर्थः सनिमित्तं कामादिनानिमित्तेन सहितमित्येतत् प्रकरणारंभप्रश्नकाक्षमनेनतर
वाक्यस्य व्यवहितेन संबंधमाह तद्वेति तथापश्यन्नस्मिन् बुद्धान्तेऽरत्वे लुप्तक्रमस्य स्वप्नान्तायैवेति वाक्यं समन्व्यापरामृश्यते स्वप्नान्तशब्द।
स्य स्वप्नविषयव्याख्यानार्थं विशिनष्टि संप्रसादेति कथं पुनः संप्रसन्नस्य संसारोपवर्णनमित्याशंक्याह तत इति प्रागुक्तः समस्य संबंधोव्यव
हितत्वप्रयुक्तेनेति परामृष्यते समनंतरं ग्रंथः बध्यमानत्वे वाक्यस्य व्यवहितेन संबंधमुक्त्वानंतराणि योजयति स वै बुद्धान्तादिति स्वप्नान्ते
रत्वा चरित्वेत्यादि बुद्धान्तायैवाद्रवतीत्येतदंतं पूर्ववदिति योजना तद्यथेत्यादेरिति प्रकाशयमानः स्वप्नस्य संदर्भस्य तात्पर्यं तदिदेव।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्रोक्तमनुवदतीतच्चारभ्येति तद्यथेत्यस्माद्वाक्यादित्येतत्तद्दृष्टान्तवाक्यमुत्थाप्य व्याकरोति यथेत्यादिना इत्यत्र दृष्टान्तमाहेति योजना
भांडोपस्करणेन भांडमुपस्कृतेन गृहोपकरणेनेति यावत् तदेवोपकरणं विशिनष्टि मूलत्वेनेति चित्ररूपकार्थे स्थले भांडं शुभ्रवद्यं दर्शयि
तव्यत्याशाहोत्रूयते लिङ्गविशिष्टमात्मानं विशिनष्टि यःस्वश्चेति जन्ममरणे विशदयति पापेति कार्यकरणानि पापशब्देनोच्य
न्ते शरीरस्य साधारण्यं योजनयति यस्येति उत्पन्नेषु शरीरेषु तेनदांगीकृतमात्मनो गमनमित्याशंक्याह नन्वेति लिङ्गोपाधेरात्मनो गमनमश
मीति निरस्यत्वापरत्वेन श्रुतिप्रमाणयति तथा चेति उपगणेन्यानीति [illegible] अर्थान्तार्थमात्मनो वस्तुतो गमने किं न स्यादित्याशंक्याह
ध्यायतीवेति औपाधिकमात्मनो गमनमित्यत्र लिङ्गान्तरमाह तन्वपवेति कथमेतावता निरूपाधेरात्मनो गमनं नेष्यते तत्राह ध्या
येति प्रमाणफलं निगमयति तेनेति न कस्मिंश्चिदपि तन्तुदेहे नार्थस्य शब्दविशेषकरणं पूर्वं केन गमने श्रूयते एतदूर्ध्वोत्क्रान्तिलमस्य
यथास्थानं यावस्था यस्मिन्काले भवति तस्मिन्काले तत्तद्गमनमित्युपपादयन्वयन्नेत्यादिना किमिति प्रयत्नसमर्थं श्रुतिरस्तुवदतित
माह दृश्यमानमपीति कथं संसारस्वरूपानुवादमात्रेण वैराग्यसिद्धिस्तत्राह दृश्यत इति ईदृशत्वमेव विशदयति येनेत्यादिना छन्दुवादः
फलेरभिप्रायमुपसंहरति तस्मादिति प्रश्नवत्यत्रमनूयतत्त्वरत्वेन सर्ग्रेत्यादिवाक्यमादाय व्याकरोति तदस्येत्यादिना प्रश्नपूर्वकं का
र्येति किमित्येतत्स्वाभाविकमार्गेण तत्कुत्र उद्दिशाति किं निमित्तमित्यादिना कथं ज्वरादिना कार्यप्राप्तिरित्याशंक्याह उपलभ्यमानोहीति य
थाकेति निमित्तं दश्यवशात् कार्यप्राप्तिर्निर्गमयन्नप्राप्यमानमिति कस्मिन्काले तदूर्ध्वोत्क्रान्तिलमस्येति प्रश्नस्योत्तरमुक्तयाविधयासिद्ध

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मित्याह यदेति स्वविशिष्टप्रश्नत्रयस्योत्तरमाह यदेत्यर्धोक्तमासीति नवहि कार्यैर्निमित्तैः संधृतं शाकटवन्नानाशब्दकरणं स्वरूपं शरीर
वियोगं च प्रयोजनमित्यर्थः सप्तदेत्यादिवाक्यादर्थसिद्धमर्थमाह नेति न यथेत्यादिवाक्यं प्रश्नस्यैवं क्रमादाय व्याचष्टे यदेत्यादि
ना फले बंधनात्प्रमुच्यतइति संबंधः किमिति विषमानेकदृष्टांतोपादानमेकेनापि विवक्षितसिद्धेरित्याशंक्याह विषमेति कथमर
णस्यानियतत्वानेकानि निमित्तानि संभवंतीत्याशंक्यानुभवमनुसृत्याहानियतानीति प्रथमरणस्यानियतत्वानेकनिमित्तत्वं संकीर्त्य
नेकत्वोपपत्त्या नेनत्याहैतरपीति तदर्थत्वमेव समर्थयते यस्मादिति इत्ययमनेनैवं वितत्वमिति शेषः एतेन फलेन सह येन देहेन संबध्यते
सरस्मो बंधनकारणभूतं तं बंधनं चेतनमेव वा बंधनं यस्मिन्फले बध्यते सरसे [illegible] नेति प्रत्यये तस्मात्तद्बंधनादनेकनिमित्त
वशात्स्वैकस्य फलस्य भवति प्रमोक्षणमित्याह बंधनादित्यादिना लिंगमात्मोपाधिरस्येति लिंगी शिष्टः शारीरस्तत्योच्यते सप्तदशव्याह
वतीति संबंधः कस्मिन्नुपसर्गस्य तात्पर्यमाह नेत्यादिना यदि स्वप्नावस्थायामिव मरणावस्थायां प्राणेन देहं रक्षन्नाद्रवतीति नाद्रियते के
न प्रकारेण नहि[illegible]मित्याशंक्याह किं तर्हीति वायुना प्राणेन सह कारणं जातमुपसंहृत्याद्रवतीति एवं संबंधः
पुनः प्रतिन्यायमिति प्रतीकमादाय पुनःशब्दस्य तात्पर्यमाह पुनरित्यादिना तथापुनराद्रवतीति संबंधः यथा पूर्वस्मिन्देहे प्रागभवात्
पुनरपि तथैव देहांतरेणाकलीत्याह प्रतिन्यायमिति देहांतरगमने कारणमाह कर्मेति आदिशब्देन पूर्वप्रज्ञा गृह्यते प्राणव्यूहाय
प्राणानां विशेषाभिव्यक्तिलाभायेति यावत् प्राणायेति श्रुतिः किमर्थमित्यपेक्षायामाख्यायते तत्राह सप्राण इति एतच्चानंतरं प्रतिपत्त्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धिकरणेति निर्द्धारितेन प्राणेन येति विशेषणस्यानर्थक्यात् श्रुतं प्राणस्त्वहायेति विशेषणमित्याह प्राणेति नत्वस्य प्राणः सहवर्त्तेत चेन्ना-
वतैव भोगसिद्धेरलं प्राणेनेत्याशंक्याह तेनहीति अन्यथा सुषुप्तिमूर्च्छयोरपि भोगप्रसक्तेरित्यर्थः नाट्यर्थं प्राणस्य भोगपोष-
कत्वसिद्ध्यर्थमिति यावत् तद्यथा राजानमित्यादिवाक्यस्यावर्त्तमाशंक्याह तद्वेति अमूर्त्तावस्थास्वसमर्थः यथास्य स्वयमसामर्थ्ये
ऽपि शरीरान्तरं कर्त्तारोऽन्ये भविष्यंति यथा राज्ञो भृत्या हरन्निर्मातारस्तत्राह नचेति स्वयमसामर्थ्यमन्येषांचासत्वमिति स्थिते फलितमा-
हायेति तद्यथेत्यादिवाक्यस्यान्यार्थं दर्शयन्नुत्तरमाशोच्यत इति भवत्वेतस्य स्वकर्मफलोपभोगसाधनत्वसिद्ध्यर्थं जगदुत्पादनं तथापि दे-
हाद्देहान्तरं प्रतिपित्समानस्य किमायातनमित्याशंक्याह स्वकर्मेति स्वकर्मणोत्पन्नस्वशरीरत्वं कर्मफलोपभोगयोग्यमित्यर्थतत्कृतं स्वप्रकृ-
तमोक्तविषयेतत्र प्रमाणमाह कृतमिति पुरुषो हि स्वकर्मानुवर्त्तमानदेहोऽभूतपंचकादिना निर्मितमेव देहान्तरमभिव्याप्य जायत इति श्रु-
तेरर्थः उक्तमेवार्थं दृष्टान्तेन स्पष्टयति यथेति स्वप्नस्याजाग्रतस्त्याने प्रतिपन्नमित्युक्तः शरीरमेवमेव कृतं नापूर्वं क्रियते तथा दे-
हाद्देहान्तरं प्रतिपित्समानस्य पंचभूतादिनाकृतमेव देहान्तरमित्यर्थः सर्वेषां भूतानां देहान्तरं कृत्वा संसारिणि परलोकाय प्रस्थिते प्र-
तीक्षणके न प्रकारेणेति प्रश्नपूर्वकं दृष्टान्तवाक्यमुत्थाप्य व्याचष्टे तमित्यादिना तत्पापकर्मणा निगृहीतत्वमेव व्यनक्ति तस्करादीति
आदिपदेनान्येऽपि निग्राह्या गृह्यन्ते दण्डनादावित्यादिशब्दोऽहिंसाप्रभेदसंग्रहार्थः ब्राह्मणघातं विधायान्ते तरतिस्तीति मात्रिस्य स्वतस्तशब्दार्थं स्मा- १८३
ह वर्णसंकरेति भोज्यभक्ष्यपानादिप्रकारैरित्यादिशब्देन लद्यादेराद्ययोः संग्रहः मदिरादिभिरित्यादिपदेन तीरादिः गृह्यते प्रासादादिभिरि-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यादित्याह योगेश्वरत्वेश्वरत्वादिग्रहार्थः विद्यमाने प्रतीयमाने किमिति कर्मफलस्य वेदितारमिति शेषोपादानमित्याशंक्याह कर्मफले
हीति तत्कर्मप्रयुक्तानीत्यन्वयस्तद्धेतुः संसारे विषयः संसारिणो वस्तुतो ब्रह्माभिन्नत्वान्नास्मिन्ब्रह्मणि शङ्कः ग्रभ्यासस्तत्त्वभयप्रदार्थः तद्य
थारज्जावप्रतियासंतमित्यादिवाक्यमावर्तयेयोघमुत्थापयति तमेवमिति वागादयस्तमनुगच्छन्तीत्याशंक्याह येनेति तत्क्रियाश्रय
त्वात्तस्यायं तत्र वागादिव्यापारेण प्रेरिताः समाहृताः इति यावत् यानि च भूतानि परलोकशब्दितं शरीरं कर्मवेति यानि च करणानुहीतानि।
तान्यपि कृत्स्नादीनि तेष्वपि प्रयोजकस्य प्रवृत्तिं दर्शयति परलोकेति नाद्यः परलोकार्थप्रवृत्तिस्तस्य वागादिव्यापाराभावादाह नानुप
पन्नेनेहितीयो भोक्तृकर्मणापि वागादिषु चेतनेषु स्वयंप्रवृत्तेरनुपपन्नेरिति चोदयितुरभिमानः उत्तरवाक्येनेतरमाहात्म्येत्यादिना मर
णकालमेव विशिनष्टि यदेति अचेतनानामपि रथादीनां चेतनप्रेरितानां प्रवृत्तिदर्शनात् वागादीनामपि भोक्तृकर्मवशान्तदाहृतत्व
मन्तरेण प्रवृत्तिः संभवतीति भावः ॥ ब्राह्मणं ॥ ब्राह्मणान्तरमुत्थापयति स यथेति तस्य संबंधवक्तुं प्रकर्कीर्तयति संसारेति
वक्ष्यमाणोपयोगित्वेनोक्तमर्थान्तरमनुवदति तदेति संसारप्रकरणसमर्थः संप्रत्याकांक्षापूर्वकमुत्तरब्राह्मणमादत्ते तस्यमोक्ष
णमिति एवं ब्राह्मणमवतार्य तदक्षराणि व्याकरोति सोऽयमित्यादिना गत्वा संमोहमिव न्येतीत्यन्तरसंबंधः कथमात्मनो दौर्बल्यं तदा।
ह यत्रेत्यसेति किमित्यपचारो रुग्णोऽयमेवात्मनो दौर्बल्यं किं तस्मादित्याशंक्याकाह नहीति यथायमबलभावं निगच्छति तथा संमोह
संमूढतामिव प्रतिपद्यते विवेकाभावो हि संमोहस्तथा च संमूढतामिव निगच्छतीति युक्तमित्याह तथेति इवशब्दार्थमाह नचेति क।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा॰ टी॰
१८४

ऽपि तु तस्यात्मनः समासेऽपि तेनापि संमोहः स्यादित्यचैतन्यज्योतिष्ट्वादित्याशंक्याह लोकान्तीति व्याकुलीभावो लिंगस्येति शेषः तत्र लौकि
कीवासनामनुकूलयति तथैवेति यथाश्रुतमिव शाङ्के शरीरत्वाकांक्षायामाद्यपदार्थानन्तरमाह ध्यायतीवेति इवशब्दप्रयोगस्योभयत्रयोजना
मेवाभिनयमवलमिति उभयत्र तद्योजने हेतुमाहोभयस्थेति त्वंप्रत्ययेनाबल्यसंमोहयोरेककर्तृकत्वनिर्देशादप्युभयत्रैवकारोऽर
थ इत्याह समानेति ग्रथैत्यादिवाक्यमवतार्य व्याकरोति कस्मिन्काले तत्संप्रमोहणमित्यपेक्षायामाह ध्यायतीत्यादिना कथं चेत्सकंप
श्नमनूद्य प्रश्नान्तरं प्रस्तौति कथमिति ग्रथोत्तरत्वेनोत्तरवाक्यमादाय व्याकरोति ध्यायतीत्यादिना बुद्ध्यादिप्रकाशनशक्तिमत्त्वं प्रथा
नभूतकार्यत्वात्तत्तेजोमात्राशब्दवाच्यानीत्यादीनीतानि संप्रति समभ्याददानस्यास्यार्थमाह तापयतीति संहरमाणो हृदयमन्ववक्रामतीत्य
न्वयः तत्समिति विशेषणं स्वप्नापेक्षयेति संबंधः कथं स्वप्नापेक्षया विशेषणं तदाह नत्विति आदानमात्रमपि स्वप्नेनास्तीति कृतस्य
शुक्राच्छब्दस्यार्थविशेषणमित्याशंक्याहास्तीति सप्त तास्तेजोमात्राः समभ्याददानस्तेनैव शब्दोपयुक्तहृदयमेवेत्यादिव्याचष्टे हृदयमित्या
दिना सविज्ञानो भवतीति वाक्यशेषमाश्रित्य वाक्यार्थमाह हृदय इति कथमात्मनो निष्क्रियस्य तेजोमात्रादानकर्तृत्वमित्याशंक्या
ह बुद्ध्यादीति तेषां तद्धि तेषामस्योपसंहारे तस्यात्मनस्तदादानकर्तृत्वमौपचारिकमित्यर्थः तर्हि तद्धि तेषामुपसंहर्तृत्ववत्तदादानकर्तृ
त्वमपि मुख्यमेव भविष्यतीत्याशंक्याह नहीति आदिशब्देन क्रियाविशेषः सर्वो गृह्यते कथं तर्हि प्रतीतिकर्तृत्वादिरिष्टोऽस्येत्याशंक्याह
बुद्ध्यादीति सधीरित्यादिवाक्यमाकांक्षाद्वारकमवतार्य व्याकरोति कदा पुनरित्यादिना तस्य पुरुषस्याज्ञात्वात्वेषा स्वे विशिनष्टि

दी
१८४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मांशइति तस्यचात्मत्वंसाधयति भोक्तेत्यादिना तस्यपुरुषशब्दोद्दिष्टस्यैवमात्मविशिनष्ट्यादित्यांशइति तस्यचात्मत्वंसाधयति
भोक्तेत्यादिना यावद्देहधारणमितिकेनविशेषणेनेत्याह मरणकालेनेति आदित्यांशस्यचन्द्ररश्म्यग्रसत्त्वोर्ध्वतः स्वात्मैवारयति स्वमि
ति मरणावस्थायांचन्द्रनाड्यग्रस्थकेदेवतांशानामधिदेवतात्मनोपसंहारेश्चात्मतरंसेवाटयति तदेतदिति तर्हिदेहान्तरेवागादिना।
दित्यंस्यादित्याशंकाह पुनरिति संसृयिष्यतिवागादयस्तत्तद्देवताधिष्ठितायथास्थानमितिशेषः पुमृषोतिवस्तत्पुनः सर्वाणिकर
णानिलिंगात्मनोपसंह्रियन्ते प्रबुध्यमानस्यचोत्पित्सोरिवतानियथास्थानेप्रादुर्भवन्तीत्याह तथेति उक्तेऽर्थेवाक्यंपातयति तदेतद
देति पराङ्गावृत्तेनइतिरूपवैशुल्यंचात्मस्यविविक्तमितिशेषः तर्हिभोक्तोपसंहृतेनचन्द्ररश्मेनाभावभूतमित्याशंक्याहैकीति उक्ते
र्थेलोकप्रसिद्धिंदर्शयति तदेति वत्स्यषिरर्थितेनस्यायन्त्राणेतन्निदिश्यति तथेति यथाचन्द्रदैवतायांनिवृत्तौलिंगात्मनाचन्द्रेएकीभवन्ती
ति तथाघ्राणदेवतांशस्यघ्राणानुग्रहनिवृत्तिद्वारेणतत्पृदैवतेनैक्येलिंगात्मनाघ्राणमेकीभवतीत्यर्थः तज्जिह्वापेक्षयावरुणादिदे
वतायाजिह्वायामनुग्रहनिवृत्तौजिह्वायालिंगात्मनैकात्म्यापेक्षयेत्यर्थः तत्तद्ग्राहकदेवतांशस्यतत्तत्त्वज्ञानुग्रहनिवृत्यात्तत्प्रदिशदेव
ताशामेतत्तत्करणस्यलिंगात्मनैकीभवतीत्यभिप्रेत्याह तथेति मरणदशायांरूपादिदर्शनराहित्यमर्थद्वयसाधकमित्याह तदेति त(
स्यैतस्यादित्यांशानुपादने तदेति उत्क्रमणावस्थायामर्थः केनायंप्रद्योतोभवतीत्यपेक्षायामाह स्वेनेति यथास्वप्नकालेस्वेनभा(
सास्वेनज्योतिषाप्रस्वपितीतिश्रुत्याख्याते तथात्रापितेनोमात्राणांयदातेनतत्कृतेनवासनारूपेणप्राप्यफलविषयबुद्धिरूपेणस्वेन

८१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्राते॰
१८५

भासास्वेनात्मचैतन्यज्योतिषा हृदयाग्रप्रद्योतनमित्यर्थः तस्यार्थक्रियां दर्शयति तेनेति किमिति लिंगद्वारात्मनो निर्गमनं प्रतिज्ञा-
यते तत्राह तद्यथेति यदि मरणकाले तेजोमात्रादानेन तर्हि सदा लिंगोपाधिरात्मेत्याशंक्याह तवचेति समस्तालिंगमुच्यते सर्वं हेति लिंग
सत्वाद्दृष्टान्तोक्तिः आत्मोपाधिभूतलिंगे किं प्रमाणमित्याशंक्यात्मनिष्क्रमणस्यैव व्यवहारदर्शनमित्याह तदुपाधीति चक्षुरादिप्रसिद्धिरपि
तत्र प्रमाणमित्याह तदात्मकेहीति एकादशविधं करणमित्युपगम्यतत्कृतो द्वादशविधत्वमित्याशंक्याविशिनष्टि बुद्ध्यादीति बाह्य
वैगुण्येन मनस्तत्त्वमित्याशंक्य निरुपधियोक्ते लिंगे प्रमाणमित्याह तस्यैवमिति जगतो जीवनमपि तत्त्वमानमित्याह तज्जीवनमिति ए
षसर्वभूतान्तरात्मेति श्रुतिरुपाधियोक्ते लिंगे साधयतीत्याह सोन्तरात्मेति लिंगोपाधेरात्मनो यथोक्तप्रकाशेन मरकाले हृदयाविष्क्र-
मणे मार्गप्रश्नपूर्वकमुत्तरवाक्येनोपदिशति तेनेत्यादिना चक्षुष्टो वेति विकल्पेति भिन्नस्य चयन्याहित्यतेति मूर्ध्नो वेति विकल्पे हेतुमा-
ह यथेति कथं परलोकाय प्रस्थितमित्युच्यते प्राणगमनाधीनत्वाद्धि ज्ञानात्मगमनस्येत्याशंक्याह परलोकायेति तमुजीवस्य प्रा-
णादितात्मसति कथमनुशाहं न क्रमो विवक्ष्यते तत्राह यथाप्रधानेति प्रधानमतिक्रम्य द्वीयमन्याच्योनेक्रान्तथा च जीवादेः प्राधा-
न्याभिप्रायेणानुशाहं प्रयोगो न क्रमाभिप्रायेण देशकालभेदाभावादित्यर्थः सार्थसपूर्वेत्यक्ति पुत्रक्रमेणागमनं दृश्यते न तथा प्राणादि
ष्विति व्यतिरेकः यदुक्तं हृदयाग्रप्रद्योतनं तत्सविज्ञानफलत्वात्प्रकटयति तदेति कर्मवशादिति विशेषणं साधयति वेति विपश्चेदोषमा-
ह स्वान्तेयोतेति इष्टापत्तिमाशंक्याह नैवेति अपूर्वोरस्वान्तेयोमानमादाय तद्वेति कर्मवशादुक्तं सविज्ञानत्वमुपसंहरति कर्मणेति

१८५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अंतःकरणस्य वृत्तिविशेषो भाविते इत्यविषयस्तदाकारितं तद्रूपं घृहासनात्मकं विशेषविज्ञानं तेनेति यावत् ध्रियमाणस्य सविज्ञानत्वे
सत्यर्थसिद्धमर्थमाह सविज्ञानमेवेति गतस्यास्य सविज्ञानत्वे विज्ञानान्ग्रहणत्वमित्याशंक्याविशिनष्टि विशेषेति यागेनोल्क्रांतेः।
सविज्ञानत्वादिरिक्ततेसत्यार्थमाह तस्मादिति पुरुषस्यकर्मानुसारित्वं तन्मूलार्थः योगश्चित्तवृत्तिनिरोधः तस्य धर्मा यमनियम
प्रभृतयस्तेषामनुष्ठितत्वेन पुनः पुनरावृत्तेन परिसंख्यानाभ्यासो योगानुष्ठानेन कर्मसंस्कारप्रकृतस्थतेर्विधेयार्थ इति शेषः किं च पुण्यापु
ण्यकर्मणामनादिरूपेषु सर्वमेव विधिकांडपर्यवसितमित्याह सर्वशास्त्राणामिति इत्युक्तेः परमणकर्मण्यमित्यसिद्धार्थे निषेधशास्त्र।
स्यमपि पर्यवसितमित्याह उक्ततत्त्वेति ननु एवं यथेष्टचेष्टां कृत्वा मरणकाले सर्वमेतत्संपादयिष्यते इत्याह नहीति कर्मणानीय
मानत्वमानमाह पुण्यइति तर्हि पुण्यापचयादेव यथोक्तानर्थनिवृत्तेरलं तत्त्वज्ञानमित्याशंक्याह एतस्येति उपशमोपायस्तत्त्वज्ञा
नेतस्य विधानेन प्रकाशनेन तदर्थमिति यावत् देवतागानादनर्थानिवर्तिष्यते किं तत्त्वज्ञानेनेत्याशंक्याह नहीति नहितितितत्त्वंहे
तुप्रकृताः सर्वशास्त्रोपनिषदो गृह्यंते विधांतरेणानर्थध्वंसासिद्धौ फलितमाह तस्मादिति तापि तेसविज्ञानवाक्येनेति शेषः वृत्तमसू।
ग्रप्रसर्वकपुनरवाक्यमवतारयत्याचष्टे प्राकरणत्वादित्यादिना विहिताविद्याध्यासात्मिका प्रतिषिद्धानयसंप्रदर्शनादिरूपा प्रविहि
ताबुराविविषयाप्रतिषिद्धापथ्यपतितरणादिविषया विरिते कर्मणा गादिप्रतिषिद्धे नेत्यप्रत्तिविहिपादिविधाकर्मात्मकपभोग
साधनत्वप्रसिद्धेरत्नाकरेऽपि किमित्यत्याह अतएवासनेत्याशंक्याह साचेति प्रथमवंकमारंभादारभ्यसर्वकाम्यसनेत्यादेतमाह नहीति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा॰भे॰ १८६

इममेवहेतुं पाठयति नदीत्यादिना इंद्रियाणां विषयेषु कौशलमनुष्ठाने प्रयोजकं तत्फलोपभोगे हेतुर्नैवं तरेणाभ्यासमिंद्रियाणां विष येषु कौशलं भवति तस्मात्तदनुष्ठानाद्यभ्यासाधीनमित्यर्थः तथापि कथं पूर्ववासनाकर्मानुष्ठानादावंगमित्याशंक्याह पूर्वभवेति तल्लोकानुभवं प्रमाणयति दृश्यते चेति चित्रकर्मादीत्यादिग्रहणेन ग्रासादिनिर्माणादि गृह्यते पूर्ववासनोद्भवत्वे कार्यशक्त्यानंतरभावकृ तें कार्यमाह कांश्चिदिति रज्जुनिर्माणादिशिक्षितेत्यावत् तत्रैवोदाहरणांतरमप्याह तथेति तत्र हेत्वंतरमाशंक्यापरिहरति तच्चेति क र्मानुष्ठानादौ पूर्वं प्रज्ञायां हेतुत्वमुपसंहरति तेनेति समन्वारंभवचनार्थं निगमयति तस्मादिति तस्यैवतात्पर्यार्थमाह यस्मादिति र णज्ञलाबुकावायामवतारयति तेषु नमनूद्यवादिविवादानुदर्शयन् ज्ञानादौ दिगंबरमतमाह देवमित्यादिना [illegible] देवतावादिमतमाहाथवे ति देवतायेनशरीरेणाविशिष्टं जीवं परलोकं नयति तदात्मिवाह किं शरीरांतरेणेनेति यावत् सांख्यादिमतमाह किंचेति सिद्धांतेस्वचयम्या दोऽस्त्विति वैशेषिकादिपक्षमाह किंचेति स्वतंत्वनिवृत्त्यर्थमाह किंवा कल्पनांतरमिति तत्र सिद्धांतस्य प्रामाणिकत्वेनोपपादयन्नेव। दन्यकल्पनांतराणामप्रामाणिकत्वेन त्याज्यत्वमभिप्रेत्याशंक्यते इति तेषां सर्वात्मकत्वे हेत्वंतरमाह सर्वात्मकेति कथं तर्हि करणानां परिच्छिन्नत्वधीरित्याशंक्याह तेषामिति आध्यात्मिकेन रूपेण परिच्छिन्नानामपि करणानामाधिदैविकात्मिकादिरूपेणापरिच्छिन्नतेति स्थिते। फलितमाहातइति तदृशादुदाहृतश्रुतिवशाद्दिव्यतत्त्वभावतो देवतास्वरूपानुसारेणेत्यर्थः कर्मज्ञानवासनारूपेणेत्यत्र भोक्तरि लिंगे षः उभयत्र संबंधार्थं प्राणानामिति हि रूकं तेषां वृत्तिसंकोचादौ प्रमाणमाह तथा चेति परिच्छिन्नापरिच्छिन्नप्राणोपासने गुणदोषसंकीर्त

३

१८६

तमपि प्राणसंकोचविकासयोः स्वकमित्याह तथा चेदमिति श्रुधिदैविकेन रूपेण सर्वगतानामपि करणानामाध्यात्मिकाधिभौति
करूपेण परिच्छिन्नत्वात्तत्परिच्छिन्नस्यागमनं सिद्धमिति सिद्धान्तो दर्शितः इदानीं तृणजलायुकादृष्टान्तो देहान्तरं गृहीत्वा पूर्वदेहं त्यजत्यात्मे
तिस्थूलदेहविशिष्टस्यैव परलोकगमनमिति पौराणिकप्रक्रियां प्रसाधयितुं दृष्टान्तवाक्यस्य तात्पर्यमाह तथेत्यादिना देहान्तर्गमना
त्प्रागवस्थासमर्थ्यार्थः तदेव यथोक्तवासनाहृदयस्था विद्याकर्मनिमित्तं भाविदेहं स्पृशति जीवोपि तत्राभिमानं करोति पुनश्च पूर्वदेहं
त्यजतीति यथा स्वप्ने देवादिरहमित्यभिमन्यमानो देहान्तरस्थ एव भवति तथोत्क्रान्तावपि तस्मान्न स्थूलदेहविशिष्टस्यैव परलोकगमनमित्यर्थः
स्वात्मोपसंहारो देहपूर्वसिद्धात्माभिमानत्यागः प्रसारितया वासनया शरीरान्तरे गृहीत्वेति संबन्धः उपसंहारस्वरूपमाह तथेति सम्यग्यं
विशृणोस्मारभ्यमाणइति प्रारब्धे देहान्तरे सत्यदेहस्याभिव्यक्तिमाह तच्चेति कर्मप्रयुक्तं विद्याश्रवप्रयोगरूपलक्षणं तल्लिङ्गदेहबलाद्दे
वार्थक्रियासिद्धौ कृतेष्टलक्षणशरीरेणात्माशंकानद्युतिरेकेणान्तरस्यार्थक्रियाकारित्वं नास्तीति मत्वाह बाह्येति प्रारब्धे देहद्वयेकरणे
शुद्धेवलानामनुग्राहकत्वेनावस्थानं दर्शयति तथेति स्थूलो देहः सम्यगर्थः करणदेहस्तेषामभिव्यक्तिः पेशस्कारिवाक्यव्याख्यामाशं
कामाह तथेति संसारिणो हि प्रकृते देहान्तरारम्भे किमुपादानमस्ति किं वा नास्ति नास्ति चेन्न भावरूपकार्यसिद्धिरस्ति चेत्किं भूतपञ्चकं
भूतानां साक्षेपितत्रित्यापातमेव पूर्वपूर्वदेहोपमर्देनान्यमन्यदेहमारभते किं वान्यदन्यत्भूतपञ्चकमन्यदेहं जनयति नाद्यो भूतपञ्चस्य तत्र
देहोपादानत्वे मायायाः सर्वकारणत्वस्वीकारविरोधान्न द्वितीयो भूतपञ्चकोत्पत्तावपि कारणान्तरस्यापेक्षणत्वान्नस्यैव देहान्तरकारणत्वे

क

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

संभवात्तेनरोदेहस्यपांचभौतिकत्वप्रसिद्धिविरोधादितिभावः उत्तरंवाक्यमुत्तरत्वेनादत्ते अथेति तत्कृत्स्नार्थमपेक्षितंतद्दर्शयन्नाह इष्टो
तइति अवशिष्टंभागमादायव्याचष्टे यथेत्यादिना किंपुनस्तदुपादानमेतावतादेहान्तरारंभेऽभ्युपगतंभवतितत्राह तिमोपात्तानीति
शरीरद्वयारंभकाणीतिशेषः तेषामुभयारंभकत्वेनमूर्तामूर्तब्राह्मणोपस्तुतत्वंदर्शयति योनीति देहविकल्पेनियामकमाह यथा
कर्मेति शरीरमेमायात्मकभूतपंचकमुपादानमितिवदताभूतावयवानामपिसहैवगमनमित्युक्तं इदानींसवाअयमात्मेत्यादेस्तात्प
र्यमाह येयमिति तानेवोपाधिभूतानन्यदार्थान्विशिनष्टि येति नन्वर्थमध्येतेपदार्थादर्शिताः किंपुनस्तत्प्रदर्शनेनेत्याशंक्याह पुंजीकृ
त्येति सवाअयमात्माब्रह्मेतिभागंव्याकुर्वन्नात्मनोब्रह्मैकत्वंवास्तवंसंदर्शयति सवाइति तस्यैवावास्तवंरूपमुपन्यस्यति विज्ञानमय
इत्यादिना ज्योतिर्ब्राह्मणेऽपिव्याख्यातंविज्ञानमयत्वमित्याह कतमइति कस्मिन्नर्थेमयट्प्रयुज्यतेतत्राह विज्ञानेति उक्तेमयडर्थेहेतु
माह यस्मादिति बुद्धेर्ध्यानाद्यासाधारणधर्मस्यकर्तृत्वादेरात्मनिप्रतीतिरित्यत्रमानमाह ध्यायतीवेति मनःसन्निकर्षात्तेनतद्विकारतयासंबं
धादितियावत् तन्मयत्वादेरुपलक्षणत्वमंगीकृत्याहैवमिति उक्तमन्वयसामान्येनभूतमयत्वमाहैवंपृथिवीति भूतमयत्वेसत्यवांतर
विशेषमाह तेजेत्यादिना तथाकाशपरमाणुभावादाकाशस्यशरीरानारंभकत्वंश्रुतिविरुद्धारंभप्रक्रियानभ्युपगमादित्यभिप्रेत्याह
तथाकाशेति कथंपुनर्धर्मादिमयत्वेकामादिमयत्वमुपयुज्यतेतत्राह नहीति कथंधर्मादिमयत्वंसर्वमयत्वेकारणमित्याशंक्याह

सर्वमयत्वमिति तद्यदेतदित्यादेरर्थमाह किंबहुनेति विषयःशब्दादिस्तेनाप्यपिमयत्वंतेनोपलक्ष्यमाणमादिशब्दार्थः इदंमयत्वमदो

मयत्वे गमकमित्याह तस्मादिति विशेषतस्तन्मयत्वोक्तिं विना किमिति सामान्योक्तिरित्याशंक्याहानेनाहीति नद्वित्वे मानमाह
तस्मिन्निति श्रुवगतिप्रकारमभिनयतीदमस्येति इदंमयत्वमदोमयत्वं चोपसंहरति नेत्यादिना परोक्षत्वं व्याकरोत्यन्तस्थाः इति अव
हितविषयव्यवहारत्वानिति यावत् इदानीमित्यस्मादुपरिष्टादपि नेनेति संबध्यते परोक्षत्वादस्येदानीमित्यस्मात्तदानीं यथाप्रकृतोऽव्य
वहारोऽनिर्दिश्यत इति शेषः सर्वमयत्वोपसंहारार्थः विज्ञानमयादिवाक्यार्थं संक्षिपति संक्षेपतस्त्विति करणचरणयोरेकत्वेनापो
नैकत्र्यमाशंक्याह करणेनामेति आदिशब्दः शिष्टाचारसंग्रहार्थः वाक्यान्तरं शंकोत्तरत्वेनोत्थाप्य व्याचष्टे नाकीत्यादिना अ
वतारितानाकीत्युपयुज्यते तत्राह नाकीत्यिन्विति सर्वपदमुपसंहरति तथेत्यादिना कर्मणः संसारकारणत्वमुपसंहरति एतच्च
पुकोरहीति संसारप्रयोजके कर्मणि प्रमाणमाहेतद्विषयोऽहीति कथं यथाक्रतुकर्मविषयत्वं विधिनिषेधयोरित्याशंक्याह वेतीति
शब्दः सर्वपदसमासार्थः सिद्धान्तमवतारयत्यथो इति संसारकारणस्यानस्य प्राधान्येन कामः सहकारीति स्वसिद्धान्ते समर्थ्यते स
त्यमित्यादिना कामाभावेऽपि कर्मणः सत्त्वे दृष्टमित्याशंक्याह काममयत्वेनेति ननु कामाभावेऽपि तन्मात्रदृष्टाभावात्परेणापूर्णमसंची
येनेतत्राहोपचितेनेति योऽपि पुत्रस्वर्गादीननन्तनिशय पुरुषार्थान्मन्यमानोऽसावेव काममयते तत्सङ्कोऽसंयधूर्मेऽतत्कामसंयुक्तो भवती
त्यस्य वेणाप्रकृतेरर्थः कृति युक्तिसिद्धमर्थं निगमयति तस्मादिति धर्मादिमयत्वस्याविप्रत्वादवधारणानुपपत्तिमाशंक्याह यदिति
स यथाकामो भवतीत्यादि व्याचष्टे यस्मादित्यादिना यस्मादित्यस्य तस्मादिति व्यवहितेन संबन्धः इति शब्दो ब्राह्मणसमाप्त्यर्थः तत्रे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लिंगेनत्वफलपरामर्शात्स्वदेवगीतत्वंफलेविशेषणेनोक्तानेदृच्छति किंतदिति प्रतीकमादायव्याचष्टे लिंगमिति योवराह्नतिस्प्रमात्रा
दिस्मान्नीयेनसाद्दैणमनसावगम्यतेतन्मनोलिंगमितिपदांतरमाहात्म्यवेति यस्मिन्स्थितोयेनसंसारिणोमनःसक्तेनत्फलप्राप्तिस्त।
स्येतिसंबंधः तदेवोपपादयति तदभिलाषोहीति इर्वाङ्गोर्थेपुपसंहरति नेवेति कामस्यसंसारमूलत्वेसत्यर्थसिद्धमर्थमाहातइति
बंधप्रसवत्वे निष्फलत्वेपर्यायमकामस्यप्राप्नपरमपुरुषार्थस्येतियावत् कृतात्मनःशुद्धबुद्धेर्विदितसतत्वस्येत्यर्थः इहेतिजीवदवा।
स्थायिकिःकामप्रधानःसंसरतिचेत्कर्मफलभोगानंतरंकामाभावान्मुक्तिःस्यादित्याशंक्याह किंचेति इतश्चसंसारस्यकामप्रधानत्व
मास्थेयमित्यर्थः यावदवमानेतावद्दुःखेतिसंबंधः उक्तमेवसंक्षिपति कर्मणाइति इत्येवंपारंपर्येणसंसरणोहतेज्ञानान्नमुक्तिरिति
शेषः संसारप्रकरणमुपसंहरति इतित्विति प्रवस्यादृयस्यदार्ष्टांतिकंबंधंप्रबंधेनदर्शयित्वामुमुक्षुस्यदार्ष्टांतिकमोत्तंवक्तुमयेत्या।
दिवाक्यंतत्रायशब्दार्थमाह यस्मादिति कामरहितस्यसंसाराभावंसाधयति फलासक्तस्येति विदुषोनिष्कामस्यक्रियाराहित्यनैष्क
र्म्यमप्यत्रसिद्धमितिभावः अकामयमानत्वेप्रश्नपूर्वकंहेतुमाह कथमित्यादिना बाह्येषुविषयेष्वासंगराहित्यादकामयमानतेत्यर्थः
अकामत्वेहेतुमाकांक्षापूर्वकमाह कथमिति वासनारूपकामाभावादकामतेत्यर्थः निष्कामत्वेप्रश्नपूर्वकंहेतुमन्यापव्याचष्टे क
थमिति आप्तपरमानंदत्वान्निष्कामतेत्यर्थः आप्तकामत्वेहेतुमाकांक्षापूर्वकमाह कथमित्यादिना हेतुमेवसाधयति यस्येति न

स्यप्रकृतमाप्तकामत्वमितिशेषः उक्तमर्थंप्रमाणप्रदर्शनार्थंसंप्रवदयत्यात्मैवेति कामयितव्याभावब्रह्मविदस्तत्वदृष्टमेनस्पष्टयति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यस्यैवेति इति विद्यावस्थायस्य विदुषो नित्योऽन्यमविज्ञानं किं विदपि कामयेनेति योजनत्वापदार्थोऽन्यत्वेनाविज्ञातोऽपि कामयितव्यः स्यादि

तिचेत्तत्राह ज्ञायमानोऽसीति ग्रन्थेनेत्यस्मरणविपरिवर्त्तितिकामनियमादित्यर्थः अन्यत्वेन ज्ञायमानस्तर्हि पदार्थो विदुषोऽपि कामयितः

व्यः स्यादित्याशंक्याह नचेति आप्तकामस्य ब्रह्मविदोऽदर्शितरीत्या कामयितव्याभावेऽपि युक्तिः सिद्धेत्युपसंहरति यस्यवेति कथं कामयि

तव्याभावो नात्मनस्तथात्वादित्याशंक्याह नहीति सर्वोऽप्यात्मत्वमनात्मकामयितृत्वं च स्यादित्याशंक्या आत्मत्वाचेति ग्रन्थेऽन्यस्यादिवाक्यो

क्तेनमर्थं पूर्वकार्य्यसिद्धमर्थं कथयति सर्वात्मदर्शिनइति कर्मजरशं नामन [illegible] विरोधेन प्रत्याचष्टे येत्विति ब्रह्मविदि प्रत्यवा

यप्राप्तिमंगीकृत्योक्तमिदानीं तत्प्राप्तिरेव तस्मिन्नास्तीत्याह येनचेति यथोक्तस्यापि ब्रह्मविदोऽविदितत्वादेव नित्याद्यनुष्ठानेस्यादिति

चेत्तत्राह नित्यमेवेति योऽपि सर्वदासंसारिणमात्मानमनुभवति न च देहयमादेर्घ्यं चात्मनोऽन्यत्पश्यति यस्मादेवं तस्मात्तस्य कर्मसंप्रवृ

त्त्यारंभ्यप्यथोक्तब्रह्मविद्यया कर्माधिकारहेतुनाशुपपत्तिर्नत्वादित्यर्थः कर्मसंबंधस्तर्हि कस्येत्याशंक्याह यस्त्विति नविरोधो विधि

कारस्येतिशेषः कृत्स्नस्य प्रोक्तं सिद्धमर्थमुपसंहरति अतइति विद्यावशादित्येतत् कामाभावात्कर्माभावाच्चेतिद्रष्टव्यमकामयमानोऽक्

ामाणत्येतिशेषः देशान्तरयास्याप्यशुक्तिरित्येतन्निराकर्त्तुं तस्येत्यादिस्माचष्टे तस्येत्यादिना ब्रह्मैव सन्नित्येतत्स्वतारयति सचेति कथंव

ेमानेदेहे तिष्ठन्नेव ब्रह्मभूतो भवतितत्राह सर्वात्मनेतीति दृष्टान्तालोचनयायदर्शितिकेऽपि सदा ब्रह्मत्वभवतीतिभावः सदाब्रह्मीभूत

स्यमुक्तिर्नामनास्तीतिशंकित्वापरिहरति सकृत्प्रमिति परिहारमेवस्फोरयितनतस्येत्यादिवाक्यार्थमनुवदति तस्येवेति ब्रह्मैवसन्नि।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्मात्पृथगेव वदति किंत्विति विद्यानिर्देव ब्रह्मचेनकथं तस्य ब्रह्मप्राप्तिरित्याशंक्याह ब्रह्मैवेति यदुक्तं ब्रह्मैव सन्नित्यादि तदुपपादयति
यस्मादिति प्रागपि ब्रह्मभूतस्यैव पुनर्देहपाते ब्रह्मप्राप्तिरस्य युक्ता विरुद्धोभूतस्य भावांतरापत्तिस्त्वीकारादित्याशंक्याह नहीति कथंतर्हि
हि ब्रह्माप्येतीत्युच्यते तत्राह देहांतरेति विरुद्धभावांतरापत्तिर्मुक्तिरिति पक्षे किं दूषणमिति चेत्तदाह भावांतरापत्तौ हीति तथा चोपनिष
दाम्प्रामाण्यं विनाशे तु नाशः स्यादिति भावः भावांतरापत्तिर्मुक्तिरित्यत्र दोषांतरमाह कर्मेति इतिपदादुपरिष्टात्क्रियापदस्य संबंधः अस्तु
कर्मनिमित्तो मोक्षो ज्ञाननिमित्तस्तु माभूत्तत्राह सचेति प्रसंगः सर्वनाशरूपपराभूयते प्रतिषेधशास्त्रविरोधादिति भावः मोक्षस्य कर्मसाध्य
त्वे दोषांतरमाह अनित्यत्वं चेति तदेवोपपादयति नहीति अस्तु तर्हि यागादिवत् क्रियासाध्यस्य मोक्षस्यापि अनित्यत्वं तत्राह नित्य
श्चेति कृतकोऽपि ब्रह्मभावो ध्वंसवन्नित्यः स्यादित्याशंक्याह तं चेति कृत्रिमस्वभावत्वाद्धत्यर्थं स्वाभाविकपदमतोऽन्यदानमिति हि स्थितिः
ध्वंसस्य तु विकल्पमात्रत्वान्नित्यत्वमसंमतमिति भावः मोक्षोऽकृत्रिमस्वभावोऽपि कर्मोत्थः स्यादित्याशंक्याह स्वाभाविकस्येति अग्नेरौ
ष्ण्यवदात्मनो मोक्षस्य स्वाभाविकस्वभावत्वे तत्र क्रियासाध्यत्वायोगादित्यर्थः दृष्टांतं समर्थयते नहीति अरणिगतस्याग्नेरौष्ण्यप्रकाशौ
नोपलभ्येते मतिरचलतेह दृश्येते तेनान स्वाभाविकाविति तावग्नेकौ कादाचित्कोपलब्धिमत्त्वादिति शंकते ज्वलनेति नहि मतोग्नेरौष्ण्या
दिकादाचित्कं युक्तं न हि ऐश्वर्य व्यधानस्य दार्वादेर्ध्वंसेन ज्वलनादिनावरुद्धाभिव्यक्तिमपेक्षते तत्स्वभावस्यौष्ण्यादेश्च प्रागभावादिति परिहरति
नान्येति तदेव प्रपंचयति ज्वलनादीति मथनादिव्यापारवशात्प्रकाशादिनाश्यजन्यते श्रिति तद्युज्यते तदग्नेरामस्येव ननत्तव्यापारापेक्षा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यानद्वैतस्याद्यभिव्यक्तिवशान्न भवति किं तु देवदत्तदेहे ऽग्निधर्मोऽप्यवहितो न तु लोकस्य तु तस्यासंबद्धो ऽतो ज्वलनादिव्यापारान्न देहेऽव्यवधा
नभंगेन द्योतरभिव्यक्तिरित्यर्थः कथं न देहे ज्वलनादिव्यापारादग्नेरौष्ण्यप्रकाशौ जातावितिचुहुलित्याह तद्रूपतयेति ज्वलनादिव्यापारहेषि
व्यवधानभंगेन वह्नेरौष्ण्यप्रकाशाभिव्यक्तरूपत्वेनेतियावत् यथा वह्नेरौष्ण्यादि स्वाभाविकं न क्रियासाध्यं तथात्मनोऽपि व्यक्तिः स्वाभाविकी न
क्रियासाध्येत्यर्थः किमिदानीमग्नेरौष्ण्यादिवत्स्वाभाविकमित्याशंक्याह यदीति उदाहरिष्यमाणो मोक्षस्य स्वाभाविकस्याकर्मसाध्यत्वाद्यामि
तिशेषः यथाग्नेः स्वाभाविको न कश्चिद्धर्मोऽस्ति यो मोक्षस्य दृष्टान्तः स्यादत आह नचेति लब्धात्मकं हि वस्तु वस्त्वन्तरेण संबध्यतेऽग्निश्च
निर्बाधेति तत्त्वादिधीरित्यर्थः भावांतरापत्तिपक्षं प्रति विप्रपक्षांतरमप्याह नचेति न हि बंधस्य तथाभूतस्य निवृत्तिः विरोधान्नाप्यन्य
थाभूतस्यानवस्थानान्नच प्रसिद्धिर्विरोधाद् निरुपपत्तिविषयत्वादिति भावः किंच परस्मादन्यस्य बंधनिवृत्तिस्तस्यैव चानाद्यत्वादाह नचे
ति न हि बंधस्य तथाभूतस्य निवृत्तिः विरोधान्नाप्यन्यथाभूतस्यानवस्थानान्नच प्रसिद्धिर्विरोधाद् निरुपपत्तिविषयत्वादिति भावः किंच
परस्मादन्यस्य बंधनिवृत्तिस्तस्यैव चानाद्यत्वादाह नचेति न तद्धेतुत्वेन परमात्मैकत्वाभ्युपगमादित्यादिभाष्यं व्याख्येयं नहि द्वितीयस्तत्त्वति
त्यपुरुषस्य तथाबंधत्वानभ्युपगमादिति निरुद्धं कथं परस्मादन्यो बद्धोऽनात्मत्वेत्याशंक्य प्रवेशविचारादनुक्तं स्मारयति परमात्मेति नचे
दन्यो बद्धोऽस्ति कथं मोक्षव्यवहारः स्यादित्याशंक्याह तस्मादिति अन्यस्य बद्धस्याभावात्परस्य तु नित्यमुक्तत्वादिति यावत् यथा रज्ज्वादा
वधिष्ठाने सर्पादिद्वैतोऽज्ञानस्य निवृत्तौ सत्यां सर्पादेरपि निवृत्तिस्तथा अविद्यायाः बंधहेतोर्निवृत्तिमात्रेण तत्कार्यस्य बंधस्यापि निवृत्तिम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वहारो भवतीति वाचा वादिष्वेति योजनानामक्लांतरप्रवृद्धावयति येष्णावदतनरति वैषयिकज्ञानानंदापेक्षयांतरशाहुः केयमभिव्यक्तिरत्या
निर्वाप्रकाशो वानाद्यो मोक्षे सुखो द्युत्पत्तौ नित्यत्वापत्तेरित्यभिप्रेत्याह नैरिति द्वितीयमालंबते यदीति तत्र दोषं वक्तुं विकल्पयति
नत्वइति द्वितीयेन रविषयाणव दपरोत्ताभिव्यक्तिर्न स्यादित्यभिप्रेत्याद्यमनुभाष्य दूषयति विद्यमानं चेदिति उपलब्धिस्वभावस्यावदात्मा
नस्य विद्यमानस्य सुखादिव्यज्यते चेत् ज्ञानानंदयोर्देशादिव्यवधानाभावादानंदः सदैव व्यज्यत इति मुक्तिविशेषणमनर्थकमित्यर्थः
वत्तर्हि दयोर्विषयविषयित्वप्रतिबंधकक्रयादिवदधर्मादिप्रतिबंधादानंदो ज्ञानं च संसारदशायां न व्यज्यते मोक्षे तु व्यज्यते तदभावा
दिति शंकते यदीति उपलब्धिदेशाद्भिन्नदेशस्यैव घटादेरुपलब्धिप्रतिबंधदर्शनात्स्वभूतेन सुखेन स्वभावभूतयोपलब्ध्या प्रकाशे तत्र किं तद्वि
षयेंद्रियसंपर्कादिसहचरमादोपलब्धीति प्रत्यतोभिव्यक्तौ किं स्यादिति चेन्नदाह तथा चेति तस्याधनानि चेन्मुक्तौ मुक्तः संसारादविशेषः
स्यादिति भावः उपलब्धिव्यवधानमानंदस्यांगीकृत्याक्षे इदानीं तदेव नास्तीत्याह तदेवोपलब्धीति कदाचिदभिव्यक्तिरनभिव्यक्तिश्चकदाचि
दित्येवं कालभेदे नो भयं किं न स्यादित्याशंक्याह नन्विति आनंदज्ञानयोर्विषयविषयित्वसंभवेपि न कादाचित्कीभावदभिव्यक्तिर्निरस्ता
संप्रतितदपि संभवतीत्याह नचेति आत्मभूतत्वेन स्वाभाविकत्वेपि मतेन समानाश्रयविषयधर्मत्वात्प्रदीपप्रकाशवदिति भावः मुक्तावा
नंदज्ञानाभिव्यक्तिपक्षे दोषांतरं वक्तुं भूमिकां करोति सानमस्वलयोश्चेति तत्र भेदोपादानमिहमिथ्यैवेत्याशंकाविवक्षितदोषमाह परमात्मे
ति परमतेनिराकृतेसिद्धांतेपि दोषद्वयमाशंक्याह मोक्षस्येति मोक्षार्थोधिकोयत्नः शमदमादिः शास्त्रमोक्षविषये मोक्षस्य निर्विशेषत्वे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विभ्रमागाविद्यातद्भ्यानर्थबंधे सिद्धे नामधूमर्थवदिति परिहरति नाविद्येति नत्वनर्थं विद्धूलेति नहीति कथं नाहिद्रगामाद्याघर्थवत्वमि।
त्याह किंत्विति नन्वशास्त्रस्यार्थवत्वं समर्थयते नहिविषयेति प्रस्तुतास्त्रविषयस्तद्धेतुः संप्रति प्रयत्नस्यार्थवत्वं प्रकटयति प्रागिति प्रथम
स्तद्धेतुः शास्त्रविषयः द्वितीयोसौ न विषयः आत्मनः सदैकरूपत्वे प्रागूर्ध्वमात्तिपन्नविद्येति आविद्यः सोपीति समाधत्ते नेति यथा रज्ज्वा
द्यविद्योत्यसर्पादेस्तद्विद्यया ध्वंसाध्वंसयो रज्ज्वादेर्नैवास्तवो विशेषस्तथात्मनोपि स्वाविद्याध्यासौत्यविशेषवत्वेपि न ह्य्साध्वंसयोर्नैवास्तवो
विशेषोस्तीत्यर्थः अद्वेषः सविशेषत्वदोषराहित्ये प्रकारान्तरेणसविशेषत्वं शंकते निमित्तेति किं मिदमविद्याकर्तृत्वं किं तज्जनकत्वं
किं वा तदाश्रयत्वमिति विकल्पाद्यं दूषयति नह्यापतीवेति आत्मनः स्वतोविद्याकर्तृत्वाभावे हेत्वन्तरमाहानेकेति विषयविषय्याका।
रेण करणस्य तत्वचिदाभासोदयस्यात्मनो व्यापारस्तथा चानेकव्यापारसंनिपाते सति स्व्रं संसारीत्यविद्यात्मकोध्यासो जायतेनस्यात्मनः
स्वात्मकार्यत्वेत्यर्थः कल्पान्तरं प्रत्याह विषयत्वेति अविद्यादेरात्मदृश्यत्वात्तदाश्रयत्वेन हि तत्स्वतस्तत्तद्ग्राह्यत्वप्रसंगः स्वग्रहापत्ते
रित्यर्थः तदेव स्फोरयति यस्येति अत्रभवमनुपपत्यं शंकते देहेत्यादिना सा तिरोहिताभावेन भेदाभ्युपगमात्तत्त्वात्मनोविद्याश्रयत्वमित्य
तत्रमाह नतस्यापीति तदेव स्पष्टयति नहीति अविद्यादेर्विवेकेन शरीरद्व्यपि तद्विषये ध्रान्तत्वे कारणान्तरिक्षाशंक्याह नत्वेति अज्ञाने
श्रयत्वे चात्मनो न विशेषणमिति विधान्तरेणादर्शयति चोद्यं वाक्यमनुवदति नन्वात्मेति तद्याचष्टे तदर्शिनश्चेति अत्रास्तारित्सहेतुहा।
र्थः दृश्यमानत्वमेव विशदयति कर्मत्वमिति इति ब्रवीषीति संबन्धः एवं परकीयं वाक्यं व्याख्याय फलितमाह तत्कथमिति तच्चोद्यं वा॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कार्यं दर्शितवतीत्यास्थिते सति कर्तृविशेषणत्वेन ज्ञानमुपयते स्यात्तेनयोः प्रत्येकं कर्मभूतत्वादित्यर्थः विपदे दोषमाशङ्कयेति कथं कर्मस्था
नामित्येतदेव व्याचष्टे दर्शितेति तत्रापि कथं शङ्कः संबध्यते एतदेव स्फुटयति कर्मेति एवं सति व्याप्यव्यापकभावसम्भेदनिष्ठत्वे सती
त्येतत किं वा ज्ञानमुपलब्धधर्मान भवत्युपलभ्यमानत्वाद्देहगतकार्श्यादिवदित्याह नचेति ज्ञानवत्तत्कार्यमपि नात्मधर्मः स्यादि
त्यतिदिशति नचेति ज्ञातात्मनोस्य सेच्छादेरात्मधर्मत्वनिराकरणेऽप्रतीतिविरोधः स्यादिति शंकते स्वेवेति तेषां ग्राह्यत्वमंगीकृत्य प।
रिहरति नचापीति आत्मनिष्ठत्वे सत्यादीनां चैतन्यवदात्मग्राह्यत्वायोगात् तत्ग्राह्याणां एतेषां न तद्धर्मत्वेनेति भावः प्रकारांतरेण निरा
कर्तृं निराकृतमेव चोद्यमनुवदति नजानइति किं प्रमातरज्ञानाद्याश्रयत्वमनुभवादभिदधासि तस्मादिल्लोवा तत्राह प्रमाह भवत्वि।
ति कल्पान्तरं निराकरोति यत्त्विति नहि योगसाक्षी सतज्ञातो मूढो वा तथा च सर्वसाक्षी ज्ञानाज्ञानादिमान भवतीत्यर्थः आत्मनो मोहा।
दिरादित्ये भगवद्वाक्यं प्रमाणयति नचेति न समसर्वविशेषशून्यत्वे वाक्यान्तरमुदाहरति समभिति आदिशब्देन समं पश्यन्हि सर्वत्र ज्यो।
तिषामपि तज्ज्योतिरित्यादिशब्देन आत्मनो निर्विशेषत्वे प्रामाणिके स्वमतमुपसंहरति तस्माद्वेति पक्षान्तरमनुभाषते येत्विति श्वेता
निर्विशेषस्वभावादिति यावत् अज्ञानाद्धेतोर्ज्ञानान्मुक्तिरिति शास्त्रमर्थवादः आदिशब्देन हृत्प्ररोदनाद्यर्थवादे दृष्टान्तं सूचयति सोप
हासं दूषयति उक्तं तन्नेति नहि विशेषत्वमात्मनः शाक्यं प्रतिपत्तुं निर्विशेषत्वप्रमापकागमविरोधादिति भावः कथं तर्हि भवद्भिरात्म
तत्वमभ्युपगम्यते तत्राह वयं त्विति प्रमाणविरुद्धार्थदर्शनेनच्छब्देन पराभ्युपगतसत्वादीनामिव सामान्यं दूषयति सर्वदेति भेदाभेदवादम।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विद्वत्तुभर्वं३

पंचदश्येकरसमिति तत्रहेतुमाहाद्वैतमिति द्वैताभावोपलक्षितत्वादित्यर्थः एकरसेकौटस्थ्यं हेतुत्वेनाहाविक्रियमिति तदुपपादय
न्नजमित्यादिना अमरं मरणाद्यं तत्र सर्वोगाविद्यासंबंधराहित्यं हेतुमाहाभयमिति तत्त्वब्रह्मैवेवविद्वत्त्वात्मतत्त्वमित्याशंक्याह ब्रह्मैवे
ति यथोक्तं प्रत्यक्भूतं तद्ब्रह्मत्वप्रमाणयति स्वयेवमिति परपक्षनिरासेनपक्षं तंवाक्यार्थमुपसंहरति तस्मादिति उपचारेणेतिसमा
र विपरीतेति आत्मातत्त्वतः संसारीति विपरीतग्रहवतीघोरेसंततिः तस्याविच्छेदमात्रं ज्ञानफलमपेक्ष्योपचारइत्यर्थः ब्रह्मणोकेर्थे
मेवमवतारयितंब्राह्मणार्थमनुवदति स्वयमेत्यादिना अयमर्थः संसारस्तद्धेतुस्वमंचस्वदेवसमः सरकर्मेणत्यादि आत्मसत्तानसत्तादिमो
क्तकारणत्वमुपेहितमित्याशंक्याह तचेति अनेनब्रह्मज्ञानेमोक्षकारणमित्युक्तत्वादितियावततस्थलेवंधस्येतिशेषः अत्रेतिमोक्षप्रकर
णोक्तिः बंधप्रकरणेतद्धेतनयितमपिशब्दः उक्तार्थेनदेवश्चाघदारणिमाचष्टे तस्मिन्नेवेति यस्मिन्कालेविद्यापरिपाकावस्थायामि
त्यर्थः अकामयमानः सञ्जिज्ञास्यात्मस्थैसर्वविशेषणमितिमत्वाह समस्तइति कामशब्दस्यार्थान्तरविषयत्वंव्यावर्तयति तस्येति क्रिया
पदेसोपसर्गेव्याकरोत्यात्मकामस्येति तावेवविशिनष्टि येषुसिद्धाइति कामानामात्माश्रयत्वंनिराकरोति स्वेतीति सप्तलतः कामवि
योगादितिसंबंधः कामवियोगादस्तोभवतीतिनिर्देशसामर्थ्यसिद्धमर्थमाहाप्राप्तादिति तेषांस्वस्मिन्नेकिंस्यात्तदाहातइति अत्रेत्यादिना
विवक्षितमर्थमाहानोत्तेति आदिपदसंक्रान्त्यादिसंग्रहार्थमुक्तेस्तदपेक्षाभावेफलितमाह तस्मादिति तर्हिमरणासिद्धिरित्याशंक्याह
यथेति उत्क्रांतिगत्यागतिराहित्येयथावस्थितत्वेपतत्त्वपंचमेप्रतिपादितमित्याह नामेमात्रमिति तद्येत्यादिवाक्यनिरस्याशंकामाह

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बृ०टी०
२६२

कथं पुनरिति विदुषो विद्ययात्ममात्रत्वेन प्राणादिष्वबाधितेष्वपि देहे चेष्टसौवर्ण्यतेन तेनासशरीरत्वं वदेदित्याह विद्यावैयर्थ्यमित्यर्थः दृष्टान्तेन
परिहरन्नत्रैवेत्यादिना देहे वर्तमानस्यापि विदुषस्तत्राभिमानराहित्येन नैव तेन सम्बध्यते यस्यां त्वचि सर्पो नितरां लीयते सा हि निर्ल्वयनी सर्पत्व
गुच्यते सर्पनिर्मोकदृष्टान्तस्य दार्ष्टान्तिकमाहैवमेवेति सर्पदृष्टान्तस्य दृष्टान्तिकं दर्शयत्यथेति मुक्तानेन सह देहस्य न हत्वमशरीरत्वादौ
हेतुरथशब्दार्थः अथशब्दावद्योतितं हेतुं व्यङ्गेनाशरीरत्वं विशदयति कामेति इदमित्यविद्यावस्थोक्तिः इदानीमिति विद्यावस्थोक्तिः
तेनपुनस्तस्य संसारित्वं शरीरं च गृह्यते प्राणं व्यावर्तयति प्राणस्येति श्लोके परस्यैवात्मनः प्राणशब्दस्तथात्रापीत्यर्थः यथा च श्लोके नरे प्राण
शब्दः परस्यैवात्मनस्तथात्रापीत्याह प्राणेति किं च परविषयमिदं प्रकरणं अथाकामयमान इति मोक्षस्य प्रक्रान्तत्वादथायमित्यादिवा
क्ये तद्विषये प्रत्यगात्मादिशब्दानुपपन्नैस्तस्मादुभयसामर्थ्यादत्र परस्यैवात्मा प्राणशब्दितस्त्वाह प्रकरणेति विशेष्यं दर्शयित्वा विशे
षणं दर्शयति ब्रह्मैवेति ब्रह्मशब्दस्य कमलासनादिविषयत्वं वारयति किं पुनरिति तेजःशब्दस्य कार्यज्योतिर्विषयत्वमाशङ्क्याह विज्ञा
नेति नत्र प्रमाणमाह येनेति प्रत्यक्प्रकृष्टात्मस्वरूपचैतन्यं तेन प्रकाशकमस्येति तथोक्तं सोऽहमित्यादेस्तात्पर्यं वक्तुं वृत्तं कीर्तयति यः का
मयमान इति निर्णयप्रकारं संक्षिपति संसारेति सोऽहमित्यादिवाक्यान्तरमुत्थापयतीदानीमिति आकाङ्क्षाद्वारेणैकं वाक्यमादाय विभज्यते क
थमिति सहस्रदानमाक्षिपत्यत्रेति सर्वस्वदानप्रसङ्गावपि सहस्रदाने हेतुमेकदेशीयं दर्शयन्नत्रेत्यादिना कदाचिदित्युत्तरं वेत्सर्वस्वं राजा निवेद
यिष्यतीत्याह श्रुत्वेति ननु पुनः शुश्रूषुरपि राजा किमिति संन्यस्यैव सर्वस्वं गुरवे न प्रयच्छतीत्यभूताभिददातिगाम्भीर्येण यतो स्वीयां गु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दुःखं फलयतीत्यत आह यदि चेति ग्रामो मे कोऽहं रयेभ्यो निधाय वा चान्यनिष्पादनान्यमकं व्याजेनानं गुरुं कं कृत्तो त्वयो रहेषु प्रामपास्ताशेषदे
षशंकायां न व्याजेनाकिं तुं कानदीयस्वारसिकप्रामाण्यभंगप्रसंगादिति निहूषयति सर्वमपीति एकीयपरिहारासंभवे देन्वरमाहार्थेति न
दृत्यमिमेवोपपादयति विमेदेति नन्वापि सर्वेममकृद्धकेत्तदीयशुश्रूषाधीने समरस्वदानमनुचितमित्याशंक्याशमादेस्तेनसाधनत्वे
नप्रागनुक्तेस्तेन सहभूयोपि संन्यासस्य वक्तव्यत्वं योगानहृपेत्रयाशुक्तं समरस्वदानमित्याशगतिकारीति नतु संन्यासादिविद्यास्वरूपं
शुश्रूषेमहाभागाद्दीर्घप्रयत्नस्थोत्कृष्टमपि करोत्यनेनानार्थशेषसिद्धिरत आह नचेति ननावत्संन्यासो विद्यास्तुतिर्विदित्वानुस्यायेतिश
मानकर्तृत्वनिर्देशादिति पंचमे ख्यितेनापि शमादिविद्यास्तुतिस्तत्रापि विधेर्वत्प्रमाणत्वादित्यर्थः ग्रन्थशेषशुश्रूषयासमरस्वदानमित्य
तत्त्वनकस्याकौशलेचोदयति नन्विति ननुः शंकिलमकौशले हूषयति नैषदतिनवेदेतमाह प्राप्तस्नानवदिति यथास्नातानेमोहेप्र
योजकत्वेन यथा संन्यासो नचास्मिन्नवहेतस्याकर्तव्यत्वं प्रतिपत्तिकर्मवदनुष्ठानसंभवादिति राज्ञा यतो मन्वेनेन संन्यासस्यक्तानेनानुल्प
त्वाज्ञानदंर्धं विमोहाद्यायेति शङ्कतीत्यर्थः संन्यासस्य प्रतिपत्तिकर्मवत्कर्तव्यत्वे प्रमाणमाह संन्यासेनेति ननु विविदिषासंन्यासमंगीकृ
र्वतानतस्यप्रतिपत्तिकर्मवदनुष्ठेयत्वमिच्छनेनत आह साधनत्वेति तत्रैव हित्वतज्ञेयं तत्कः प्रत्यक्परे पदमित्यकृत्वादित्यर्थः राज्ञोकौ
शलेपरिहृत्यमेवानवतारयन्नाकामसेति पदेन्यायुतीतश्लोकेनाप्रामिश्लाकानामर्थोपोनरुक्तं स्तचयति विस्तरेति ज्ञानमार्गस्य
स्तत्त्वेदेतमाह इर्विवेयत्वादिति विलीर्णत्वे शर्णवस्तुविषयत्वादवधेयमाह्रेदिनकृतिमाश्रित्याह विमहेति प्रयत्नसाध्यत्वेनास्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्राने·
२५३

पंचम्या विवक्षितेत्येकथं पुनरपुनरावृत्तिनो वैदिको ज्ञानमार्गः स्थिरत्वेन ततो निरूप्यते तत्राह नित्येति विशेषणप्रकाशितमर्थमुक्त्वा तस्यावच्छे
द्यमाह नन्विति किं केति संवरणलक्षत्वेपि ज्ञानमार्गस्य तत्संस्पर्शित्वमित्याशंक्याह योहीति अनुवेदनलाभयोर्विशेषाभावात्स्यात्त
कृत्स्नमाशंक्याहानुवेदनमिति एवं शाहेन पाठक्रमानुसारेण लाभो गृह्यते एवकारमाश्रित्याशंकते किमसाविति तथा च तद्योगे देवा
नामित्यादिश्रुविशेषणश्रुतिर्विरुध्येतेति शेषः अवधारणश्रुतेरन्यपरत्वेनान्ययोगव्यवच्छेदकाभावमभिप्रेत्य परिहरति नैष दोष इति
स्तुतिपरत्वमेव प्रकटयन्नेवं हीति कृतार्थोस्मीत्यात्मन्यभिमानकरत्वादनुभवसिद्धमात्मज्ञानं तस्मादन्यदुत्कृष्टं किं विद्यते विद्यामवधा
रणश्रुतिस्तौतीत्यर्थः यद्यश्रुतार्थत्वे को दोषः स्यादिति चेत्तत्राह नत्विति इत्यवधारणश्रुत्याविवक्षितमिति शेषः तद्देहस्य घाय इति
सर्वार्थश्रुतेर्ब्रह्मविद्या सर्वार्थसर्वसाधारणीति श्रवणादिति यावत् ब्रह्मविद्यायाः सर्वार्थत्वे वाक्यशेषं प्रमाणत्वेनावतार्य व्याचष्टे तदे।
वेति ननु मोक्षे स्वर्गशब्दो न युज्यते तस्यार्थांतरे रूढत्वादित्यत्राह स्वर्गेति यथा ज्योतिष्टोम[illegible]प्रकरणे श्रुतो ज्योतिः शब्दो ज्योतिष्टोमविष
यत्वया मोक्षप्रकरणे श्रुतः स्वर्गशब्दो मोक्षमधिकरोति रहंगीकारे ब्रह्मविद्याया निकर्षप्रसंगादिति भावः जीवन्नेवमुक्तात्मनः शरीरपा
तादूर्ध्वं मोक्षमपि संबध्नः तस्मिन्नित्यादिश्लोकं पठत्युत्तरस्यापयति तस्मिन्निति विप्रतिपत्तीरेव प्रश्नपूर्वकं विशदयति कथमित्यादिना पिंगले।
त्वक्षिस्वात्मानं लोहितेजपाकुसुमसन्निभं सप्रपंचं शब्दस्पर्शरूपरसादिमत् ब्रह्म तदुपासनमनुसरत्यनंतप्राप्तिमार्गे विवादोपपन्नताणामित्या
ह यथादर्शनमिति तथापि कथं ब्रह्मप्राप्तिमार्गोपशुक्लादिरूपसिद्धिर्नैर्हि ज्ञानस्य रूपादिमत्वमित्याशंक्याह नाड्यस्त्विति तासामपि कथंच

२५३

यंतीति२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

थ्योऽक्रत्वपवननमित्याशंक्याह श्लेष्मादीति तथापि कथं शुक्लादित्वपवननमित्याशंक्य नाडीत्वं ड्रोऽकं स्मारयति शुक्लेति नाडीपरिग्रहे निया
मकाभावमाशंक्य पक्षांतरमाहाहिंस्रं चेति एवंविधं शुक्लादिनानावर्णमित्यर्थः तस्य तथात्वे प्रमाणमाह एष इति यद्येतेन ज्ञानमार्गेण किमिति मा
र्गांतरं कल्प्यते तत्राह दर्शनेति नहि नाडीपक्षो वादित्यपक्षो वा कल्पनेऽविवदितव्यस्तत्राह दर्शनेति नहि नाडीपक्षो वादित्यपक्षो वा कल्पनेऽवि
वदितव्यस्तत्राह सर्वव्यापीति शुक्लमार्गस्य ज्ञानमार्गाद्व्यत्वमाद्विपति नन्विति शुक्लमाहुस्तन्नाहैतन्मार्गविषयत्वे नीलादिग्राहुः समभि
व्याहारविरोधादिति परिहरति ननीलेति सैशांतिकं मेव भारांग्याप्यातेऽस्र्वपदे हृषयति यावच्छुक्लादीनिति न केवलं देहदेशनिःसर
णसंबंधादेव नाडीभेदानां संसारविषयत्वे किं तु ब्रह्मलोकादिसंबंधादपीत्याह ब्रह्मादीति ग्रारिल्मापि देवयानमध्यपाती ब्रह्मलोकः
प्रापकः संसारहेतुरेवेति मन्वानो मोक्षमार्गमुपसंहरति तस्मादिति आत्मकामतया ज्ञानमार्गे इति संबंधः एवंभूमिकोऽकृत्वेष इत्यस्यार्थ
माह सर्वकामेति यथा तैलादिविलये प्रदीपस्य स्वरूपनाश उपपद्यते तेजोमात्रेण निर्वाणमिष्यते तथास्य लयस्तस्य च सर्वस्यैव कामस्य ज्ञा
नात् तद्येषतिरामत्तु उपपन्नावश्चैव प्रत्यगात्मनि कार्यकरणानामेकीभावेनावस्थानमित्ययमेष शब्दार्थ इत्यर्थः पंथा इत्येतद्व्याचष्टे ज्ञान
मार्ग इति इत्थंभावे तृतीयामाश्रित्याह परमात्मेति ब्रह्मवेदनकर्तृत्वं श्रोत्रियाणां संन्यासित्वं दर्शयति त्यक्तेति विद्यादिपत्नीं निराकृत्य मोक्षमा
र्गे निर्दिष्टार्थे तेन धीरा अपि यन्ति ब्रह्मविदो निगमयति तेनेति ब्रह्मणोऽपि संबंधः सकाशादिति शेषः इतेति जीवदवस्थायाः समुच्चयकारिणा
ब्रह्मज्ञानिविवक्षितेनेति केचित्तान्प्रत्याह नन्विति विरोधात्ज्ञानकर्मणोरिति शेषः किंच क्रमसमुच्चयः समसमुच्चयो वेति विकल्पासहे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रा॰ टी॰
१९४

नीकृत्य हर्षयति प्रवृत्त्येति ज्ञानस्य कर्मासमुच्चयेपि विवेकज्ञानेन समुच्चयोस्तीत्याशंक्याह यज्ञेति ब्रह्मविदोपिस्तन्यादिदृष्टेस्तेन समुच्च-
योज्ञानस्येत्याशंक्याह निराशिषमिति काम्यानुष्ठानमनारंभोत्तीर्णत्वे निषिद्धानाचरणोत्तीर्णकर्मत्वे नित्यादिकर्मणादित्येवं समुच्चयेवा-
कर्तेत्याह नेत्यादिना एकत्वानिरपेक्षत्वान्न सर्वोदासीनत्वेतियावत् समत्वान्मित्रोदासीनशत्रुबुद्धिव्यतिरेकेण सर्वत्र स्वस्मिन्निव दृष्टिः इंदुनि
धानमहिंसा वा तत्व प्रयोजनमूलेति कृतिः तमाह कामस्य वितंचव व्रतं यज्ञाधर्मस्य योगादि दयादमश्च मोक्षस्य सर्वोपरमः क्रियाभ्यः इत्या-
दिवत्तद्विधयुक्तसार्थसाधनमेदोपदेशवाक्यान्यादिपदग्राह्यार्थः इत्यादिसूत्रतिभाष्य उत्पादिसमुच्चयकारिणोप्युक्तमिति संबंधः तथा-
पिप्रकृते मंत्रे समुच्चयो भातीत्याशंक्याहोपदेक्ष्यंतीति वाक्यशेषादिपर्यालोचनासिद्धमर्थमुपसंहरति तस्मादिति एवं पुण्यकृतनुभूत्वा।
पुनस्त्यक्तपुत्राद्येषणो ब्रह्मविन्नैनैतीति क्रमो न युज्यते प्रक्रतत्वादित्याशंक्याहाथवेति स्तुतिमेवोपपादयति पुण्यकृतीति तेजोमिक-
रणात्पुपसंहृत्य स्थितत्वे तैजसे दहराद्युपासीनो योगी तस्मिन्नणिमाद्यैश्वर्यानुभवानुभावत्वप्रसिद्धिस्तामंशु पुण्यकृत्तैजसाभ्यामित्यर्थः अ-
तःस्यानूपरावृत्तेः स्पष्टयति अभ्यासेति पुण्यकृत्तैजसयोरितिशेषः प्रस्तुतज्ञानमार्गस्तुत्यर्थं मार्गांतरं विनिंदंस्तद्धमित्यादिना विद्यायामिति।
प्रतीकमादायव्याकरोत्यविद्येति कथं पुनस्तेषामभिरतानामधःपतनमित्याशंक्याह विधीति मंत्रांतरमाकांक्षाद्वारोत्थाप्य व्याचष्टे
यदीत्यादिना श्रुत्यर्थस्य निष्पत्तिं सूचयति वहितमर्थमाहाव्युद्धेरिति उक्तामवज्ञानस्तुत्यर्थमेव तन्निंदैकस्य कायक्लेशादिरंदर्शयन्ना- १९४
त्मानमित्यादिना विज्ञानात्मनो वैलक्षण्यार्थं विशिनष्टि सर्वेति नारस्थ्यं व्याधर्तयति हृत्स्थमिति बुद्धिसंबंधप्राप्ते संसारित्वे वारयत्य-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शानायादीति प्रश्नपूर्वकं ज्ञानप्रकारं प्रकटयति कथमित्यादिना सर्वभूतसंबंधप्रयुक्तदोषं वारयितुं विशिनष्टि नित्येति इति विज्ञानी
यादिति संबंधः प्रयोजनमाह शरीरमनुमन्वरेदिति संबंधः किमिच्छन्नित्याहेपसमर्थयते नदीति कस्यचाकामयेत्यादेरुपपादयति न
चेति शालेपद्वयं निगमयत्यत इति नेदेवस्पष्टयति शरीरेति विद्वषस्तापाभावं व्यतिरेकमुखेन विशदयत्यनात्मेति वस्त्वंतरे स्वात्मा
पत्तं भवत्विति शेषः सचेत्यत्याहत्वमभेदमित्यादियोज्यमित्यतदाह किमिच्छन्नित्याद्याक्षतिविनिशेषः नकेवलमात्मविद्यारसिका
सकाम्यक्रियाणादित्यत्किंतत्कृतत्कृत्यत्वाचास्तीत्याह किंचेति संदेहयित्यात्मादिभिर्भूतैरुपचितेन शरीरे संदेहत्वे साधयत्यनेकेति विश्व
मत्वं विशदयत्यनेकधेनेति ननाममात्रमित्यत्र उरस्तात्मसस्मारिति पठितत्वेयस्मादित्युपक्रमादिह स्वकृतत्वमिति शेषः परशाङ्को विद्या
विषयः विस्वकृतत्कृतत्कृत्यत्वइत्येतत लौकलौकिकविभागेन भेदं शंकित्वा दूषयति किमित्यादिना यस्येत्यादिमंत्रस्यतात्पर्यार्थं संग्रह्णा
ति यपपद्यते ग्रुत्वेवं किंतावतेत्याशंक्याह एकपदेति यथो हि परः सर्वप्रकारभेदरहितत्वात् एतत्यावर्तेतेसपवासीत्यात्मात्रसंधात्व
इति योजना ब्रह्मविदो विद्यया कृतत्कृत्यत्वे श्रुतिसंप्रतिपत्तिरेव केवलं न भवति किं तत्स्वानुभवसंप्रतिपत्तिरस्तीत्याह किंचेति ग्रथेस
सकथंचिदिदेवेतित्याख्याने नदित्यस्य ब्रह्मज्ञानत्वमित्यर्थकमर्थं स्फुटयति नदेवदिति नहिंमहतीविनष्टिरिति संबंधः बहुत्वेन विवक्षितेना
नात्मा ज्ञातो बहुविधविनदेत्यभिप्रेत्यावेदिदित्यस्यार्थमाह वेदनमित्यादिना नचेहाब्रह्मविदि नवं तावचनतो हमवेदिस्यामितियोजना विद्याभा
वेदोपश्रुत्का विदुष्टेऽभवमित्युमर्थं निगमयत्यमहोवयमिति इहैवेत्यादिनार्थवादेनोक्तमेवार्थं तत्र देनप्रपंचयति यथाचेत्यादिना उक्ता

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बृ॰भा॰
१२५

दविदुषो विनिर्मोकाभावे हेतुमाह दुःखमेवेति किंच विदुषो विहिताकरणादिप्रयुक्तं भयं नास्तीति विद्यां स्तोतुमेव मंत्रांतरमादाय व्या
चष्टे यदैतमित्यादिना उक्तमर्थं व्यतिरेकमुखेन विशदयति सर्वो हीति जुगुप्सायाः निंदात्वेन प्रसिद्धत्वात्कथमवयवार्थमादाय व्या
ख्यायते हृदि यौगपद्यमस्तीति न्यायादित्याशंक्याह यदेति तदेवोपपादयति सर्वमिति यद्येश्वरस्यापि कालान्यत्वे मतिवस्तुत्वात्तदव
च्छिन्नकालावच्छिन्नत्वान्न कालत्रये प्रतिनियतमीश्वरत्वमत आह किंचेति यस्मादीश्वरादर्वाक्संवत्सरो वर्तनेन तमुपासते देवा इति संबंधः न
नु कथं संवत्सरोऽर्वागित्युच्यते कालस्य कालांतराभावेन पूर्वकालसंबंधाभावादत आह यस्मादिति अन्वयस्तु पूर्ववत् आत्मज्योतिषा
गुणमायुष्ट्वलक्षणं पूर्वयत्नुपासकस्य फलमाह सर्वस्येति यथोक्तोपासने देवाधिकारो विशेषवचनादित्याशंक्याह तस्मादिति ॥
ज्योतिषां ज्योतिरमृतमित्युक्तं तस्यामृतत्वं सर्वाधिष्ठानत्वे साधयति किंचेति एवकारार्थमाह नचेति यथात्मानं ब्रह्मत्वेन जानामि तत
हि किं तेन विद्याफलमिति प्रश्नपूर्वकमाह किंतर्हीति कथं तर्हि तेऽमर्त्यत्वप्रतीतिस्तत्राह तदात्मत्वेनेति प्रकृताः पंचजनाः पंचज्योतिषा
सह प्राणेनावसुरित्यभिप्रेत्याह किंचेति कथं चक्षुरादिषु चक्षुरादित्वं ब्रह्मणः सिद्धमित्यत आह ब्रह्मणेति विमतानि केनचिदधिष्ठिता
नि चेतनेन करणत्वाद्वास्यादिवदिति चक्षुरादिव्यापारेणानुमितात्मतत्त्वं प्रत्यगात्मानं ये विदुरिति योजना विदिक्रियाविषयत्वमावर्तय
ति नेति प्रत्यगात्मविदां कथं ब्रह्मवित्त्वमित्याशंक्याह तदिति मनसो ब्रह्मदर्शनसाधनत्वे कथं ब्रह्मणो वाङ्मनसातीतत्वश्रुतिरित्याशं
क्याह परमार्थेति केवलं मनो ब्रह्माविषयीकुर्वदपि श्रवणादिसंस्कृतं तदाकारं जायते तेन द्रष्टव्यं तदुच्यते प्रतिपत्तिव्याप्यं ब्रह्मै

१२५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क्षिनद्र

त्यपरत्वंतीतिभावः युक्तशास्त्रार्थमाहाचार्यैरिति इहेदंह्यादिभावेनयेदमाशंक्याह तद्येति यत्नतोभेदरहितेपिकथंभेदाभानी
त्याशंक्याहाम्नतीति नेहेत्यादेः संपिंडितमर्थंकथयन्विवृणोति द्वैताभावेकथमनुरुद्ध्यमित्याशंक्याह यस्मादिति तमेवैकंप्रकारं
शकरयति विज्ञायेति परिछिन्नत्वंच्यवस्थितत्वमाकाशवदिति एकरसत्वंहेतुत्वमाग्रमेयत्वंप्रतिजानीते यस्मादिति एतत्तत्त्वंयस्मादेक
रसत्वमाह प्रमेयमितिनियोजनमाह नचैषस्मरयति सर्वैकत्वादिति तथापिकथमप्रमेयत्वंतत्राहात्मत्वेनेति मिथोविरोधमाशंकते नन्विति वि
रोधमेवस्फारयति ज्ञातृत्वेनेतीति चोदितेविरोधंनिराकरोति नैषदोषइति संगृहीतंसमाधानंविशदयति यथेत्यादिना तत्समानानन्तरं
विषयीकर्तुमशक्यत्वेहेतुमाह सर्वस्येति इतिसर्वंद्वैतापवादेनिष्फलत्वेतिशेषः आगमस्यापितर्हिकथमात्मानमावेदयेदित्याशंक्याह प्रमा
तेति प्रात्मनः स्वर्गादिवद्विषयेनागमप्रतिपाद्यत्वाभावेहेतुमाह प्रतिपादयतीति तथापिकिमितिविषयत्वेनाप्रतिमाद्यत्वेतत्राह प्रतिपा
दयितुमिति तर्हितत्प्रतिपाद्यत्वप्रश्नेकथंतर्हितस्मिन्नागमिकंज्ञानंतत्राह ज्ञानेचेति परस्मिन्नद्वैतेह्यात्माभावस्यारोपितस्यनिवृत्तिरेवज्ञा
नेनक्रियते तथाचात्मनिप्रतिपत्तेःस्वाभाविकमेवस्फुरणंप्रतिबंधविगमात्प्रकटीभवतीतिभावः ननुब्रह्मणआत्मभावंश्रुत्वाकथंज्ञाविदु
षस्तेनहदेहाद्यात्मत्वव्यावृत्तिरतआह नतस्मिन्निति ब्रह्मणएवब्रह्मात्मभावः सदामन्यते कथमन्यथाप्रपेत्याशंक्याह नित्योहीति सर्वे
षांप्राणिनांब्रह्मणास्त्यैकत्वेनप्रतीतद्विषयोस्तुब्रह्मात्मतयामिकंविषयतःस्यात् ब्रह्मणआत्मभावस्यसदाविद्यमानत्वेफलितमाह तस्मादिति प्रतीते
षयाभासाद्देहादात्मत्वप्रतिभासः तस्मिन्नब्रह्मणात्मत्वे प्रन्यस्मिन्नात्मभावनिवृत्तिरेवागमेनक्रियतेचेत्तर्हिकथमात्मानेनगम्यैरस्या

त

धक्र

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा॰ टी॰
१२१६

धनेनतत्रात्यागात्येति यद्यागामिकवृत्तिव्याप्यत्वेनात्मनोमेयत्वमिष्यतेकथंतर्हितस्यामेयत्ववाचोयुक्तिरित्याशंक्याह स्वतश्चेति इति
व्याप्यत्वेनमेयत्वेप्युरणाव्याप्यत्वेनचामेयत्वमित्युपसंहरति इत्यमयमिति यदुक्तंध्रुवत्वंतदुपस्कारएवंकमुपपादयति विरजइ
त्यादिना कथंजन्मनिषेधात्तिलेरेविकारान्निषिध्यतेनचाह सर्वेषामिति यथोक्तंवस्तुनिदर्शनेनिगमयति तमीदृशमिति विमृ
दृत्वादिलक्षणमितियावत् उक्तंयाप्रीत्याप्रज्ञाकरणेकानिसाधनानीतिचेन्नानिर्दिशत्येवमिति काम्यनिषिद्ध त्यागःसंन्यासउपर
मोनित्यनैमित्तिकत्यागइतिभेदः बहूनितिविशेषणवशादायानमर्थंदर्शयति नचेति चिंतनीयेषुशब्देष्वितियावत् तच्छब्दस्यनेरसे
वादयन्तोनित्येवमिति नानुध्यायादित्यत्रहेतुमाह वाचइति तस्मात्बहून्शब्दान्नानुचिंतयेदितिशेषेणसंबंधः इतिशब्दःश्लोकव्याख्या
नसमाप्त्यर्थः कंडिकांतरमवतारयितुंवृत्तंकीर्तयति सवेतकाविति उत्तरकंडिकातात्पर्यमाह एवमिति विरजःपरइत्यादिनोक्तक्र
मेणावस्थितेब्रह्मणीतियावत् तस्मिन्नप्युक्तोक्तिः तदर्थंब्रह्मात्मनिसर्वस्यवेदस्यविनियोगप्रदर्शनार्थंत्वर्थः ननुविविदिषावाक्येन
ब्रह्मात्मनिसर्वस्यवेदस्यविनियोगोवक्ष्यते तथाचतस्मात्प्राक्तनवाक्यंकिमर्थमित्याशंक्याह तद्वेति यथास्मिन्नध्यायेसफलमात्मज्ञान
मुक्तंतथैवतदत्रद्योतियोजना कथंयथोक्तेज्ञानेसर्वोवेदोविनियोक्तुंशक्यते स्वर्गकामादिवाक्यस्यस्वर्गादावेवपर्यवसानादित्याशंक्य
नेयोगादहत्यक्त्वायमनाहृत्यविप्रतिपत्ति कामनाशीति उक्तस्यसफलस्यात्मज्ञानस्यानुवादइतियावत् उक्तानांधर्मयत्वेविशेषणानांतदेक
ति कोसाविति विशेषणानर्थक्यमाशंक्यपरिहरत्यनीनेति नहिविरजःपरआकाशादितिनोक्तोमहत्त्वादिविशेषणोपरमात्मनत्रसशब्दस्य

१९६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नीमप्यस्तीतिकृत्वा तेन तस्यानिर्वोढ्यात्मत्वं जीवं परामृश्य तमेव वैशद्येन स्मारयित्वा तस्यैव निर्दिष्टेन परेणात्मनैकात्म्यमेषशब्देन निर्दिशती
त्यर्थः विशेषणवाक्यस्यैवमेषशब्दप्रश्नपूर्वकं व्याचष्टे कतम इति कथं जीवो विज्ञानमयः कथं वा प्राणेष्विति सप्तमी प्रयुज्यते तत्राहोक्तेति
तदनुवादस्य शब्दार्थं स्फुटेदापोदफलमाह संशयेति एकवाक्योक्तिं गगनमित्यकं विज्ञानेत्यकं दीति योयं विज्ञानमयः प्राणेषु प्राणकः
सवएष महानात्मेति जीवानुवादेन परमात्मभावो विहित इति वाक्यार्थमाह एतदिति परमात्मभावापादनप्रकारमनुवदति साक्षादिति
विशेषणवाक्यस्य व्याख्येयत्वप्राप्तानुक्तवाक्योत्थिगगनमित्यत्रोक्तं स्मारयति योयमिति वाक्यान्तरमवतार्य व्याचष्टे एष इति कथं
पुनराकाशशब्दस्य परमात्मविषयत्वमुपेत्य हितीयव्याख्यानेन स्पार्थान्तरे हृदयाकाशेत्याशंक्याह चतुर्थ इति इत्यमुक्तं ज्ञानमनूद्यतत्फ
लमनुवदति सचेत्यादिना कथं पुनर्निरुपाधिकमीश्वरस्य वशित्वं कथं च तद्भावेन तादात्म्येनाविदुषस्तदुपपद्येतेत्याशंक्याह चेति विशेष
णत्वयस्यादेतमद्रूपत्वमेव विशदयति योहीति न केवलमुक्तमेव विद्याफले किंतु तत्त्वान्तरमप्यस्तीत्याह किंचेति एवंभूतत्वेन ज्ञातपरमात्माभि
न्नत्वेपरिशुद्धत्वमर्थमनुवदति कृतीति ब्रह्मीभूतस्य विदुषः स्वातंत्र्यादिवद्धर्माधर्मासंस्पर्शित्वमपि फलमित्यर्थः अधिष्ठानादिकं तत्त्वा
हिरण्यगर्भादिलोकिकवद्धर्मोद्भिसंबंधित्वं स्यादिति शंकते सर्वेति परंतत्त्वमुपाधितिमिरपरिहरणमुच्यते इति सर्वाधिपत्यादिकं सोपाधि
रित्याहैष इति सर्वोपाधारत्वेनोपाधिरित्याह एष इति कथं विधारयितृत्वमित्याशंक्याह तदाहेति तदेव साधयति परमेश्वरेणेति
सर्वस्य वशीत्यादिनोक्तमुपसंहरत्येवंविदिति सफलं ज्ञानमनूद्य विविदिषावाक्यमवतारयति किंत्वेतिरिति एवंफलाधारसर्वस्य वशी

यस्मादित्यादि
ना तदप्रसिद्धि
प्रकाणयति

वंपालकत्वादि
त्वंचोपाधि

नै

रित्याह किंचेति स

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्राने॰
२९८

त्यादिनोक्तफलोपेतायामिति यावत्तादर्थ्येन परंपरया ज्ञानोत्पत्तिशेषत्वेनेत्यर्थः विनियोजकं वाक्यमाकांक्षापूर्वकमादाय व्याचष्टे
तत्कथमित्यादिना एवंभूतं श्लोकोक्तविशेषणमित्यर्थः ब्राह्मणशब्दस्य क्षत्रियाद्युपलक्षणत्वे हेतुमाहाविशिष्टो हीति संभावितत्वा
दितरमाहाथवेति तेन विविदिषाप्रकारेण प्रश्नपूर्वकं विवृणोति कथमित्यादिना मंत्रप्रपंचस्यानंतरस्याप्यर्थमाचष्टे ये पुनरित्यादि
ना तत्र हेतुमाह नहीति भवतूपनिषन्मात्रग्रहणमित्याशंक्य वेदानुवचनेनेत्यत्र ग्रहणाध्यारणानन्तरं पठ्यमानत्वात्स्मृत्यन्तरे वेदानुवचनशब्देन
सर्ववेदग्रहे संभवति तदेकदेशत्यागो न युक्त इत्याह वेदेति दोषसाम्यमाशंकते नन्विति सिद्धान्तेऽप्युपनिषदं वर्जयित्वा वेदानुवचन
शब्देन कर्मकांडं गृहीतमिति कृत्वा तस्य वेदैकदेशविषयत्वं स्यात् यश्चोभयोः समो दोषः परिहारोऽपि वा समः नैकः पर्यनुयोक्तव्यस्तादृ
गर्थविचारणे तस्य यश्चोभयोरित्यादिन्यायविरोध इत्यर्थः नित्यस्वाध्यायो वेदानुवचनमिति पक्षमादाय परिहरति नेत्यादिना वेदै
कदेशपरिग्रहपरित्यागात्मकविरोधाभावं साधयति यदेति तर्हि व्याख्यानेनानंतरमुपपत्तिरित्याशंक्य नहि वाक्यशेषवशादेवेति
तमेवेत्याह यज्ञादीति संग्रहवाक्यं विवृणोति यज्ञादीनि कर्माणीति तर्हि प्रथमव्याख्याने कथं वाक्यशेषोपपत्तिरित्याशंक्याह कर्म
हीति वेदानुवचनादीनामात्मविविदिषासाधनत्वमापतति कथमिति उपनिषद्भिरिवात्मा तैरपि ज्ञायतामित्याशंक्याह नैवेति क
र्मणामप्रमाणत्वेऽपि परंपरयात्मज्ञाने हेतुत्वादिति विविदिषाफलतिरविरुद्धेति समाधत्ते नैष दोष इति तदेव स्फुटयति कर्मभिरिति त
र्थश्रुत्यंतरं प्रमाणयति तथा हीति तनोतिन्यायवशान्नहि शुद्धधीरात्मानं सदा चिन्तयेदुपनिषद्भिस्त्वपश्यतीत्यर्थः प्रादिशब्देन कथा

२९८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यदक्रियमाणादिम्यन्निमित्प्रबद्धः नित्यकर्मणां संस्कारार्थत्वे प्रमाणं पृच्छति कथमिति यद्यपि श्रुतिस्मृतिभ्यां कर्मभिः संस्कृतस्योपनिषद्विद्याभ्या
साते शक्यते तथापि तेषां संस्कारार्थत्वे किं प्रमाणमिति प्रश्ने श्रुतिस्मृती प्रमाणं यदि मद्वाक्यादिना किंपुनस्तच्छ्रुतिशास्त्रं तदादाच्छान्दचत्वारिं
शदिति यज्ञवताद्यास्मादयो गुणाः अष्टचत्वारिंशत्तु गर्भाधानादयः संस्काराः इति विभागः बहुवचनोपात्तस्य संस्कारस्यमाह गीतायां चेति पठेत
स्मादावश्यमवश्यं यतेनेतीति तेषां संस्कारार्थत्वेऽपि कथं ज्ञानसाधनत्वमित्याशंक्याह संस्कृतस्येति दानेन विविदिषन्तीति श्रुतेर्ज्ञानसंबंधः कं
थं पुनः स्वतंत्रत्वेन विविदिषाकारणमत आह दानमपीति विविदिषारेणैव विनियोगः नचैवमनेनापि स्वर्गवत्स्वर्गः कामानशनेनाग्नेहोत्रादि
विविदिषेयं विषयमेवं चेत्यहत्कालाभसंबंधत्वमिति यावत् यथाश्रुतार्थत्वे कादाचित्कत्वमित्याशंक्याह नत्विति भवदुपात्तानां वेदानुवचनादीनां
विद्यमानेनाविनियोगात्तथापि कथं सर्वेषां नित्यकर्मणां विनियुक्तमित्याशंक्याह वेदानुवचनेनेति उपलक्षणफलमाहैवमिति यज्ञाद्या
कर्मणां शुद्धिद्वारेण तत्काहदयस्यैकवाक्यतामपि मित्रावलीस्याहैवं कर्मेति वाक्यान्तरमवतार्य व्याकरोति एवमिति तस्यैवार्थमाह यथोक्तेने
ति यज्ञादयश्चोपकाराः शुद्धिहेतवो विविदिषोत्पत्तौ गुरूपादोपसर्पणं श्रवणादि चेत्यनेन क्रमेणेत्यर्थः यथाप्रकाशितं मोक्षप्रकरणे मंत्रब्राह्म
णाभ्यां मुक्तलक्षणमित्यर्थः योभिप्रायोऽजीवन्मुक्तविषयः एवकारव्याकरोऽस्यैवेति यथावधारणमात्रिविषयसमाधत्ते नत्वित्यादिना
एवकारस्ताद्धिंसत्वत्वानामित्याशंक्याह किंत्विति ग्राह्मवेदनेऽपि कर्मित्वस्यादिति चेन्नेत्याहैनत्विति कथमात्मविदोऽपि सिद्धमित्वमसाधारणं
तदाहैतस्मिन्निति इत्यात्मविदोनकर्मित्वमित्याह किंचेति ग्राह्मलोकमिच्छतां प्रवृत्तानामपि कर्मसंन्यासश्रवणादात्मविदोनकर्मि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्राते
१९८

नेति किं वक्तव्यमित्यर्थः नालीलं वैराग्यातिशयशालित्वं श्रवणादिसामर्थ्यसिद्धमर्थमाहैतमेवेति पारिव्राज्ये लोकत्रयार्थिनामन-
नधिकारे हेतुमाह नहीति लोकत्रयार्थिनश्चेत्पारिव्राज्येनाधिक्रियेरंस्तत्राहि तेषामधिकारस्तत्राह तस्मादिति स्वर्गकामस्य स्व-
र्गसाधने यागेऽधिकारवल्लोकत्रयार्थिनामपि तत्साधने पुत्रादावधिकार इत्यर्थः पुत्रादीनां बाह्यलोकसाधने प्रमाणमाह पुत्रेणे-
ति पुत्रादीनां लोकत्रयसाधनत्वे सिद्धे फलितमाहात इति अतस्साधनत्वे लोकत्रयं प्रत्युपायत्वं प्रवधारणार्थमुपसंहरति तस्मा-
दिति लोकत्रयार्थिनां पारिव्राज्येऽनधिकारादित्येतावत् आत्मलोकस्य स्वरूपत्वेन सदात्मत्वात् कथं तदेच्छेत्याशंक्याहात्मेति न-
स्यात्मत्वेन नित्यप्राप्तत्वेऽप्यविद्यया व्यवहितत्वात्प्रेप्सा संभवतीति भावः भवत्वात्मलोकोऽप्येतुं तत्राऽपि किं तत्प्राप्तिसाधनं तदाह न-
स्मादिति अविद्यावशान्नेच्छासंभवादित्यर्थः नेच्छाया दौर्लभ्यं योनपि चेत्कुतः पुत्रत्वं कृत्स्नतर इति प्रसक्त्वप्रत्यगात्मनाशीकसाधने-
भ्यो वेदानुवचनादिभ्यो विशेषमाहान्तरंगमिति पारिव्राज्यमेव लोकस्यान्तरंगं साधनमिति दृष्टान्तमाह यथेति तथा पारिव्राज्यमेवा-
त्मलोकस्य साधनमिति शेषः पारिव्राज्यमेवेति नियमे हेतुमाह पुत्रादीति तस्यानात्मविनियुक्तत्वादिति शेषः यद्यपि केवलं पुत्रादिके-
नात्मलोकप्रापकं तथापि पारिव्राज्यसहितेन तेनापि स्यादित्याशंक्याहासंभवेनेति न हि परिव्राजकस्य पुत्रादिना सह तेनो वा पारिव्राज्यसंभ-
वति एकं च सहद्वयं निराकुर्वद्भिः सपरिकरस्य तत्तानस्य कर्मादिविरुद्धत्वात्तेन कृतः सहितं पुत्राद्यात्मलोकप्रापकमित्यर्थः साधनान्तरा-
संभवे फलितमुपसंहरति तस्मादात्मानमिति यद्यजेतीति वर्तमानापदेशात्तत्र विधिरस्तीत्याशंक्याग्निहोत्रं जुहोतीति विधिमाश्रित्याह

१९८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यथा चेति पारिव्राज्यविधिश्रुत्यानन्तर्यापेक्षितमर्थवादमाकांक्षापूर्वकमुत्थापयति कुतः पुनरिति उत्थापितमर्थवादस्य तात्पर्यमाह न
चेति आत्मलोकार्थिनां पारिव्राज्यनियमः सप्तम्यर्थः अर्थवादस्यान्तरालिकं व्याचष्टे नह्येतदिति क्रियापदेनास्येति संबध्यते निपातद्व
यस्यार्थमाह किलेति प्रजां न कामयन्त इत्युत्तरेण संबंधः प्रजामात्रे श्रुते कथं कर्मादि गृह्यते तत्राह प्रजेति आकांक्षापूर्वकमन्वयमन्वा
चष्टे प्रजां किमिति अकामयमानत्वस्य पर्यवसानं दर्शयति प्रजादीति पूर्वे विद्वांसः साधनत्रयं नानुतिष्ठन्तीत्युक्तमाक्षिपति नन्विति
एषणाभ्यो व्युत्तिष्ठन्तो किं न दृष्टानेनेत्याशंक्याह न हि तानीति आत्मविदामपरविद्यानुष्ठानं दूषयति नापवादादिति अथात्र सर्वस्या
नात्मनो दर्शनमेवापोद्यते न त्वपरस्य ब्रह्मणो दर्शनमत आह अपरब्रह्मणोपीति तदपवादे हेत्वन्तरमाह यत्रेति यस्मिन्भूम्नि स्थितस्य द्र
ष्टादिरन्यो न पश्यति न शृणोतीत्यादिना च दर्शनादिव्यवहारस्य वारितत्वादात्मविदो न सकृदपरब्रह्मदर्शनमित्यर्थः तत्रैव हेत्वन्तरमाह इ
वेति प्रतिषेधप्रकारमभिनयत्यपरमिति इतश्चात्मविदो नापरब्रह्मदर्शनमित्याह ~~तत्रैव हेत्वन्तरमाह द्वैतेति~~ न केनेति अपरब्रह्म
दर्शनासंभवे किं तेषामेषणाभ्यो व्युत्थानकारणमित्याशंक्याह तस्मादिति साधनत्रयमननुतिष्ठतामभिप्रायं प्रश्नपूर्वकमाह कः पुनरि
त्यादिना कैवल्यमेव तत्साध्यं फलमित्याशंक्याह प्रजादीति निर्ज्ञातासोयमित्यादिश्रुतावितिशेषः सप्रपञ्चं हि प्रजया साध्यतामिति चेन्ने
त्याह स चेति आत्मव्यतिरिक्तो नास्तीत्युक्तमुपपादयति सर्वं हीति आत्माव्यतिरिक्तस्यैव लोकस्य प्रजादिसाध्यत्वसिद्धतामिति चेन्नेत्या
हात्मा चेति आत्मयाजिनः संस्कारार्थं कर्मेत्यंगीकारादात्मनोस्ति संस्कार्यत्वमित्याशंक्याह यद्यपीति अथागोगित्वे संस्कार्यत्वं च शक्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा॰
१५५

त्मदर्शनविषयमेव किं नेष्यते तत्राह नहीति आत्मविदां प्रजादिसाध्याभावमुपसंहरति तस्मान्नेति केषां तर्हि प्रजादिभिः साध्यं फलं त
दाहाविदुषां हीति केषांचित्तत्रादिषु प्रवृत्तिस्तेनैवं न्यायेन विदुषामपि तेषु प्रवृत्तिः स्यादित्याशंक्याह नहीति तत्र प्रवृत्तिरिति संबंधः अ
विद्वद्दर्शनविषय इति च्छेदः उक्तेऽर्थे वाक्यमवतार्य व्याचष्टे नवेति आत्मा चेदस्माभिः प्रेतः फलं तर्हि तत्साधनेन भवितव्यमित्याशंक्याह
नवेति कृतं तर्हि साधनमेष्टव्यमित्याशंक्याह साध्यस्येति विपक्षे दोषमाह असाध्यस्येति येषामित्यादिवाक्यार्थमुपसंहरति तस्मादिति
ब्राह्मणानां ब्रह्मविदां प्रजादिभिः साध्याभावादिति यावत् वाक्यांतरं प्रश्नद्वारेणावतार्य पांचमिकं व्याख्यानं तस्य स्मारयति तएवमि
त्यादिना यदर्थो यमर्थवादस्तं विधिं निगमयति तस्मादिति महानुभावो यमात्मलोको यदर्थिनोऽद्युक्तरमपि पारिव्राज्यं कुर्वंतीति स्तुति
रत्र विवक्षिता न विधिरित्याशंक्याह नहीति तदेव प्रपंचयति प्रव्रजंतीत्येतस्येति तथापि प्रव्रजेदिति वाक्यस्यार्थवादत्वे किं तस्यादित्याशं
क्याहार्थवादस्येति अपेक्षाप्रकारमेव प्रकटयंस्तस्य स्तुत्यभिमुखत्वाभावाद्विधित्वमेवेत्याह यस्मादिति किंच विदित्वा व्युत्थाय भिक्षा
चर्यं चरंतीत्यत्र विज्ञानेन समानकर्तृकत्वं श्रुत्या नादेरुपदिश्यते विज्ञानं च सर्वोपनिषत्सु विधीयते ततो व्युत्थानमपि विधिमर्हतीत्युक्तं तथा
चायमपि व्युत्थानपर्यायं पारिव्राज्यं विधेयमित्याह विज्ञानेति इत्यस्य पारिव्राज्यवाक्यमर्थवादो न भवतीत्याह वेदेति तदेव साधयति य
स्मादिति पारिव्राज्यविधेयत्वे हेत्वंतरमाह फलेति पुत्रादिफलापेक्षया पारिव्राज्यफले विभागेनोपदिश्यते तथा च फलवत्त्वात्पुत्रादिवत्पा
रिव्राज्यस्य विधेयत्वसिद्धिरित्यर्थः तदेव विवृणोत्येतमेवेति प्रकृतमात्मानं स्वं लोकमाप्तानतो विदित्वा तमेव साक्षात्कर्तुमिच्छंतः प्रव्रजंती

गु
१५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निवचनात्सूत्रादित्याध्यात्मरुद्यादिलोकादात्मान्तं लोके पारिव्राज्यफलान्तरत्वेन यतः श्रुतिर्विभज्याद्धातिसूत्रन्तस्य विधेयत्वमप्र
स्तुतमित्यर्थः फलविभागोपदेशे दृष्टान्तमाह यथेति तथा पारिव्राज्येपि फलविभागोक्तेर्विधेयत्वेनेति दार्ष्टान्तिकमिति शब्दार्थः पारिव्रा
ज्यस्य स्तुतिपरत्वाभावे हेत्वन्तरमाह नचेति यथा वायुर्वै क्षेपिष्ठेत्यादेरर्थवादः प्राशस्त्यार्थो देवतादिस्तुत्यर्थत्वस्थितो न तथेदं स्तुतिपरं तद्वा
द्योतिशब्दाभावादित्यर्थः किंच प्रधानस्य दर्शपूर्णमासादेरर्थवादापेक्षावत् पारिव्राज्यमपि तदपेक्षत उपलभ्यतेनेन तत्सदृशाद्विहितेय।
त्वे हेत्वन्तरमित्याह प्रधानवच्चेति किंच पारिव्राज्यस्य सकृदेव श्रुतत्वे चेद्विविहितमन्यस्तुतिपरं स्यादथ चेदं सकृदेव श्रूयते प्रव्रजेन्नीसुपक्रमस्य प्र।
शंसनकामयेत तस्मात्पाप्मभिस्ताचर्यं चरेन्नीत्यभ्यासादपिन तस्तुतिमात्रमेतदित्याह सकृदिति नचैतस्य चापि संबध्यते कथं तर्हि पारिव्रा
ज्यस्य स्तुतिपरत्वमनीतिस्तत्राह तस्मादिति श्रुतत्वाद्विधेयमपि पारिव्राज्यं स्तावकमपीति चेत्तत्राह नचेति विपक्षे दोषमाह यदीति अ
यपारिव्राज्यं यज्ञादिवत्त्रविधीयमानमिदं तस्तुतिरेवेत्याशंक्याह नचान्यैवेति आत्मज्ञानाधिकारादन्यत्र पारिव्राज्यविध्यनुपलंभादित्यर्थः
अन्यत्र विध्यनुपलंभमसमर्थयते यदीत्यादिना अन्यत्र प्रक्रियामितियावत् कर्माधिकारे त्यागविधेर्विरुद्धत्वादितिभावः भवत्विदं पारि
व्राज्यविधिस्तथापि सर्वकर्मानधिकृतविषयः स्यादित्याशंक्याह यदपीति नत्वकर्मानधिकृतेषु सीस्येतत् नत्वेतन्माह कर्त्रेवमत्वेनेति क
र्मानधिकृतेन कर्त्तव्यान्तयान्तानां त्वचूहतारोद्गगारादीनां पारिव्राज्येपि नास्ति तथा चानधिकृतविषये पारिव्राज्यं कल्प्यते चेत्तस्मिन्विषये चद्वा
रोद्गगाद्यपि कल्प्येतेति विशेषादित्यर्थः पारिव्राज्यस्याधिकृतविषयत्वे विधेयत्वे च सिद्धे फलितमाह तस्मादिति सार्थवादं पारिव्राज्यंस्या॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्राने-
२००

त्व्यायमप्रवृत्त्यादि व्याकर्तुं शंकयति यदीति परिहरत्यत्रेति तदर्थिनो नारभंते कर्माणीति शेषः कर्मभिरसंबंधमात्मलोकस्य साधय
ति ममात्मानमिति तस्य कर्मासंबंधेन निष्प्रपंचत्वे फलतीत्याह तस्मादिति आत्मनो निष्प्रपंचत्वेपि कुतस्तदर्थिनां पारिव्राज्यसिद्धिरित्या
शंक्याह यस्मादिति निर्विशेषस्तत्रतत्रवाक्यैर्दर्शितस्वरूपोयमात्मेत्येतदागमोपपत्तिभ्यां यथा एवं वस्त्वपि तत्तथैवाज्ञापि ब्राह्मणाद्ध्ये
विशेषतो यस्मान्निर्द्दिष्टमिति तस्मादस्मिन्नात्मन्यापाततो ज्ञाते कर्मानुष्ठानप्रयत्नासिद्धिरिति योजना उक्तात्मविषयविवेकविज्ञानवतोन
कर्मानुष्ठानमित्यत्र दृष्टांतमाह तदीति ब्रह्मज्ञानफले सर्वकर्मफलान्तर्भावाच्च तदर्थिनो मुमुक्षोर्न कर्मसंबंधमित्याह कृत्स्नमपीति तथा
पि विचित्रफलानि कर्माणीति विवेकीकृतहलवशादनुष्ठास्यतीत्याशंक्याह नचेति तत्र लौकिकं न्यायं दर्शयति अर्के चेदिति प्रदेशे मधु
लभेत चेदिति यावत् ज्ञानफले कर्मफलान्तर्भावे मानमाह सर्वमिति अखिलं समग्रं सांगोपांगमित्यर्थः तत्रैव श्रुतिं संवादयतीहापीति नि
षेधवाक्यतात्पर्यमुपसंहरत्यत इति एतमित्यादिवाक्यं योजयति यस्मादिति उ हेति निपाताभ्यां सूचितोऽर्थो यस्मादित्यनुभाषित इति शब्द
स्यापेक्षितं पूरयति इत्युक्तमिति प्राक्तनात्पूर्वकस्योत्तरवाक्यमवतार्य व्याकरोति केनेत्यादिना यथोक्तात्मविदस्तापस्पर्शासंस्पर्शो हि
तमाहोभे इति अपि पापेतरतीरच्छगवस्यानेतयोः शंकातेनेनिरस्यैवमिति निषेधवाक्योक्तकर्मेणेति यावत् इतश्चात्मविदो धर्माधर्मसं
बंधो नास्तीत्याह किंचेति तदेवानंतरवाक्यव्याख्यानेन स्फोरयति नैनमिति तयोस्तर्हि कुत्र तापकत्वं तदाह नात्मनेहीति पुरुषत्वात्तद
स्याविद्वद्यपि कृताकृतयोस्तापकत्वं स्यादित्याशंक्याहायं त्विति तत्र भगवद्वाक्यं प्रमाणयति यथेति यद्यपि पूर्वोक्तरयोर्धर्माधर्मयोरना

२००

तुक्ते ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रब्धयोस्तत्त्वविद्यावशाद्विनाशाच्छ्लेषोस्त्यपि प्रारब्धयोरस्ति तयोस्तापकत्वमित्याशंक्याह शरीरेति प्रकृतेविद्याफलमुपसंहरन्नस्तीति
कर्मकार्यासंबंधादित्यिति यावत् उक्ते विद्याफले मंत्रं संवादयति तदेतदिति एषनित्योमहिमेत्यत्रनित्यत्वमुपपादयन्नस्यैवेति तद्धिलक्षण
त्वमकर्मकृतत्वं प्रकर्मकृतो महिमा स्वाभाविकत्वाभ्युपगमस्त्वकर्मकृतत्वेन स्वाभाविकत्वमसिद्धमित्याशंक्याह अतोस्येति वृद्धिरपक्षयश्चे
तिविक्रियाद्वयाभावेपि विक्रियांतराणि भविष्यंतीत्याशंक्याहोपचयेति एतावुभौ निषेधाभ्यामिति यावत् आत्मनः सर्वक्रियाराहित्ये फ
लितमाहातइति तस्यैवं नित्यत्वेपि किं तदाह तस्यैवेति गुणधर्मलक्षणेनेत्यविकृतस्येति किमिदं धर्माधर्मलक्षणेनेत्युक्तमत उक्तोभयमपीति संसा
रहेतुत्वाविशेषादित्यर्थः तस्मादित्यादिवाक्यं व्याचष्टे यस्मादिति एवंविदात्मा कर्मतत्फलसंबंधशून्य इत्यापातलो ज्ञानवित्त्वित्यर्थः विशेषणा
प्यात्मदर्शितो विहितस्योभयविधकरणव्यापारोपरमस्य यावज्जीवादिश्रुतिविहितकर्मापवादस्तस्माद्विरक्तस्यापि नित्यादिभ्यः उपरमः
उपरमस्यापवादेन बाधः कस्य न संमतस्त्यादित्यायादित्याशंक्याहोपरत इति जीवनविच्छेदव्यतिरिक्तशीतादिसहिष्णुत्वं तितिक्षुत्वं यच्च क
र्णः स्यात्तद्धत्तेषां कर्मणां निवृत्तिः शमादिपदैरुक्ताय तत्तत्समाधीविरोधि निनिद्रालस्यादेर्युक्तेनस्यातेनायत्तनिवृत्तिः समाधानं समाहितो भू
त्वात्मन्येवेतिसंबंधः पश्यतीति वर्तमानोपदेशात्कथं विशेषणेषु संक्रामितो विधिरित्याशंक्याह तदेतदिति यथोक्तैः साधनैः सहितायो
विद्यायां किं स्यादित्याशंक्याहैवमिति तस्य उभयपापासंस्पर्शे हेतुमाहायंतिति एतच्च विद्धेन कर्मसंबंधोस्तीत्याह नैनमिति किमिति
पाप्मावस्थाविदंन तपतीत्याशंक्याह सर्वमिति कथं ब्राह्मणो भवतीत्यत्र एवं वदुच्यते प्रागपि ब्राह्मणत्वसत्वादित्याशंक्याहायंत्विति शुद्ध

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शांभे·
२०१

त्वमबाधितत्वं सफलां विद्यां मंत्रब्राह्मणाभ्यामुपदिश्योपसंहरत्येष इति तत्र कर्मधारयसमासं सूचयति ब्रह्मैवेति तथाविधसमास
परिग्रहे प्रकरणमनुग्राहकमभिप्रेत्याह मुख्य इति तथापि किमसमस्सिद्धमिति तदाहेनमिति आत्मीयं विद्यालाभं द्योतयितुं राज्ञो वचन
मित्याहैवमिति सति वक्तव्यशेषे कथमित्थं राज्ञो वचनमित्याशंक्याह परिसमापितेति तथापि परमपुरुषार्थस्य वक्तव्यत्वमित्याशं
क्याह परिसमाप्त इति कर्तव्यांतरं वक्तव्यमस्तीत्याशंक्याहैनावदिति तथापि यत्र निष्ठा कर्तव्या तदाच्यमित्याशंक्याहैवेति तथापि
परमात्मनिष्ठात्वात्तस्येति चेन्नेत्याहैवेति निश्चितं श्रेयोऽन्यदस्तीत्याशंक्याहैन दिति तथापि कृतकृत्यतया मुख्यब्रह्मणः सिद्ध्यर्थं वक्तव्या
न्तरमस्तीत्याशंक्याहैतव्याप्येति किमस्यां प्रतिज्ञापरं वरयोनियामकमित्याशंक्याहैनदिति निरुपाधिकब्रह्मज्ञानत्वात्तत्कैवल्यमि।
ति गमयितुमिति शङ्कः संप्रति सोपाधिकब्रह्मध्यानादभ्युदयं दर्शयति यो यमित्यादिना ईश्वरस्यैव कर्मफलं प्राणिभ्यो ददातीति तर्हि ता।
स्यैवैषम्यनैर्घृण्ये स्यातामित्याशंक्याह प्राणिनामिति उपास्यस्वरूपं दर्शयित्वा तदुपासनं सफलं दर्शयति तमेतमिति सर्वात्मत्वफल।
मुपासनस्य व्याख्यातं तस्माद्वा एवेति दृष्टं फलमन्नादत्वं धनलाभश्चोक्तमगुणकमीश्वरं ध्यायतः फलमाह वेदेति तदेतत्फलं स्पष्टयति
दृष्टेनेति अन्नादत्वं दीप्ताग्नित्वं निरुपाधिकब्रह्मज्ञानान्मुक्तिरुक्ता सोपाधिकब्रह्मध्यानाच्चाभ्युदय उक्तस्तथा च किमुत्तरकण्डिकयेत्याशं
क्याहेदानीमिति अजत्वाद्यविनाशीति वक्तव्ये च शङ्कः कथं जन्मजराभावयोरमरत्वाविनाशित्वसाधकत्वं तदाह यो हीति अयं त्वजत्वाद २०१
विनाशी अजरत्वाच्चामरोऽमरत्वाच्चाविनाशीति योजना मरणायोग्यत्वमुपजीव्य मरणकार्याभावं दर्शयत्यत एवेति जन्मापक्षयविना॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शानामेवभावविकाराणामिदंष्टवेतोनिषेधात्विद्धद्यादीनिविकारांतराण्यात्मनिभविष्यंति विशेषनिषेधस्यशेषाभ्यनुज्ञापरत्वा
दित्याशंक्याह यस्मादिति इतरेसर्वविक्रियाविपरिणामाः अतएवाभयइत्युक्तेविद्धणोति यस्माच्चेति किंतद्वयंतदाह भयंचेति अविद्या
निबंधिविशेषणाभावादात्मनेऽस्यास्मदादीस्पशंतीत्याशंक्याह तत्कार्यमिति विशेषणांतरंप्रश्नपूर्वकमुत्थाप्यव्याकरोत्यभयइति कथंपुन
रभयप्राप्तिर्विशिष्टस्यात्मनोब्रह्मत्वंतदाहाभयमिति वैशद्यार्थमाह प्रसिद्धमिति लोकशब्दःशास्त्रस्याप्युपलक्षणंवेदघस्व इत्युपसंहृत्य
विद्याफलंकथयति यएवमिति केचित्कार्यब्रह्मोपसंहरत्येषइति स्वप्नादेरपितदर्थत्वात्किमिति व्यासादिसंनापसंक्षिपयतेतत्राह तमेतिमिति स
प्नादेरारोपितत्वेगमकमाह तदप्याहेनेति तस्मादुःस्वप्नादिप्रपंचविषयंतदप्याहेनेति यज्जकृतदेवपश्यतीति नेतीति अध्यारोपापवादः
न्यायेनतत्त्वमावेदितंत्वादारोपितेभवत्येवस्वप्नादिद्वैतमित्यर्थः अध्यारोपापवादन्यायस्यपंकप्रक्षालनन्यायविरुद्धत्वात्तत्त्वविवदि
तेचेत्तदेवोच्यतांकृतंस्वप्नादिद्वैतारोपणेत्याशंक्याह यथेति उदाहरणांतरमाह यथाचेति दृष्टांतद्वयमनूद्यदार्ष्टांतिकमाचष्टे तथा
चेति इदेतिमोहशास्त्रोक्तिः तथापिकल्पितप्रपंचसंबंधप्रयुक्तमविशेषत्वंब्रह्मणः स्यादित्याशंक्याह पूर्वमिति तस्मिन्नात्मनिकल्पितःस
प्तादिकपायस्तेनजनितोविशेषस्तस्मिन्कारणत्वादिस्तस्यनिरासार्थमितियावत् तर्हिद्वैताभावविशिष्टत्वमितिचेन्नेत्याह तदपसंहृ
तमिति परिशुद्धंभाववदभावेनापिनसंस्पृष्टमित्यर्थः केवलमितिद्वितीयोक्तिः स्वप्नादिवचनस्यागतिशंकाप्रकृतमुपसंहरति सफलमिति
इतिशब्दः संग्रहसमाप्त्यर्थोब्राह्मणसमाप्त्यर्थोवा ॥ ब्राह्मणं ॥ समाप्तेशारीरकब्राह्मणेवशब्राह्मणंव्याख्यातव्यं कृतेनानार्थेन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ.टी.
२०२

मैत्रेयीब्राह्मणेनेत्याशंक्य मधुकांडार्थमनूद्य वत्तामामेति पांचमिकमर्थमनुभाषते पुनरिति तस्यैव ब्रह्मणस्तत्त्वमितिशेषः विगृह्य
वादो जयपराजयप्रधानो जल्पस्तन्न्यायः षष्ठे प्रतिष्ठापितमनुवदति शिष्टेति प्रश्नप्रतिवचनन्यायस्तत्त्वनिर्णयप्रधानो वादः उपसंहृतेन त
देवतत्त्वमितिशेषः से प्रश्नस्तत्र ब्राह्मणस्यागतार्थत्वमाराघेति आगमोपपत्तिभ्यां निश्चितेन तत्त्वे निगमनमकिंचित्करमित्याशंक्याहा
येचेति प्रकारांतरेण संगतिमाहाथवेति कथमिह तर्केणाधिगतिस्तत्राह तर्केति श्रुतिकांडस्य तर्कप्रधानत्वे किं स्यात्तदाह तस्मादि
ति इतिफलतीतिशेषः शास्त्रादिनाययोक्तस्य ज्ञानस्य निश्चितत्वेपि किं सिध्यतीति तदाह तस्मात्स्थात्त्वगृहावहिरिति एतच्छ्लोकयोक्त
ज्ञानपरामर्शार्थः इतिसिध्यतीतिशेषः तत्रहेतुमाहागमेति श्रुत्यभिचारान्मानयुक्तिगम्यस्यार्थस्य तत्त्वैवमत्वादितियावत् इतिशब्दो

रव्या

ब्राह्मणसंगतिसमाप्त्यर्थः तात्पर्यार्थे दर्शिते समत्र्त्वाख्यानप्रसक्तावाहाह तत्तामोत्विति नहि ब्राह्मणे स्मिन्नक्त्याभावाभावाद्यतिरिसमाप्ति
रेवेत्याशंक्याह यानीति ननु वाक्यानि पूर्वं व्याख्यातानि न देवतरूपरिष्ट्त्वक्यंत दुपदेशार्थं संन्यासस्यापृतत्वहेतोरात्मज्ञानस्या
यथाहेनयोक्तत्वेतत्राह हेतुप्रधानानीति तदेवहेतुत्वमनक्ति याज्ञवल्क्येति प्रश्येत्यस्यार्थमाह एवं सतीति भार्याद्वयेदर्शितरीत्या।
स्थितेस्वस्यचवैराग्यातिरेके सतीत्यर्थः तस्याब्रह्मवादित्वेनदाम्पत्यहारेणतां प्रत्येव संवादेहेतुकत्वंवक्तं तस्यां ब्रह्मवादित्वे योतयितुमपि
क्वसिप्रत्ययक्रमे मैत्रेयीत्वमृतत्वमात्मनोदर्शयति सैवमिति गुरुप्रसादाधीनाविद्याप्राप्तिरिति द्योतनार्थमाह सहोवाचेति ज्ञानेक्काड

२०२

लभ्यत्वद्योतनायचेति क्रमेणव्याख्यानप्रकारमेवाहात्मनीति दृष्टे सर्वमिदं विदितं भवतीत्युत्तरसंबंधः केनोपायेनात्मनि दृष्टे सर्वं दृष्टं भव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तीव्रपापंश्चेति कथमिति ग्राम्यदर्शनेनापायंश्रवणादिकं दर्शयन्नुत्तरमाहोच्यतइति उक्तोपायफलं प्रश्नपूर्वकमाह किमित्यादिना इदं
सर्वमित्यन्तग्रन्थस्यार्थमाह यदात्मनोऽन्यदिति तदात्मनि दृष्टे दृष्टं स्यादितिशेषः कथमन्यस्मिन्दृष्टे सत्यन्यद्दृष्टं भवति तत्राहात्मव्यतिरेकेणेति
सयथार्द्रैधाग्नेरित्यादाविहं दृष्टान्तमित्याद्यधिकं दृष्टान्तस्यार्थमाह चवर्धइति समाप्यादर्थस्यन्यस्य शास्त्रस्याप्युपपन्नेरित्यर्थः नन्वत्रापि सामा
न्यविशेषात्मस्वरूपशक्तिरग्रहेत्याशंक्याह दृत्विति सयथासैन्धवघनइत्यादिवाक्यतात्पर्यमाह सर्वकार्येति एतेभ्योभूतेभ्यइत्यादेरर्थमाह
सर्वैस्त्विति तानेवानुगाग्यवस्थायामित्यर्थः तत्र विशेषविज्ञानः सन्नेवस्वतीतिशेषः प्रविलापितेनस्यैवाहारः पूर्वोत्तरविरोधशंकिता
परिहरति सा होवाचेत्यादिना अविनाशित्वंपूर्वत्रहेतमित्याह यतइति प्रत्यध्यायमन्यथान्यथा प्रतिपादनादात्मनः सविशेषत्वमाशंक्य
स एष इत्यादेस्तात्पर्यमाह यत्रापीति केनप्रकारेणात्मनस्तत्त्वमित्याशंक्याह परब्रह्मेति ग्रहणायभेदस्तर्हि कथमित्याशंक्याहोपाये
ति उपायभेदेऽप्युपेयभेदोऽपिस्यादित्याशंक्याहोपेयस्त्विति चातुर्थिकाद्यायाचमिकस्यार्थस्यभेदाभावं नयति स एवेति प्रमाणवाक्या
त्यामेनामृतान्तेविप्रतिपत्तीतिमूर्द्धेपात्तोपन्यासात्मगाणांयणत्वेनगृहीत्वाइतिराम्यते तेनशाकल्यब्राह्मणेन निर्विशेषः प्रत्यगात्मानि
र्द्धारितइत्यर्थः विज्ञानमानन्दंब्रह्मेत्यादावुक्तं स्मारयति पुनरिति पंच मसमाप्तौ पुनर्विज्ञानमित्यादिना स एव निर्द्धारितइतियोजना कृ
वेब्राह्मणादावपि स एवोक्त इत्याह पुनर्जनकेति अस्मिन्नपिब्राह्मणे स एवोक्त इत्याह पुनरिहेति किमितिपूर्वत्रतत्रोक्तस्य निर्विशेषस्या
स्मनो वस्मानेव वचनमित्याशंक्याह यत्राण्यपीति सर्वोपरपर्यालोचनायामुपनिषदर्थो निर्विशेषमात्मतत्त्वमित्युपपादयवाक्यान्तरमवता

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शाने·
२०३

र्थं व्याकरोति यस्मादित्यादिना इति होवाचेत्यादिवाक्यमाकांक्षापूर्वकमादाय व्याचष्टे यत्र एव त्वमसीत्यादिना ब्राह्मणार्थमुपसंहरति
परिसमाप्तेति तथाप्युपदेशानंतरं कर्तव्यमस्तीत्याशंक्याह एतावानिति किमत्र प्रमाणमिति तत्राह एतदिति तथापि परमात्मनिष्ठासंन्यासि
नोऽवगन्तव्येति चेत्तत्राहैवेति आत्मज्ञानेन संन्यासेनत्यपि पुरुषार्थान्तरं कर्तव्यमस्तीत्याशंक्याहैवं इति शाट्यो ब्राह्मणसमाप्त्यर्थः ससंन्या
समात्मज्ञानममृतत्वसाधनमित्युपपाद्य संन्यासमधिकृत्य विचारमवतारयति इदानीमिति तत्रत्त्रप्रागेव विचारितत्वात्किं पुनर्विचा
रेणेत्याशंक्याह शास्त्रार्थेति विरक्तस्य संन्यासो ज्ञानस्यान्तरंगसाधनं ज्ञानेन केवलममृतत्वस्येति शास्त्रार्थविवेकरूपा प्रतिपत्तिरपि
प्रागेव सिद्धेति किं तदर्थेन विचारारंभेणेत्याशंक्याह यत इति अतो विचारः कर्तव्यो नान्यथा शास्त्रार्थविवेकः स्यादित्युपसंहारार्थो हिश
ब्दः वाक्यानामाकुलत्वमेव दर्शयति यावदिति यदग्निहोत्रमित्यादीनीत्यादि शास्त्रादेकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येत्यादि
स्मृतिवाक्यं शृण्वतः कथमेतावतां वाक्यानां व्याकुलानामित्याशंक्याहान्यानि चेति विदित्वा मुन्यायमित्वाच्चर्यं चरन्तीति वाक्यपाठक्रमेणावि
द्वत्संन्यासपरमर्थक्रमेणाह विविदिषासंन्यासपरमात्मानमेव लोकमिच्छन्तः प्रव्रजन्तीति विविदिषासंन्यासपरमेवेति विभागः क्रमसंन्या
सपरोक्षत्वमुदाहरति ब्रह्मचर्यमिति अक्रमसंन्यासविषयं वाक्यं पठति यदि चेति कर्मसंन्यासयोः सम्यगधिकारप्रदर्शनपराक्षतिं दर्शय।
ति ह्यवेवेति अत्र निष्क्रान्ततरो शास्त्रक्रमेणाभ्युदयनिःश्रेयसोपायत्वेन पुनः पुनरुक्तावित्यर्थः ज्ञानद्वारा संन्यासस्य मोक्षोपायत्वे श्रुत्य
न्तरमाह न कर्मणेति तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयदित्यादिवाक्यमादिशब्दार्थः यथाश्रुतयज्ञस्याश्रुतयोग्या

दुति २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ऊलादृशंपतइत्याह तथेति तत्राक्रमसंन्यासेस्मृतिमाहात्तुदाहरति ब्रह्मचर्यंवानिति यद्येष्ठाश्रमप्रतिपत्तौप्रमाणाभूतांस्मृतिंदर्श
यतिवशीलेति आश्रमविकल्पविषयांस्मृतिंपठति तस्येति ब्रह्मचारीगृहस्थः क्रमसंन्यासेप्रमाणमाह तथेति तच्चैववाक्यांतरंप
ठति प्राजापत्यामिति सर्ववेदसंसर्वस्वंदक्षिणायस्यांतांनिवर्त्येत्यर्थः आदिपदेनमुंडोनिस्तंतुनवस्त्रेत्यादिवाक्यंगृह्यतेइत्याद्यास्मृतय
श्चेति इत्येवंणसंबंधः याऊलानिवाक्यानिदर्शितान्युपसंहरत्येवमिति इतस्सकर्मणोविचारइत्याहाचारश्चेति श्रुतिस्मृतिविहिताचार
श्चविरुद्धोलक्ष्यतेकेचित्ब्रह्मचर्यादेवप्रव्रजेदित्यपरेतत्परिसमाप्यगार्हस्थ्यमेवाचरेदित्यन्येतचतरोप्याश्रमानक्रमेणाश्रयेत तथा
चविनाविचारंनिर्णयासिद्धिरित्यर्थः इतश्चास्तिविचारस्यकार्यतेत्याह विप्रतिपत्तिश्चेति यद्यपिवहुविदः शास्त्रार्थप्रतिपत्तारोजैमिनि
प्रभृतयस्तथापितेषांविप्रतिपत्तिरुपलभ्यतेकेचिदूर्ध्वरेतसआश्रमाःसंतीत्याहुर्नसंतीत्यपरेतत्कृतोविचारादृतेनिश्चयासिद्धिरित्यर्थः
अथकेषांचिदंतरेणापिविचारंशास्त्रार्थोविवेकेनप्रतिभासतितत्राहातइति श्रुतिस्मृत्याचारविप्रतिपत्तेरितियावत् केषांचिच्छास्त्रा
र्थोविवेकेनज्ञातुंशक्यतेतत्राह परिनिष्ठितेति नानाश्रुतिदर्शनाद्विवशादुपपादितेविचारारंभमुपसंहरति तस्मादिति विचारकर्तव्य
तामुक्त्वाशंकापदंव्याख्यातियावदित्यादिना श्रुत्यादीत्यादिशब्देनकुर्वन्नेवेहकर्माणीत्यादिमंत्रवादोगृह्यते एकाश्रम्येहेत्वंतरमाह तमिति एतद्वैजा
णामर्थ्यंसत्रंयदग्निहोत्रमितिश्रुतेश्चपारिव्राज्यासिद्धिरित्याह नचेति नचैवहेत्वंतरमाह लिंगाच्चेति पारिव्राज्यपदेपिनदुपपत्तिमाशंक्याह
नहीति इतश्चनास्तिपारिव्राज्यमित्याह स्मृतेश्चेति तस्याःतात्पर्यमाह संमंत्रकेदीति नानास्यकस्यचिदित्यत्रसचितमर्थ्यंकथयत्यधिकारे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ति गृहस्थस्य पारिव्राज्याभावे हेतुत्वेन तस्माद्गृहीति क्रियावसानत्वादिति विषयत्वेनार्थं केवलयाधिकारीति गृहस्थस्य पारिव्राज्ये पूर्वप
क्षमाविषयत्ति तन्वेति इमर्थविधिदर्शने षोडशिग्रहणाग्रहणवदधिकारिभेदेन विकल्पोपपत्तेः न तु क्रियावसानपदवेदार्थ इति पक्षपातेनि
बंधनमस्तीत्यर्थः तस्य विधिद्वयदर्शनेऽपि विकल्पो भवत्यत्र तु सावकाशानवकाशत्वेनातुल्यत्वान्नैवमित्याह नान्यार्थत्वादिति तदेव स्फु
टयति यावज्जीवमित्यादिना कर्मानधिकृतविषयत्वान्नैकल्पिकमिति संबंधः क्रियावसानत्वे वेदार्थस्येति शेषः तत्रैव दर्शनं तत्राह
कुर्वन्नित्यादिना नवैकल्पिकमित्यत्र हेतुमेव दर्शयति श्रुत्यानादिवाक्यानां कथमनधिकृतविषयत्वमित्याशंक्याह काणेति अनधिकृतवि
षयत्वेनैषामशक्यं वक्तुं ब्रह्मचर्यं समाप्येत्यादावधिकृतविषये क्रमदर्शनादिति शंकते पारिव्राज्येति गम्यतेऽदर्शयन्नन्तरमाह नविरु
द्धमिति यावज्जीवमग्निहोत्रं जुहोतीत्यस्य गोत्सस्यापवादो विश्वजित्सर्वमेधौ तद्द्वयस्थाने सर्वस्वदानादेवसाधनसंपत्तिः इहाप्यापारिव्राज्यस्या
वश्यं भावित्वात्तत्तद्विषये क्रमविधानमित्यर्थः तदेव स्फुटयति यावज्जीवेति कथं कर्मविधेरेवं विषयत्वं कल्पकाभावादित्याशंक्याह
विरोधादुपपत्तेरिति गृहस्थस्यापि विरक्तस्य पारिव्राज्यमिति किमिति क्रमविधेर्विषयोऽनेष्यते तत्राह तावविषयेति क्रमविधेरपि तन्मते स
कोचः स्यादित्याशंक्याह क्रम प्रतिपत्तेस्त्विति सति ज्ञानेऽकर्मत्यागो निषिध्यते सत्यां जिज्ञासायामिति वा विकल्पायोग्यं दूषयति नाममता
नस्येति विद्वत्संन्यासस्यावश्यं भावित्वात्तत्कर्मावसानपदवेदार्थ इति संगृहीतवस्तु विघटनेति यन्नावदिति विद्यासत्त्वादारभ्य निषेधवाक्या
तेन यदात्मज्ञानं प्रत्युपसंहृतेन तन्मावस्तुनि साधनमिति भवतापि यस्मादभ्युपगतेऽपरावाक्यविज्ञानादन्यत्रेत्यवधारणादिति न्यायात्तस्मात्तत्त्वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नैष्किकर्मो च स्वातन्त्र्येण निरवकाशमित्यर्थः अथात्मज्ञानं कर्मसहितमपूर्वत्वसाधनमिष्यते न केवलं न यावज्ज्ञानोत्तरकालमपि न कर्मत्यागः।
सिद्धिरिति शंकते न चेति आत्मज्ञानस्यापूर्वत्वसाधनत्वे सत्यपीति यावत् कर्मनिरपेक्षत्वं चेदात्मज्ञानस्य भवान्न सहते किमिति तर्हि ज्ञानमे।
वोपगतमिति सिद्धान्ती शङ्कते न चेति तस्य कर्मानपेक्षत्वांगीकारे सतीत्यर्थः न च पूर्ववादी शास्त्रीयत्वादात्मज्ञानमपूर्वत्वसाधनमभ्युप
गतमिति शंकते ऋषिरिति ज्ञापयति वेद इति शेषः शास्त्रानुसारेणात्मज्ञानांगीकारे कर्मनिरपेक्षमेवात्मज्ञानं मोक्षसाधनं सेत्स्यतीति प
रिहरत्येवं तर्हीति उभयत्र ज्ञाने कर्मणि चेत्यर्थः यद्यात्मज्ञानस्यापूर्वत्वसाधनत्वं तस्य कर्मनिरपेक्षत्वं चेत्यर्थः तत्प्रामाण्यात्प्रामाण्यख्यात
त्वात्तद्वदस्येति शेषः यथा शास्त्रे ज्ञानाभ्युपगमेपि कथं तत्केवलं कैवल्यकारणमिति शङ्कते यद्येवमिति शास्त्रानुसारेण ज्ञानमभ्युप
गच्छन्तं प्रत्याह सर्वं कर्मेति आत्मज्ञानस्य तदुपमर्दकत्वं दर्शयितुमिदं तत्त्ववद्दर्शयति दाराग्नीति अग्निहोत्रादीनां संप्रदानकारकसाध्य
त्वव्यतिरेकद्वारा साधयन्नपेति तथापि कथमात्मज्ञानस्य कर्मादेस्तदुपमर्दकत्वमित्याशंक्याह यथादीति इहेति विद्यादर्शनोक्तिः विद्यायाः
फलितमर्थमेतेन बलवत्त्वं दर्शयन्नस्योपासाविद्यादिना न च गुरुचोदितैरिव सादीकालेण शास्त्राचार्योपदिष्टविधाद्युत्पन्नेन ज्ञानेनमर्थसाधनेषु चोदशे
शतिह्याधिस्यादिस्मितेस्तथा च कथं तस्य भेदबुद्ध्युपमर्दकत्वमत आह न चेति यद्वै कामुनातद्वा विशेषादिति न्यायात्तज्ज्ञानसाधनस्य समा
धेरपि न देशाद्यपेक्षाह रम्यं तु कूटस्थवस्तुतंत्रस्य ज्ञानस्येति भावः विमतं देशाद्यपेक्षं शास्त्रीयत्वाद्धर्मवदित्याशंक्याह रूपं तत्त्वस्तुपाधिरित्या
ह क्रियायास्त्विति साधनव्याप्तिं दूषयति ज्ञानं त्विति विमतं न देशाद्यपेक्षं प्रमाणत्वादनुमानादिज्ञानवदिति प्रत्यनुमानमाह यथेति आत्मज्ञा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नत्वसर्वकर्महेतुत्वपक्षेद्वैतत्वेदोषमाशंकते नत्विति इष्टापत्तिमाशंक्याह नचेति कर्मकांडेनकांडांतरस्यापिविरोधसंभवादित्यर्थः
साक्षादात्मज्ञानेनकर्मविधिनिरोधकमस्यादितिविकल्प्याद्यंदूषयति नेत्यादिना तदेवस्फुटयति नहीविद्यावतेति द्वितीयंशंकते नचा
पीति यथानकामीस्यादितिनिषेधात् कस्यचित्कामप्रवृत्तिर्नभवतीत्येतावतानसर्वान्प्रतिकाम्यविधिर्निरुध्यते तथाकस्यचिदात्मज्ञा
नात्कर्मविधिनिरोधेपिनसर्वान्प्रत्यसौनिरुध्योभविष्यतीतिपरिहरति नकामेति दृष्टांतमेवस्फुटयति यथेत्यादिना प्रतिषेधशास्त्रार्था
नभिज्ञंप्रतितदनुपपत्तेरितिभावः अभिप्रायपरिज्ञानाशंकते प्रतिषेधविधिरिति अनर्थकत्वज्ञानात्कामस्येतिशेषः प्रवृत्त्यनुपपत्तेः का
म्येषुकर्मस्वितिदूषयति निरुद्धःस्यात्काम्यविधिरित्यत्राह नेत्थं शत्वाभिसंधिःसिद्धांतेऽभ्युपगते भवत्विति पुनरभिप्रायमप्रतिपद्यमानश्चोद।
यति यद्येवमिति ज्ञानेनकर्मविधिनिरोधेस्तीतियावत् तत्प्रमाणाभावादनुपपत्तिरितिशेषः तदेवचोद्यंविशदयन्ननुष्ठेयत्वइति नेषाम
नुष्ठेयानामग्निहोत्रादीनांकर्मणांयेविधयस्तेषामितियावत् सिद्धांतीस्वाभिसंधिमुद्घाटयन्नुत्तरमाह नेत्यादिना उपपत्तिमेवोपदर्शय।
ति स्वाभाविकस्येति तदेवदृष्टांतेनस्फुटयति यथेति अज्ञानावस्थायामेवकर्मविधिप्रवृत्तिरित्यत्रानिष्टमाशंकते तथासतीति कर्म
विधेरपिपुरुषाभिप्रायवशात्पुरुषार्थोपयोगित्वसिद्धेर्नानिष्टापत्तिरित्युत्तरमाह नार्थेति अर्थस्यपुरुषाभिप्रायप्रयुक्त[illegible]
गित्वसिद्धेर्नानिष्टापत्तिरित्युत्तरमाह नेदंत्वेमोक्षस्यापिवाक्यत्वंपुरुषार्थेनस्यादित्याशंक्याह मोक्षमिति अर्थानर्थयोरभिप्रायतंत्रत्वं।
षयति तदसदिति शास्त्रांतरेण कृमयो भवेत्सम दमहिणेरस्यादिनेत्यर्थः प्राणविद इति किं विषयेशास्त्रांतरे सर्वभक्षणं तु प्राणदृष्टि
नोविवर्तितमतोऽस्य वस्थितविषयत्वात् प्रतिषेधेन सर्वभक्षणस्योदितानुदितहोमवद्विकल्पः स्यादिति शंकते तेनेति किं तर्हि सर्वा॥
न्नभक्षणविधिरिति नवा न चेन्न तस्य निषिद्धस्यानुष्ठाने प्राणविदि तस्यापकाभवाहिहितेचेन्न किं यदिदमित्यादिना नदेत्यादिना वा विहि
तेनाद्य इत्याह नाविधायकत्वादिति यदिदमित्यादिनाहि सर्वप्राणस्यान्नमिति ज्ञानमेव विधीयते न तु प्राणविदः सर्वान्नभक्षणं तद्व
द्योतिपदाभावान्न विकल्पोपपत्तिरित्यर्थः द्वितीयं दूषयति न दवा इति अस्येति विद्वत्परामर्शान्निपातयोरर्थवादत्वावद्योतिनोर्देशो॥
नादेकवाक्यत्वसंभवे वाक्यभेदस्यान्याय्यत्वाच्चेति हेतुमाह तेनेति अर्थवादस्यापि स्वार्थे प्रामाण्यं देवताधिकरणन्यायेन भविष्य॥
तीत्याशंक्य तत्कल्पं भक्षयेदित्यादिविहितस्य भक्षणाभावस्य बाधने नदेत्यादेर्नसामर्थ्यं हि परत्वादस्यमानांतरविरोधे स्वार्थे मा॥
नत्वायोगादित्याह नत्विति नहेत्यादेरन्यपरत्वं प्रपंचयति प्राणमात्रस्येति तन्न दोषाभावज्ञापनात् तदेवविधित्वेन मित्याशंक्याह यत्विति

२१९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रंथे बाह्यसमानो न तद्विरोधे स्वार्थे मानत्वायोगात्सोऽकृत्वादिति भावः प्रमाणाभावस्यासिद्धिमाशंकते विद्व[illegible]षरति सामर्थ्यात्प्रमाणत्वस्व
रूपवत्वादिति यावत् अदोषः सर्वज्ञभक्तेन स्यादिति शेषः ग्रंथोपपत्तिं दूषयति नेत्यादिना अनुपपत्तिमेव विवृणोति सत्यमिति येनेत्यस्याक्षा
कृतत्वापीति वक्तुं च यद्यपीत्युपक्रमात्प्रमाणत्वस्वरूपमात्रमप्यर्थादनुपपत्तिरपि शाम्यतीतिपेशंकते नन्विति किंफलात्मना विद्वद्भिः सर्वज्ञ।
भक्तेन साध्यते किंवा साधकत्वस्वरूपेणेति विकल्प्याद्यमंगीकरोति बाढमिति प्रमाणस्वरूपेण सर्वज्ञभक्तेन तद्बुद्ध्यार्थः तत्र प्रतिषेधाभावे स्प
ष्टो नेति फलितमाह तस्मादिति तथ्यास्त्वसिके प्रमाणस्य सर्वज्ञभक्तेन तत्र चाप्रतिषेधादोषराहित्यमिति शेषः तद्राहित्ये किं स्यादिति चेन्नत्र
व्यक्त इति पंचमर्थमेवास्फोरयत्यप्रामत्वादिति प्रमाणविदः साधकत्वाकारेण साध्यते सर्वज्ञभक्तेनेमिति पदे प्रत्याह येनत्विति इदे
ति प्रमाणविद्गुच्यते निमित्तान्तरात्त्वेन प्रामाणविषयो विधिः प्रतिप्रसवो यथा ज्वरितस्यान्नप्रतिषेधे पथ्यौषधे विवेदिति तथा प्रमाणाधिका।
रिणः सर्वज्ञभक्तस्य भक्तेन निषेधेपि प्रमाणविदो विशेषविधिर्नोपलभ्यते तथा च तस्य भक्तेन दुःसाध्यमित्यर्थः प्रतिप्रसवाभावेन च ब्रदर्श
यति तस्मादिति ग्रंथे बाह्यस्य तद्धिकारातितित्याशंक्याह अन्यविषयत्वादिति तस्य स्तुतिमात्रार्थत्वान्न तदंशाप्रतिषेधातिक्रम इत्यर्थः नत्र
विशिष्टस्य प्रमाणस्य सर्वज्ञत्वदर्शनमत्र विधीयते तथा च विद्वुषापि तदा[illegible]नः सर्वज्ञभक्तेन दोषो यथा दर्शनफलाभ्युपगमाद् तत्राह
नचेति इतोपि सर्वप्रमाणस्यात्र सिध्येतद्वशमेन प्रमाणविदः सर्वभक्तेन विधेयमित्याह यथा चेति प्रमाणस्य यथोक्तस्य स्वीकारेपि कस्यचि
त्किंचिदज्ञे जीवनहेतुरित्यत्र दृष्टांतमाह यथेति तथा सर्वप्राणिषु अन्नस्य यात्रासंबंधे दृष्टोतिकमाह तथेति प्रमाणविदोपि कार्यकर।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

णाचमनो निषेधातिक्रमायोगोपफलितमाह तस्मादिति वाक्यांतरस्मादाचम्याकरोत्यापइति स्मार्तो ह्याचमनादन्यदेव श्रौतमाचमनमप्य
नोप्राप्तं विधेयं न तच्छ्रौतमिदं वाक्यमिति केचित्तान्प्रत्याह हाचचेति वासः कार्यं परिधाने तत्र साक्षात्प्रयोगविनियोगाद्योगोप्राप्तमर्थमाह तस्मादि
ति यदिदं किं चेत्याह तत्र कच्छ्रविधेरर्थवादस्माद्राचम्याचष्टे तेनादिना पुनर्नन्नु कर्षणमन्वयार्थपदार्थमुक्त्वा वाक्यार्थमाह यद्यपीति
अभक्ष्यभक्षणं नर्हि स्वीकृतमिति चेन्नेत्याह इत्येतदिति यथा प्राणविदोनान्नंभक्ष्यं भवति तथैवैतेन न अन्नमत्तस्तर्हि प्राणविदोपि दुष्यति यु
द्दोषीत्याशंक्याह नवापीति अन्नस्तुतिपरत्वे प्राप्तेपीत्यर्थः किमित्ययं स्तुत्यर्थवादः फलवादपूर्वं किं तस्मादित्याशंक्याह फलं त्विति इतिशब्दः
सर्वं प्राणस्यान्नमिति हृद्विविधेः सार्थवादस्योपसंहारार्थः उक्तमेवार्थं चाद्यसमाधिभ्यां समर्थयते नन्वित्यादिना यथाप्राप्तं प्रकृतवाक्यव
शात्स्वतिपत्रं हृपमनतिक्रम्येति यावत् वाक्यस्य विद्युतित्वे फलितमाहातइति यदुक्तमायोवासइतितस्य शेषभूतं तत्र तद्व्याख्यातम्॥
चष्टे यस्मादिति तत्रेत्यप्राना त्यागृहकालोक्तिः उक्तेभिप्रायेलोकप्रसिद्धिमनुकूलयति श्रुतिश्चेति तत्रैव वाक्योपक्रमस्यानुकूल्यं दर्श॥
यति प्राणस्येति किमर्थमिदं सोपक्रमवाक्यमित्यपेक्षायामत्र चेत्याद्युक्तं स्मारयति यदयइति हृद्विविधानमसहमानः शंकते नन्विति
श्रुत्वप्राप्त्यर्थमाचमने प्राणपरिधानार्थं चेत्याशंक्याह नचेति कल्पप्रणयनन्यायेन द्विःकरत्वाविरोधमाशंक्याह नचेति तत्र प्रमत्वा
त्वेकार्थभेदस्याविरोधेपि प्रकृते प्रमाणाभावाद्विकरणत्वानुपपत्तिरित्यभिप्रेत्योक्तमुपपादयति यदीति नन्तु स्मार्तमाचमनस्य प्राप्त्यर्थ॥ २२०
त्वे प्रकृतवाक्याद्धिगतेत्याचक्ष्यं हि करत्वमप्रामाणिकमित्याशंक्य वाक्यस्य विषयांतरं दर्शयति यस्मादिति द्विःकरत्वे दोषश्रुतं दृषय

ध्या॰ ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ति नेत्यादिना स्नात्वाचमनं दर्शनं निरपेक्षमित्याह क्रियामात्रमेवेति नत्वाचमनफलभूतं शापत्वं दर्शनसापेक्षमिति चेन्नेत्याह नन्विति
क्रियायाएव तदाधानसामर्थ्यादित्यर्थः तत्रेत्याचमने शुद्ध्यर्थं क्रियान्तरे सतीत्यर्थः प्राणविज्ञानप्रकरणे वासो विज्ञानं चोद्यते चेद्वाक्य
भेदः स्यादित्याशंक्याह प्राणस्येति सर्वान्नविज्ञानवदिति चकारार्थः स्नाचमनीयास्त्वप्सु वासो विज्ञानं क्रियते चेत् कथमाचमनस्य
प्राशनार्थत्वमित्याशंक्याह नन्विति द्विकरत्वदोषाभावे फलितदर्शनविधिमुपसंहरति तस्मादिति अप्राशनत्वाद्वासोदृष्टेर्विधिर्व्यति
रेकेण प्राशनाभावाद्दृष्टेश्चात्र प्रकृतत्वात्कार्याख्यानाद्दृष्टमिति च न्यायादित्यर्थः ॥ ब्राह्मण ब्राह्मणान्तरमादाय तत्सूत्रं वेणसं
बंधं प्रतिजानीते श्वेतकेतुरिति को ऽसौ संबन्धस्तमाह तावदिति तत्र कर्मकाण्डे ज्ञानकाण्डे वा यद्यस्य प्राधान्येन नोक्तं तदस्मिन्काण्डे वक्तव्य
मस्याखिलाधिकारत्वान्नयाचस्वं मन्त्रं मे वक्तुमिदं ब्राह्मणमित्यर्थः वक्तव्यपोषं दर्शयितुं वृत्तं कीर्तयति सप्तमेति सप्तर्षिकारिणाम्
भूर्भोरग्निप्राप्त्यैनेपि किं स्यादित्याशंक्याह तवेति अस्यायावसाने समम्यर्थः सामर्थ्यमेव दर्शयति रूपद्धेति विशेषणवशाद्दृश्यो
मार्गाभावः किं पुनस्तेषां स्वरूपं तदाह पंथान इति तत्र वाक्यशेषमनुकूलयति वहन्ति चेति संगृह्याकांक्षाहारासमनन्तरब्राह्मणा
तात्पर्यमाह तेचेति उपसंक्रियमाणं संसारगतिमेव परिच्छिनत्त्येतावती ह्येति दक्षिणोर्ध्वागत्यात्मकेति यावत्कर्मविपाकस्ताद्दि
ऊर्ध्वोपसंक्रियते तत्राहैतावानिति इति प्राप्तेर्यथोक्तसंसारगत्यतिरिक्तकर्मविपाकाभावात्तदुपसंहारार्थमेवायमारंभस्तदुपसंहारात्
यं चाधोऽक्षीयाधिकारे सर्वोपि कर्मविपाको ऽननुष्ठेयत्वेन कृत्वा त्यागि हि संसारगमनाभावात्कथं खिलकाण्डे तन्निर्देश इत्याशंक्याह यद्यपीति

य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रा॰
२२१

कस्तर्हि विपाकस्तत्राह प्राक्तनीयस्येति तत्रस्थकृतविपाकस्यैवोपन्यासे हेतुमाह ब्रह्मविद्येति ग्रनिष्टविपाकाश्चैवेत्यर्थं हकृतामि
मुच्यते देवस्मिद्धमिति न तत्र तद्विद्वतां इह पुनः शास्त्रसमाप्तो विलधिकारे तद्विपाको पुत्रपत्नेत्यियत इतिभावः प्रकारान्तरेण संगतिं वक्तुमुपक्र
स्मारयति तत्रापीति प्राक्तनीयविपाकविषयेपीत्यर्थः उत्तरग्रन्थस्य विषयपरिशेषार्थं पातनिकामाह नन्वेति लोकद्वयेऽस्य समर्थः प्रागनु
क्तमपि देवयात्राद्युत्तवक्तव्यमिति तत्कालोनियमसिद्धिस्तत्राह नन्वेति वक्तव्यशेषस्य सत्वेफलितमाह इत्यत इति यत्तर्हि प्रागनुक्तं तदेव देवया
नादि वक्तव्यं प्रागेवोक्तं ब्रह्मलोकादिकस्मादुच्यते तत्राह अन्तेवेति शास्त्रस्यान्ते चेति संबंधः इतश्चेदं ब्राह्मणमनर्थात्वादारभ्यमित्याह अपि
चेति एतावदित्यात्मज्ञानोत्कृष्टत्वं तत्साधनमिति यावत् चकारादुक्तमित्यनुषंगः ज्ञानमेवामृतत्वे हेतुरित्युक्तोर्थस्तत्रेति समर्थः त
दर्थोदेत्वपदेशार्थः कथं पुनर्वेदमाणाक्रमंगतिज्ञानमेवामृतत्वसाधनमित्यवह्यदेतत्वं प्रतिपद्यते तत्राह यस्मादिति व्यापारोक्तिकर्मणः

त

विशेषः सामर्थ्यात् ज्ञानातिरिक्तस्योपायस्य संसारहेतुत्वनियमादित्यर्थः प्रकारान्तरेण ब्राह्मणानारम्भं वक्तुमग्निहोत्रविषये जनकयाज्ञवल्क्य
संवादसिद्धमर्थमनुवदत्यपि चेत्यादिना एतयोरग्निहोत्राहुत्योः सायंप्रातस्त्वानुष्ठितयोरिति यावत् लोकं प्रत्युत्थायिनं यजमानं परिवेष्टयेल्लो
कं प्रत्यावृत्तयोस्तयोरनुष्ठानोपचितयोः परलोकं प्रति स्वाश्रयोत्थानहेतुं परिणामस्येतत इतिप्रश्नप्रश्नचैकमग्निहोत्रविषये जनकेन याज्ञवल्क्यं प्र
त्युक्तमिति संबंधः तत्रेत्याहेपराभिप्रायमुप्रद्योक्तिः न तु फलत्वतोऽश्ववाणात कस्येदमाङ्गतिफले नहितत्स्वतंत्रं संभवतीति तत्राह तद्धेति कर्मवाचिप
दमावादाहुत्येर्वस्यैवोत्क्रान्त्यादिकार्यारंभकत्वान्न तत्कर्मणामिफलमुक्तमित्याशंक्याह नहीति किं चकारकाश्रयत्वात्कर्मणो गुरुं तत्फ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्य कर्मणां मित्यमित्याह साधनेति स्वातंत्र्यासंभवादाद्ययोः सकर्मकयोरेव गत्यादिविवक्षितं चेत् तर्हि कथं केवलाद्ययोः सकर्मकयो
रेव गत्यादिविवक्षितं चेत् तर्हि कथं तत्र केवलाद्ययोर्गत्यादि गम्यतेत्यत आह तवेति अग्निहोत्रप्रकरणे समभ्यर्थः अग्निहोत्रस्तुत्यर्थत्वात्प्रश्न
प्रतिवचनरूपस्य संदर्भस्येति शेषः भवत्वेवमग्निहोत्रप्रकरणस्थितिः प्रकृते तु किमायातं तत्राह इत्थमिति किमिति विद्याप्रकरणे कर्मफल
विज्ञाने विवक्षितेत्यत आह तद्धेतोरिति ब्राह्मणारंभस्योपपादितस्योपसंहारत्वमिति संसारगत्युपसंहारेण कर्मविपाकस्य सर्वस्यैवोपसंहारः
सिद्धो भवति तदनिदिकृतद्विपाकाभावादित्याह कर्मकांडस्येति यथोक्तं वस्तु दर्शयित्वा ब्राह्मणमारभ्यते ऽनेन तत्र किमित्याख्यायिका प्र
णीयते ऽत आह इत्येतदिति सर्वमेव पूर्वोक्तं वस्तु दर्शयित्वा निमित्तं भवेत् एतावद्बोधार्थमाख्यायिकां करोतीत्यर्थः यदाकदाचिदतिक्रांते काले
वृत्तार्थद्योतिनं निपातमुपदर्शयति इत्याहेति यशः प्रथने विदुष्टु स्वकीयविद्यासामर्थ्यख्यापने प्रसिद्धा विद्वज्जनविशिष्टत्वेनेति शेषः
क्वचिन्तयस्यप्राप्तत्वेन पूर्वं हेतुः किमिति राज्ञा श्वेतकेतुमागतमात्रं तदीयाभिप्रायमप्रतिपद्यत एवं कुर्वन्निव संबोधितवानित्याशंक्याह स
राजेति संबोधनमत्स्नेहकृतवानिति शेषः तदेवद्योतिपदमिह नास्तीत्याशंक्याह भर्त्सनार्थेति भो इति प्रतिवचनमाचार्यमुपशिक्षितेन नति
यमप्रतिपत्तिहीनत्वादित्याह भो इतीति अप्रतिरूपवचने क्रोधं हेतुं करोति क्रुद्धः सन्निति पितुः सकाशादेवं बलज्ञानुशासनत्वेति नासीत्याश
क्याह एकेति पदार्थमुक्त्वा वाक्यार्थमाह समानेति नाडीरूपेण साधारणेन मार्गेण भ्रुटयगच्छतां यत्र मार्गे विप्रतिपत्तिस्तत् किं जानासीति
प्रश्नार्थः विप्रतिमेव विशदयति तत्रेति अधिकृतप्रजानिर्धारणार्था सप्तमी प्रथमं प्रश्नं निगमयति यथेति प्रश्नांतरमादत्ते तदीति तद्देव।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रा॰
२२२

स्पद्यति यथेति परलोकं गताः प्रजाः पुनरिमं लोकं यथागच्छन्तीति तथा किं वेत्थेति योजना प्रश्नान्तरप्रतीकमुपादत्ते वेत्थेति नद्याक
गोप्येवमिति प्रसिद्धोन्यायो जराज्वरादिर्मरणहेतुः प्रश्नान्तरमुत्थाप्य व्याचष्टे वेत्थेत्यादिना पुरुषशब्दवाच्या भूत्वा समुत्थाय वदन्तीति संबंधः
कथमपां पुरुषशब्दवाच्यत्वं तदाह यदेति प्रश्नान्तरमवतारयति यद्येवं ति पितृयाणस्य वा प्रतिपदं वेत्थेति संबंधः यत्कृत्वा प्रतिपद्य
न्ते पन्थानं तत्कर्म प्रतिपदिति योजना वाक्यार्थमाह देवयानमिति उक्तमर्थं संक्षिप्याह देवलोकेति मार्गद्वयमेव नास्तित्वयात्र त्यक्ता मा
र्गेण श्वेतकेतुर्ब्राह्मणोपीति यद्वेति कर्मविपाकप्रक्रियोक्तिः प्रस्तावः स्यमार्गद्वयस्येत्यत्र तेषामेव मार्गद्वयेधिकृतत्वमिति वक्ष्यते दीयते त
देवस्कृद्यति ताभ्यामिति विश्वं साध्यसाधनात्मकं संगच्छते गन्तव्यत्वेन गन्तृत्वेन चेति शेषः प्रकृतमेव व्याख्यानं ग्रन्थाब्राह्मणशङ्कार्थः
यदन्तरेत्यादौ विवक्षितमर्थमाह उरुकपालयोरिति श्वेतकेतोरभिमाननिराकृतियोजनार्थं बहुवचनेन राजा न वक्तव्य नाद्ये हेतुमाह उक्तमाह
ति एवं किलेति राजवचनं भवलिंगाकं पितृत्वचमोमृषात्वं यो ते अत्ता नाधीनेदुःखेन वा संभावितमिति सूचयति समेध इति सत्यं किं चि
दुक्तं किंचिन्न विज्ञानमन्यस्मै प्रियतमाय दातव्यं रहितमित्याशंक्याह कोह्यस्मीति यत्तायन एष हि तन्मया न विज्ञातं तथा च तस्मिन्विषये त्वया वे
ति नोस्मीत्याशंक्याहाहमपीति तर्हि तत्त्वज्ञानं कथं माज्ञासामित्याशंक्याह तस्मादिति विवक्षितविद्यागौरवं विवक्षित्वाह प्रस्थामिति
तदिति सामान्यो मन्त्रवशेनिर्दिश्यते ममात्मिम इति यदुक्तं तदुपपादयति यस्मादित्यादिना न वयं न्यामेत्यत्र तस्मादिति पठितव्यं किं तर्हि मया
कर्तव्यमित्याशंक्याह प्रतिज्ञातमस्येति यन्नवाभिप्रेतं तदहं करोमीत्याशंक्याह ममेति मा भूदित्यन्वयं दर्शयन्प्रतीकमादाय व्याचष्टे नोस्मा

२२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नभीति वदान्यो दानशीलो विभवे सत्यदाता कदर्य इति भेदः परिशिष्टं भागं व्याकुर्वन्नाकाङ्क्षापूर्वमाह वदेरित्यादिना मा प्रब्रूयेति निय
मस्य कृतमिदं दर्शयति न चेति कोऽसौ न्याय इत्यत आह यावदिति उपसदनवाक्यं शास्त्रसिद्धमित्युच्यते गौतमो राज्ञा न प्रतिशिष्यत्व हृतिं कृतवाणः शा
स्त्रार्थविरोधमाचरतीत्याशङ्क्याह वाचा हेति आपदि समर्थाधिकाराद्वा विद्याप्राप्त्यसंभवाद्वा क्षत्रियादिप्यमित्यर्थः उपायनपूर्वगमनेनापादोप
सर्पणमिति यावत् विद्यादातृत्वापेक्षया निहीनविशिष्टभावोपगतिरपदं नरेन्द्रयाशास्त्रार्थमेव विशदयति न चेति सह पितामहादय
यानेयाः किमस्माकमित्याशङ्क्याह पितामहानामिति किमिति नहि इयं विद्या फलितिमहत्वेनोपदिष्टपूर्वेत्यत आह नकस्मिन्निति नहि भवता
माष्टिमीश्वराणामहं न यथागतोऽस्मि शिष्यामीत्याशङ्क्याह तत परमिति तवाहं शिष्योऽस्मीत्येवं ब्रुवते भवते महोऽन्याऽपि न वक्ष्यामीति यस्मात्तन्न
त्याख्यानमहेति तस्मात् हेतुनत्वं मऽप्य कथं न वक्ष्ये किंतु वक्ष्याम्येव विद्यामित्यनन्तरं प्रतिपादयति को हीत्यादिना अमात्येत्यादिनायातत्पा मि
त्यादि वक्तव्यं प्रश्नस्य प्राथम्येन निर्णयेऽक्रमभंगः स्यात् न च चकारेणावाच्यमित्याशङ्क्याह क्रमभंगामिति मन्त्रब्राह्मणस्थितिलङ्घनाच्चेत्यर्थः
प्रश्ननिर्णयाधीनत्वात् तस्य प्राधान्यात्प्राधान्येमत्यर्थंक्रममाश्रित्याविवक्षितत्वात् क्रमस्य भंगः कृत इत्यर्थः इन्द्रादीनां कर्मानधिकारि
त्वात् द्युलोकस्य वाह्वनीयत्वाप्रसिद्धात् होमाधारत्वायोगात् तस्य यस्य च श्रद्धायागादौ सत्त्वान्नोपपन्नेत्यस्मिन्नित्यादिवाक्यमयुक्तमिति शङ्कते
न चेति होमकर्मसमर्थः श्रुत्यन्तरप्रसिद्धं ब्राह्मणस्यसंबंधग्रंथेनसमाधानमस्य चोद्यस्यासमाभिरुक्तमित्याह तत्त्वेति न देववद्दर्शयितुमग्निहोत्रप्रकर
णे हूतं स्मारयति नन्विति किं तदुक्तमिति चेत्तदाह नेवाहेति प्राक्त्याकालं न ययोः फलं कान्यादिकर्थमित्याशङ्क्याह नचेति यजमानस्यापि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कालमप्यर्थः समाधनयोरेव तयोरुत्क्रांतिर्नेत्य तत्र योरित्येन दूषयति यथेत्यादिना इहेति जीवदवस्थोच्यते तथाना मग्न्यादी
नामव्याकृतभावापन्नत्वेनाविशेषप्रसंगान्नैनैः सद्द्वाङ्गत्योरुत्क्रांत्यादिसिद्धिरित्याशंक्याह तत्राग्निरिति नापणाहृद्धृमपिप्रतिस्वकशक्ति
रूपेणाग्न्यादिव्यवतिष्ठते तथा चाविशेषप्रसंगाभावाद्द्वात्योः समाधनयोरेवोत्क्रांत्यादिसिद्धिरित्यर्थः यथोक्तयोगाङ्गत्योरुत्क्रांत्यादि
समर्थनेनाग्निहोत्रस्य सर्वस्य जगदारंभकत्वमुक्तं भवतीत्याह तद्विद्यमानमिति विद्यमानत्वमेव विशदयति अपूर्वेणेति अपूर्वयोगित्वया
विधयाकृष्यमपिहवे कल्पोपेकर्मप्रलयदशायामव्याकृतात्मनावस्थितेषु नजगदारंभतात तथापीदानीतनमग्निहोत्रादिकं कर्म कथं जगदा
रंभकं भविष्यतीत्याशंक्याह तथैवेति विमतमारंभकं तत्कर्मत्वात्संप्रतिपन्नवदितिभावः अग्निहोत्रप्रकरणमर्थं संगृहीतमुपसंहर।
त्येवमिति उक्तमुपजीव्य प्रकृतब्राह्मणप्रवृत्तिप्रकारं प्रदर्शयतीदत्विति उत्तरमार्गप्रतिपत्तिसाधनेविधित्सितमिति संबंधः किमित्युत्तर।
मार्गप्रतिपत्तिरित्याह विविक्षेति ब्राह्मणप्रवृत्तिमभिधायासौ वै लोको ग्निरित्यादिवाक्यप्रवृत्तिप्रकारमाह इतिद्युलोकेति इत्यं ब्राह्मण
स्थितेसतीत्येतत्भवत्वेवं तथापि केदेवा इतिप्रश्नस्य किमुत्तरं तत्राह तवेति उक्तरीत्या पंचाग्निदर्शने प्रवृत्ते सतीत्येतत् इहेति व्यवहारभूमि
गृहः कथं तेषां तत्र होतृत्वं तदाह तेचेति तथापि कथं द्युलोकाग्नौ तेषां होतृत्वं तदाह तएवेति तत्फलभोक्तृत्वादित्यत्र तत्कृताग्निहोत्रादि
कर्मविषयत्वं तच्छ्रोतृत्वं च प्राणानां जीवोपाधित्वादवधेयं तथा तया द्युपर्जन्यादिसंबंधयोग्यप्रकारेणेति यावत् केदेवा इति प्रश्नो निर्णीतः
संप्रत्यवशिष्टं प्रश्नद्वयं निर्णेतुमाह तवेति जीवदवस्थायामिति यावत् सह कर्तृत्वेन तत्कृहोइहत्वः अयंलोकमाविशतीति संबंधः या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वेशाप्रकारं प्रकटयति धूमादीति कथमेतावती किं पुनः ब्रह्माण्डे त्विविरिति प्रश्नो निर्णीतमस्त्वत्राह तांसत्त्वादीति तथापि कथं तत्क
तीति प्रश्नस्य कथं निर्णयस्तत्राह सोमलोक इति तथापि तस्याग्राह्यत्वेः सोमो राजा संभवतीति कथमुच्यते तत्राह ताम्रचेति निर्णीते
ऽपि स्फुटमवतारयति तदेतदिति कथं पुनरापश्च ब्रह्मशब्दवाच्या न हि लोके ब्रह्मशब्देनापः प्रयुज्यन्ते तत्राह अद्भेति उपक्रमवशादपा
मेव ब्रह्मशब्दवाच्यत्वमित्याह वेदेति अपामेव पुरुषशब्दवाच्यानां शरीरारंभकत्वं न भूतान्तराणामिति कृत्वा तस्य पंचभूतारब्धत्वाभ्यु
पगमभंगः स्यादिति चेत्तत्राह भूयस्त्वादिति अपां पुरुषशब्दवाच्यत्वे हेत्वंतरमाह कर्मेति अपां कर्मप्रयुक्तमपि प्रकृष्टजन्मास्तितत्क
थमपां सर्वत्र पुरुषशब्दवाच्यत्वं तत्राह कर्मकृतो हीति अन्यथा तत्र तत्र सुखदुःखभेदोपभोगासंभवादिति भावः यदि कर्मापूर्वशब्द
वाच्यं भूतसूक्ष्मं सर्वत्र शरीरारंभकं कथं तर्हि पूर्वमग्निहोत्राहुत्योरेवापूर्वजनकत्वं शरीरारंभकत्वं चोक्तं तत्राह तदेति लक्ष्यते अग्निहोत्राहुत्येति शे
षः लक्षणाया प्रवृत्तिनिमित्तं वाक्ययोर्भिन्नकत्वमाह तावतीति आद्यमाहुत्याधारमेव निर्दिश्याहुत्याधारान्तराणि क्रमेणाभिनिर्दिशयति पर्जन्येति
त्या × वाय्वग्निरिति दिना कृतो स्वाहितीयत्वमिति प्रोक्तिरित्याकाशमाहुत्योरिति अस्ति खलु धाराणां धूमरूपभवत्वे गाथा धूमज्योतिः सलिलमरुतां स
निपातः क्व मेघ इति एतल्लोकपृथिव्योर्देहदेहिभावेन भेदः पृथिवीकार्याहीति एतानि ह्रीचेहं त्रये त्रक्षमसोमृत्यो विभ्यतनसत्यपारयत्वितिश्रु
तेरत्रेत्तमस्त्वावगमानस्य च पृथ्वैवं तमः कार्यान्तेनैव तद्रूपाति घाटृत्वेन तमःकार्याणं तरतीति भूकार्यात्वेश्रुतेन मेरा ऊर्ध्वानेन तद्भूकार्येति हि
प्रसिद्धं तद्धत्पृथिवीकार्यो निर्मितं मंडलाकृति सभोनोस्त्व धूर त्स्यानेन तन्नीयघ नमोमयमिति समेतेरिन्त्यः सोमश्चन्द्रमसो राज्यश्चाग्निभा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रा॰वे॰
२२७

वेनभेदः योगशास्त्रोपलब्धिविरोधमाशंकते नन्विति इहेति पुरुषाग्निनिर्देशः शंकितं विरोधं निराकरोति नैष दोष इति उपपत्तिमेव दर्शि
यतुमिदेवमिति तस्मात्प्रागुक्तैः पुरुषः संभवतीति वाक्यं व्याकरोत्येवमिति पंचाग्निदर्शनस्य चतुर्थप्रश्ननिर्णायकत्वेन प्रकृतोपयोगं
दर्शयति यः प्रश्न इति निर्णयप्रकारमेव वदति पंचम्यामिति यथोक्तरीत्या जाते देहे कर्मक्षये पुरुषस्य जीवनकालो नियमस्तेनेत्याह स
पुरुष इति पंचाग्निक्रमेण जातो ऽग्निलयस्याहेतेनाग्न्यात्मेतिध्यानसिद्धये षष्ठमग्निमित्याह अन्त्याधिकरणं प्रत्यासन्नत्वेति जीवननिमित्त
कर्मविषयत्वकृतः वक्ष्यमाणकीटादिदेहप्राप्तेर्न येभ्यः स्वरवर्णविशेषणं दीप्यति शायवन्त्वे हेतुमाह निषेकादिमिति पंचाग्निवि
दो गतिविवक्षणमेवं गृह्णमवतारयति दानीति ये विद्वस्ते चिषमभिसंभवतीति संबंधः एवं शब्दस्य प्रकृतं पंचाग्निपरामर्शित्वं स्फुटीक
र्तुं चोदयति नन्विति एवमेतद्विदुरिति प्रकृतमेतद्दर्शनमित्युक्ते तदेवेदमिति प्रत्यभिज्ञापकं दर्शयति नचेति आदिपदमादित्यस
मिथमित्यादि संगृहीतं रश्मीनां धूमत्वमङ्गारविंस्फुलिङ्गमित्यादि गृहीतं द्वितीयमादिपदं प्रत्यभिज्ञाफलमाह तस्मादिति प्रश्नप्रतिवचनवि
षयस्यैव प्रकृतस्यैवं शब्देन परामर्शान्न षड्प्रश्नीयं दर्शनमिह परामृष्टमिति परिहरति नेत्यादिना संगृहीतं परिहारं विवृणोति यतियथा
मित्यस्येति अधिकरणे षष्ठ्या यावदेव वस्तु परिग्रहो विषयस्त्वर्थः षड्प्रश्नीयमेव व्यवहितं तद्दर्शनमत्र परामृष्टं चेन्न दायतित्याग्निमिति प्र
श्नानुपपत्तेः स्यात्तत्र षड्प्रश्नीनिर्णीतदर्शनशेषभूतदर्शनस्य प्रश्नारेतेषु वचनसंभवादित्याशंक्याह नयोरिति [illegible] किंचक्षुर्वशिभ्यं
श्रेयप्रचयशिष्टत्वात्पंचवत्संख्योपानिश्चितत्वात्तद्वाक्येभ्यः सोऽपदिकायपदवाक्यं नैवपरामृष्टमुपचितानि(?)त्याह निर्णीतत्वाच्चेति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्निहोत्रप्रकरणे निर्ज्ञातमेवाग्न्यादिदृष्टं ग्रहेण गृह्यते तथाग्निहोत्रदर्शनमस्त्वविहितमेवं शङ्के न शक्यं परामष्टुमिति शंकते ग्रहेति अग्नि
होत्रदर्शनेष्टं ग्रहेण गृह्यते चेत्तत्प्रकरणमात्रेण पञ्चमत्वानतिक्रमस्यैवोत्तरनिरित्वादेरप्यत्रानुवदनेस्यात्तनतद्वैपरीत्ये नानुवदने युक्तमनुवादस्य शेषा
दस्यापेक्षत्वान्नुवा नचित्राग्रहणं गृह्यते तस्माद्देवपाङ्गेनाग्निहोत्रपरामर्शो नोपपद्यत इति यथापात्रस्येति द्युलोकाद्देर्वादस्यानतरित्वा द्युपलक्ष
णार्थत्वात्तर्वेस्यात्तुवादत्वसंभवाद्देवं शङ्क्यस्याग्निहोत्रविषयत्वसिद्धिरिति चोदयत्यथेति प्रापकाभावादुपलक्षणपक्षायोगे यं गीकृत्य
पंचाग्निनिर्देशो वैयर्थ्यं न द्रष्टव्यं इति यथापीति इतस्वत्वतत्रमेवपंचाग्निदर्शनमेवं शङ्कापराहृष्टमित्याह क्रमस्यान्यथात्वेति समिदादिसम्पद्दर्शना
दग्निहोत्रदर्शने शेषभूतमेवैतद्दर्शनमित्युक्तमत्र गृह्यते द्रष्टव्यमिति यत्विमानादिना ग्रहेचामाग्निहोत्रस्तत्पर्यत्वादग्निहोत्रस्यैव कार्यमित्युक्तमित
रेतिशेषः एवं शङ्केनाग्निहोत्रपरामर्शासंभवे फलितमाह तस्मादिति तत्कुर्यादर्थमेवमस्फुटयत्वेवमितीति प्रकृते पंचाग्निदर्शने तत्त्वाख्यते
र्यमित्युक्तं तद्दृत्वा मर्चिरादिप्रतिपत्तिर्न केवलकर्मिणामित्यर्थः अत्र पूर्वं केवेदत्र विशेषं निर्दिशति किंपुनरित्यादिना गृहस्थानां यत्ना
दिना पितृयाणप्रतिपन्ने देवमार्गे त्वात्रदेवयानेपथि प्रवेशोस्तीति शंकते नचेति पंचाग्निविदो गृहस्थानां देवयानेपथ्यधिकारस्तद
दितानां तेषामेव यज्ञादिना पितृयाणप्राप्तिरितिविभागोपपत्तेर्वेवाक्यभेदविरोधोस्तीति समाधत्ते नेत्यादिना एवंविदुरितिसामान्य
वचनात्परिव्राजकादेरप्यत्र ग्रहणं स्यादित्याशंक्याह भिक्षुवानप्रस्थयोस्त्वेति विधान्तरेण तयोरुत्तरमार्गप्रवेशात्पंचाग्निविषयत्वेन गृह
णं युक्तमित्यर्थः गृहस्थानामेवपंचाग्निविदामत्र ग्रहणमित्यत्र हेत्वन्तरमाह गृहस्थेति ब्रह्मचारिणो नैष्ठिकस्य ग्रहणमविशिष्टमिति तस्मादा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नइति पंचाग्निदर्शनस्य गृहस्थकर्मसंबंधादेवेत्येतन्न कथं नर्हि नैष्ठिकब्रह्मचारिणां देवयानेपथिप्रवेशस्तत्राह नेष्ठांत्विति ऊर्ध्वमताः से
वेधीयः पंचाग्निसमासाद्यते नोत्तरेणपथा तेयथोक्तसंख्योपसवधः सापेक्षमथूतत्वेप्राप्तातिस्रस्तयर्थः श्रमात्तरोणां पंचाग्निविद्येना
श्रागृहस्थो फलितमाह तस्मादिति अग्निजत्वे फलितमाहात्रापत्यमिति अग्निजत्वेसाधयत्येवमिति अग्न्यपत्यत्वे किं स्यात्तदाहत्राग्नीति द्वेधे
वेधेगृहस्थाविदुस्तेयेतेच योजना अरण्यं तौजना संकीर्णादेशः परिव्राजकाश्चेति विदेहिनो गृह्यंते अन्येषामेव ग्रणाभ्यो सुस्थितानां समध
कृत्वानतिष्ठानां देवयाने पथ्यप्रवेशात्तां अश्रमस्य चतिष्ठानां ने पिशृह्ये रश्मिनिदृश्ये श्रद्धापि स्वयज्ञपास्मकर्मत्वश्रवणादित्याशंक्य श्र
त्ययमाश्रमस्मात्तात्तदुपास्यत्वानुपपत्ते मैवमित्याह नवुत्तरिति सर्वे पंचाग्निविदः सम्यब्रह्मविदश्चेत्यर्थः विनापि विद्याबलमर्चिरभिसं
पत्तिः स्यादिति चेन्नेत्याह यावदिति कर्मकृत्वालोकं प्रत्युत्थायिन इति पूर्वेणसंबंधः केवलकर्मणां देवयानमार्गप्राप्तिर्नास्तीत्युक्तं नि
गमयतीत्येवमिति विदुषामेव देवयानप्राप्तिमुपसंहरति यदात्विति नन्वर्चिषो ज्वालात्मनोऽस्थैर्यान्नदप्रतिसंपत्तिर्नफलायकल्पते न
ज्ञाहार्चिरिलीति अर्चिः शब्देन यथोक्तदेवतागृह्येलिंगमाह तदीति अतोऽर्चिर्देवतायाः प्रकाशादिति यावत्तं अहः शब्दस्यकालविषय
यत्वयुक्तदोषभावादितिचेन्नेत्याह परणेति नियमाभावमेवव्यनक्त्याग्रहरति विद्वद्विषयेनियममाशंक्याह नहीति नत्वराज्ञेशृतो
पिविद्वानदरपेक्ष्यफलसंपद्यते नेत्याह नचेति एकस्मिन्नेवब्रह्मलोके कथं बहुवचनमित्याशंक्याह ब्रह्मेति ब्रह्मलोकानितिबहुव
वचनप्रयोगादितिसंबंधः अवब्रह्मलोकाः विशेष्यत्वेन गृह्यंते बहुवचनोपपत्तौ हेत्वंतरमाह उपासनेति कल्पणां ब्रह्माण्डांतरकल्पवि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्धयः तेषामिह तत्र नराहृत्वितिनिरूढ्यचिन्मागादस्मिन्नित्यादिव्याख्यानमयुक्तमिति शंकते इहेति यथा श्वोभूते पौर्णमासीं यजेतेत्यत्रा
नियमात्र पौर्णमास्याकृतेरिह शब्दार्थत्वान्निरूढ्यैवानाश्रितस्त्रसिद्ध्यतीत्यर्थः परिहरति नेत्यादिना पौर्णमासीशब्दं दृष्टान्तेन विवरयति श्वोभूत
इति कृतसंभारदिवसापेक्षं हि श्वोभूतत्वं पौर्णमासीदिने चातुर्मास्येष्टौ कृतायां कदा पौर्णमासीष्टिः कर्तव्येति विना वचनं न ज्ञायते तत्र
श्वोभूतत्वविशेषणं भवत्यव्यावर्तकं तदहरिदेति विशेषणमपि व्यावर्तकमेवेति नात्यन्तिकानाहृतिसिद्धिरित्यर्थः यत्र पौर्णमासी
शब्दवदिह शब्दस्याकृतिवाचित्वाद्व्यावर्तकत्वमिति तत्राह नहीति यद्यपि प्रकृते वाक्ये पौर्णमासीशब्दो भवत्याकृतिवचनस्तथापि स्वः
शब्दार्थोपि कदाचिदाकृतिरत्नीमंगीकृत्य व्यावर्तकः श्वोभूतशब्दो नैव प्रयुज्यते तथात्रापि विशेषणशब्दस्य व्यावर्तकत्वमावश्यकमि
त्यर्थः स्वर्गकामाकाममित्यादौ व्यावर्त्याभावेपि विशेषणप्रयोगवदत्रापि विशेषणस्वरूपानुवादमात्रमित्याशंक्याह यद्यपीति विशेष
णफलमुपसंहरति तस्मादिति देवयानं पन्थानमाक्रम्य पश्चात्तरं वक्ष्ये वाक्यांतरमाद्यपदद्वयं व्याकरोत्यथेत्यादिना कथं ते फलभागि
नो भवंतीत्याकांक्षायामाह यद्वेति तत्र दानतपसी यत्र शूद्रेणैव गृहीते तेन स्वयमगृहीतत्वेन त्राह बहिर्वेदीति दीक्षादीत्यादि परे तप
यो व्रतादिर्यज्ञांगसंग्रहः तत्रेति पितृलोकोक्तिः अपिशब्दो ब्रह्मलोकरक्षणार्थः धूमसंपन्नेरक्षणार्थत्वमाशंक्याक्ष चन्द्रमार्गश्चेति
इहापीति पितृयाणमार्गोपीत्यर्थः तद्देवेष्वन्तरमार्गगामिनीनां देवतानामिवेत्यर्थः तत्रेति प्रकृतलोकोक्तिः कर्मिणां ते हि दैवैर्भक्ष्य
माणानां चेह लोकप्राप्तिरनर्थायैवेत्याशंक्याह उपभुंजत इति अन्यथा शतिभासे व्यावर्तयन्नाप्यायस्वेति एवं देवा अपीति संहितंरर्थोपेति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

केचिदृणोतीति सोमलोक इति कथं पौनःपुन्येन विशन्तीति तेषां प्राप्यलेनेत्याह कर्मानुरूपमिति दृष्टान्तवदावर्तन्त इति के किमित्याशङ्क्याह ये
लोकान्तरमाह नहीति पुनःपुनर्विश्रमाभावमुक्त्वा नमिति यावत् लोकद्वयप्रापकौ पन्थानावित्यत्र व्याख्याय पुनरेतल्लोकप्राप्तिप्रका।
रमाह तेषामित्यादिना कथं चन्द्रस्थलस्य वलितानां कर्मणामाकाशत्वादित्यमित्याशङ्क्याह यावत्सा इति सोमाकारपरिणतत्वमे।
व स्फोरयति यामिति तस्य फलीनिद्रवीभवनयोग्यतां दर्शयत्यनयमिति स्वाभाव्यापत्तिरूपपन्नेरिति न्यायेनाह आकाशभूता इवे
ति आकाशाद्वायुप्राप्तिप्रकारमाह तेषुनरिति अन्याधिष्ठिते पूर्ववदभिलापादिति न्यायेनाह ते पृथ्वीमिति रेतःसिग्योगोपीति।
न्यायमाश्रित्याह तेषुनरिति [illegible] योनेः शरीरमिति न्यायमनुसृत्याह तत इति उत्पन्नानां केषांचिदिष्टा
दिकारित्वमाह लोकमिति कर्मानुष्ठानानन्तरं तत्फलभागित्वमाह तेनापुनरादिनेति सोमलोकफलभोगानन्तरं पुनरेतल्लोकप्राप्ति
माह पुनरिति पौनःपुन्येन विपरिवर्तनस्यावधिं सूचयन्नुत्तरमार्गायेति प्राकृतानामात्मसंसारणोपदेशे पिव्याख्यानमित्याह नेति
स्यान्नहृद्यमावृत्तिसहितमुक्त्वा स्थानान्तरं दर्शयत्यथेत्यादिना स्थानद्वयात्तृतीयस्थानविशेषं प्रश्नमप्रयत्नमेवमिति तृतीयस्थाने कोदो
षस्तत्रेति संवादयति तथा चेति अनुष्ठानगतेरतिकष्टत्वे परिशिष्टं वाक्यार्थमाचष्टे तस्मादिति सर्वो लसाद्दोवाक्याय चेतसाप्रयत्नः
षडूर्मयस्तानि मत्स्यपुनरक्षारोदुर्लभो भवतीति तत्र कस्यान्तरमनुक्तलयति तथा चेति अतोऽब्रह्मादिभावादित्यर्थः तस्मादित्या।
तिकष्टांसंसारादित्यर्थः इतिपणोत्तरमार्गप्राप्तिसाधनेय त्नसमाप्यमाशङ्क्याहा स्तायीति पंचप्रश्नान्वस्तन्यक्तिमिति एतेकेतेषांनिर्ण

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

येन कृत इत्याशंक्याह एवमिति निर्णीतप्रकारमेव संगृह्णाति समाविस्तारादिना ग्रंथस्येन निर्णीत इति संबंधः देवयानस्येत्यादिः पंचम
प्रश्नः सतद्वितीयत्वेन द्वित्तागादि मार्गोपनिषासाधनोक्त्या निर्णीत इत्यर्थः तेनैव मार्गद्वयप्राप्तिसाधनोपदेशेनैवेतियावत् श्रुत्वानाथ
जातो विप्रतिपत्तिः प्रथमप्रश्नस्तस्य निर्णयप्रकारमाह ग्रंथेतिति द्वितीयप्रश्नस्वरूपमनूद्य तस्य निर्णीतत्वप्रकारं प्रकटयति पुन
रावृत्तिस्येति आगच्छतीति निर्णीत इत्यन्वयः संबंधः तेनैव पुनरावृत्तेः सत्वेनेत्यर्थः अमुष्य लोकस्यासंपूर्त्तिर्द्वितीयः प्रश्नः सवद्वाभ्यां प्राग्नक्ता
भ्यां निवृत्तेरितो भवतीति भावः ब्राह्मणांतरमवतारयति तामित्याह स यइति नवेतिनिर्द्धारणे सप्तमी कथं तर्हि विमोपार्जने संभवतितद्या
ह नचेति तदर्थं वित्तसिद्ध्यर्थमिति यावत् नत्र महत्वमिद्ध्यर्थमिदं कर्मारंभणेन महत्प्राप्नुयामिति श्रुतेस्तत्त कथं मन्वथा प्रतिज्ञातेमि
तिशोकते महत्वेति परिहरति महत्वेचेति उक्तेर्थे फलसंदर्गाणि योजयति नदश्च मंथादिकं यो वित्तार्थी कामयेत तस्येदं कर्मेति शेषः
यस्यकस्यचिद्वित्तार्थिनस्तदिदं कर्मस्यादित्याशंक्याह कर्मण्यधिकृत इति नत्र वित्तार्थिनि उसीति यावत् उपसदोनामेष्टिविशेषाः ज्यो
तिष्टोमे प्रवर्ग्योदर्ध्वस्थितिशेषं किं पुनस्तासु व्रतमिति तदाह नचेति यदुपसत्सुस्तनोपचयापचयाभ्यां पयोभक्षणं यजमानस्य प्रसिद्धं
तदेतदुपसद्व्रतमित्यर्थः अक्तत्यमिति तेनोपचयापचयाभ्यां पयोभक्षणस्यादि निवेदयत्याह ग्रंथेति मंथाख्यकर्मणश्चेत्यर्थः तत्कर्मेत्य
पसद्रूपकर्मातिः केवलमित्यस्यैवार्थमाहेतिकर्तव्यतानाशत्वमिति समासांतरमाश्रित्य शंकते नत्विति कर्मधारयरूपसमासस्वाकांत
दित्यत्के संबंधोत्वमकर्मणः स्यात् तत्वादर्थ फलस्कानामुपसदाद्युपसंग्रहाभावान्नकर्मधारयः सिद्धांतीतत्परमाहोक्तमतेति मंथ्यकर्म

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ० ३०
२२०

णः स्वार्थत्वमाविपति नत्विति परिसमूहनपरिलेपनाद्युपसमाधानादेः स्वार्थत्वं साक्षोक्ष्यमाणत्वादियं फलितः स्वत्वनुवादितिनीधुक्तावथा
वैतत्कर्मभवत्वे स्वार्थमिति परिहरति स्वत्वेति नत्वत्र तेन स्वत्वनुवादित्वे वैपरीत्यादतो भवतीदं श्रौतमित्याशंक्याह श्रौतत्वेदीति यदीदं
कर्मश्रौतं तदा श्रौतविधेयमेनास्य प्रकृतिविकृतिभावं स्यात् अग्न्याधेयसंयुक्ता प्रकृतिः विकल्पेनाग्निसंयुक्ता च विकृतिः प्रकृतिविकृतिभावे च
विकृतकर्मणः प्राकृतधर्मग्राहित्वादुपसदेवव्रतमिति विशेष्य सर्वमिति कर्तव्यतानर्पेक्षां गृहीतेन चायं श्रौतत्वमस्मिन्परिलेपनादि
वेधात्र च हवं भावित्याक्षते कृतत्वभाविस्वत्वनुवादित्वात्सिद्धिरस्यास्वेकालत्वविधेयत्वाद्युपनमादिति भावः पृथक्कर्मणः स्वार्थत्वेतिरा
माह तत एवेति नत्वेवदेवत्वं तस्मादह सर्वं चेति पृथग्गतेनेतिकर्तव्यतानाग्राच्चरित्वाच्चाते उपसदेवव्रतमिति विग्रहात्संभवादुपसत्त्वव्रतमित्यु
स्यादुक्तेमिदमित्युपसंहरन्नेमितिशङ्कः पक्षोऽन्यत्रीसत्वस्यमाणेनक्रमेणात्रद्रोतीतिसंबंधः तात्पर्यमोऽदुवरमितिशंकां वारयति चूत्वमयरति
तस्यैवेति प्रकृतपात्रपरामर्शोऽह्नदेवरत्वेपि विकल्पमाशंक्याह्याकार इति अत्रेति पात्रनिर्देशः असंभवादशक्यत्वाच्च सर्वौषधिसमाहृत्वे
ति सूत्रुक्तमित्याशंक्याह यथासंभवमिति सर्वौषधिश्रुतिनियमं दर्शयति नवेति परिसंख्यां वारयति अपिकेति रतिसंभत्याचेतिप्राहस्यपर
र्थे नार्थत्वे फलितेवाक्यार्थं कथयन्नाह यथेति श्रोषध्याहीनो संभरणाने तत्वं परिसमूहनादिकर्मे किं प्रमाणमित्याशंक्याह क्रमइतित
चेति परिसमूहनाद्युक्तिः होमाधारत्वेनत्रेताग्निपरिग्रहं वारयन्त्यग्निमिति प्रावसथ्योऽग्नौ होमइतिशेषः कथमेतावता त्रेताग्निपरिग्रा
गत्वत्राहैकवचनादिति कथमुपसमाधानश्रवणेनेताग्निनिवारकं तत्राह विद्यमानस्येति आहवनीयादेस्त्वाधेयत्वात्प्राग्गेवसत्वा।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तिति भावः मन्त्रे स्वस्याग्रेस्त्वेति शेषः आचापस्थानमाह्वतिविशेषप्रदेशः भोजातवेदस्त्वं योनाम्नायावंतो देवा वक्रमनघः संतो मम्मा।
र्थो नमामि बध्नंतितेभ्यो रमा त्वभागं त्वं ययैव धामिते वनेनरमाधूत्वा सर्वैरपि ग्रहणाथ्यै मां नर्थयेत्वहं चत्वदधीनोऽस्मि तस्मात्तद्यमंत्रस्यार्थः
जातं जातं वेत्तीति वा जाते जाते विद्यत इति वा जातवेदाः यादेवतानाकुटिलमतिर्भूत्वा सर्वं स्वैवाहमेव धारयामीति च मत्वा त्वां मामाश्रित्य व
र्तते तां सर्वं साधनीं देवतामहं हुतस्य धारयामि जेस्मादेतिपूर्वं वदेवहितीयमंत्रार्थः जो ब्राह्मणादिमेवेषु धनितमर्थ्यमाहैतस्मादेवेति
हृदेयाद्धृतीद्धृत्वेत्य केनत्रमर्वं रहितत्वप्रसंगं प्रस्माचक्षे रेतस्तस्मात्स भोति संस्थावत्सचावलिममाज्यमेथ्यश्च स्वप्राणांद्देवताकल्पयाम्यो
नैकीकृत्य सर्वात्मकत्वेनतथाच सर्वदेहेषु प्राणरूपेण त्वं भ्रमसि प्राणस्य बलनात्मकत्वान्न रूपत्वाच्चानतनाग्निरूपेण च त्वं स्वलद्भिप्रकाशा।
त्मकत्वात्प्रियस्तरूपत्वाच्च तत्र वक्त्रस्य रूपेण त्वं सर्गं मसि न भोः रूपेणापस्तत्वं निष्पमसि ... सर्वं रविविरोधित्वात्सर्वं सृष्टिजगत्तेकमभवत्ता
मनेत्तमभोग्यापरिष्क्रिमनतयास्थितेन वस्तत्वमसिप्रेत्ताद्यघन्तावेभत्वमेव दिक्कृतमसि नैनवघतमध्ये हृदिक्रिश्रमाणं चासि रुद्राश्वचयस्ताद
भेनममध्येवोढ्ढीयश्रुद्धीयमानेवासि रूपधर्गुणात्वं प्राविनमसि प्राग्नी प्रेणा च प्रस्ता स्वाविनमसि आदेमहोदरेममप्यदोममसि विविधं भव
नीतिविभुः प्रभुः समर्थो भोगरूपेण सोमात्मना स्थितत्वात् त्वं भोक्तृरूपेण आत्मना ज्योतिः कारणत्वाद्विधनेत्वेघो ज्ञात्मादिदैवयोवो।
गाहीनाममाटीनां च सहस्रणात्वं सेवगोसीत्यभिमर्शनमंत्रस्यार्थः आमंसित्वं सर्वं विजानासि वयं च तेतवमहिम हतरे रूपमामेहिम।
त्वामहे महिमाणां पजातिरणाः सचमांतयाभूतेकरोतिस्वयमनमंत्रस्यार्थः सवितुस्तद्वरेण्यं वरणीयं श्रेष्ठं देवस्य धीमहीति संबंधः वा।

ज्ये ४१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बृ॰टी॰
२२८

तावायुप्रभेदा मधुत्वं व्रतमायते व्रतमायंते वदंति सिंधवो नद्यो मधु क्षरंति मधुरसास्रवंति ओषधीश्चास्माकमपि माध्वीर्मधुरसाः संत
देवस्य सवितुर्भर्गस्तेजो व्रतेवा शस्तं नपदं चिंतयामः नक्तं रात्रिरुषसो दिवसाश्च मधु प्रीतिकराः संतु पार्थिवं रजो मधुमत्तद्वेगाकरमस्तु द्यौश्च
नः पिता नोऽस्माकं मधु स्वात्मकरोऽस्तु यः सविता नोऽस्माकं धियो बुद्धीः प्रचोदयात् प्रेरयेत्तस्य तद्वरेण्यमिति संबंधः वनस्पतिः सोमोऽस्मा
कं मधुमानस्तु गावो रश्मयो दिशो वा माध्वीः स्वात्मकराः संतु ग्रंथशास्त्रादिति शास्त्राद्योपरिहार्ये स्वत्वेषेणः एवं ग्रामचतुष्टयेनिषु नेमस्तु
वशिष्टेऽदृष्टे किं कुर्यादित्याह यथेति पंचबलिमसुपरित्यागं वारयति यदिति निर्णिज्य प्रक्षाल्य तिलपात्रं पाणिप्रक्षालनं वचनमामध्या
तः सेतुं स्थैर्ये स्थानमाचमनमस्तु नानाल्पद्याचमेति एकः पुंडरीकपत्रेऽत्वेऽङ्गुष्ठेऽवाचीनमेते नानुरात्रेणादेरर्थमाह विद्येति शिष्यः
श्रोत्रियो मेधावी धनदायी प्रियपुत्रो विद्यया विद्यादानेतिषट्तीर्थानि संप्रदानानि ॥ ब्राह्मणं ॥ प्राणोपासकस्य विज्ञानार्थिनो मध्या
त्मकर्मोक्ता ब्राह्मणेनानंतरमुत्थापयति याहृविति उक्तगुणः सकर्मस्यादित्यपेक्षायामिति शेषः तदृष्टोपयोक्तपूर्वाविषयः यदस्मि
न्ब्राह्मणे पूर्वमध्यायोक्तं कर्म वक्ष्यते तदुपनिषद्विषयमित्याशंक्याह प्राणेति पूर्वमेव स्यकालनियमाभावमाशंक्याह य
देति किमयमगमकमित्याशंक्याचेतनत्वान्नित्याह इत्येतदिति इयमिति पृथिव्याः सर्वभूतसारत्वे मधुब्राह्मणं प्रमाणयति सर्वभूतानामिति तत्रैता
नीब्राह्मणप्रमाणमित्याशंक्य स्मृतीति अपां पृथिव्याश्च रसत्वे कारणत्वात्तद्गुणमोषधादीनां कथमित्याशंक्याह कार्यत्वादिति रेतो
रत्नेनेति सत्त्वात्मरेतस्तत्तेजः पात्रप्रयोगात्मपुरुषसारत्वमैत्रेयके विवहितमित्याह सर्वेभ्य इति श्लोकमन्त्रयंतेनेत्र सरंतीति येषा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वृषयुक्ताः पशुकर्मणि स्वारस्येन प्राणिपात्रस्य प्रहेन्ने व्यर्थो विधिरित्याशंक्याह वेति प्रवाजेककर्मसमस्यार्थः शुक्लो वृषणो योनि पार्श्वयोः
कृष्णो नीलो मांसरक्तैश्चैन व्याधिषु वर्णेषु हित सोमफलकं दृष्टिः यच्चानंदं च मे सोम कं इन्नार्थे नहृष्टी रहस्य देशस्य कर्मणि कर्त्तव्ये त्याह नाविति
उपास्तिप्रकारस्तुक्त्वा फलोक्तेः तात्पर्यमाह वाजपेयेति स्तूयते मैथुनाख्ये कर्मे तिशेषः स्तुतिफलमाह नस्मादिति इतिशब्दः स्तुतिफल
दर्शनार्थः उपास्तेरधिकं फलमाह य एवमिति प्रविद्वाशोदुर्गापारवनिरतस्य प्रत्यवायं दर्शयत्येति प्रविद्वाममतिकार्हितमिदं कर्म
स्यत्राचार्यपरंपरासंमतिमाह एतद्धेति पशुकर्मणा वाजपेयसंपन्नत्वमिदं शाह्वार्थः प्रविद्वामवाच्यकर्मणा प्रद्युम्नानो द्राशित्वयप
संदर्शमितिशब्दः विद्वषो लाभमविद्वषस्तु दोषं दर्शयित्वा क्रियाकालात्प्रागेव रेतःस्खलने प्रायश्चित्तं दर्शयति यमित्यामितिपः प्रती
तं तेन तस्य रेतो यदि स्कंदतीति योजनाग्रसमाप्रातकाले यदि रेतः पृथिवीमनुस्कंतसौ तरागातिरेके एगस्कन्नमासीत ओषधीः प्रतिचयद स्मर
दगमत पञ्चार्थः स्वयोनिप्रतिगतमभूत्तदिदं रेतः संप्रत्याददे हमित्याददानमन्त्रार्थः केनाभिप्रायेणतदादानं तदाह पुनरिति तत्पुनरेतो
रूपेण वहिर्निर्गतं तस्मिन्निंद्रियं मां प्रत्येतु समागच्छतु तेजस्तु गतां कांतिः भगः सौभाग्यं पुनर्मामेवागच्छत्विसर्वं रेतो निर्गमनात् तदा सनाबहिर्निर्गं
तं वस्थाप्य त्यागाच्छतु अग्निर्धिष्ण्या यथास्थानं येषां ते देवास्तद्रेतो यथास्थानं कल्पयंत्विति मार्जनमंत्रार्थः अथो नो रेतः स्खलने प्रायश्चित्तमस्तु करे
णेत्येतानु दकेरेतः सिचः क्वाचा दर्शने प्रायश्चित्तं दर्शयत्यथेत्यादिना तिमितान्तरे प्रायश्चित्तं मातरमदर्शन प्रकसार्थो यशब्दः मयि तेजः
प्रभृति देवाः कल्पयंत्वित्यमंत्रयोजना प्रकृते नरेतः सिचायस्या उपजनयितव्यसा भिसिंचतौ श्रीरित्यादिना कथं सायश्विनीति

प्रा०वे० २२९

तस्याः स्त्रीत्वमित्यत्राह ... ति रजस्वलाभिगमनादि शक्तिविरुद्धमित्याशंक्य विशिनष्टि विरात्रेति तापयेदात्मीयं मे मातिरेकमिति शे
षः बलादेव वशीकृत्य भार्यायाः पशुकर्माद्यं कथं गुणपराक्षेदित्याकांक्षायामाह प्राप्स्यामीति भर्त्रा भार्यावशीकरणप्रकारस्त्वक्त्वा उह बद्दे वि
ष्णोस्तस्यास्तद्विषये प्रीतिसंपादनप्रक्रियोपदर्शयति सयामित्यादिना हेरेतस्त्वं मदीयात्सर्वस्मादंगात्संभवत्यद्य विशेषतस्तु हृदयात्संभ्र
मद्वारेण जायसे सत्वमंगानोकषाघोरसः मत्र विषबलिप्रशरविङ्गसुमीमिवायं मदीयांस्त्रियंमेमादयमहृदयांक विंत्यर्थः तस्याः स्ववि
षये प्रीतिमापाद्यावाच्यकर्मानुष्ठानदशायामभिप्रायविशेषानुसारेणानुष्ठानविशेषं दर्शयत्यपेत्यादिना तत्र तत्रापि पशाहूस्तद्रूपक
मार्थे नेतव्यः पशुकर्मकाले प्रथमं स्वकीयपुंस्त्वद्वारा नदीयस्त्रीत्वे वामुंविसृज्य तेनैव द्वारेण ननु स्त्रादाना नाभिमानं कुर्यादित्याहाभिप्रा
येति भर्तेरेवाभिप्रायो न तदनुसारेण विधिमाहाप्ययामित्यादिना स्वकीयपंचमेंद्रियेण तदीयपंचमेंद्रियाद्रेतः स्वीकृत्य तस्य शोत्यति
समर्थं कृतमिति मत्वा स्वकीयरेतसा सह तस्मिन्निहितेपत्र हिदमपानेन प्राणेन च तत्सर्वंकं रेतः सेचनं ... तिप्रासंगिकमोभिचारिके क
र्मकथयतस्यप्युक्तारिति हेयवतानुष्ठितमिदं कर्मफलवदिति वक्तुं द्विषादित्यधिकारिविशेषणं श्रामविशेषणं पाठस्य प्रकृतकर्मयोग्यत्व
ख्यापनार्थं अग्निमित्येकवचनं तु यसमाधानवचनाह्रावसथ्याग्निरत्र विवक्षितः सर्वंपरिस्तरणादि तस्य प्रतिलोमत्वे कर्मणः प्रतिलोम
त्वे हेतुकृतं वं मम स्वधृते योषा मे यो वनादिना समिद्धेरेतो हूतवानमि तत्वपराधिनस्तव प्राणापानावाददेफडिति त्वा होमो निवर्तते २२९
तस्याः तदैतेवासाविन्मात्मनः सह्योवै नाम गृह्यादाम इष्ट्वा तं कर्मेत्वकृतेस्मात्मं सुशोशाप्राघेनावावाचायस्यतिज्ञात्वं कर्मणानोपपादितेत

कं

स्यप्रतीत्तापराकाशायघोरकर्महिंसायाः पापहेतुत्वस्य फलेरर्थ्यायति स्यादिति एवं विहितत्वेप्यथकर्महिंसायाः प्राणवियोगावत्वेन तस्मादेवं विदे
न्यदैवं वित्वेपरदारगमने घृष्टोकर्मदोषत्वात्तत्वेनत्क्षेपात्तेरेवत्परमादैवंविदपीति आभिचारिकंकर्म श्येनागागनत्रुत्क्राष्टवोक्त इति
कालेनामघस्यघेति श्रीदेवापकाशमीलामित्येनरयेत्तयाप्रूर्वत्वेपावक्रमादर्थक्रमस्यबलवत्वेदेनमाह सामर्थ्यादिति ग्रंथवशा
दितियावत् किंभूतंरवंशान्नत्विष्णुत्रैलंदुलेरनुष्ठेयेनेत्याह सयइति बलदेवसादृश्यपवाशुद्रत्वेवाशुक्रत्वेस्वाभाविकमोदनेपाचयतिचेन्नकि
मर्थंश्रुतइहणोनह्यतिरेकेणौदनपाकासंभवादित्याशंक्याहोदयइत्याणामिति तीराट्टेरितिपोषः वेदविषयमेवतन्त्यादित्यकिंनस्यादतआह
वेदइति समिनिर्विदत्सभानोनाक्तीतिविहानेवोच्यतामितिचेन्नेत्याह पारिप्लवेति सर्वशाखावेदचतुष्टयविषयः अतएवस्मादित्वनीया
मदार्थेदैशावविशेषापेक्षयाकालविशेषापेक्षयावासांनियमः अयथाहस्तुत्यैवंवाकेशुघृषाहचिविकल्पार्थः कदाधुनरितिमोदनपाका
दिकर्मणेनदादायेति कोसौस्थालीपाकविधिकथंवातत्रहोमः तत्राह गार्ह्यइति गृहेघसिद्धोगार्ह्यः स्त्रेतिधुचमेधुकर्मोक्तिः अतोमद्रा
योनः सकाशाद्देविश्यावसोगंधर्वत्वप्रतिष्ठान्यांचजायांप्रघ्रुर्भतरुणीपन्त्यासहसंक्रीडमानानामित्यादेवतः स्वामिमांजायांसमुपैमीति
मेवार्थः अभिपतिरालिंगनेकदाहरोदनादिभोजनेनेत्याह तीरेति भुक्त्वाभिपद्यतइति संबंधः गृहपतिरमः प्राणोस्मित्वेसावागसिक
येनवप्राणत्वममवाचस्त्वमित्याशीकावाचः प्राणाधीनत्वंवतवमदधानत्वादित्यभिप्रेत्यसात्वमित्यादिपुनर्वचने अगाधारेहिसामगी
यतेऋक्चसिवमदाधारत्वेनचतथासमसामत्वमृक्त्वंचतवद्यौरहंपितृत्वात्पृथिवीत्वंमातृत्वात्तयोर्मातापितृत्वसिद्धेरित्यर्थः तावावेहि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रेभावहे संरंभमुद्यमं करवावहै हि त्वमागच्छ कोसौ संरंभस्तमाह सरेति पुंस्त्वयुक्तपुत्रलाभाय रेतोधारणं कर्तव्यमित्यर्थः उर्वोः संबाध
ने द्यावापृथिवी इति विजिहीतो वि शलिहे भवतां पुत्रवामित्यर्थः विष्णुर्व्यापनशीलो भगवान् भवत्या योनिं कल्पयतु उत्पत्तिसमर्थां क
रोतु त्वष्टा सविता त्वष्टा रूपाणि पिंशतु विभागेन दर्शनयोग्यानि करोतु प्रजापतिर्विराड्रूपामदात्मना स्थित्वा त्वयि रेतः समासिंचतु प्रति
पत्तुधरणं पुत्रः सूत्रात्मा त्वदीयं गर्भं त्वदात्मना [illegible] स्थित्वा धारयतु पुत्रसात् सिनीवाली दृष्टार्द्दृष्टचन्द्रकला त्वदात्मना वर्भं तेन सा च पृथुष्टु
का विस्तीर्णस्तुतिर्भो सिनीवाली पृथुष्टुके गर्भं सिमं धेहि धारय धस्विनौ च देवौ सूर्याचंद्रमसौ स्वकीयरश्मिमालिनौ तव गर्भं मदात्मना स्थित्वा
समाधत्तां ज्योतिर्मयं पावरणी प्राणापानौ तयोः स्वभावे गर्भमस्विनौ निर्मथितवंतौ तथाभूतं गर्भं ते जठरे दधावहे दशमे मासि प्रसवार्थं माधीयमा
नं गर्भं हृष्टं तेन दर्शयति यथेति ईदृक्स्वर्णैरतियावन अग्निसाविति पत्वादीनि द्वैशः तस्यानामशङ्खानीति पूर्वेण संबंधः समिंधति स्वरूपोपपादन
मकुर्वन्नेव चालयतीत्येव तत्पदार्थे एवमेव तव स्वरूपोपघानमकुर्वन्नेजतु गर्भं सलतजरायुणा गर्भवेष्टेन मासान्दशेन सह त्रावेत निर्गच्छतु इदस्य
प्राणस्यायं व्रजो मार्गः सर्गकाले गर्भाधानकाले वा कृत स्यार्गलाइत्यस्य व्याख्यासपरिस्त्यइति परिवेष्टनेन जरायुणा सहित इत्यर्थः तेसार्गं प्राप्य
त्वमिंद्र गर्भेण सह निर्जहि निर्गच्छ गर्भनिःसरणानंतरं या मांसपेसी निर्गच्छति सा वरातां च निर्गमयेत्यर्थः छूतमिन्द्रं दधि पृषदाज्यमित्युच्यते उ
पस्तानमित्यभीष्टे पीनः पुलंपविवहितेः पृषदाज्यस्यानस्य मस्य मादाघ पुनः पुनर्जुहोतीत्यर्थः अस्मिन्स्वे गृहे पुत्ररूपेण वर्द्धमानो मनुष्याणां स
हस्रं पुष्याससमने कमनुष्यापोषकोभूयासमस्य सन्तपुत्रस्यापसंघ्रांसतं तौ प्रजयापशुभिश्च समहं श्रीमां विशिष्टेनाभूयादित्यादाशास्मित्रिति मयिपित

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निरोधप्राणाः संनितानुद्रेत्वयि मनसा समर्पयामीत्याह मयीति ग्रुत्यरीतिश्च मितिग्रुतिरिक्तं कृतवान स्मिइह कर्मण्येक रमकरवं तत्सर्वं विहा
तग्निरिद्विष्टं करोतीति स्विष्टकृद् दूत्वा स्विष्टमनधिकं सद्दनमस्ते वाऽस्माकं करोत्वित्यर्थः ग्रुस्यजातस्य प्रियोरित्यर्थः ब्रवीत्वद्गत्रा वाकृत्वा
प्रविशत्वितिजपतोऽभिप्रायः एतैर्मे ब्रैभूस्तेदधामीत्यादिभितितिशेषः वेदनामाख्यवहारो लोके नास्तीत्याशंक्याह तदस्येति यत्तद्देदश्ति
नाम तदस्य गृह्यं भवति वेदं नवेदोऽनुभवः सर्वस्मिन्निजे स्वरूपमित्यर्थः देमरस्वतियस्तेस्तनः मणायः शयः फलं तेन सद्दवर्गमानोयस्त्वसर्वग्राणि
नोऽस्थितिरिदे त्वद्भावेन जातोऽयस्त्वर ब्रधाग्रुब्रस्य पयसो वा धाताय सुवस्तकर्मफलं तदिदं ततीति वसुविद्येस दुष्टदत्तानि तिसदर्शो येन त्वस्ते नेन
विश्वानि वार्याणि चरणीयानि देवादीनि भूतानि त्वं पुष्यसि तेन त्वं नमदीयपुत्रस्य धात्रे वेपानायमदीयभार्यास्तने प्रविष्टं कुर्वित्यर्थः इला
स्तुत्याभोगयाऽसिमित्रावरुणाभ्यां संभूतो मैत्रावरुणो वसिष्ठस्य भार्या मैत्रावरुणी सा चाहं धतीन हद्वत्वे तिष्ठसीति भार्यां संबोधयति मैत्राव
रुणीति वारे पुरुषेभ्यप्रियिनिमित्तभूते भवतीवीरं पुत्रमजीजनत सात्वं वीरवती जीवद् दुत्राभवया भवती वीरवतः पुत्रं संपन्नान स्मानकर
त्कृतवतीति मंत्रार्थः पितरमतीत्य वर्तत इत्यतिपिता ग्रहोमहानेघविस्पष्टायत्विरं पितामहं च सर्वमेवं शामतीत्य सर्वस्मादधिकस्त्वंजा
तोऽसीत्यर्थः न केवलं पुत्रमेवेद्येस्तति रपि तद्यशोऽरूपुत्रं संपन्नस्य पिनरपीत्याह यस्येति ॥ सोऽनिधानवित्वलकांडस्य वंशावमिति प्रकाने
वनेयन वंशवाद्भाद्मणानां त्वयं महार्थं इति विद्याभेदादत्वीतस्य कांड्दयस्य प्रत्येकं वंशभावे पिनास्यपर्श्वकृत्स्नानं विलत्वे नत्वोपत्वाद
याद्वसमा मायी परिति तो वंशः समस्तस्यैव प्रवचनस्य भविष्यतीत्यर्थः एवं वंशो पुत्रकष वंशो षितो तरती यस्त्वस्तो विशेषितः तत्र किंकारणमित्याशं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बृ॰ भा॰ टी॰
२३१

चार्य आह स्त्रीप्राधान्यादिति तदेव स्फुटयति गुणवानिति कीर्त्यते ब्राह्मणेनेति संबंधः शुक्लानि यजूंषीत्यस्य व्याख्यानमव्यामिश्राणीति दोषैर
संकीर्णानि पौरुषेयत्वदोषद्वाराभावादित्यर्थः प्रयातयामान्यदुष्टान्यगतार्थानीत्यर्थः पाठक्रमेणानुष्ठानादिः प्रजापतिपर्यंतो वंशो व्या
ख्यातः संप्रत्यर्थक्रममाश्रित्याह प्रजापतिमिति अथो शुक्लत्वे पाठक्रमादेवेदं वोच्यते तत्रापि प्रजापतिमारभ्य सांजीवीपुत्रपर्यंतो वाजसने
यशाखोत्तमर्षीणामेक एव वंश इत्याह समानमिति प्रवचनाख्यस्य वंशस्यात्मनो ब्रह्मणः संबंधात्प्रजापतिर्विद्यालब्धवानित्याह ब्रह्मण इति
तस्याधिकारिभेदादवांतरभेदं दर्शयति तच्चेति प्रजापतिप्रभृतेः प्रबंधः प्रपंचः सैव परंपरा तयेति यावत् तस्य परमात्मरूपस्य वेद्यभूतत्वमपि
दधात्यनादीति तस्यापौरुषेयत्वेनासंभावितदोषतया प्रामाण्यमभिप्रेत्य विशिनष्टि नित्यमिति आदिमध्यांतेषु कृतमंगलाश्रयणाः प्र
चारिणो भवंतीति मन्वानः सन्नाह तस्मै नम इति ॥ नमो जन्मादिसंबंधबंधविध्वंसहेतवे इच्छयैव परमानंदपरिज्ञानवपुर्भृते १ नमस्त्व
प्यतसंदोहसरसीरुहभानवे गुरवे परपत्नौघध्वांतध्वंसपटीयसे २ ॥ ❀ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धा
नंदपूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यश्रीमदानंदज्ञानभगवतः कृतौ बृहदारण्यकभाष्यटीकायामष्टमोऽध्यायः समाप्तः ८ ॥

का

विक्रमादित्यसंवत् १८३५ कार्तिककृष्णाष्टम्यां मंगलवासरान्वितायां काश्यां मणिकर्णिकातीरे इयं बृहदारण्यभाष्यटीका काश्मी
रदेशोद्भवराजानहीरामत्तिना [illegible] चित्रिता ॥ शुभमस्तु लेखकपाठकयोः ॥ राम ॥

२३१



CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

46

162



CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative